डॉ॰ प्रियतमचन्द्र शास्त्री

विक्रमाङ्कदेवचरितस्य साहित्यिकं सर्वेक्षणम्

विक्रमाङ्कदेवचरितस्य
साहित्यिकं सर्वेक्षणम्

166

Price 30-00
मूल्यम् ३०-००

श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमालायाः प्रथमं पुष्पम्

विक्रमाङ्कदेवचरितस्य साहित्यिकं सर्वेक्षणम्

वाराणसेयसंस्कृतविश्वविद्यालयीय-
विद्यावारिध्युपाधये स्वीकृतः शोधप्रबन्धः

डॉ० प्रियतमचन्द्रशास्त्री
साहित्याचार्यः, विद्यावारिधिः (Ph. D.)

श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम्
(राष्ट्रियसंस्कृतसंस्थानसंस्थापितम्)
जम्बू

© प्रकाशकः **डॉ० दयानन्दो भार्गवः**
श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम्
जम्बू

प्रथमं संस्करणम्, १९७३

शान्तिलाल जैन, जैनेन्द्र प्रेस, बंगलो रोड, जवाहर नगर,
दिल्ली-७ द्वारा मुद्रित ।

आशीर्वचनम्

श्रीप्रियतमचन्द्रशास्त्री मन्निर्देशकत्वे 'विक्रमाङ्कदेवचरितस्य साहित्यिकं सर्वेक्षणम्' इति विषयमवलम्ब्य यथानिर्दिष्टकालं विद्यावारिध्युपाधये शोभनं शोधप्रबन्धं सुपरिश्रम्य नैकविधांश्च ग्रन्थान् समीक्ष्य प्रस्तौति। अस्मै प्रबन्धे सर्वविधं श्रेयः कामये।

पट्टाभिरामशास्त्री

दिनाङ्कः १५-१०-७१ ई०

साहित्यविभागाध्यक्षः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी।

गुरुवन्दना

साक्षाद्भगवतीं वन्दे जननीञ्जनकन्तथा ।
काकारामेति नामानं खैरिग्रामनिवासिनम् ॥

वैद्यराजेति विख्यातं शिष्याज्ञानगदापहम् ।
द्वारिकानाथनामानं वन्देऽहं प्रथमङ्गुरुम् ॥

शास्त्रव्याख्यारतास्सर्वे सूरिचक्रे सुविक्रमाः ।
गुरवो भिन्ननामानो नम्यन्ते सुविशारदाः ॥

विद्यामूलाय शूलाय वादिनामुदरस्य हि ।
काकारामाभिधानाय साक्षाज्ज्ञानाय मे नमः ॥

प्रातःस्मरणयोग्याय विद्यारोग्याय मे नमः ।
श्रीगुरवेऽभिरामाय पट्टपूर्वाय शास्त्रिणे ॥

वेधसे काव्यनिर्माणे विष्णवे शिष्यपालने ।
प्रतिवादिविनाशे तु शम्भवे गुरवे नमः ॥

यत्पादमूलमध्युष्य विद्यागङ्गापयांस्यहम् ।
पीत्वा नीत्वार्जयन् कीर्तिन्तस्मै श्रीगुरवे नमः ॥

कृतज्ञताभिव्यक्तिः

विक्रमाङ्कदेवचरितस्य साहित्यिकं सर्वेक्षणमिति शीर्षकव्यपदिष्टस्य शोधप्रबन्धस्य लेखने येषां ग्रन्थानां पत्रपत्रिकाणाञ्च मया साहाय्यमधिगतं तेषां लेखकानां नामानि सहायकग्रन्थसन्दर्भे उपात्तानि । अहं पूर्णतया तान् प्रति कृतज्ञोऽस्मि । कश्चिन्महानुभावश्चेदवशिष्टो भवेत् तं प्रत्यपि पूर्णकृतज्ञतां निवेदयामि । डा० व्युह्लर-श्रीमुरारिलालनागर-श्रीविश्वनाथशास्त्रिभारद्वाज-डा० चण्डिकाप्रसादशुक्लमहोदयानां विशेषतः प्रशस्यो योगोऽस्य प्रबन्धस्य लेखने वर्तते यतो हि एषां महानुभावानां कृतिभ्यः सर्वाधिकं साहाय्यं मयाऽधिगतम् ।

परं श्रद्धास्पदानामृषिकल्पानां सूरिचक्रचक्रवर्तिनां वाराणसेयसंस्कृतविश्वविद्यालये साहित्यविभागाध्यक्षपदभाजां विद्यासागर-शास्त्ररत्नाकरविद्यावाचस्पति-मीमांसारत्नाद्यनेकोपाधिविभूषितानां प्रातःस्मरणीयानां गुरुवर्याणां पण्डितप्रवराणां श्रीमतां पट्टाभिरामशास्त्रिमहाभागानामतिशयेन ऋणी अस्मि । एषां हि चरणरजसां प्रतापेनानुभवपूर्णेन मार्गनिर्देशनेन च मदीयाऽत्र प्रबन्धे सम्यग्गतिरभूत् । वाराणसेयसंस्कृतविश्वविद्यालयीयानुसन्धानसञ्चालकानामनुसन्धानविशेषज्ञानां डा० श्रीभगीरथप्रसादत्रिपाठि-'वागीशशास्त्रि'-महाभागानां तथा साहित्यविभागे प्रवाचकपदभाजां साहित्यात्मनां गुरुवर्याणां श्रीमतां बटुकनाथशास्त्रि-खिस्ते-महोदयानाञ्च समये समये मार्गदर्शनार्थमतिशयेन कृतज्ञोऽस्मि ।

भारतशासनस्य शिक्षामन्त्रालयाधिकारिभ्यः सविनयमनेकशो धन्यवादा विज्ञाप्यन्ते, येषामकम्पानुकम्पया पारम्परिकसंस्कृतपाठशालानां परिणतियोजनयाऽनुसन्धानच्छात्रवृत्तिं प्राप्य भृशमुपकृतोऽहम् ।

प्रकाशनसम्बध्युत्कर्षाधानात्मकैः संशोधनैरहमुपकृतः श्रीमद्भिः जगदीशलालशास्त्रिमहाभागैः, तेषामस्य अविस्मरणीयसाहाय्यस्य कृते कृतज्ञोऽस्मि ।

अन्ते च राष्ट्रियसंस्थानान्तस्संस्थापितस्य श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्याधिकारिभ्यो हृदयेन कृतज्ञतां निवेदयामि, यैर्ममायं शोधप्रबन्धः स्वकीयग्रन्थमालायां प्रथमपुष्पत्वेनाङ्गीकृतः ।

लेखकः

भूमिका

संस्कृतकाव्यवाङ्मये श्रेष्ठेषु काव्येषु विक्रमाङ्कदेवचरितमपि गण्यते। यः कोऽपि सुरभारतीप्रियोऽस्यैकमपि पद्यमधीते, असावेवाऽस्य विलक्षणकाव्यस्यापरिमेयमवर्ण्यञ्चानन्दमनुभवति। रघुवंशकुमारसम्भवयोरिव अस्मिन्नपि सहृदयाकर्षणक्षमाः सर्वे गुणाः विद्यन्ते, परमस्य न तथा बहुजनप्रचारः यथा तयोर्वर्तते। रघुवंशकुमारसम्भवयोः पश्चादतिचिरादेकादशशताब्द्या उत्तरार्वेऽस्य रचना, ततोऽपि पश्चात् १८७५ खीष्टाब्दपर्यन्तं पाण्डुलिपिस्वरूपस्यास्याज्ञातरूपेण पुस्तकालये एव स्थितिश्चेति तत्र हेतुद्वयं परिलक्ष्यते। संस्कृतकाव्येषु रामादिवद्दिव्या नलादिवदर्धदिव्याश्चैव नायका आधिक्येन दृक्पथमवतरन्ति। परमस्मिंस्तात्कालिको नृप एव नायकोऽस्ति इत्यपि तत्र तृतीयो हेतुर्भवितुमर्हति। काव्यलक्षणदृष्ट्या शैलीदृष्ट्या भाषादृष्ट्या चेदं पूर्णतयाऽत्युत्तमकाव्यकोटिमलङ्कुरुते। यद्यपि अस्य प्रत्येकं पद्यं पूर्णमाकर्षणक्षममस्ति तर्ह्यपि अस्य बहुजनप्रचाराभावोऽत्यन्तं खेदविषय इति कृत्वा वाराणसेयसंस्कृतविश्वविद्यालयस्य तदानीन्तनोपकुलपतिभिः डा० श्रीगौरीनाथशास्त्रिभिर्विक्रमाङ्कदेवचरिते गवेषणात्मकं कार्यं कर्तुं प्रेरितोऽहं तत्रादावेव वर्तमानेन—

उल्लेखलीलाघटनापटूनां सचेतसां वैकटिकोपमानाम्।
विचारशाणोपलपट्टिकासु मत्सूक्तिरत्नान्यतिथीभवन्तु॥

इति पद्येन आहूत इवाऽत्रानुसन्धातुं सम्यक् प्रवृत्तोऽभवम्।

प्रबन्धेऽस्मिन् काव्यकथानकेन कविपरिचयेन च सहैव रसध्वनिगुणदोषालङ्कारदृष्ट्या विवेचनं कृतमस्ति। 'दोषे प्रयत्नः सुमहान्खलानाम्', महाकवेरिमामुक्तिं समादृत्य दोषदर्शने विशेषायासं परिहरता समासत एव तत्र विचारः कृतोऽस्ति। ऐतिहासिकमिदं काव्यमिति कृत्वा ऐतिहासिकदृष्ट्या विवेचनं कृतम्, ऐतिहासिके काव्ये भौगोलिकं ज्ञानमपि सापेक्षं भवतीति कृत्वा कविनिर्दिष्टभौगोलिकस्थानानां परिचयप्रदानप्रयासोऽपि कृतोऽस्ति। प्रकृतिचित्रणमपि

महाकाव्येऽलौकिकं महत्त्वं धत्ते इति कृत्वा प्रकृतिचित्रणपात्रचरित्रचित्रणादौ इतरकाव्येभ्योऽस्य वैलक्षण्यं प्रदर्शयितुमपि सर्वात्मना प्रयतितम् । काव्ये सङ्केतितासु पौराणिककथासु पूर्वमेव तत्र प्रसिद्धिकारणादर्थान्तरन्यासमाध्यमेन अन्याध्यायेषु प्रसङ्गान्तरेणोद्धृतत्वाच्च पार्थक्येन विचारे नौचित्यं समीक्षितम् । विक्रमाङ्कदेवचरिते विद्यमानान् बिल्हणकवेर्विलक्षणकाव्यातिशयाननुसन्धाय रघुवंशादाविव अस्मिन् काव्येऽपि सर्वजनध्यानाकर्षणमेव मुख्यं प्रयोजनमस्य प्रबन्धस्य वर्तते । तत्र कियत्साफल्यं मयाऽधिगतमित्यत्र विद्वदग्रेसरा एव प्रमाणम् । एवं च गच्छतः स्खलनादिवज्जातं त्रुटिजातं सज्जनसमाधाननिर्भरम् । यतो हि—

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

विदुषामाश्रवः

प्रियतमचन्द्रशास्त्री

दिनाङ्कः १५-४-७३

श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम्,
जम्बू ।

विषयानुक्रमणिका

कविपरिचयः

प्रायः संस्कृतकवीनां देशकालादिनिर्णयो महत्काठिन्यं समुपस्थापयति संस्कृतानुसन्धातॄणां पुरतः। यतो हि संस्कृतकविताकामिनीकमनीयालङ्कारतामुपगताः कालिदासादयो बहवोऽन्येऽपि कवयः स्वीयकाव्येष्वात्मनो देशकालादिविषये न किमपि सङ्केतयामासुः। सौभाग्यस्यायं विषयो यन्महाकविरयं बिल्हणः स्वकीयदेशकालादिविषये स्वपूर्वजानामपि विषये विक्रमाङ्कदेवचरितमहाकाव्ये सविस्तरं विवरणमुपन्यस्यति। यद्यपि काश्मीरेतिहासे, राजतरङ्गिणीमहाकाव्येऽपि च महाकविबिल्हणसम्बन्धिनः सङ्केताः समुपलभ्यन्ते, तर्हि अपि विक्रमाङ्कदेवचरितस्य अष्टादशतमे सर्गे चेन्महाकविर्बिल्हण आत्मनो वंशावलीवर्णने प्रयत्नं नाकरिष्यत्तर्हि सम्भवतस्तत्पूर्वजानां तस्य चैतादृक् परिस्फुटपरिचयलाभोऽपि नाभविष्यत्।

कविना कृतस्य निजवंशावलिवर्णनस्य मुख्यं कारणं समक्षमेवास्माकं विद्यते। महाकविर्बिल्हणो महतोत्साहेन भणति—

"शुद्धा कीर्तिः स्फुरति भवतां नूनमेतत्प्रसादात्"[1]

अत्रेदमस्ति विचारणीयं यदपरेषां कीर्तिस्फोरणे दत्तावधानः कविश्चेदात्मनः कीर्तिविषयेऽसावधानः स्यादित्यत्र महती विरोधविषयताऽऽपतति। अत एव विक्रमादित्यभूपतेः कीर्तिं चिरस्थायिनीं विदधतो बिल्हणस्यापि यशः कल्पान्तस्थायितामुपेयिवत्[2]।

कविजन्मभूमिपरिचयः

अयं महाकविः काश्मीरानलञ्चकार निजप्रसूत्येति नात्र विचिकित्सालेशोऽपि। महाकविर्बिल्हणः स्वपरिचयप्रदानात्पूर्वं गुणगणगरिम्णा गरिष्ठाया आत्मनः

---

१. विक्र० १८।१०७।

२. डा० व्युल्हरस्य विक्रमाङ्कदेवचरितभूमिका, पृ० ५।

जन्मभुवः परिचयप्राथम्येन जननी जन्मभूमिश्च स्वर्गादपि गरीयसीत्युक्ति चरितार्थतामगमयत्।

अस्मिन्महाकाव्ये सरलया सरसया प्राञ्जलयानुपमया च काव्यभाषया चित्रविचित्रवर्णनैरलञ्चकार निजजन्मभुवं यथा बिल्हणः, न तथा कोऽप्यन्यः संस्कृतकविः। सकलभूमण्डलस्य शिरोमणिभूतोऽयं काश्मीरदेशोऽद्यापि 'भूस्वर्ग' इति सर्वैः स्वीक्रियत एव। यतो हि उग्रनिदाघकोपभाजनतां गतेऽपि सकलभूमण्डले ज्येष्ठाषाढादिषु ग्रीष्ममासेषु पीतद्राक्षारस इव कमलिनीकामुको रत्नश्रेणिकिरणकलिकासमामंशुमालां काश्मीरदेशे प्रक्षिपति[1]।

यथाद्यत्वे लोकाः काश्मीरदेशे स्वर्गीयसुखमनुभूयात्मानं कृतकृत्यं मन्यन्ते तथैव पुरापि काश्मीरेषु स्वर्गसुखमनुभूयते स्म तत्रत्यजनैरिति बिल्हणेन स्वयं प्रतिपाद्यते —

यत्र स्त्रीणां मसृणघुसृणलेपनोष्णा कुचश्री-
स्ताः कस्तूरीपरिमलमुचः पट्टिका राङ्कवाणाम्।
नौपृष्ठस्थाः शिशिरसमये ते वितस्ताजलान्तः-
स्नानावासाः प्रचुरमपि च स्वर्गसौख्यं दिशन्ति[2] ॥

काश्मीरदेशो जगतां दुर्लभं वल्लभं काव्यं कुङ्कुमञ्च प्रसूते, अत एवोरगाधीशः (तक्षकः) स्वयं काश्मीररक्षाभारं वहति[3]। नात्र सन्देहो यत्काश्मीरकाव्यं कुङ्कुमञ्च जगद्दुर्लभत्वमधिरोहति यतो ह्यत्राभूतपूर्वप्रतिभाजुषो विद्वांसः कवयश्च बिल्हणादपि प्राग्जनिं लेभिरे। एतस्मादेव कारणान्महाकविर्बिल्हणो महता गौरवेणाभिधत्ते काश्मीरकाव्यकुङ्कुमयोर्गौरवम्—

सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कवितावितासाः।
न शारदादेशमपास्य दृष्टस्तेषां यदन्यत्र मया प्ररोहः[4] ॥

इति तु सत्यं यत्काश्मीरेभ्यो बहिरप्यन्यदेशेषु हृदयाह्लादकारिणां काव्यसौष्ठवानुस्यूतसंस्कृतकाव्यानां प्रसूतिरभूत्परन्तु काश्मीरकवितोत्कर्षहेतुमाधारीकृत्यैव बिल्हणोक्तिरियमास्ते। इदमपि च सत्यं यत्कवेः काले (ईस्वीयसम्व-

१. विक्र० १८।२।
२. विक्र० १८।३१।
३. विक्र० १८।१६।
४. विक्र० १।२१।

रसरस्यैकादशशताब्द्याम्) काश्मीरदेशः संस्कृतविद्वत्तायामन्यदेशाग्रणीः समभूत् । यतो हि बिल्हणः स्वयं ब्रवीति-

ब्रूमः सारस्वतकुलभुवः किं निधेः कौतुकानां
तस्यानेकाद्भुतगुणकथाकीर्णकर्णामृतस्य ।
यत्र स्त्रीणामपि किमधिकं जन्मभाषावदेव
प्रत्यावासं विलसति वचः संस्कृतं प्राकृतञ्च[1] ॥

यस्मिन् देशे स्त्रियोऽपि जन्मभाषावन्निरर्गलं संस्कृतं भाषन्ते तत्रत्याः पुरुषा यदि काव्यकौशले सर्वश्रेष्ठा भवेयुः न तत्र सन्देहकारणं किमपि परिलक्ष्यते ।

काश्मीरविदुषां विद्वत्ता

प्राचीनकाले (एकादशशताब्द्याम्) काश्मीरदेशे शास्त्रधुरन्धराणां विदुषां विद्यमानताविषये नापेक्षन्ते प्रमाणान्तराणि । यतो हि बिल्हणः स्वयमस्मिन् विषये प्रतिपादयति यदुन्नतमणिनिर्मितगवाक्षेषु शास्त्रव्याख्यारतेषु सूरिचक्रेषु प्रोद्यद्विपुलका देवाः पुष्पवर्षणं वाञ्छन्ति स्म[2] । उपर्युक्तकथने यद्यपि कविकल्पनासमावेशोऽपि वरीवर्ति, तथापि बृहस्पतिप्रतिस्पर्धिनो विद्वांसः काश्मीरानलञ्चक्रुरिति तु सर्वैः स्वीकर्तव्यमेव । काव्यसौष्ठवसमाविष्टभाषायां काश्मीरविदुषां सरस्वतीकृपापात्रतां स्वयं महाकविबिल्हणः प्रतिपादयति—

दुर्लक्ष्यत्वं कलियुगदृशां प्रेषिते ब्रह्मधाम्ना
क्षिप्त्वा विद्याविभवमखिलं यत्र विश्वासधाम्नि ।
स्थाने तत्र त्रिनयनगुरोर्निर्जने नूनमद्रेः
सा वाग्देवी भजति शमिताशेषतापा तपांसि[3] ॥

प्रवरपुरपरिचयः

विद्यावैभवेन सम्पन्नस्य काश्मीरदेशस्य वितस्तातटे सुशोभमानं प्रवरसेनपुरं प्रवरपुरं वा नाम नगरं राजधानीतिपदमलङ्क्रियमाणमासीत्[4] । नगरमिदं मधुरमधुराभिः प्राकृतिकच्छटाभिरभिभूषितमनेकदर्शकव्रातचेतांसि आवर्जयति, नास्त्यत्र संशयो मनागपि । नगरस्यास्यानौपम्यं वर्णयतानेन महाकविना बिल्हणेन लङ्कालकामरावतीनामपि सौन्दर्यनिकृष्टतरत्वं प्रकटितम् । नगर-प्रवर-प्रवरपुरस्य पुरतो लङ्कादीनां कीदृशी स्थितिरिति प्रातिपादितं कविना—

१. विक्र० १८।६ ।
२. विक्र० १८।४ ।
३. विक्र० १८।८ ।
४. विक्र० १८।१ ।

यक्षग्रस्ता धनपतिपुरी निष्कलङ्का न लङ्का
सातङ्केव त्रिदशनगरी मेरुपृष्ठेऽधिरूढा ।
इत्यप्राप्याप्रतिभटतया नूनमुच्चैः शिरांसि
यत्प्रद्युम्न-क्षितिधरनिभादुत्तमाङ्गं बिभर्ति[1] ॥

वितस्तापरिचयः

नगरमिदं वितस्तानद्यास्तटे सुशोभमानमधितिष्ठति । अत एव वितस्ता-परिचयोऽप्यत्रावश्यक एव प्रतिभाति । इयं पन्नगोत्तमा काश्मीरमण्डल एव 'वेरीनाग' नाम्नः स्रोतसो निर्गच्छति तथा च प्रवरपुरस्य मध्यभागं स्वसुरम्यया शोभया भूषयन्ती वहति । गङ्गास्नानेन यथा पापक्षयो भवति पुण्यलाभेन स्वर्गप्राप्तिरपि भवति तथैव वितस्तानदीस्नानेन तदीयशीतत्वपावनत्वादिपुण्यैः स्वर्गप्राप्तिरजायत जनानामिति विक्रमाङ्कदेवचरितादवगम्यते—

वैतस्तानां स खलु पयसां सङ्गमो यत्र चर्या-
मर्यादायाः कृतयुगभुवः पात्रभूतोद्भुतश्रीः ।
दोलालीलातरलगतिषु प्रेङ्खिता यत्तरङ्गै-
रुत्सङ्गेषु त्रिदशसुदृशां देहभाजः पतन्ति[2] ॥

काश्मीरिकाणां स्वर्गसौख्यम्

अस्मिन्देशे एकतो देहभाजो वितस्ताजलैस्त्रिदशसुदृशामुत्सङ्गेषु स्वर्गसुख-मनुभवन्ति, अन्यतश्चात्रत्योपवनेषु, केलिवाप्युपकण्ठेषु मनसिजकथाघातभग्ना युवानो विषमधनुष्कार्मणतां गतानां रामाणां निविडतरप्रेमबन्धे पतित्वात्रैव स्वर्गसुखमनुभवन्ति । यतो हि—

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी ।
अस्या रदच्छदरसो न्यक्करोतितरां सुधाम्[3] ॥

महाकवेः ग्रामः

स्वर्गायमाणस्य प्रवरपुरस्य सार्धगव्यूतिमात्रान्तरे जयवनाभिधमुत्तुङ्ग-चैत्यमासीत् । तत्र च कलिकलङ्कनाशकममलसलिलललितं तक्षकस्य कुण्डमस्ति ।

---

१. विक्र० १८।१५ ।
२. विक्र० १८।२३ ।
३. काव्यप्रकाशात् ।

तस्य समीप एव 'खोनमुष' नाम ग्रामोऽस्ति[1]। अयमेवासौ सौभाग्यविलसितो ग्रामो यो हि महाकविबिल्हणं प्रसूय तस्य यशसा आत्मानमपि धवलीचकार।

पुरा राजा खगेन्द्रः काश्मीरान् शशास। तेन च ब्राह्मणानां कृते 'खागी' 'खोनमुष' नामभ्यां प्रसिद्धमग्रहारद्वयं परित्यक्तम्[2]। तयोः खोनमुषाग्रहार-नाम्नैव बिल्हणस्य ग्रामः प्रथितोऽस्ति। महाकवेः बिल्हणस्य ग्रामस्तस्यैव शब्दैरलङ्कृतो यथा—

यस्यास्ति खोनमुष इत्युपकण्ठसीम्नि
ग्रामः समग्रगुणसम्पदवाप्तकीर्तिः।
आलानरूपबहुयूपवति प्रविष्टं
नो यत्र बन्धनभियेव कलिद्विपेन[3]॥

महाकवेः पूर्वजाः

खोनमुषेति नाम्नि प्रसिद्धे ग्रामे वेदशास्त्रावगाहनैः प्रसारितनिजगोत्र-कीर्तयः कौशिकगोत्रीया ब्राह्मणाग्रगण्या ब्राह्मणा न्यवसन्। यांश्च गोपादित्यनामा काश्मीरिको भूभृन्मध्यदेशादानिनाय। प्रचलितासीत्पुरेयं प्रथा यद्गुणानुरागिणो राजानो विदुषो ब्राह्मणान् बहिर्देशेभ्य आनीय सम्यक् सम्मान्य स्वसभासु पाण्डित्यपदवीमारोहयन्ति स्म। गोपादित्यात्प्रागेव खगेन्द्रो नाम राजा कान्य-कुब्जं विजित्य तत्रत्यान् विदुषो ब्राह्मणान् काश्मीरानानिनाय[4]।

जगत्त्रितयपवित्रचरित्रवतां ब्राह्मणानामग्निहोत्रपरिशीलनजेन स्वेदाम्भसा कृतकलिकालकलङ्कशान्तिः मुक्तिकलशनामा ब्राह्मणः कुलशेखरत्वमभजत्। कीदृगासीत्तस्य वेदेषु प्रावीण्यमिति तु बिल्हणगिरैव प्रतिपाद्यते—

शङ्के पङ्केरुहवसतिना स्थापिताः शान्तिहेतो-
रन्योऽन्येर्ष्याकलहचतुरा याश्चतुर्ष्वाननेषु।

---

१. इदानीं खोनमुह इति प्रसिद्धः।

२. खागिखोनमुषयोः कर्ता मुख्याग्रहारयोः।
हरहाससितैः कृत्यैः प्रीतालोकान्क्रमाद्ययौ।
—राजतरङ्गिणी १।९०

३. विक्र० १८।७१।

४. जित्वोर्वी कान्यकुब्जाद्यां तत्रत्यं सन्न्यवेशयत्।
चातुर्वर्ण्यं निजे देशे धर्म्यांश्च व्यवहारतः॥
—राजतरङ्गिणी १।९१।

एकत्रैव स्वमुखकमले लीलया वल्लभानां
चक्रे तासामपि चतसृणां यः श्रुतीनां निवासम्[१] ॥

यथा मुक्तिकलशः स्वयं परं विद्वान् धार्मिको याज्ञिकश्चासीत् तथैव तस्य पुत्रो राजकलशोऽपि दानशीलः पराक्रमी सकलशास्त्रनिष्णातश्चासीत्[२]। अस्य चामलकीर्तिवतो राजकलशस्य विश्वम्भरासारभूतः, क्षमावान्, निधिश्चाखिलशास्त्ररहस्यस्य, ज्येष्ठकलशो नाम सुतो बभूव। अखिलजनवन्दनीयां महाभाष्यव्याख्यां कृतवतोऽस्य प्राङ्गणं सदैव शिष्यैस्तिलकितमासीत्। डा० व्युल्हरमते दुर्दैवविलसितत्वात्कालकवलितैव तत्कृता महाभाष्यव्याख्या, यतो हि नेदानीं कुत्रचिन्नामनिर्देशोऽपि तस्या दृश्यते[३]।

डा० व्युल्हरमहोदयस्योपर्युक्तं मतं नेदानीं प्रामाणिकं मन्यते। डा० व्युल्हरमतखण्डने श्रीमुरारिलालनागरमहोदयैः यानि प्रमाणानि उपन्यस्तानि तानि सर्वाणि सुसंगतानि विश्वासार्हाणि च प्रतीयन्ते।

श्रीमुरारिलालनागरमहोदयस्य मते डा० व्युल्हरमतनिरासः—

"महाभाष्यव्याख्यां सकलजनवन्द्यां विदधतः" 'सदा यस्यच्छात्रैस्तिलकितमभूत्प्राङ्गणमपि"। इति कवेरुक्तिं ज्येष्ठकलशो महाभाष्यव्याख्यां काञ्चन प्रणिनाय इति व्याख्यातवान् डा० व्युल्हरमहोदयः। इयं टीका क्वचिदपि नोपलभ्यते नापि च निर्दिश्यते इत्यपि तेन प्रत्यपादि[४]। सर्वमेतदसङ्गतम्। ज्येष्ठकलशः कामपि टीकां न प्रणीतवान्, स हि महाभाष्यस्य व्याख्यायां (व्याख्यानेऽध्यापने वा) कुशलोऽभवदित्येव कवेराशयः।

काश्मीरेषु अनेकानि व्याख्यास्थलान्यासन्, काश्मीरिका विद्वांसो व्याख्याकुशलिन आसन्, इति कविनाऽन्यत्रापि स्थानद्वये (अष्टा० ४, ८) प्रतिपादितम्। कवेः प्रागुक्तोक्तौ टीकानिर्माणपरकतया प्रतिपन्नायां छात्राणां निर्देशो न सङ्गच्छते। किञ्च कृतवत इति पदेनैव तात्पर्यावबोधे सुकरे वर्तमानकालप्रयोगो मुधैव स्यात्।

डा० व्युल्हरमहोदयस्येदमसङ्गतं मतम् ईस्वीये १९३७ वर्षे प्रकाशिते एम० कृष्णमाचारियरमहोदयानां संस्कृतसाहित्येतिहासेऽप्युपलभ्यते[५]।

---

१. विक्र० १८।७६।
२. विक्र० १८।७७।
३. व्युल्हरस्य विक्रमाङ्कदेवचरितभूमिका, पृ० १२, १६।
४. व्युल्हरस्य विक्रमाङ्कदेवचरितभूमिका, पृ० १२-१३।
५. History of the Classical Sanskrit Literature, p. 164.

अनेकगुणनिधानस्वरूपानुपमचरितचित्रितां नागादेवीनाम्नीं भार्यामूढवानयं ज्येष्ठकलशः । स्वभार्याया दयादाक्षिण्यादिगुणैः नासीत्काठिन्यमतिथिसत्कृतिषु यज्ञादिकार्येषु च ज्येष्ठकलशस्य कृते । यतो हि नागादेवी ऐहिकामुष्मिकोपकरणप्रापणे पूर्णप्रवीणासीत् ।

कवेर्जन्म

ज्येष्ठकलशनागादेव्योः पुण्यातिशयैरेव संस्कृतभाषां गौरवगरिम्णश्चरमसीम्नि प्रापयितुमनयोरङ्कमलञ्चकार महाकविर्बिल्हणः । बिल्हणस्य प्रसूतिर्बिल्हणशब्दैरेवोपन्यस्यते—

अङ्गैस्स्वङ्गैस्त्कनकरुचिभिः कार्मणं लोचनानां
सूरेस्तस्मादजनि जगतां शेखरो बिल्हणाख्यः ।
सान्द्रैर्वेदध्वनिभिरभिव्यक्तमञ्जीरनादा
मौञ्जीबन्धात्प्रभृतिवदने यस्य वाग्देवतासीत्[1] ॥

सौन्दर्यं वैदुष्यञ्च

उपर्युक्तपद्ये स्वकीयमनूपमं सौन्दर्यं वैदुष्यञ्च सङ्केतितं कविना । महाकविरयं जन्मन एव अतिसुन्दर आसीत् । नास्य लोचनकार्मणत्वविषये शङ्कावकाशो वरीवर्ति । यतो हि अद्यापि काश्मीरदेशीयाः सौन्दर्येऽन्यदेशीयजनान् न किमपि गणयन्ति । यथा सौन्दर्ये तथैव बुद्धिप्रकर्षेऽपि प्रख्यातिः सर्वत्र प्रसृता वर्तते काश्मीराभिजनानाम् । बिल्हणः स्वसुषमाया बुद्धिमत्तायाश्च वर्णने न कामपि कल्पनां न चात्युक्तिं समाश्रितवान् । तस्य काव्यमेव तदीयबुद्धिप्रभावं परिपुष्णाति । मौञ्जीबन्धात्प्रभृति वेदाध्ययनमपि च न ब्राह्मणपुत्रस्यासम्भवम् । बिल्हणः छन्दःशास्त्र-व्याकरण-कल्प-ज्योतिष-शिक्षा-निरुक्तनामभिः षडङ्गैः[2] सह वेदमधीत्य, ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति वचनमन्वगर्थवान् ॥ साहित्यविद्याया महर्षिपतञ्जलेः महाभाष्यस्य चापि गम्भीराधीतिरस्यासीदिति तद्वचसैवावगम्यते—

साङ्गो वेदः फणिपतिदिशा शब्दशास्त्रे विचारः
प्राणा यस्य श्रवणसुभगा सा च साहित्यविद्या ।
को वा शक्तः परिगणयितुं श्रूयतां तत्त्वमेतत्
प्रज्ञादर्शे किमिव विमले नास्य संक्रान्तमासीत् ॥[3]

---

१. विक्र० १८।८१ ।

२. छन्दः पादौ शब्दशास्त्रञ्च वक्त्रं कल्पः प्राणाः ज्योतिषं चक्षुषी च ।
शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं वेदस्याङ्गान्याहुरेतानि षट् च ॥

३. विक्र० १८।८२ ।

श्लोकस्यास्य उत्तरार्धेनावगम्यते यदन्यासामपि विविधविद्यानां ज्ञातासीदयं महाकविर्बिल्हणः।

वैदुष्यानहङ्कारिता

यद्यपि बिल्हण आत्मसर्वज्ञताया विषये किञ्चित्सङ्केतयति, तथापि नह्यसावात्मसर्वज्ञताम् अहङ्कारविषयतामापादयति। तदिदं काव्याध्येतृभिः स्वयमेव तत्काव्यपठनादनायासेन बोद्धुं शक्यते। तस्य निरभिमानितानिदर्शनं निदर्श्यते—

चक्रं यस्याक्रियत वदनप्रेक्षिविद्यावधूनां
श्रीवाग्देव्याश्चरणरजसा कार्मणत्वं गतेन।
याताः सार्धं दिशि दिशि पुनर्बन्धुराः सर्गबन्धाः
कीतः पारिप्लवविदलने सौविदल्ला बभूवुः[1]॥

एतेन परिस्फुटं परिज्ञायते यदयं महाकविस्स्वकीयं वैदुष्यं शारदाचरणकमल-रजसां प्रसादमेवाकलयते, न च भवभूतिवदित्थमाचष्टे—"यं ब्रह्माणमियं देवी वाग्वश्येवाभिवर्तते।" इत्थं विनयावनतमपि कविमिमं केचन विद्वांसः ज्ञानगर्व-गर्वितं मन्यन्ते,[2] तत्र तेषां भ्रान्तिरेव कारणं प्रतिभाति। स्वकीयां रसस्रोत-स्विनीप्रवाहाधिरूढामपि गिरं नीरसेति प्रतिपादयन् साक्षान्नम्रतावतारभूतो-ऽयमासीदिति प्रमाणीकुरुते वक्ष्यमाणं पद्यम्—

गिरां प्रवृत्तिर्मम नीरसापि मान्या भवित्री नृपतेश्चरित्रैः।
के वा न शुष्कां मृगमभ्रसिन्धुसम्बन्धिनीं मूर्धनि धारयन्ति[3]॥

एतस्मात्पद्यादनुमीयते यन्नासीद्बिल्हणे सर्वज्ञताजन्याहङ्कारलेशाय मनागपि स्थानम्।

सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कविताविलासाः।
न शारदादेशमपास्य दृष्टस्तेषां यदन्यत्र मया प्ररोहः[4]॥

---

१. विक्र० १८।८३।

२. विक्रमाङ्कदेवचरितस्य टीकाकारः रामचन्द्रशर्मा स्वसंस्करणे द्वितीय-पृष्ठे लिखति यदयं कविः स्वभावत एवाभिमानी प्रतीयते।

३. विक्र० १।२८।

४. विक्र० १।२१।

नानेन पद्येनाहङ्कारिताप्रतिपादनमात्रं प्रयोजनम्, अपितु काश्मीर-काव्यकलायाः श्रेष्ठतावर्णनमेव कवेरभीष्टमिति ।

बिल्हणस्य ज्येष्ठो भ्राता

परमविद्वान् काव्यकलासु लब्धप्रतिष्ठोऽनेकजनगणकाव्यसुधापायी सुधीरिष्टरामाभिधो बिल्हणस्य ज्येष्ठो भ्राताऽनेकेषां राज्ञां सभासु सभाजितो बभूवेति विक्रमाङ्कदेवचरितादेवावगम्यते[1] । विक्रमाङ्कदेवचरिते स्पष्टमुट्टङ्कितं यदिष्टरामः काव्यकलाकोविद आसीत्परं न तस्य किमपि काव्यमद्यावधि उपलभ्यमानमास्ते ।

कवेरनुजः

महाकविबिल्हणस्यानुजोऽपि विद्वान् कविश्चासीत् । 'स्पर्धाबन्धोद्धुरकविमदच्छेदलीलाकुठारः'[2] एतस्मात्पद्यांशादवगम्यते यत्तेन स्वीयकाव्यकलाविज्ञानैरनेके प्रतिस्पर्धिनः कवीन् पराजित्य विपुला कीर्तिश्चाधिगतासीत् । यदि बिल्हणः स्वकीयकाव्ये पूर्वजाग्रजानुजानां निर्देशं नाकरिष्यत् तर्हि एतेषां नामान्यपि कालकवलितान्यभविष्यन् ।

महाकवेश्शैशवम्

महाकविना बिल्हणेन विद्याध्ययनरतेन स्वशैशवं काश्मीरेष्वेव यापितम् । विद्याध्ययनं परिसमाप्य बिल्हणः स्वाध्ययनस्य परीक्षणार्थं देशदेशान्तरेषु भ्रमणाय मतिं बबन्ध ।

कवेर्भ्रमणशीलता

देशदेशान्तरभ्रमणपरिपाटी तदानीन्तनपण्डितेष्वाधिक्येन प्रथितासीत् । यतो हि भ्रमणेन बुद्धिः प्रौढतां याति । विविधानुभवाननुभूय महत्प्रावीण्यं प्रागल्भ्यञ्चाधिगच्छति नरः । संस्कृतसाहित्यस्य प्रसिद्धैः बाणकालिदासादिभिः कविभिरपि स्वजीवने पर्याप्तं परिभ्रम्य स्वकीयज्ञानराशिरगाधतां प्रापित आसीत् । अत एव तेषां धिषणायां प्रौढतासमावेशोऽजायत । स्वप्रौढप्रतिभाधारशिलायामेव कालिदासेन कविकुलशेखरत्वमासादितम् । "बाणोच्छिष्टं जगत्सर्वमित्युक्तिः" संस्कृतसाहित्यवाङ्मये प्रसिद्धास्ति । अस्या आधारशिलापि बाणस्य भ्रमणप्रियत्वे स्थिरास्ति । यतो हि भ्रमणं शिक्षायाः प्रधानमङ्गमस्ति। देशकालविभेदेन अधर्मो धर्मः धर्मश्चाधर्मः कुत्रचित्संजायते । इति महाभारतीया-

१. विक्र० १८।८४ ।

२. विक्र० १८।८५ ।

भिप्रायानुभूतिः देशाटनेनैव भवितुमर्हति । "न रत्नमन्विष्यति मृग्यते हि तत्" इत्युक्ति चरितार्थयता कालिदासेन आ च काश्मीरात् आ च कुमारिकाया भारत-भ्रमणमकारि । बिल्हणोऽपि कालिदासादर्शमनुसरन् साहित्यवाङ्मये पदार्पणं व्यधत्त, अतः कालिदासजीवनादेव प्रेरणामवाप्य देशाटनाय निर्जगाम । एवमपि सम्भाव्यते यद् बिल्हणसमयेऽपि पण्डितेषु देशाटनस्य प्रचार आसीत्, एकस्माद् देशादन्यदेशं जिगमिषवः पण्डिताः स्वविद्यायाः काव्यस्य परिचयं यच्छन्तः शास्त्रार्थोत्सुकैः पण्डितैः सह शास्त्रार्थं कुर्वन्तः सन्तः देशाटनं तीर्थाटनञ्च अकुर्वन् । एभिरेव कारणैः बिल्हणः काश्मीरान्परित्यज्यान्यदेशेषु बभ्राम ।

काश्मीरेभ्यः प्रस्थानम्

काश्मीरेभ्योऽमलशास्त्रतत्त्वं गृहीत्वा प्रालेयाद्रेः स्थैर्यञ्चादाय वादिनां मुखानि मुद्रयन् देशाटनेन स्वकीर्तिं चतसृषु दिक्षु प्रसारितवानयमिति विक्रमाङ्कदेव-चरितस्य वक्ष्यमाणपद्यादवगम्यते—

काश्मीरेभ्यः सकलममलं शास्त्रतत्त्वं गृहीत्वा
प्रालेयाद्रेरपि गुणमसौ निश्चितं स्वीचकार ।
देशे देशे कथमपरथा वादिनामाननानि
क्रुद्धश्चक्रे तुहिनपटलप्लुष्टपद्मोपमानि[1] ॥

इत्थं बिल्हणः स्वीयं काश्मीरत्यागन्त्वाचष्टे, परं कदायं काश्मीरान्तत्याजेत्यस्मि-न्विषये न किमपि निर्दिशति । उपर्युक्तस्य तथ्यस्य गवेषणायाऽस्माभिरन्यग्रन्थ-साहाय्येनैव मतमुपस्थापयितुं शक्यते। कल्हणस्य राजतरङ्गिण्यां स्पष्टोऽयमुल्लेखो यद्बिल्हणः कलशभूपतौ काश्मीरान् शासति काश्मीरान्परित्यक्तवान्[2] । बिल्हणः १०५० तमे ईस्वीये वर्षे काश्मीरेभ्यो निर्जगाम[3] । डा० व्युल्हरेण बिल्हणस्य काश्मीरत्यागस्य समयः १०६० तमादीस्वीयवर्षात् १०६५ तमेस्वी-यवर्षयोर्मध्ये निश्चीयते[4] । बिल्हणः काश्मीरत्यागात्पूर्वमेव स्वाध्ययनं समाप्त-वान् । काश्मीरत्यागावसरेऽसौ युवा भवितुमर्हति, अत एकादशशताब्द्या द्वितीये अथवा तृतीये भागे तस्य जन्म सम्भाव्यते ।

---

१. विक्र० १८।८६ ।

२. 'काश्मीरेभ्यो विनिर्यातं राज्ये कलशभूपतेः' —राजतरङ्गिणी सप्तम-स्तरङ्गः ९।३५ ।

३. संस्कृत साहित्य का इतिहास—वाचस्पति गैरोला ।

४. डा० व्युल्हरस्य विक्रमाङ्कदेवचरितभूमिका, पृ० २३ ।

बिल्हणो मथुरायाम्

काश्मीरेभ्यो निर्गत्य पाञ्चालमार्गेण बिल्हणो मथुरां प्राप। तत्र च तत्रत्यैः पण्डितैः सह तस्य शास्त्रार्थो बभूव। शास्त्रार्थे चायं पण्डितान् पराजितवान्। शास्त्रार्थस्योल्लेखस्तु विक्रमाङ्कदेवचरिते वर्तते, परं शास्त्रार्थेषु ये पण्डिताः पराजिताः तेषां नामनिर्देशो नास्ति। अयं किल मथुरातो वृन्दावनं गत्वा कतिपयदिवसान् राधाकृष्णक्रीडाविटपिनः पश्यन् यापितवान्।

बिल्हणस्य वृन्दावनवसतिनिदर्शनम्—

दोलालोलद्घनजघनया राधया यत्र भग्नाः
कृष्णक्रीडाङ्गनविटपिनो नाधुनाप्युच्छ्वसन्ति।
जल्पक्रीडामथितमथुरासूरिचक्रेण केचित्
तस्मिन् वृन्दावनपरिसरे वासरा येन नीताः[1]॥

विक्रमाङ्कदेवचरितस्य सूक्ष्मेण समीक्षणेनावगम्यते यद्वृन्दावने बहवो विद्यार्थिनो बिल्हणस्य शिष्यतां स्वीचक्रुरिति। तैश्च शिष्यैः स्वगुरोर्बिल्हणस्य कीर्तिः समस्तभारतवर्षे प्रसारिता[2]। बिल्हणकीर्तिं श्रावं श्रावं भारतवर्षस्य राजानस्तं स्वसभासु प्रधानपण्डितराजकव्यादिपदवीप्रदानोत्सुकतां भेजिरे। शिष्याणां माध्यमेनैव बिल्हणस्य काव्यप्रचारो दिशि दिशि समभूत्। तत्काव्यञ्च सरलत्वेन सरसत्वेन च ग्रामे ग्रामे नगरे नगरे स्त्रियः, पुरुषाः, वृद्धाः, युवानः, बालकाश्चापि महता प्रेमबन्धेन पेठुः—

ग्रामो नासौ न स जनपदः सास्ति नो राजधानी
तन्नारण्यं न तदुपवनं सा न सारस्वती भूः।
विद्वान्मूर्खः परिणतवयः बालकः स्त्री पुमान्वा
यत्रोन्मीलत्पुलकमखिला नास्य काव्यं पठन्ति[3]॥

पद्यादस्मादनुमीयते यद्बिल्हणो विक्रमाङ्कदेवचरितात्पूर्वमपि किमपि काव्यं न्यबध्नात्। परमसौ तस्य नामनिर्देशं नाकरोत्। बिल्हणस्य नाम्ना लिखिता कर्णसुन्दरीनाटिका चौरपञ्चाशिका च विक्रमाङ्कदेवचरितात्पूर्वं लिखिता विद्वद्भिर्मन्यते। चौरपञ्चाशिका बिल्हणकृता न वात्र विद्वत्सु विवादो वरीवर्ति। अस्मिन् विषये यथास्थानं विवेचनं करिष्यते। परमत्र वक्ष्यमाणोऽयं

---

१. विक्र० १०।८७।
२. विक्र० १८।८८।
३. विक्र० १८।८९।

विषयो यद् बिल्हणस्य यत्काव्यं मथुरायां वृन्दावने वा छात्रैः पठितं तदेभ्यः सर्वेभ्यः अन्यदेव यदिदानीमनुपलब्धं वर्तते ।

विक्रमाङ्कदेवचरितस्यान्तःसाक्ष्याधारेणानुमन्यते यद् बिल्हणेन रामविषयकस्य कस्यचित्काव्यस्य रचना कृता आसीत् । सूक्तिसङ्ग्रहेष्वपि बिल्हणनाम्ना कानिचित्पद्यानि उपलभ्यन्ते । पिशेलस्य अनुमानमिदं यद्बिल्हणः सुभाषितसङ्ग्रहस्यापि सङ्कलनमकार्षीत् । शिल्हणस्य नाम्नोपलभ्यमानस्य सुभाषितसङ्ग्रहस्यापि सङ्कलनकर्ता बिल्हण एवासीत् । कालान्तरे भ्रान्तिवशाद् बिल्हण एव शिल्हण इति व्याहारतां गत इति । शिल्हणस्य एकस्यां पाण्डुलिपौ बिल्हणस्यापि पद्यमेकमुपलभ्यते । अन्यपुष्टप्रमाणानामभावेऽस्मिन्विषये स्थिरमतस्थापनं न युक्तियुक्तम् । बिल्हणस्य यत्काव्यं जनास्तन्मयत्वेन पठन्ति स्म किन्तस्य नामेति विषये न हि बिल्हणस्य कोऽपि स्पष्टः सङ्केतः, अतोऽनुमानप्रमाणादिभिरपि सिद्धान्तस्थापनमशक्यमेव ।

बिल्हणः कान्यकुब्जे

मथुरातः प्रस्थानं विदधतो बिल्हणस्य कीर्तिः गङ्गायाः कलकलध्वनिं तर्जयन्ती कान्यकुब्जनगरं कथं प्राविशदिति तु प्रत्यक्षमेवास्माकम्—

यस्योत्तुङ्गैर्मणिमयगृहैर्लीलयोत्तारिता श्री-
र्व्योमोतंसा त्रिदशपुरतः प्राप्तसोपानलीलैः ।
द्वारे गङ्गां कृतकलकलां तर्जयित्वा प्रविष्टा
कीर्तिर्यस्य स्ववशमकरोत्तत्पुरं कान्यकुब्जम्[१] ॥

बिल्हणः पर्याप्तं सम्मानं कान्यकुब्जेश्वरादधिगत्य सकलमपि कान्यकुब्जनगरं स्वगुणगणैः स्वायत्तीचकार ।

बिल्हणः प्रयागे

पर्यटनैकमात्ररुचिरयं कान्यकुब्जेऽपि स्थिरां स्थितिं न लेभे । अत एव कन्नौजनगरात्प्रस्थाय प्रयागाभिमुखं ययौ । तत्र च गङ्गायमुनयोर्सङ्गममवाप्य महत्या भक्त्या श्रद्धया च तत्र सस्नौ । तत्र च वसतिं विदधतानेन विश्वाद्भुतगुणगणोपार्जिता लक्ष्मीः ब्राह्मणेभ्यो दानरूपेण दत्ता । तीर्थराजे प्रयागे बिल्हणस्य श्रद्धा—

धर्मस्यैव व्युपरतकलेर्यत्र गीर्वाणसिन्धु-
स्रोतः कोशे विशति यमुनावेणिभङ्ग्या कृपाणः ।

---

१. विक्र० १८।९० ।

तस्मिन्वारान्कति न कृतिना तीर्थनाथे प्रयागे
दत्ता विश्वाद्भुतगुणगणोपार्जिता येन लक्ष्मीः[1] ॥

एतस्मात्पद्यात्सुस्पष्टं प्रतीयते यदनेन स्वकीयदिग्यात्रायां महद्धनमर्जितमासीत् । तत्सर्वं सङ्गमस्नानानन्तरं ब्राह्मणेभ्यो दत्तम् । यतो हि तीर्थस्थलेषु दानप्रदानस्य धार्मिक्याः प्रथाया विशिष्टं माहात्म्यं धर्मशास्त्रेषु प्रतिपादितम् । अद्यापि हिन्दु-समाजे तीर्थेषु दानप्रदानस्य प्रथा परम्परितरूपेण विद्यमानास्ति ।

बिल्हणो वाराणस्याम्

कलिकालकलङ्कनाशिनी यमुनावीचिस्वरूपासिः यत्र गङ्गाप्रवाहकोशे निपतति तत्र तीर्थराजप्रयागे कानिचन दिनानि यापयित्वा बिल्हणः काशीमाययौ। तत्र च कलिकालभयात्तीरमागतानां स्वशीकरैः श्रमापहरणशीलायां स्वर्नद्यां विहितस्नानोऽसौ कुपार्थिवदर्शनसमुद्भूतपापमपाचकार[2] ।

तत्समये डाहलाधीशस्य हैहयवंशीयस्य महाराजकर्णस्य काशी अपि लघुराजधानी आसीदत्रैव महाकवेः बिल्हणस्य परिचयो राज्ञा कर्णेन सह समभूदिति । एकादशशताब्द्या मानचित्रावलोकनेनावगम्यते यत्कालिञ्जरगिरिः डाहलदेशस्योत्तरस्यामासीदिति । इतिहासे च तद्गिरिविजयः कर्णेन कृत इति समुट्टङ्कितम् । महाकविर्बिल्हणोऽपि कर्णेन कालिञ्जरविजयं निर्दिशति—

कालः कालिञ्जरगिरिपतेर्यः प्रयाणे धरित्रीं
तुक्खाराणां खुर-पुटरवैः क्ष्मापशून्याञ्चकार ।
श्रीडाहलक्षितिपरिवृढः सोऽपि यं प्राप्य वृत्तं
कर्णः कर्णामृतरसभरास्वादमन्तस्ततान[3] ॥

एतस्मात्पद्याद् बिल्हणस्य कर्णेन सह काश्यां समागमस्य सम्भावना बलवती सञ्जायते । काश्यामेव बिल्हणस्य सरसकवितायाः कर्णेन आकण्ठं पानमकारि । अत्रैव महाकवेर्बिल्हणस्य कविगङ्गाधरस्य च मिथः शास्त्रार्थः समभूत्, शास्त्रार्थे च जयश्रीर्बिल्हणमशिश्रियत[4] । स्वविजयनिर्देशमित्थञ्चकार कविरत्र काव्ये—

नीत्वा गङ्गाधरमधरतां डाहलाधीशधाम्नि
क्रीडाक्रान्तप्रतिभटकवेः पूर्वदिक्कोटरेषु ।

१. विक्र० १८।९१ ।
२. विक्र० १८।९२ ।
३. विक्र० १८।९३ ।
४. विक्र० प्रबोधिनीटीकाया भूमिका, पृ० १ ।

निर्जित्यैरावतमदजलभ्रान्तभृङ्गालिनादान्
सुत्राम्णोऽपि श्रवसि लुठितं यस्य शङ्के कथाभिः[1] ॥

बिल्हणस्यायोध्यागमनम्

कविरयं काशीतोऽयोध्यामपि जगाम, तत्र वसतिं विदधतानेन भगवतो रामस्य जीवनचरितविषये काव्यमपि लिखितमिति वक्ष्यमाणात्पद्यादनुमीयते—

यस्यातृप्तः स्फटिकगिरिणा तं विनिक्षिप्य वामे
प्रालेयाद्रेः क्षणमभिमुखो दक्षिणः पाणिरासीत् ।
तं पौलस्त्यं विदलितवतः सूक्तिनिस्यन्दशीतां
सीताभर्तुर्व्यरचयदसौ राजधानीमयोध्याम्[2] ॥

पद्यमिदमाधारीकृत्य सर्वेऽपि विद्वांसः स्वीकुर्वन्ति यदनेन अयोध्याविषयेऽथवा भगवतो रामचन्द्रस्य जीवनचरितविषये किमपि काव्यं निबद्धमिति[3] । संस्कृत-साहित्येतिहासे माननीयो विद्वान् ए० बी० कीथमहोदयश्चापि विषयमिमं सम्मनुते, यन्महाकविर्बिल्हणो भगवतो रामस्य जीवनेन सम्बद्धं किमपि काव्यं लिलेख । अथवा अयोध्याया यात्रां कृतवान्[4] । परन्तु बिल्हणस्य रामविषय-कमयोध्याविषयकम्वा किमपि काव्यं नोपलभ्यते । डा० व्युल्हरमहोदयो डाह-लादेशमिदानीन्तनबुन्देलखण्डादभिन्नं मन्यमानो बिल्हणस्यायोध्यागमनेऽसम्भा-वनामित्थं परिपुष्णाति—

बहुकालं यावद्दक्षिणपश्चिमप्रान्तमागत्य पुनरुत्तरस्यामयोध्यां गमनमसम्भा-व्यमिवाभाति । ततश्च 'सूक्तिनिस्यन्दशीतां' 'सीताभर्तुर्व्यरचयदसौ' अस्य वाक्यस्येदमेव तात्पर्यं यत्कर्णसभायामेव विहितस्थितिः रामस्तुतिपरकं काव्यं निबवन्धेति[5] व्युल्हरमतमसङ्गतं मन्यमानैः श्रीमुरारिलालमहोदयैः प्रतिपादितं मतं पूर्वं प्रतिपादितस्यास्मन्मतस्य परिपोषकम् । तदित्थम्—

---

१. विक्र० १८।९५ ।

२. विक्र० १८।९४ ।

३. विक्रमाङ्कदेवचरितचर्चा, पृ० २१ ।

४. संस्कृत साहित्य का इतिहास (कीथ), अनु० डा० मंगलदेवशास्त्री, पृ० १९१ ।

५. व्युल्हरस्य विक्रमाङ्कदेवचरितभूमिका, पृ० १८।२४ ।

कविः वाराणस्यां स्वागमनं निरूप्य (अष्टा० ९२) अनन्तरश्लोके (१८।९३) 'कर्णो बिल्हणवृत्तान्तं निशम्य ननन्द' इति प्रतिपाद्य ततश्चानन्तर एव श्लोके (१८।९४) असौ कविरयोध्यां सूक्तिनिस्यन्दशीतां व्यरचयदिति व्यलिखत्। तदग्रिमे च श्लोके (१८।९५) डाहलाधीशधाम्नि विजितगङ्गाधरस्य क्रीडाक्रान्तप्रतिभटकवेस्तस्य कीर्तिरिन्द्रश्रोत्रयोरतिथीबभूवेति न्यरूपयत्। अत्रेदमवधेयम्—

कलचुरिहैहयवंशीयो डाहल (चेदि)—देशाधीशो लक्ष्मीकर्णः (कर्णः) प्रायशः (ई० १०४१) वर्षाद् (ई० १०७५) वर्षं यावदशास्त। स हि तदानीन्तनेषु राजसु प्रतापशाली उत्कृष्टतमश्चासीत्। तस्य राज्यं प्राज्यं प्रसिद्धञ्चाभवत्। एतद्वंशः त्रिपुर्यां प्राचीनराजधान्यां सत्यामपि काशीं द्वितीयां राजधानीं व्यदधात्। आसतां तावदिदानीं गवेषणाग्रन्थाश्च, फार्बसमहोदयप्रणीते अतिपुरातने रासमालाग्रन्थेऽस्य राज्ञोऽतिविपुलविभूतिवर्णनं काश्याश्चैतद्राजधानीत्वेन वर्णनं निरूपितम्। इदानीन्त्वेतद्विषयकाणि बह्न्युपलभ्यन्ते प्रमाणान्तराणि[1]। कविः कर्णेन सह क्व परिचयमकार्षीदिति असौ न प्रत्यपादयत्। परं प्रागुक्तपद्यचतुष्टयेषु साधु पर्यालोचितेषु परिचयोऽयं काश्यामेव बभूव, न त्रिपुर्यामिति स्पष्टीभवति। अत्रेदमपि अवधेयम्—यत्कविः साक्षात्परिचयसूचकं पदमप्रयुज्य 'सोऽपि यं प्राप्य वृत्तम्' इत्येव भणति[2]। 'वृत्तम्' इति पाठः स्यादसङ्गत इत्यपि नास्त्यसम्भाव्यम् बिल्हणकवेः काश्यागमने, आस्तां नाम कर्णनृपतिस्त्रिपुर्यां, परमीदृशस्य महाकवेः स्वराज्यागमनं न हि स नाकर्णयेत्[3]। कविः कर्णराजधान्यां काश्यामेव वसन् यात्रोत्सवादिप्रसङ्गेन अयोध्यां ययावित्यपि सम्भाव्यते। यतोऽसावनेकस्थलेषु रामविषयकमनुरागं बाढं स्वीचकार। अयोध्यानैकट्यमुपगतोऽपि तद्दर्शनं कविरुपेक्षेतेति न विश्वासार्हम्। किञ्च 'सूक्तिनिस्यन्दशीताम्, 'सीताभर्त्तुर्व्यरचयदसौ राजधानीमयोध्याम्' कवेरयोध्यागमनं निस्संशयं प्रमाणयति। वस्तुतो रामस्तुतिकाव्यमेवारचयिष्यच्चेद् 'रामपदसेवां रामगुणकीर्तनं वाकरोद्' इत्येवाकथयिष्यत्। रामस्तुतिकाव्यप्रणयनेन अयोध्यामात्रं शीतलीचकार इत्युक्तिः बिल्हणस्य प्रतिकूलैवाभाति। तत्काव्यं सकलजगतीतलं शीतलीकरोतु एतदेवोचितं वास्तविकञ्च प्रतीयते। किञ्चेदं प्रतीयते यत्कविः स्वसकलयात्रायां केवलमत्रैव विजितविद्वांसं सनामग्राह-

१. D.H.N.I. Vol. II. pp. 777-786.

२. विक्र० १८।९३।

३. विक्रमाङ्कदेवचरितभूमिका, सरस्वतीभवनप्रकाशनं, पृ० १२ टिप्पणी।

मुल्लिखति । एतच्च तदात्वे गङ्गाधरस्य लोकोत्तरयशोमण्डितत्वं गुणगणालङ्कृतत्वञ्च ध्वनयति। वाराणसी चिराय विद्याकेन्द्रमिति जनैर्न हि न विदितम्। ईदृशमहास्थले ईदृशलोकोत्तरविदुषो विजयं को न स्वीकुर्यात्, अन्यथा तु इयमुक्तिरेव निरर्थिका स्यात्। एवञ्चास्य विजयस्य सम्भवः काश्यामेवाऽधिकतरं सम्भाव्यो युक्तियुक्तश्च सिध्यति । कविरयोध्यां नूनं जगामेति सर्वात्मना निश्चीयते । रामस्तुतिकाव्यं तु कल्पनामात्रविषयमेव डा० व्युल्हरमहोदयस्येति निर्विवादोऽर्थः । संस्कृतविद्वन्मण्डली तत्काव्यमाधुरीवञ्चितेति प्रातिपादयन्नस्मन्मानसानि दुःखाकरोति डा० व्युल्हरमहोदयः । किञ्च सुभाषितग्रन्थेषु बिल्हणनामाङ्कितानि बहूनि पद्यानि उपलभ्यन्ते इति तदुक्तिः सङ्गतापि तदुक्तपद्यानां शृङ्गाररसमयत्वेन रामस्तुतिपरकत्वाभावेन च रामस्तुतिकाव्यनिर्माणं साधयितुं नैव समर्था । सहृदयवरिष्ठो विद्वदग्रेसरः कीथमहोदयः श्रीकृष्णमाचारियरमहोदयश्च रामस्तुतिकाव्यकथामेवान्वदतामिति[1] ।

कवेर्धारागमनम्

महाराजकर्णस्य राजधानीतः धारापतेर्भोजस्य राजधानीं धारामपि जगाम । परं प्रसिद्धः साहित्यधुरन्धरो विद्वान् श्रीमहावीरप्रसादद्विवेदिमहोदयः स्वविक्रमाङ्कदेवचरितचर्चायामित्थं प्रतिपादयति—

डाहलान्नातिदूर एव आसीद्राज्ञो भोजस्य राजधानी धारा, परं बिल्हणः भोजस्य कीर्तिं श्रुत्वापि न तत्र जगाम । मतमिदञ्चासौ इत्थं परिपुष्णाति—

प्राचीनशिलालेखैरेवं प्रतीयते यदन्हिलवादस्य राज्ञा भीमदेवप्रथमेन कर्णेन च भोजदेव आक्रान्त आसीत् । अतः सम्भाव्यते यत्कर्णभोजयोर्वैमनस्येनैव बिल्हणः धारां न जगाम । श्रीमतः महावीरप्रसादद्विवेदिमहोदयस्योक्तधारणाया इदमेव कारणमस्ति यत्तेन विक्रमाङ्कदेवचरितभूमिकाया एकोनविंशतितमे पृष्ठे व्युल्हरमहोदयप्रतिपादितं मतमनुसृतम्, यस्मिंश्च व्युल्हरमहोदयेन भोजस्य धारागमनं न स्वीकृतम् तस्य च कारणं कर्णभोजयोर्वैमनस्यमेव प्रतिपादितम्, यद्वशात्कर्णकृपापात्रं बिल्हणो धारां न ययौ । परं मतमिदमसङ्गतमस्ति । भोजराजः (ई० १०६०) वत्सरात्प्रागेव मृत्युमवाप[2] । बिल्हणश्च ई० १०६२-१०६५ वत्सरयोर्मध्ये काश्मीरान् जहौ, इति स्वयमेव व्युल्हरमहोदयः स्वीकरोति[3] । वक्ष्यमाणाद्विक्रमाङ्कदेवचरितस्य पद्यात्प्रत्यक्षं प्रतीयते यद्बिल्हणो

---

१. History of Sanskrit Literature, p. 153,
History of Classical Sanskrit Literature, p.164.

२. पुरुषोत्तमलाल भार्गव—प्राचीन भारत का इतिहास—पृ० ३८५ ।

३. व्युल्हरस्य विक्रमाङ्कदेवचरितभूमिका—पृ० २३ ।

धारां गतः, परन्नासीत्तदानीं भोजो जीवितः—

भोजक्ष्माभृत् स खलु न खलैस्तस्य साम्यं नरेन्द्रै-
स्तत्प्रत्यक्षं किमिति भवता नागतं हा हतास्मि।
यस्य द्वारोड्डमरशिखरक्रोडपारावतानां
नादव्याजादिति सकरुणं व्याजहारेव धारा[1] ॥

डा० व्युल्हरः श्लोकस्यास्य साध्वर्थं[2] कुर्वन्नपि कथं न बिल्हणस्य धारागमनं स्वीचकारेत्यत्र महदाश्चर्यं प्रकटयति श्रीमुरारिलालनागरमहोदयः स्वकीयविक्रमाङ्कदेवचरितभूमिकायाम्[3]। असौ किल बिल्हणस्य धारागमनमूरीकुर्वन् डा० व्युल्हरस्य भ्रन्तिमन्मतमित्थमपास्तवान्—'इति साध्वर्थं व्याचक्षाणोऽपि गृहीतविपरीततात्पर्योऽपि डा० व्युल्हरमहोदयोऽसङ्गतं मतं प्रत्यपादयत्। कवेर्धारायां साक्षाद्गमनाभावे 'भवता' इति पदं नैरर्थक्यं भजति। कथं नाम धारा कवेः सम्बोधनं कुर्यात्। भोजे जीवति हा हतास्मि इति खेदोक्तिरसङ्गतैव। स हि (डा० व्युल्हरमहोदयः) तत्प्रत्यक्षमित्यर्थपरकतया व्याचख्यौ। वस्तुतस्तु 'तस्मिञ्जीवति कथन्नागतो भवान्' इत्येव कवेरभिप्रेतोऽर्थः[4]।

कविः गुर्जरदेशे

धारानगरीतः बिल्हणो गुर्जरप्रदेशं प्राप, पथि च गुर्जरदेशवास्तव्यानां जनानां दर्शनेन, तेषामशुद्धभाषण-कक्षाबन्धनाभाव-जुगुप्सास्पदवस्तुनिषेवणादिभिश्च तस्यासीज्जुगुप्सा। तेषां दर्शनान्यशुभानि मन्यमानः कविः तद्दर्शनोद्भवं सन्तापं गुर्जरप्रदेशे सोमनाथदर्शनैरपाचकार[5]। इति तु निश्चप्रचं यदसौ महाकविः गुर्जरराजधान्याम् अण्हिलपाटनाभिधायां वसन् कर्णसुन्दरीनाटिकां रचयामास, अतोऽनुमीयते यदसौ कञ्चित्कालन्तत्रोवासापि। परं स्वाभिमानप्रकृतिहेतुत्वात्तस्य केनचिद्विपश्चिताथवा नृपेण वा सङ्घर्षोऽभूदित्यप्यनुमानविषय एव। एवमपि सम्भाव्यते, यद्विक्रमाङ्कदेवचरितस्य 'हे राजानस्त्यजत सुकविप्रेमबन्धे विरोधम्' इत्यादीनि पद्यानि सङ्घर्षमुपलक्षीकृत्य रचितानि स्युः।

---

१. विक्र० १८।९६।
२. विक्र० १८।९६। डॉ व्युल्हरस्य टिप्पणी।
३. श्रीमुरारिलालनागरस्य—विक्रमाङ्कदेवचरितभूमिका, पृ० १४।
४. श्रीमुरारिलालनागरस्य—विक्रमाङ्कदेवचरितभूमिका, पृ० १४।
५. विक्र० १८।९७।

कवेः दक्षिणयात्रा

सोमनाथदर्शनानन्तरं बिल्हणः पोतमारुह्य दक्षिणभारताभिमुखं प्रतस्थे। मार्गे केषु केषु स्थानेषु पोतादवतीर्ण इति तु नैव वक्तुं शक्यते, सम्भवतः कोङ्कणे गोकर्णस्य समीपेऽवतीर्णः स्यात्[1]। बहुकालं यावद्दक्षिणस्यां दिशि परिभ्रमन्नसौ रामेश्वरमगच्छत्। बिल्हणस्य समुद्रदर्शनं वक्ष्यमाणः श्लोकः प्रमाणयति—

तामप्येष क्षितिपतिशतालोकनौत्सुक्ययोगा-
दाचक्राम क्रमुकविटपिश्यामलामब्धिवेलाम्।
यत्र स्वेच्छा प्रसरमधुनाप्यम्बुराशेर्भिनत्ति
क्षिप्ततीक्ष्णप्रहरणमिषाद्भार्गवेणार्गलेव[2]॥

रामेश्वरदर्शनानन्तरमयं महाकविर्न लङ्कां जगामेति वक्ष्यमाणं पद्यं बोधयति—

खल्वाटत्वं शिरसि घटयन्नम्बुधेर्यश्चकासे
लङ्कानाथापहृततनयापृष्ठलग्नेव धात्री।
सीतावार्ताश्रवणचकितेवान्तिके राक्षसानां
सेतोस्तस्माद्यदि परमगान्नास्य कीर्तिः परस्तात्[3]॥

महाकविः कल्याणनगरे

समुद्रतीरात्प्रत्यावर्त्य चालुक्यकुलभूषणस्य विक्रमादित्यस्य (षष्ठस्य) कल्याणाभिधानां राजधानीमाजगाम। तदानीन्तनेषु दिवसेषु कल्याणचालुक्यवंशो भारतीयराजकुलानामलङ्कारतां भजमान आस्त। कल्याणनगरी च तात्कालिकानां भारतीयराजधानीनां मूर्धन्याद्भुतवैभवशालिनी चासीत्[4]। तस्याः शासको प्रतापी विक्रमादित्यः षष्ठोऽनुपमकाव्यरसिको विश्रुत आसीत्।

---

१. विक्रमाङ्कदेवचरितचर्चा, पृ० २२-२३, व्युल्हरस्य विक्रमाङ्कदेवचरितभूमिका, पृ० १९।

२. विक्र० १८।९८।

३. विक्र० १८।९९।

४. नासीदस्ति भविष्यति क्षितितले कल्याणकल्पं पुरं
नो दृष्टः श्रुत एव वा क्षितिपतिः श्रीविक्रमार्कोपमः।
विज्ञानेश्वरपण्डितो न भजते किञ्चान्यदन्योपम-
ञ्चाकल्पं स्थिरमस्तु कल्पलतिकाकल्पं तदेतत्त्रयम्॥ विज्ञानेश्वरस्य

अत एवासाववाप्तकल्याणनगरं महाकविं बिल्हणं सम्यक् सम्मान्य तस्मै मदोन्मत्तगजसमूहं नीलच्छत्रञ्च ददौ[1]। बिल्हणस्य पाण्डित्येन काव्यप्रतिभाऽऽदिभिर्गुणैश्च प्रभावितो गुणगणग्रहणाभिलाषोऽसौ कल्याणीश्वरो 'विद्यापतिः' इत्युपाधिविशेषेण विभूष्य तं स्वसभायां प्रधानपण्डितपदे प्रतिष्ठापयाञ्चकार। प्राप्तविशिष्टराजसम्मानो बिल्हणोऽपि स्वकीयगुणग्रामेणाप्रतिहतप्रतिभाप्रभावेण च तत्पदं मण्डयन् कल्याणनगरे वसतिं स्वीचकार। तत्र बहुविधान् राजभोगान् भुञ्जानः कमनीयकविताकामिन्या सहृदयहृदयान्यपहरन् चिरं यावदुवास।

कवेः राजकन्यया सह प्रणयकथा

महाकविबिल्हणसम्बन्धिनी अन्याप्येका कथा विद्वत्समाजे प्रथितास्ति। सा चेत्थं बिल्हणीयकाव्ये बिल्हणचरिते चोपनिबद्धास्ति—

गुर्जरदेशेऽन्हिलपत्तनाभिधाने नगरे वैरिसिंहाभिधो भूपतिः सम्बभूव। सुताराभिधाऽवन्तिराजतनयाऽऽसीत्तदीया महामहिमशालिनी महिषी। सुरतसुखमनुभवतोस्तयोः कालक्रमेणैका शशिकलेति नाम्नी कन्या समुत्पन्ना। सा च क्रमेण बाल्यं वयो यापयित्वा यौवनमधिरूढातिशयरूपलावण्यभाजनतामाससाद। नित्यं तदध्यापनचिन्ताक्रान्ते तदीयपितरि काश्मीरिकः कविर्बिल्हणस्तत्र समाजगाम। राजपुरोहिताश्च तं भूपतिसमीपं निन्युः। महीपतिरपि तद्विद्यावैभववैलक्षण्यं वीक्ष्य तन्मधुरमधुरां कविताञ्चाकर्ण्य नितरां प्रासीदत्। बहुविधसम्पत्तिसमर्पणपूर्वकञ्च तन्नियुक्तवान् शशिकलां पाठयितुम्। पितुराज्ञामनुसरन्ती शशिकलापि शुकसारकादिकां शैशवसुलभक्रीडां परित्यज्य स्वकीयं गुरुं सेवमाना स्वल्पैरेवाह्नोभिः सर्वमपि संस्कृतप्राकृतादिकञ्चाध्यैष्ट।

एकदा चातिसुरभिगन्धसञ्चाररुचिरे विविधाभिः सुमनोमालाभिः परिष्कृते राजप्रासादे बिल्हणो राजसुतां पाठयन्नासीत्। तस्मिन्नेवावसरे रूपश्रिया समुदिते विनयविद्याद्यनेकगुणगुम्फिते तस्मिन्कविवरे तदीया शिष्याऽऽसक्तिमभजत। एवञ्च नानाविधैर्हावभावैः स्वकीयश्चित्तं तदऽऽयत्तीचकार। दैवप्रेरितो मदनमोहितश्च बिल्हणोऽपि प्राग्जन्मजायायास्तस्याः प्रच्छन्नरूपेण गान्धर्वेण विधिना पाणिञ्जग्राह। मन्मथतन्त्रप्रतिपादिताभिर्बहुभिः केलिकलाभिर्विविधबन्धक्रिया-

---

१. नीलच्छत्रोन्मदगजघटापात्रमुत्त्रस्तचोला-
च्चालुक्येन्द्रादलभत कृती योऽत्र विद्यापतित्वम्।
अस्मिन्नासीत्तदनु निविडाश्लेषहेवाकलीला-
वेल्लद्बाहुक्वणितवलया संततं राजलक्ष्मीः॥ विक्र० १८।१०१।

भिश्च राजपुत्र्या मनोरञ्जनमकार्षीत् । इत्थं सुखमनुभवतोस्तयोः कतिचिद्दिनानि व्यतीतानि ।

तदनन्तरं शशिकलायाः तपनीयकान्तीन्यङ्गानि म्लायमानशिरीषपुष्पोपमानि सम्भोगचिह्नानि समीक्ष्य बिल्हणासक्तिरूपतदीयगूढचरितञ्च विज्ञाय राजपुरुषैः नृपो विज्ञापितः। राजापि वज्रपातसन्निभं तद्वचनमाकर्ण्य बिल्हणस्य शूलारोपणमादिदेश । तदैव वधिकैः शूलारोपणस्थलं नीतो बिल्हण उक्तश्च—

'हे वध्य ! साम्प्रतं सन्निहिता तव मृत्युर्निजाराध्यदेवस्य स्मरणादिकञ्च यत्त्वयास्ति करणीयम्, तत्त्वरितं कुरु' इति । बिल्हणोऽपि राजसुतासक्तमना मृत्युभीतिमप्यगणयन् 'अद्यापि तां कनकचम्पकदामगौरीम्' इत्यादीनि शशिलेखास्मरणरूपाणि पञ्चाशिकापद्यान्युदाजहार ।

अत्रान्तरे प्राणप्रियाया निजसुतायास्तस्मिन् गाढानुरागं स्वप्रियामुखादाकर्ण्य पौरैः परिजनैरमात्यैश्च बोधितो ब्राह्मणवधपातकभीरुर्नृपः परमेश्वरेच्छामेव तादृशीं मन्यमानो निवारयामास बिल्हणं शूलारोपणाद् । बहुग्रामगजतुरगादिसमृद्धिसमर्पणपूर्वकं स्वतनयां बिल्हणाय दत्तवान् ।

रहस्यसन्दर्भे लक्ष्मीमन्दिरराजदारिकाया यामिनीपूर्णतिलकायाः सनामोल्लेखं बिल्हणेन सह तदीया प्रणयाख्यायिका प्रकारान्तरेण वर्णितोपलभ्यते । सा चेत्थम्—

मदनाभिरामनामा नृपतिः स्वपुत्रीं यामिनीपूर्णतिलकां शिक्षयितुं शिक्षकत्वेन बिल्हणं नियुक्तवान् । तदर्थञ्चेतादृशीं व्यवस्थाञ्चकार, यया तावध्ययनाध्यापनरतौ परस्परं नावलोकयेताम् । अतो राजकन्या कुष्ठरोगपीडितेति बिल्हणम्, अन्धोऽयं बिल्हण इति च राजकन्यामचकथत् ।

अथ बिल्हणयामिनीपूर्णतिलकयोर्मध्ये यवनिकां विधाय तयोरध्ययनाध्यापनस्य उपक्रमः समभूत् । तीव्रधिषणा यामिनीपूर्णतिलका त्वरितमेव नानालङ्कारेषु नानाभावसमन्वितेषु काव्यादिषु नैपुण्यमाससाद । एकदा सायन्तने पूर्णिमाचन्द्रमसमवलोकयन् बिल्हणः काव्यमयीं गिरमित्थं व्याजहार—

नेदं नभोमण्डलमम्बुराशिः नैताश्च ताराः नभफेनभङ्गाः ।
नायं शशिः कुण्डलितः फणीन्द्रो नायं कलङ्कः शयितो मुरारिः ॥

अन्यच्च

इन्दुमिन्दुमुखि लोकय लोकं भानुरश्मिभिरमुं परितप्तम् ।
वीजितं रजनीहस्तगृहीतं तालवृन्तमिव नालविहीनम् ॥

इत्यादिकां बिल्हणस्यापूर्वां कवितामाकर्ण्य राजकुमारी बिल्हणस्यानन्धत्वं विवेद। पित्रा चाहं प्रतारितेत्यपि ज्ञातवती। अतोऽसौ यवनिकामपसार्य बिल्हणं ददर्श। तद्दिनादारभ्य तयोः प्रणयव्यवहारः प्रचलितः। कतिचिद्दिनानन्तरं गूढरूपेण गान्धर्वेण विधिना यामिनीपूर्णतिलकामुपयेमे बिल्हणः। ज्ञातोदन्तो मदनाभिरामो राजा कोपज्वालापुञ्जपिञ्जरितो बिल्हणः शूलमारोप्यतामित्यादिदेश। वधार्थं शूलारोपणस्थलं नीतो बिल्हणस्तत्रैव वधस्थले स्वप्रेमिकायाः सम्भोगदिनानि चिन्तयन् पञ्चाशिकापद्यानि अरचयत्।

वृत्तमिदं कवेः जीवनचरितेन सम्बद्धं न वेत्यत्र विवादो विद्वत्सु वरीवर्ति। पूर्वोक्तकथाया ग्रन्थद्वये पाठभेदस्योपलभ्यमानतया विश्वासार्हनीयतायां विचिकत्सासमावेशः स्वाभाविक एव प्रतिभाति। डा० व्युल्हरमहोदयोपि कथाया अस्याः बिल्हणचरितसम्बन्धे न विश्वासार्हतां स्वीकरोति[1]।

कवेः कृतयः

महाकवेर्बिल्हणस्य सर्वोत्कृष्टा कृतिः विक्रमाङ्कदेवचरितं महाकाव्यमस्ति। कल्याणनगरे महतैश्वर्येण जीवनं यापयन् महाकविरयं स्ववार्द्धक्ये विक्रमाङ्कदेवचरितं महाकाव्यं रचयामासेति निश्चप्रचम्। अयं ग्रन्थोऽष्टादशसर्गात्मकं सम्पूर्णं महाकाव्यं वर्तते, परम् एम० कृष्णमाचारियरमहोदयोऽस्य काव्यस्य पूर्णतायां विचिकित्सते[2]। तेन विक्रमबिल्हणयोर्दौर्मनस्यकारणवशात्काव्यमिदमपूर्णमिति प्रतिपाद्यते। तत्र च विक्रमाङ्कदेवस्य १०८५ तमे खिृष्टाब्दे नर्मदापरतटाभियानवर्णनाभाव एव कारणं प्रदर्श्यते। काव्यान्तिमपद्यान्यपि तयोर्मतभेदसूचकानीत्यपि श्री आचार्यमहोदयस्य मतं न युक्तियुक्तम्[3]। यतो हि—

> **दिङ्मातङ्गैरपि सपुलकैः शुश्रुवे यस्य कीर्ति-**
> **र्निद्रामुद्राप्रणयिषु मदास्वादतः षट्पदेषु।**
> **तेन प्रीत्या विरचितमिदं काव्यमव्याजकान्तं**
> **कर्णाटेन्दोर्जगति विदुषां कण्ठभूषात्वमेतु[4]॥**

विक्रमाङ्कदेवचरितस्य अस्मात्पद्यात परिस्फुटं प्रतीयते यद्विक्रममहीपतेः कीर्तिगायनं कुर्वता सानन्दं महत्या प्रीत्या च काव्यमिदं कविना विरचितमिति।

---

१. मुरारिलालशर्मा—विक्रमाङ्कदेवचरितभूमिका, पृ० १५।
२. History of Classical Sanskrit Literature p. 164-165.
३. श्रीमुरारिलालनागरशर्मा—विक्रमाङ्कदेवचरितभूमिका, पृ० १६।
४. विक्र० १८।१०२।

विरोधभावनामाकलयतः कवेः काव्यान्तिमपद्येषु उक्तश्लोकस्योत्तरार्धस्तु नैव सङ्गच्छते ।

एवञ्च महाकाव्यस्यान्तिमः श्लोकोऽपि उपसंहारात्मको दरीदृश्यते ।

यस्य स्वेच्छाशबरचरितालोकनत्रस्तयेव
न्यस्तश्चूडाशशिकलिकया क्वापि दूरे कुरङ्गः ।
स व्युत्पत्तिं सुकविवचनेष्वादिकर्ता श्रुतीनां
देवः प्रेयानचलदुहितुर्निश्चलां वः करोतु[1] ॥

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि' इतीमामुक्तिमनुसृत्य काव्यस्य आरम्भे मध्ये अन्ते च मङ्गलसूचकानि पद्यान्युपनिबध्य कविः स्वकीयं महाकाव्यमुपसंहृतवान्[2] । तथा च सप्तदशसु सर्गेषु महाराजस्य विक्रमाङ्कदेवस्य चरितं सम्यगुपनिबध्याष्टादशतमे सर्गे तात्कालिककाश्मीरनृपतीनां स्वकीयञ्च परिचयमुपनिबद्धवान् विक्रमाङ्कदेवस्य नर्मदापरतटाभियानस्य वर्णनाभावस्येदमेव कारणं भवितुमर्हति, यदस्य काव्यस्य रचना तदभियानस्य पूर्वमेव सम्पन्नासीत् । यद्यपि वक्ष्यमाणं विक्रमाङ्कदेवचरितस्य श्लोकद्वयं तयोर्वैमनस्यभ्रान्तिमुत्पादयति तथापि विषयस्य सम्यगनुशीलनेन भ्रान्तिनिराकरणमपि भजते ।

स्वेच्छाभङ्गुरभाग्यमेघतडितः शक्या न रोद्धुं श्रियः
प्राणानां सततप्रयाणपटहश्रद्धा न विश्राम्यति ।
त्राणं येऽत्र यशोमये वपुषि वः कुर्वन्ति काव्यामृतै-
स्तानाराध्य गुरून्विधत्त सुकवीन्निर्गर्वमुर्वीश्वराः[3] ॥
हे राजानस्त्यजत सुकविप्रेमबन्धे विरोधं
शुद्धा कीर्तिः स्फुरति भवतां नूनमेतत्प्रसादात् ।
तुष्टैर्बद्धं तदलघु रघुस्वामिनः सच्चरित्रं
रुष्टैर्नीतस्त्रिभुवनविजयी हास्यमार्गं दशास्यः[4] ॥

एतत्पद्यद्वयं विक्रमबिल्हणयोर्वैमनस्यं प्रमाणयत इति नैव युज्यते वक्तुम् । यतो हि कवेरियं धारणा अतीव बलवती परिपुष्टा चासीत्, यत्कविरेकः प्रजापति-

---

१. विक्र० १८।१०८ ।

२. अन्यकाव्यानां मङ्गलान्तत्वम्—किरातार्जुनीयम् १८।४८ ।
श्रीकण्ठचरितम्—२५।१५२ ।

३. विक्र० १८।१०६ ।

४. विक्र० १८।१०७ ।

रस्ति, अतोऽसौ यं यशोन्वितं चिकीर्षति तं तथा चर्कर्ति। यस्य च कीर्तिमपचिकीर्षति तदीयाञ्च तथा विदधाति।

विरोधे सत्येव चेत्कविः काव्यान्ते विरोधसङ्केतमूलकं श्लोकद्वयमलिखिष्यत्तर्हि प्रथमसर्गे समानार्थप्रतिपादकं श्लोकत्रयं[1] नारचयिष्यत्। किञ्च अयमेव भावोऽन्यत्राप्युपलभ्यते। अतो निश्चीयते यत्काव्यान्ते कविः स्वीयां धारणां परिपोषयितुमेव तच्छ्लोकद्वयमरचयत्, न तु विक्रम-विरोधप्रकाशनाय। एवमपि सम्भाव्यते यत्स्वकीययात्रायां अनेकेषां राज्ञां सभासु जगामाय महाकविस्तत्र कैश्चित्कुनृपैरुपेक्षितः स्यात्तानेव लक्ष्यीकृत्य वागियं व्यवहृता स्यात्। यतो हि कुनृपदर्शनं स्वयमेव कविना स्वीकृतम्—

'स्नात्वा दैवोपनतकुनृपालोकनोत्थः कलङ्कः[3]'

अत इदं स्पष्टीभवति, यन्नासीद्बिल्हणविक्रमयोः विरोधः, यस्य कारणाद् बिल्हणेन काव्यमिदमपूर्णमेव परित्यक्तम्। उक्तं विरोधमूलकं पद्यद्वयं न केवलं विक्रमाङ्कदेवमेव, अपि तु सकलनृपतीनुद्दिश्य बिल्हणेन व्याहृतम्[4]। चौरपञ्चाशिकायाः काश्मीरिके संस्करणे आदावेव समुपलभ्यमानं श्लोकद्वयं विक्रमबिल्हणविरोधस्वीकारेऽस्माकं ध्यानमाकर्षति—

---

१. किं चारुचारित्रविलासशून्याः कुर्वन्ति भूपाः कविसङ्ग्रहेण।
किं जातु गुञ्जाफलभूषणानां सुवर्णकारेण वनेचराणाम्॥
विक्र० १।२५।

पृथिवीपतेर्यस्य न सन्ति पार्श्वे कवीश्वरास्तस्य कुतो यशांसि।
भूपाः कियन्तो न बभूवुरुर्व्यां जानाति नामापि न कोऽपि तेषाम्॥
विक्र० १।२६।

लङ्कापतेः सङ्कुचितं यशो यद् यत्कीर्तिपात्रं रघुराजपुत्रः।
स सर्व एवादिकवेः प्रभावः न कोपनीयाः कवयः क्षितीन्द्रैः॥
विक्र० १।२७।

२. भुजवनतरुच्छायां येषां निषेव्य महौजसां जलधिरशना मेदिन्यभूदकुतोभया।
स्मृतिमपि न ते यान्ति क्ष्मापा विना यदनुग्रहं प्रकृतिमहते तस्मै नमः कविकर्मणे॥
राजतरङ्गिणी

३. विक्र० १८।९२।
४. मुरारिलालशर्मणः—विक्रमाङ्कदेवचरितभूमिका, पृ० १६।

सर्वस्वं गृहवर्तिकुन्तलपतिर्गृह्णातु तन्मे पुन-
भाण्डागारमखण्डमेव हृदये जागर्ति सारस्वतम् ।
रे क्षुद्रास्त्यजत प्रमोदमचिरादेष्यन्ति मन्मन्दिरं
हेलान्दोलितकर्णतालकरटिस्कन्धाधिरूढं श्रियः ॥

अयि किमनिशं राजद्वारे समुद्धरकन्धरे
कुवलयदलस्निग्धे मुग्धे विमुञ्चसि लोचने ।
अमररमणीलीलावलाद्विलोचनवागुरा-
विषयपतितो न व्यावृत्तिं करिष्यति बिल्हणः ॥

अनेन श्लोकद्वयेन सूच्यते विक्रमबिल्हणविरोधस्यावश्यम्भाविता । विरोधश्चायं बिल्हणेन विक्रमाङ्कदेवचरितरचनायाः प्रागेव सम्भाव्यते नह्यन्ते[1] । अस्मिन् विषये मुरारिलालमहोदयस्यापि विरोधस्यादावेव सम्भावना अभिमता विक्रमाङ्कदेवचरितस्य भूमिकायां दरीदृश्यते ।

पुरा राजसभासु नूतनविद्वत्प्रवेशो नासीत्सुकरः । नूतनविदुषि राजप्रीत्यतिशयितां गते राजपण्डितास्तं पराभूय, परिपीड्य, कोपभाजनीकृत्य यथाकथञ्चन राजसभाया दूरीकर्तुमचेष्टन्त । विक्रमसभापण्डिता बिल्हणेनापि दुर्व्यवहृत्य केनचित्कपटप्रयोगेण राजप्रकोपपात्रमकुर्वन्निति न खलु न सम्भाव्यम्[2] ।

कर्णसुन्दरी

नाटिकेयं गुर्जरदेशस्य राज्ञः कर्णदेवस्य एवं विद्याधरकन्यायाः प्रणयकथामाधारीकृत्य विरचिता बिल्हणेन । अस्याः नाटिकायाश्चत्वारः अङ्काः सन्ति । अस्यां नाटिकायामपि प्रत्यक्षं कालिदासस्य प्रभाव इति केषाञ्चिद्विदुषां मतम्[3] ।

चौरपञ्चाशिका

चौरपञ्चाशिका बिल्हणकृता न वेत्यस्ति विद्वत्सु विवादः । टीकाकारः रामतर्कवागीशः (१७९८ ईस्वीयः) साग्रहं प्रातिपादयति, यद्विद्यया सह गुप्तप्रणयकारणाच्चौरपल्लिराजकुमाराय सुन्दराय मृत्युदण्ड आदीयत, प्रस्तुतकाव्यं तेनैव कृता कालिकाप्रार्थनास्ति । तेन काव्यशीर्षकस्य व्याख्या इत्थं क्रियते—

चौर इति नाम्ना सूच्यते यच्चौरनामायं कविः येन इमानि पद्यानि निर्मितानीति[4] । श्रीदुर्गाशंकर के० शास्त्री अपि चौरपञ्चाशिका बिल्हणकृतैव इत्यत्र

१. मुरारिलालशर्मणः— विक्रमाङ्कदेवचरितभूमिका, पृ० १६ ।
२. मुरारिलालशर्मणः— विक्रमाङ्कदेवचरितभूमिका, पृ० १५ ।
३. चौरपञ्चाशिकाभूमिका, पृ० ७ ।
४. संस्कृत साहित्य का इतिहास—अनु० डा० मंगलदेवशास्त्री, पृ० २२८ ।

स्वमतं प्रकटीचकार, तस्य चाधारतया वक्ष्यमाणं श्लोकं स्वीचकार—

श्रीमद्विक्रमधीरराजकुमुदश्चन्द्रप्रकाशकृतः
भूतं वेदयुगञ्च चन्द्रसहितमब्दे गते संख्यया।
एते अब्दगतेऽपि चौरकविना काव्यं कृतं सङ्ग्रहः
श्रीमत्पण्डितधीरसत्सुधिकविः श्रीभट्टपञ्चाननः॥

डा० व्युलहरमहोदयैः विक्रमाङ्कदेवचरितभूमिकायां चौरपञ्चाशिकायाः बिल्हणकृतित्वेन स्वीकारे कारणत्रयमस्ति, इति प्रतिपादितम्—

चौरपञ्चाशिकाया भिन्नभिन्नपाण्डुलिप्योः राज्ञः तत्सुतायाश्च नामविभेदः प्रथमं कारणम्। एकस्याञ्च पाण्डुलिपौ कवेश्चौर इति नाम व्यपदिष्टमिति द्वितीयं कारणम्। विक्रमाङ्कदेवचरितस्य अष्टादशे सर्गे चौरपञ्चाशिकाविषये न कोऽपि सङ्केतः दरीदृश्यते, इति तृतीयं कारणम्।

उपर्युक्तकारणत्रयं स्वीकृत्यापि डा० व्युल्हरमहोदयः पञ्चाशिकां बिल्हणकृतित्वेनैव स्वीचकार। कीथमहोदयः पञ्चाशिकां बिल्हणकृतित्वेनैव अङ्गीकरोति[1]। डा० व्युल्हरमहोदयस्य डा० कीथमहोदयस्य च नास्माभिः गड्डलिकाप्रवाहेण अनुसरणं कर्तव्यम्, पर स्वतन्त्रविवेचनं कृत्वा सिद्धान्तगवेषणायां प्रयतद्भिरिदं प्रतिपाद्यते, यद् बिल्हणस्य पदविन्यासो यादृग्विक्रमाङ्कदेवचरिते दृश्यते, चौरपञ्चाशिकायामपि तत्सादृश्यं वर्तते। विक्रमाङ्कदेवचरितेऽपि चौरपञ्चाशिकावत् प्रसादगुणगुम्फिता शैली समाश्रिता। शैल्यामभेददर्शनात्, पञ्चाशिकाबिल्हणकृता नास्तीति मन्यमानानां विदुषां मतमसङ्गतमेव। इत्युक्ति समर्थयितुमयं सन्दर्भः प्रमाणत्वेन संस्थाप्यते—

चौरपञ्चाशिकापद्येषु 'अद्यापि तां कनकचम्पकदामगौरीम्' इति पदावली प्रयुक्तावलोक्यते। विक्रमाङ्कदेवचरितस्य नवमसर्गस्य त्रिंशत्तमे श्लोकेऽपि 'चम्पकदामगौरी'ति पदावली बिल्हणेन प्रयुक्तास्ति[२]। इत्थमुभयत्र समानपदावलीप्रयोगदर्शनात् पञ्चाशिका बिल्हणकृतैवेति वयं स्वीकर्तुं शक्नुमः।

कवेः कालः

बिल्हणः सुस्पष्टरूपेण यद्यपि कमपि सङ्केतं विक्रमाङ्कदेवचरिते न

---

१. Of purely erotic type is the Chaura panchasika which is certainly written by Bilhana, author of Vikramanka Deva Charitam.—Classical Sanskrit Literature, p. 120.

२. तथा गता चम्पकदामगौरी शरीरयष्टिः कृशतां कृशाङ्ग्याः।
यथा गलच्चापमनोरथोऽस्यां मौर्वीलतास्थां मदनः करोति॥
—विक्र० ९।३०।

कृतवान् तर्हि अपि अन्यैरैतिहासिकग्रन्थैः तस्य कालज्ञाने साहाय्यं क्रियते। तस्य कालनिर्णयात्पूर्वमस्माभिः काश्मीरनृपतेः कलशस्य तत्पुत्रस्य हर्षस्य कुन्तलपतेर्विक्रमादित्यस्य च कालो निर्णेतव्यः। यतो हि बिल्हणः कलशस्य राज्यकाले काश्मीरेभ्यः विनिर्गत्य भारते बहुषु देशेषु पर्यटन् चालुक्यराजधानीं कल्याणनगरीमागत्य विक्रमादित्यस्य राजसभामलञ्चकार। अनन्तरञ्च काश्मीरेषु कलशपुत्रस्य हर्षस्य कविताकलाभिरुचिं दानवीरत्वञ्च निशम्य काश्मीरान् पुनः गन्तुमैच्छत्। अस्मिन्विषये कल्हणस्य राजतरङ्गिणीस्थं पद्यद्वयमत्रोपन्यस्यते—

काश्मीरेभ्यो विनिर्यातं राज्ये कलशभूपतेः।
विद्यापतिं यः कर्णाटश्चक्रे पर्माडिभूपतिः॥
त्यागिनं हर्षदेवं हि मत्वा सुकविबान्धवम्।
बिल्हणो वञ्चनां मेने विभूतिं तावतीमपि॥

कलशस्य राज्यकालः ई० १०६२ तः ई० १०८९ खिष्टाब्दोऽस्ति। एवञ्च विक्रमस्य (षष्ठस्य) कालः १०७६ तः ११२६ खिष्टाब्दोऽस्ति। हर्षस्य राज्यारोहणकालश्च १०८९ खिष्टाब्दो वर्तते। इत्थं बिल्हणस्य काश्मीरत्यागकालः १०६२ तः १०६५ खिष्टाब्दवर्षस्य मध्ये वर्तते, परं श्रीवाचस्पतिगैरोलामहोदयः बिल्हणस्य काश्मीरत्यागकालं १०५० तमं खिष्टाब्दवर्षं स्वीकरोति[2]। बिल्हणस्य विक्रमाङ्कदेवचरितरचनायाः कालः १०८८ खिष्टाब्दतः प्रागेवास्ति[3]। यतो हि बिल्हणः तस्मिन्नेव वर्षे नर्मदापरतटमहाभियानं नावर्णयद् विक्रमाङ्कदेवचरिते विक्रमस्य। डा० व्युल्हरमहोदयश्चापि स्वकीयविक्रमाङ्कदेवचरितभूमिकायां विक्रमाङ्कदेवचरितस्य रचनाकालं १०८५ खिष्टाब्दवर्षस्य नेदीयसि स्वीचकार। बिल्हणः काश्मीरत्यागात्पूर्वमेव समस्ता विद्याः पठित्वा काश्मीरेभ्यो विनिर्जगाम, निर्गमनकालेऽसौ युवा एवासीत्। इति तु निश्चप्रचमेव यद् बिल्हणेन विक्रमाङ्कदेवचरितस्य रचना स्ववार्द्धक्ये कृतासीत्। अतोऽनुमानतः १०२० तः १०९० खिष्टाब्दः, अथवा तन्निकटतमश्च काल एव बिल्हणकालो भवितुमर्हति।

---

१. डा० व्युल्हरस्य विक्रमाङ्कदेवचरितभूमिका, पृ० २३।
२. वाचस्पति गैरोला—संस्कृत साहित्य का इतिहास, पृ० ८७४।
३. संस्कृतसाहित्य का इतिहास—अनु० डा० मंगलदेवशास्त्री, पृ० १८८।
४. संस्कृतकाव्यकार, पृ० ५०१।

आयुषोऽन्तिमदिनेषु कवेः स्थितिः

विक्रमाङ्कदेवचरितस्य रचनानन्तरं कुत्राभूद् बिल्हणस्य स्थितिरिति नाद्यापि केनचिदितिहासकारेण स्पष्टीकृतम्। राजतरङ्गिणीस्थपद्येन[1] अनुमीयते यद् बिल्हणः कुन्तलेन्द्रविक्रमादित्येन प्रदत्तं सम्मानं परित्यज्य पुनः काश्मीरान् गन्तुमैच्छत्। विक्रमाङ्कदेवचरितस्य वक्ष्यमाणादपि पद्यात्तस्य काश्मीरगमनेच्छा प्रत्यक्षमवगम्यते—

लब्धा लक्ष्मीर्दिशि दिशि कृताः सम्पदः साधुभोग्याः
प्राप्ता योग्यैः सह कलहतः कुत्र नोच्चैः जयश्रीः।
गोष्ठीबन्धः सपदि सुजनैः सारनिष्कर्षदक्ष-
प्रज्ञालब्धस्तुतिभिरचिरादस्तु काश्मीरिकैर्मे[2] ॥

नात्र सन्देहः यदसौ स्वायुषोऽन्तिमे चरणे काश्मीरगमनमियेष। काश्मीरांश्चेदगमिष्यत्कविः, तर्हि राजतरङ्गिण्यामेव तस्य काश्मीरागमनं कथं सुस्पष्टरूपेण न अङ्गीचकार कल्हणः, बिल्हणस्य सूक्ष्मैतिहासिकघटनाक्रमस्यापि तेन स्वराजतरङ्गिण्यां निर्देशोऽकारि, बिल्हणस्य काश्मीरागमनं न तेन कुत्रापि स्वीकृतम्, अत इच्छामात्रेणैव तस्य काश्मीरगमनं न सङ्गच्छतेतराम्। नापि च तत्र कल्याणे स्थितिः स्वीकर्तुं शक्यते यतो हि यदि तस्य १०८८ खिष्टाब्दतः अनन्तरं कल्याणनगरे स्थितिः स्वीक्रियेत, तर्हि कथन्न तेन तस्मिन्नेवाब्दे विक्रमादित्यस्य (षष्ठस्य) नर्मदापरतटे ऐतिहासिकं महाभियानमवर्णि। अथेदं १०८८ खिष्टाब्दतोऽनन्तरमथवा विक्रमाङ्कदेवचरितस्य रचनाया अनन्तरं नासीत्तस्य कल्याणेऽपि स्थितिरिति। यदि नासीत्कविः कल्याणनगरे, न च काश्मीराननपि जगाम, तर्हि कुत्र तस्य स्थितिः स्वीक्रियेत इत्यत्र विचार्य्यते—

सम्भवतो बिल्हणेन काश्मीरगमनविचारोऽपि पश्चात्स्थगितः स्यात्, यतो हि यस्मिन् पद्ये तेन काश्मीरगमनेच्छा प्रकटितातस्मादग्रिम एव पद्ये तेन गङ्गास्नानस्याभिलाषः प्रकटितः। कविना स्वीकृतं यत्तेन पण्डिताः वादकथासु पराजिताः, नैकविधैः राजभिः प्रदत्तास्सम्पद उपभुक्ताः, इत्यादीनि कर्माणि कुत्सितानि अत एतदर्थं प्रायश्चित्तं चिकीर्षता स्वजीवनस्यान्तिमेषु दिनेषु ब्रह्मज्ञानमासाद्य गङ्गास्नाने स्पृहा प्रदर्शिता—

आरुक्षाम नृपप्रसादकरिणामद्राक्ष्म लक्ष्मीलवान्
किञ्चिद् वाङ्मयमध्यगीष्महि गुणैः कांश्चित्पराजेष्महि।

१. राजतरङ्गिणी—७।९३८।
२. विक्र० १८।१०३।

इत्यज्ञानमयीमकार्ष्म कियतीं नानार्थकन्थां मनः
स्वाधीनीकृतशुद्धबोधमधुना वाञ्छत्यमर्त्यापगाम्[१] ।। इति ।

अतोऽनुमीयते यत् तेन प्रतिपादितानां कुकृत्यानां प्रायश्चित्तं कुर्वता कुत्रचिद् गङ्गातटेऽज्ञातवासः स्वीकृतः स्यात् । यतो हि विक्रमाङ्कदेवचरितस्यान्तेऽन्यत्रापि एकस्मिन् स्थले गङ्गावासिनां श्लाघ्यतां प्रतिपादयतः कवेर्गङ्गावासस्य बलवती इच्छास्माकं दृष्टिपथमवतरति—

मन्दाकिन्याः पवनचटुलोत्तालवीचिदुकूले
कूलोत्सङ्गे विरचितवतां योगनिद्राभियोगम् ।
शेषाः केषामपि परिणतौ वासराः पुण्यभाजां
शान्तस्वान्तस्थितगिरिसुतावल्लभानां प्रयान्ति[२] ।।

श्लोकस्यास्य सूक्ष्मेण परिशीलनेनावगम्यते यत्कविना प्रयुक्तेन 'परिणतौ शेषा वासराः केषामपि पुण्यभाजां शान्तस्वान्तस्थितगिरिसुतावल्लभानां प्रयान्ति' इत्युत्तरार्धेन शेषा वासरा गङ्गाकूले यापयितव्या इति ।

कवेरास्तिकत्वम्

महाकविर्बिल्हणः बाल्यादेव अतीव प्रतिभावानासीत्,[३] अत एवायं वेदेषु शास्त्रेषु अन्यस्मिन्नपि वाङ्मयेऽप्रतिहतगतिरासीत् । कविरयं स्वकीयपूर्वजानां कर्मकाण्डप्रकाण्डत्वप्रतिपादने महद्गौरवमनुभवति । अतोऽनुमीयते यदासीत् कविवरस्य कर्मकाण्डेऽपि महती आस्था । विक्रमाङ्कदेवचरिते बहुषु स्थलेषु[४] यज्ञहविषामुल्लेखदर्शनेन तस्य कर्मकाण्डपाण्डित्यमपि सूच्यते । तत्र निदर्शनं यथा—

गर्जद्वातायनविततयः शास्त्रगोष्ठीगरिष्ठै-
स्ताः काष्ठीलद्विजवसतयो यत्र नेत्रोत्सवाय ।
यासु त्रासं विदधति कलेर्दर्शनादेव विप्राः
सायं प्रातः प्रहुतहुतभुग्धूमधूम्रैः शिरोभिः[५] ।।

अत्र हि सायं प्रातः प्रहुतहुतभुग्धूम्रैः शिरोभिः कलित्रासस्तस्य कर्मकाण्डप्रका-

१. विक्र० १८।१०४ ।
२. विक्र० १८।१०५ ।
३. विक्र० १८।७४, ७५ ।
४. विक्र० १।६७, ६६ ।
५. विक्र० १८।२५ ।

ण्डत्वं सूचयति । यत्र यज्ञहविषामुल्लेखस्तस्यास्तिकत्वमासूत्रयति तत्रैव मन्दिराणां मठानां सादरमुल्लेखः तेषु च देवप्रतिमानां सभक्तिभावं वर्णनमपि तस्य धर्मपरायणतामेव द्योतयति—

कृत्वा मध्ये मठमनुपमोत्तुङ्गदुर्गानुकारं
वैतस्तेन ग्रथितपरिखारेखमम्भोभरेण ।
लग्नाः शृङ्गैर्नभसि विजयक्षेत्रभट्टाग्रहाराः
प्राकारत्वं कलिभियभिदे येन धर्मस्य नीताः[1] ॥

अत्र परिखारेखाम्भोभरैः मठस्य प्राकारत्वं धर्मस्य रक्षार्थमेवेति प्रतिपादयतः कवेर्धर्मपरायणत्वं प्रत्यक्षमेव दरीदृश्यते । अन्यत्रापि काव्येऽस्मिन् बहुषु स्थलेषु मन्दिराणां मठानाञ्च सादरमुल्लेखोऽकारि कविना[2] । कवेरास्तिक्यभावस्य पूर्णपरिचयस्तु महाकाव्यस्य आदावेवोपलभ्यते । कविना महताऽऽदरेण स्वकीयमहाकाव्यस्योपक्रमे श्रीकृष्णविष्णुपार्वतीशङ्करसरस्वत्यादीनां देवतानां नामनिर्देशेन[3] नमस्कारात्मकं मङ्गलाचरणं कृतम् । अतो नात्र सन्देहः यदयं महाकविर्बिल्हण आसीत्परमास्तिको धार्मिकश्च ।

---

१. विक्र० १८।३९ ।

२. विक्र० १८।४६ ।

३. श्रीकृष्णस्य—भुजप्रभादण्ड इवोर्ध्वगामी स पातु वः कंसरिपोः कृपाणः ।
यः पाञ्चजन्यप्रतिबिम्बभङ्ग्या धाराम्भसः फेनमिव व्यनक्ति ॥

श्रीविष्णोः— श्रीधाम्नि दुग्धोदधिपुण्डरीके यश्चञ्चरीकद्युतिमातनोति ।
नीलोत्पलश्यामलदेहकान्तिः स वोऽस्तु भूत्यै भगवान्मुकुन्दः ॥
वक्षःस्थली रक्षति सा जगन्ति जगत्प्रसूतेर्गरुडध्वजस्य ।
श्रियोऽङ्गरागेण विभाव्यते या सौभाग्यहेम्नः कषपट्टिकेव ॥

पार्वत्याः—एकस्तनस्तुङ्गतरः परस्य वार्तामिव प्रष्टुमगान्मुखाग्रम् ।
यस्य प्रियार्धस्थितिमुद्वहन्त्याः सा पातु वः पर्वतराजपुत्री ॥
विक्र० १।१-४ ।

शिवस्य— पार्श्वस्थपृथ्वीधरराजकन्याप्रकोपविस्फूर्जितकातरस्य ।
नमोस्तु ते मातरिति प्रणामाः शिवस्य सन्ध्याविषया जयन्ति ॥

सरस्वत्याः—वचांसि वाचस्पतिमत्सरेण साराणि लब्धुं ग्रहमण्डलीव ।
मुक्ताक्षसूत्रत्वमुपैति यस्याः सा सप्रसादास्तु सरस्वती वः ॥

गणेशस्य— अशेषविघ्नप्रतिषेधदक्ष-मन्त्राक्षतानामिव दिङ्मुखेषु ।
विक्षेपलीला करशीकराणां करोतु वः प्रीतिमिभाननस्य ॥
विक्र० १।६-८ ।

कवेः शैवत्वम्

प्रायः काश्मीरिकाः शैवा एव भवन्ति, अतो बिल्हणोऽपि शैव आसीदित्यत्र न सन्देहः। एतावदेव प्रतिपाद्य तस्य शैवत्वसाधनं नोचितमतोऽत्र प्रमाणान्तराण्यप्युपन्यस्यन्ते। अस्मिन्काव्येऽन्यदेवानामपेक्षया शिवस्य नामाधिक्येन सम्प्रकीर्तितम्। कविना स्वकाव्यनायकस्य तत्पितुश्चापि शैवत्वं प्रातिपादितम्। नायकस्य शैवत्वेन कविना स्वकीयमेव शैवत्वं प्रकारान्तरेण सूचितम्। तद्यथा—

विधाय शान्त्यै कलुषस्य कर्मणस्तदेष सर्वेन्द्रियतापनं तपः।
नयामि भक्त्या झटिति प्रसन्नतामखण्डया खण्डशशाङ्कशेखरम्[1]॥

यथास्मिन्पद्ये तथैवान्यत्राप्यस्मिन्महाकाव्ये स्थाने स्थाने भगवतः शिवस्य महत्या भक्त्या आदरेण च मङ्गलकरैर्नामभिः स्वकीयमिदं काव्यं पवित्रीकृतं कविना। कवेः शैवत्वं प्रतिपादयद्भिरस्माभिः सर्वेषामपि शिवसम्बन्धिनां स्थलानां पर्यालोचनं कर्तव्यमेव। सर्वप्रथमं मङ्गलाचरणे[2] अन्यत्रापि बहुषु स्थलेषु[3] च शिवस्य नामालोकयद्भिरस्माभिस्तस्य शैवत्वं स्वीक्रियते। महाकविर्बिल्हणः

कवीश्वराणाम्—जयन्ति ते पञ्चमनादमित्रचित्रोक्तिसन्दर्भविभूषणेषु।
सरस्वती यद्वदनेषु नित्यमायाति वीणामिव वादयन्ती॥
विक्र० १।१०।

१. विक्र० २।४२।
२. नमोस्तु ते मातरिति प्रणामाः शिवस्य सन्ध्याविषया जयन्ति।— विक्र० १।६।
३. क—नयामि भक्त्या झटिति प्रसन्नतामखण्डया खण्डशशाङ्कशेखरम्। विक्र० २।४२।
ख—विभावरीवल्लभखण्डमण्डनः स यावदायाति दयां जगद्गुरुः। विक्र० २।४१।
ग—स्वहस्ताहृतपुष्पपूजितत्रिलोचनः। विक्र० २।४४।
घ—मृगाङ्कचूडस्य किरीटनिम्नगा। विक्र० २।४७।
ङ—तदद्रिकन्यादयितस्य पूजने जितेन्द्रियः कल्पयति स्म पार्थिवः। विक्र० २।४८।
च—कमप्यपूर्वं त्वयि पार्वतीपतिः प्रसादमारोहति भक्तवत्सलः। विक्र० २।४७।
छ—शिवप्रसादान्नृपतेरजायत। विक्र० २।८५।

'कुलप्रभुर्बालमृगाङ्कशेखरः' इति राज्ञः कुलप्रभुव्याजेन आत्मनोऽपि शिवस्य कुलप्रभुत्वमङ्गीकुर्वन् स्वकीयशैवत्वं सुस्पष्टं प्रतिपादयति। यदाऽपि किमपि काठिन्यं बिल्हणस्याभीष्टपात्राणामथवा व्याजतो बिल्हणसमक्षमायाति तदैव भगवतः शिवस्य विशिष्टया आज्ञया तन्निवृत्तिर्जायते।

इदमत्रोदाहरणम्—

यदा राजिगेन सह सन्धिं कृत्वा विक्रमाङ्कदेवस्याग्रजो विक्रमाङ्कदेवेन सह योद्धुमागच्छत्, तदानीमग्रजेन सह युद्धस्य समस्या विक्रमस्य समक्षं सञ्जाता।

'अपसरणमितः करोमि किंस्वित्प्रसरति गोत्रवधाय नैष बाहुः।
परमयमयशांसि दुष्टलोकः किमपि निपात्य मयि प्रमोदमेति[1]॥

विक्रमः स्वाग्रजेन युद्धमनिच्छन्नपसरणमैच्छत्, परमकीर्तिभयात्तदपि कर्तुं नाशक्नोत्। एतादृश्यां परिस्थितौ भगवान् शिवः स्वप्ने तं योद्धुं प्रेरितवान्—

त्वमिह महति वत्स देवकार्ये ननु गुणवानवतारितो मयैव।
तरलयति मुधा विकल्पदोला किमिति मनस्तव शुद्धधैर्यधाम्नः[2]॥

प्रकारान्तरेण बिल्हणसमक्षमपि 'अग्रजेन सह युद्धं' तस्य नायकस्य चरित्रे दोषावहं स्यादिति समस्यायाः समाधानं साक्षात्तस्येष्टदेवः शिव एवाकरोत्[3]। स्वकीयमग्रजं युद्धे विजित्य यदा पुनः विक्रमः सोमेश्वराय राज्यं दातुमैच्छत्, तदानीं पुनः तुहिनकिरणखण्डमण्डनेन चन्द्रमौलिनाऽसौ न्यषेधि[4]। विक्रमाङ्कदेव-

---

ज—ननु तदुत्पत्तिपरिश्रमे मे स चन्द्रचूडाभरणः प्रमाणम्। विक्र० ३।३१।

झ—भाग्यैः प्रभूतैर्भगवानसौ मे सत्यं भवानीदयितः प्रसन्नः। विक्र० ३।४४।

ञ—साम्राज्यलक्ष्मीदयितं जगाद देवोऽपि त्वामेव मृगाङ्कमौलिः। विक्र० ३।५०।

१. विक्र० ६।५९।

२. विक्र० ६।६३।

३. गिरमिति निशम्य विश्वभर्तुर्गिरितनयादयितस्य मुक्तनिद्रः।
वचनमिदमलङ्घ्यमिन्दुमौलेरिति रणकर्मणि निश्चयं चकार॥
विक्र० ६।६६।

४. वितरितुमिदमग्रजस्य सर्वं पुनरुपजातमतिः स राजपुत्रः।
तुहिनकिरणखण्डमण्डनेन स्फुरदशरीरगिरा रुषा न्यषेधि॥
विक्र० ६।९३।

चरिते बहुषु स्थलेषु मुहुर्मुहुर्भगवतश्चन्द्रशेखरस्य नाम कीर्तयन् कविः भगवन्तं शिवं प्रति स्वकीयामास्थां प्रकटीचकार। राज्ञ आहवमल्लस्य परलोकगमनं प्रतिपादयन् कविः स्वेष्टदेवं महादेवं प्रति स्वकीयां विशिष्टां श्रद्धां भक्तिञ्च प्रदर्शयितुं स्वर्णिममवसरं प्राप्नोत्। राज्ञ आहवमल्लस्य जीवनयात्रासमाप्तिकामना कवेः शिवं प्रति दृढानुरागं सूचयति—

इति मे कृतकृत्यस्य महेश्वरशिरोमणेः।
गिरिजानाथनगरे समारोहणमुत्सवः[1] ॥

तुङ्गभद्रायां जलसमाधिग्रहणात्प्रागाहवमल्लस्य स्वेष्टदेवशिवस्य आराधना सुस्पष्टं कवेः शैवत्वं प्रातिपादयति—

तत्रावतीर्य धौरेयो धीराणां धरणीपतिः।
स्नात्वा चण्डीशचरणद्वन्द्वचिन्तापरोऽभवत्[2] ॥

गृहीतजलसमाधिराहवमल्लनामा राजा चन्द्रचूडामणेः पुरीं जगामेति[3] प्रतिपादयतः कवेः शैवत्वं नास्त्यसन्दिग्धम्। विक्रमाङ्कदेवचरिते बिल्हणस्य शैवत्वानुरागस्य पराकाष्ठा वक्ष्यमाणपद्ये स्पष्टं परिलक्षिता भवति—

जानामि करिकर्णान्तचञ्चलं हतजीवितम्।
मम नान्यत्र विश्वासः पार्वतीजीवितेश्वरात्[4] ॥

विक्रमाङ्कदेवस्य चरितं वर्णयता महाकविना सप्तदशसु सर्गेषु स्वकीयमहाकाव्यस्य बहूनि स्थलानि शिवनाम्ना अलङ्कृतानि। यथा च अष्टादशे सर्गेऽपि काश्मीरदेशस्य तत्रत्यनृपतीनामात्मनश्च वंशवृत्तं वर्णयता चण्डीपतेः नाम्नां निवेशेन स्वकीयं शैवत्वं सूचितम्। काश्मीरवर्णनोपक्रमेऽष्टादशस्य सर्गस्य प्रथमे श्लोके एव प्रवरपुरवर्णप्रसङ्गे 'यातं गौरिपरिणयविधौ साक्षितामिन्दुमौलेः' प्रवरपुरस्य पार्वतीशङ्करपरिणये साक्षितां प्रतिपादयन् काश्मीरिकाणां परम्परितं शैवत्वं कविः सूचितवान्।

हिमालयस्य भगवता शङ्करेण सह विशिष्टः सम्बन्धो वर्तते, अतो हिमालयस्य विवक्षायां 'त्रिनयनगुरोः'[5] इति वदन् कविः स्वकीयां त्रिनयनं प्रति भक्तिमत्तां प्रकटीचकार। वितस्तां व्याहरन् कविस्तस्याः नीलकण्ठात् प्रसूतिं

१. विक्र० ४।५५।
२. विक्र० ४।६६।
३. विक्र० ४।६८।
४. विक्र० ४।५८।
५. विक्र० १८।८।

प्रतिपादयन् महता गौरवेण तां 'नीलकण्ठप्रसूता कुलसरित्'[1] इति विशेषणेन विशिष्य नीलकण्ठे दृढानुरागमङ्गीचकार।

'गेहं यत्र प्रवरगिरिजावल्लभस्याद्भुतं तत्'[2]

प्रवरसेननृपतिना निर्मितस्य गिरिजावल्लभगेहस्य सादरं सभक्तिभावमुल्लेखेनः, एवञ्च तस्य गेहस्य सुरपतिपुरारोपणेन सर्वेषां नराणामाशाप्रतिपादनेन कविः शैव इति सिध्यति। अनन्तदेवमहिष्या सुभटया निर्मापितस्य शिवमन्दिरस्य उल्लेखेन कविना या श्रद्धा दर्श्यते, तयापि तस्य शैवत्वं ध्वन्यते[3]। शिवमन्दिर-वर्णनेषु बिल्हणस्य शैवत्वं दृष्टिपथमवतरत्येव, परं कैलासवीचिवर्णनेष्वपि तस्य शैवत्वं लक्ष्यते—

'कैलासस्थत्रिनयनवधूक्षालिताङ्गास्तरङ्गाः'[4]

रावणस्य शिवभक्तिमत्त्वं[5] सादरमुल्लिखन् कविः स्वकीयशैवत्वं सूचयति। किम्बहुना—काव्येऽस्मिन् यत्र तत्र बहुषु स्थलेषु[6] भगवतः शिवस्य निर्देशः दरीदृश्यते। विक्रमाङ्कदेवचरितस्यान्तिमे पद्ये स्वेष्टदेवस्य शिवस्य नाम सङ्कीर्त्य कविना महाकाव्यस्य उपसंहारो विहितः। तद्यथा—

यस्य स्वेच्छाशबरचरितालोकनत्रस्तयेव
न्यस्तश्चूडाशशिकलिकया क्वापि दूरे कुरङ्गः।
स व्युत्पत्तिं सुकविवचनेष्वादिकर्ता श्रुतीनां
देवः प्रेयानचलदुहितुर्निश्चलां वः करोतु[7]॥

अस्मिन् पद्ये श्रुतीनामादिकर्ता भगवान् शिवो युष्माकं सुकविभणितिषु व्युत्पत्तिं करोतु इति आशीर्वादात्मिका कवेरुक्तिर्बिल्हणस्य शिवानुरागे अर्थात् शैवत्वे प्रत्यक्षप्रमाणं वरीवर्ति।

---

१. विक्र० १८।९।
२. विक्र० १८।२८।
३. विक्र० १८।४६।
४. विक्र० १८।३६।
५. खड्गे कुण्ठीभवति शिरसां छेदतः खेदमागाद्।
यः शाणार्थी हरशिखरिणा प्राग्गृहीतोज्झितेन॥
विक्र० १८।६०।
६. 'भर्गक्रोधज्वाला', 'गौरीपतिवृषखुरक्षोदचिह्नानि' 'दत्ताश्लेषं हरमुकुटतः' इत्यादीनि—विक्र० १८।१३, १४, ५५।
७. विक्र० १८।१०८।

बिल्हणस्य दानप्रियत्वम्—

बिल्हणो महाकविः दानस्य माहात्म्यं सर्वोपरि मन्यते । तस्य दानप्रियतानिदर्शनानि महाकाव्येऽस्मिन् आधिक्येन लभ्यन्ते । महाकवेः काव्यनायको विक्रमाङ्कदेवो महान् दानपरायण आसीत्[1] । काव्येऽस्मिन् अन्येऽपि राजानः कलशहर्षाहवमल्लप्रभृतयो महान्तो दानिन आसन्निति महाकाव्यस्यान्तःसाक्ष्येणावगम्यते । बिल्हणो महाकविस्तीर्थराजप्रयागमागत्य सङ्गमस्नानानन्तरं स्वकीयं परिश्रमोपार्जितं धनं सर्वमपि ब्राह्मणेभ्यो दानरूपेण ददौ[2] । विक्रमाङ्कदेवस्य पिता आहवमल्लो दानमाहात्म्यं प्रतिपादयन् बिल्हणस्य दानवृत्तौ प्रवृत्तिं प्रतिपादयति—

अदरिद्रीकृता भूमिर्विमुद्राभिर्विभूतिभिः ।
नीताः कुलवधूसाम्यं साधूनां वेश्मसु श्रियः[3] ॥

दुर्निमित्तानि दानबलेन शाम्यन्ति इत्यप्यासीद्बिल्हणस्य विचारः । दुर्निमित्तशान्त्यै विक्रमस्य सर्वस्वदाननिदर्शनम्—

सर्वस्वदानमालोच्य दुर्निमित्तप्रशान्तये ।
अप्रयाणमसौ चक्रे ततः कृष्णानदीतटे[4] ॥

दानस्य माहात्म्यं कलियुगे विशिष्टमहत्त्वास्पदं वर्तते । स्मृतिष्वपि 'दानमेकं कलौ युगे' इत्यादिभिरुक्तिभिर्दानमाहात्म्यं प्रतिपादितं स्मृतिकारैः । बिल्हणो महाकविरपि तथ्यमिदं स्वकीयमहाकाव्ये समर्थयन् पात्राय दानमेव श्रियः प्रसूत इति साहित्यसुधासमन्वितां गिरं व्याजहार—

'फलं हि पात्रप्रतिपादनं श्रियः'[5]

बिल्हणस्य त्यागप्रियत्वम्—

ऐश्वर्यसुखमनुभवन्नपि महाकविर्बिल्हणस्त्यागमहिमानं न विस्मृतवान् । यतो हि भारतीयजीवनपद्धतौ आदिकालात्त्यागप्रवृत्तिसमादरः स्वमहत्तां न जहाति । अत एव अस्मिन्काव्येऽपि भारतीयजीवनाङ्गभूतस्य त्यागस्य महिमानं प्रदर्शयन्नसौ आत्मनोऽपि त्यागप्रवृत्तिं सूचयति । तद्यथा—

१. विक्र० ३६।४२ ।
२. दत्ता विश्वाद्भुतगुणगणोपार्जिता येन लक्ष्मीः । विक्र० १८।९१ ।
३. विक्र० ४।५२ ।
४. विक्र० ४।३६ ।
५. विक्र० २।२६ ।

'न कृच्छ्रेऽपि महाभागास्त्यागव्रतपराङ्मुखाः'[1]

राज्ञां कृते त्यागस्यानिवार्यत्वं प्रतिपादयन् 'लोकप्रियतायाश्चेत्कामना स्यात्, तर्हि राजभिस्त्यागपरायणैर्भाव्यम्' इति प्रत्यपादयत्। यतो हि त्यागेनैव विश्व-मिदं वशीकर्तुं शक्यते—

'त्यागो हि नाम भूपानां विश्वसंवननौषधम्'[2]

त्यागस्य दानस्य च माहात्म्यं जानन्तोऽपि केचन जनाः सदैव स्वार्थसाधनायैव प्रयतन्ते, महाकवये तेषां स्वार्थपरायणता नैव रोचते। अत एवायं कविः स्वार्थ-परायणानां निर्लज्जत्वं प्रतिपादयन्नित्थमभिधत्ते—

'लज्जा कुतः स्वार्थपरायणानाम्'[3] इति

स्वार्थपरायणानां निर्लज्जतां प्रतिपाद्य लुब्धकानां धृष्टतां प्रतिपादयन् कविः वर्णयति—

निरुध्य रन्ध्रं मधुपूरितस्य पुष्पस्य लोभाद्भ्रमरोऽवतस्थे।
अन्येन मार्गेण पपुस्तदन्ये लब्धार्जनानामयमेव मार्गः[4] ॥

कवेर्भाग्यवादित्वम्—

महाकविर्बिल्हणो महान् भाग्यवादी आसीत्। तस्य भाग्यं प्रति अचलो विश्वासो महाकाव्येऽस्मिन् दृष्टिगोचरीभवति। विधिरेव महान् बलवानस्ति, न केनापि प्रकारेण तत्प्रातिकूल्यं कर्तुं शक्यते, इति विषये बिल्हणो व्याहरति-

'भाग्येषु नास्ति प्रतिषेधमार्गः'[5] इति।

विक्रमाङ्कदेवस्य भ्राता सोमेश्वरः सदाचारी कुलीनश्चासीत्, परं कैश्चि-द्दिनैरेवासौ पापे रतिञ्चकार, इति प्रसङ्गे कविर्भवितव्यताया दुर्निवार्यत्वमित्थ-माचष्टे—

जातः पापरतः कैश्चिद्दिनैः सोमेश्वरः ततः।
एषा भगवती केन भज्यते भवितव्यता[6] ॥

---

१. विक्र० ४।६७।
२. विक्र० ४।११०।
३. विक्र० १०।६२।
४. विक्र० १०।१३।
५. विक्र० १०।४१।
६. विक्र० ४।६७।

स्वपितुराहवमल्लस्य मृत्युमाकर्ण्य विक्रमदेवः पितुः मृत्युः स्वभाग्यदोषैरभूदिति मत्वा कवेः भाग्यपरायणतां सङ्केतयति—

कुण्ठीकृतारिशस्त्रस्य तस्य वज्रोपमाकृतेः ।
भाग्यानामेव मे दोषादेष जातः परिक्षयः[1] ॥

महाकविर्बिल्हणः स्वपात्रमुखैस्तु स्वकीयां भाग्यवादितां सूचयत्येव, परन्तु तस्य कवेः दिवसा अपि भाग्यपरायणा आसन्निति महदाश्चर्यम्—

एतद्दुःखानभिज्ञेभ्यो दिनेभ्यः स्पृहयन्मुहुः ।
दिवसोऽपि यथात्मानं मन्दभाग्यममन्यत[2] ॥

एतस्मिन् श्लोके दिवसस्य मन्दभाग्यत्वेन कवेर्भाग्यवादित्वं सूच्यते । वक्ष्यमाणे पद्ये चोलराजस्य पराजयं वर्णयन् महाकविर्बिल्हणः स्वकीयं भाग्यविश्वासमित्थं स्वीचकार—

चोलस्य यद्भीतिपलायितस्य
भालत्वचं कण्टकिनो वनान्ताः ।
अद्यापि किं वानुभविष्यतीति
व्यपाटयन् द्रष्टुमिवाक्षराणि[3] ॥

महाकवेर्गुणग्रहिलत्वम्—

गुणिगणगुणग्रहिल आसीदस्य कवेः स्वभाव इति विक्रमाङ्कदेवचरितस्य अन्तःसाक्ष्येण स्पष्टं प्रतीयते । परदोषाणामन्वेषणं तदाविष्करणञ्च न रोचतेऽस्मै । 'परदोषान्वेषकः खलः' इत्युक्तं महाकविना ।

तद्यथा—

कर्णामृतं सूक्तिरसं विमुच्य दोषे प्रयत्नः सुमहान् खलानाम् ।
निरीक्षते केलिवनं प्रविष्टः क्रमेलकः कण्टकजालमेव[4] ॥

दोषान्वेषकस्य भर्त्सनां कुर्वतः, 'सज्जनाः परेषां दोषान्परित्यज्य गुणानेव गृह्णन्ति', इत्यासीद्बिल्हणस्य विचारः । तद्यथा—

दोषजातमवधीर्य मानसे धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपनीय गृह्णते वारिधेः सलिलमेव वारिदाः[5] ॥

---

१. विक्र० ४।८३ ।
२. विक्र० ४।७२ ।
३. विक्र० १।११६ ।
४. विक्र० ५।५१ ।
५. विक्र० ५।५२ ।

विक्रमाङ्कदेवचरितस्य सूक्ष्मसमीक्षणेन कवेर्मान्त्रिकत्वं (तान्त्रिकत्वम्) अनुमातुं शक्यते । काव्यस्यास्य प्रथमसर्गे अष्टादशे पद्ये कविना व्यलेखि—

दहत्यशेषं प्रतियोगिवर्गमनर्गले मञ्जुजशौर्यवह्नौ ।
प्रत्यर्थिपृथिवीपतिचिन्त्यमानो न कोऽपि मन्त्रः प्रतिबन्धकोऽभूत्[1] ॥

महाकवेर्धर्मशास्त्रास्था—

आहवमल्लस्य राजपुत्राणां संस्कारोल्लेखः कवेः धर्मशास्त्रधुरीणतायाः परिचयं ददाति । नासौ केवलं राजकुमाराणां धर्मशास्त्रीयसंस्कारोल्लेखमकरोदपि तु स्वकीयानामपि बन्धूनां मौञ्जीबन्धनादिसंस्कारोल्लेखं महताऽऽदरेण कृतवान्—

महाकविरयं बिल्हणः कामशास्त्रस्यापि विशेषतो ज्ञाताऽऽसीदिति विक्रमाङ्कदेवचरिते कामशास्त्रीयसङ्केतैः प्रतीयते[2] ।

महाकविरयं चतुष्षष्टिकलानामपि विशेषज्ञ आसीदिति विक्रमाङ्कदेवचरितस्य द्वितीयसर्गे सङ्केतः समुपलभ्यते[3] । ओषधिविज्ञानं प्रति महती रुचिर्बिल्हणस्य विक्रमाङ्कदेवचरिते परिलक्ष्यते[4] । चतुर्थे सर्गे दाहज्वरस्योल्लेखेन विषयस्यास्य सम्यक्पुष्टिः सञ्जायते[5] । महाकाव्यस्य बहुषु स्थलेषु राजनीतिकपरिस्थितीनां समावेशेन महाकवेः राजनीतिवैशारद्यं नास्त्यविदितं विदुषाम् । राजनीतिकसमस्यानां समाधानमपि कुर्वतानेन महाकविना न कुत्रापि स्वकाव्यकौशलं हारितमपितु स्वकीयकाव्यप्रतिभया राजनीतेः ऋजुस्वरूपमपि सरलतां सरसताञ्च प्रापितम् ।

विक्रमाङ्कदेवचरिते बहुषु स्थलेषु दर्शनशास्त्रसम्बन्धिनः सङ्केता महाकवेः दार्शनिकत्वस्य परिचयं ददति[6] ।

---

१. षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः, इत्यमरः । वह्निशामकमन्त्रश्च—
उत्तरस्मिन् दिग्विभागे मरीचो नाम राक्षसः ।
तस्य मूत्रपुरीषाभ्यां हुतस्तम्भः प्रजायते ॥

२. विक्र० ६।२३, २६ ।

३. विक्र० ३।३०-४६ ।

४. विक्र० २।८० ।

५. विक्र० ३।४६-४६ ।
(ख) वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः ।
कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते ॥
प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा ।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव वा ॥
इति चक्रपाणिदत्तोक्तं दाहज्वरलक्षणम्

६. विक्र० ६।३१ ।

२

विक्रमाङ्कदेवचरितस्य सामान्यपरिचयः

मुद्रितामुद्रितपुस्तकपरिचयः—

अद्यावधि प्राप्तानि विक्रमाङ्कदेवचरितस्य मुद्रितामुद्रितानि एकादश पुस्तकानि विद्यन्ते ।

प्रथमं पुस्तकम्—

१२८६ तमखिष्टाब्दतोऽपि पूर्वं लिखितं विक्रमाङ्कदेवचरितस्य पाण्डुलिपिस्वरूपं पुस्तकं जैसलमेरस्थबृहज्ज्ञानकोषभाण्डारात्प्राप्तमासीत् । व्युल्हरगवेषितं पुस्तकमिदं शुद्धं सुलिखितं चास्ति । अस्य लिपिः प्राचीना जैनदेवनागरी अस्ति । इदं हि १५८ तालपत्रेषु लिखितमस्ति, येषामाकारः १६ × २″ वर्तते । अस्मिन् हि पत्रसंख्याका टिप्पण्यश्च सुवर्णमयाक्षरेषु लिखिता आसन् । परं तान्यक्षराणि घर्षणादिभिः कृष्णानि एव अवलोक्यन्ते । अस्मिन् पुस्तके पञ्चषेषु पत्रेषु लिपिः किञ्चिदस्पष्टा, अन्येषु च सुस्पष्टैवास्ति । व्युल्हरावलोकनानन्तरम् अस्मिन् पुस्तके किञ्चित्परिवर्तनं नास्त्यसम्भवम्, परं पट्टणजैनभाण्डारस्थेन १४८५ तमेन ईस्वीवत्सरीयेण प्रथमपुस्तकप्रतिलिपिना प्रमाणीभवति यदितः चतुर्भ्यः शतकेभ्योऽपि प्राक् पुस्तकमिदमीदृगेवावर्तत, घर्षणादिजन्याश्चास्य दोषाश्शतकचतुष्टयादपि प्राक्तनाः सन्ति । लेखनप्रमादजासु त्रुटिषु सम्यक् संशोधनम्, सरलाभी रेखाभिः पदच्छेदसङ्केताः, सवर्णदीर्घस्थलेषु सपदच्छेदं ऽ (=अ) ऽऽ (=आ) इत्यादिरूपेणार्थस्पष्टीकरणम्, सन्धिसंयुक्तवर्णानां पृथग्रूपेणोपरि (म् अ) (=म) इत्यादि लेखनं, तृतीयाचतुर्थ्यादीनां समासविभक्तीनां ३, ४ इत्यादिभिरङ्कैः निर्देशादयो बहवो विचित्रा सङ्केता वर्तन्ते । (c) इति चिह्नेनोत्प्रेक्षालङ्कारनिर्देशः, मिथः सम्बद्धदूरस्थपदानां ✓ ✓ प्रभृतिभिर्बहुविधसङ्केतैः सम्बन्धनिर्देशश्चावलोक्यते । कुत्रचित् (यथा भ०) यथा भवति, कुत्रचिन्नाम्ना च क्रियाविशेषणसंसूचनं वर्तते । पुस्तकेऽस्मिन् विषमस्थलार्थबोधिनी टिप्पण्यपि अस्ति । पत्राणां चतुर्ष्वपि प्रान्तेषु=ईदृशयोः चिह्नयोर्मध्ये सङ्क्षिप्ताः सङ्गताश्चार्थाः सूक्ष्माक्षरैः लिखिताः सन्ति । ईदृशचिह्नस्य मध्ये लेखप्रमादवशात्परित्यक्ता वर्णा लिखिता वर्तन्ते ।

द्वितीयं पुस्तकम्—

डा० व्युलहरयाकोवीमहोदयाभ्यां १८४७ तमखिष्टाब्दे कृता प्रथमपुस्तकस्य प्रतिलिपिरियं पुण्यपत्तनस्थभाण्डारकरप्राच्यानुसन्धानसंस्थाने वर्तते। अतिस्थूलेषु (१२॥×८″) कर्गलेषु पुस्तकं नातिसुन्दरैः वर्णैः लिखितं नास्ति सुवाच्यं निर्दोषञ्च। यद्यपि प्रथमं पुस्तकमधिकं सुवाच्यमासीत्, तदपि व्युलहरमहोदयेन कृता प्रतिलिपिरशुद्धिबहुला वर्तते। तत्र च समयाभावेन अतित्वरैव कारणं भवितुमर्हति। अस्मिन् पुस्तके बहूनामक्षराणां परस्परं परिवर्तनम्, अनुस्वाराणामस्पष्टता, विंशत्यधिकबह्वक्षररिक्तस्थानानि, संख्यातीता एकाक्षरलोपादयो बहवो दोषा विद्यन्ते। इदमपि च सत्यं यत् प्रथमपुस्तकेऽपि अशुद्धयः सन्ति, परं द्वितीयपुस्तके ततोप्यधिका अशुद्धयो दृश्यन्ते। प्रथमपुस्तके दोषाः स्वल्पाः सन्ति, तेष्वधिकानां लेखकस्य जैनत्वमेव कारणम्[१]। यद्द्वित्वं सन्धिराहित्यञ्चापि क्वचिद्दोषकारणं सञ्जातम्। ग्रन्थस्य प्राचीनतया पाठानामस्पष्टताऽपि दोषवृद्धौ मुख्यं कारणं वर्तते। डा० व्युलहरमहोदयेन द्वितीयपुस्तके अद्यादृश्यानि सर्वथा स्पष्टाक्षराणि विज्ञातानि (अद्यापि) इत्यादीनि स्पष्टाक्षराणि च उपेक्षितानि। तेन हि अस्मिन् पुस्तके पञ्चदशसर्गीयषोडशतमे पद्ये प्रथमपुस्तकेऽविद्यमानानि 'तेन वारिनिधि' इत्यक्षराणि स्वयं संग्रथ्य संयोजितानि। प्रथमपुस्तके 'बृहद्द्वाराग्रघण्टारवास्ते[२]' इति स्पष्टोऽपि पाठो द्वितीयपुस्तके 'बृहद्द्वारवास्ते' इत्यशुद्धः पाठो वर्तते। कुत्रचिद्रेखाणामुपरिस्थटिप्पण्या मूले सन्निवेशः[३]। क्वचिच्च (ॅ) इति दीर्घचिह्नस्य रेफत्वेनावृत्तिरवलोक्यते। एभिः कारणैः प्रथमपुस्तकाद्द्वितीयपुस्तकमपकृष्टमित्यत्र नास्ति मनागपि सन्देहः।

तृतीयं पुस्तकम्—

द्वितीयपुस्तकमनुसृत्य मुम्बापुर्याः संस्कृतग्रन्थमालाया अन्तर्गतं १८७५ ख्रिष्टाब्दे मुद्रितं पुस्तकमेव तृतीयं पुस्तकमस्ति। अस्मिन् पुस्तके बहुषु स्थलेषु द्वितीयपुस्तकात् कियांश्चित् पाठभेदोऽपि वर्तते। द्वितीयपुस्तकस्यापपाठेष्वत्र क्वचित् संशोधितेष्वपि बहुत्र शुद्धमपि द्वितीयपुस्तकं विपर्यासितं दृश्यते। द्वितीयपुस्तके वर्तमानेऽपि द्वे पद्ये तृतीये पुस्तके न वर्तेते। डा० व्युलहरमहोदयो बहुत्र पाठानाम-

१. यथा य-ज, प-व, न ण, द-ड, स-श, ल-ड प्रभृत्यक्षराणां शेखरखण्डप्रभृतिपदेषु ष-खयोः स्रगादिशब्देषु स्र-श्रयोरन्योन्यं परिवर्तनानि दृश्यन्ते। समस्तेऽपि पुस्तके 'ब' वर्णस्य 'च्छ' इति संयुक्ताक्षरस्य च प्रयोग एव नास्ति।

२. विक्र० १६।५१।

३. विक्र० १८।१०१।

सङ्गतं संशोधनं कुर्वन्नपि अन्यत्र बहून् शुद्धानपि पाठानशुद्धान् कृतवान्। क्वचिदस्पष्टस्थलेषु समानतया निकटवर्तिनः पाठान् व्युत्सृत्य दूरवर्तिनोऽयुक्तान् पाठान् स्वबुद्धयाऽघटयत्।[1] केषुचित्स्थलेषु सङ्गतानसङ्गतान् मत्वा स्वकल्पितानयुक्तान्पाठान् न्यवेशयत्। डा० ब्युल्हरमहोदयो बहूनि रिक्तस्थानानि पूरितवान्। तत्रापि क्वचन साधुपाठानपूरयन्नपि बहूनसाधून् मनसाऽघटयत्।

चतुर्थं पुस्तकम्—

विक्रमाङ्कदेवचरितस्य सप्तसर्गमात्रमेकं पुस्तकं मुरारिलालशर्मभिरमदाबादनगरे अवलोकितमासीत्। पुस्तकमिदं नातिशुद्धं न चाधिकमुपयोगि वर्तते। प्रथमपुस्तकाद्भेदो विक्रमाङ्कदेवचरितस्य पुस्तकान्तराणामस्तित्वमपि सूचयति।

पञ्चमं पुस्तकम्—

पुस्तकमिदं डा० रामकृष्णभाण्डारकरमहोदयैः अमदाबादे प्राप्तस्य कारितं चतुर्थपुस्तकस्य प्रतिलिपिरूपं मूलादपि अशुद्धतरं वर्तते। अस्यान्ते लेखकस्य परिचयोऽप्युपलभ्यते येन तस्य केवलं लेखकत्वमात्रं प्रमाणीभवति[2]।

षष्ठं पुस्तकम्—

विक्रमाङ्कदेवचरितमिदं १९२७ खिष्टाब्दे काशीस्थज्ञानमण्डलात् पण्डितप्रवरैः श्रीरामावतारशर्मभिः प्रकाशितं वर्तते। प्रथमसंस्करणस्था अशुद्धाः पाठा अस्मिन् पुस्तके यद्यपि अंशतः क्वचित्संशोधिताः सन्ति तर्हि अपि अन्यत्र बहवो नूतना अशुद्धाः पाठा दृष्टिपथमवतरन्ति। अस्य पुस्तकस्य मुद्रणादिकमपि न सन्तोषजनकम्। पुस्तकमिदमालोचयद्भिः श्रीमुरारिलालशर्मभिः अस्य पुस्तकस्य अत्यर्थं हीनता प्रतिपादिता[3]।

सप्तमं पुस्तकम्—

वाराणसेयसरस्वतीभवनाच्छ्रीमद्भिर्मुरारिलालनागरमहोदयैः सम्पाद्य मुद्रापितं विक्रमाङ्कदेवचरितं पुस्तकं प्राक्तनपुस्तकेभ्यः साधुतरमधिकमुपकारि च। एतदेवाधारीकृत्य विश्वनाथशास्त्रिभारद्वाजमहोदयैः स्वीये पुस्तके पाठक्रमः

---

१. विक्र० ६।४६, ८।१४, १४।२ इत्यादयः।

२. लिपिकृतं जोसि परसुराम ज्ञाती पुष्करणा ब्राह्मण मारवाडी अमदाबादमध्ये सम्बत् १९४१ जैठवदि ३ बुधवासरे श्री श्री। भूमिका विक्र० (मु० ला०) पृ० ४।

३. संस्करणमिदं निश्चेतनमिवाभाति एवञ्च प्रथमसंस्करणादत्यर्थं विप्रकृष्टमिति को नु न स्वीकुर्यात्?

स्वीकृतः । अस्य पुस्तकस्योपोद्घातः परिशिष्टञ्चास्ति विशेषतः प्रशस्यम् । अस्यान्ते चरितचन्द्रिकाटिप्पणी नागरमहोदयानां संस्करणं सुवर्णसुगन्धयुक्तमिवाकरोत् ।

अष्टमं पुस्तकम्—

काशीस्थहिन्दूविश्वविद्यालयतः प्रकाशितं श्रीमद्भिः विश्वनाथशास्त्रिभारद्वाजमहाभागैः विक्रमाङ्कदेवचरितस्य संस्करणमेव अष्टमं पुस्तकमस्य काव्यस्य विद्यते । त्रिषु भागेषु प्रकाशितस्यास्य पुस्तकस्य सप्तसर्गात्मकः प्रथमो भागः १९५४ तमे खिृष्टाब्दे अष्टमस्त्रयोदशसर्गान्तो द्वितीयो भागः १९६२ खिृष्टाब्दे तृतीयो भागश्च १९६४ तमखिृष्टाब्दे रमाख्यया संस्कृतटीकया हिन्द्यनुवादेन च सह प्रकाशमाप । श्रीमतां भारद्वाजमहाभागानामकथनीयपरिश्रमवशाद्विक्रमाङ्कदेवचरितस्य साधु प्रकाशनं नितरामन्येभ्यः प्रकाशनेभ्योऽधिकमुपयोगि ।

नवमं पुस्तकम् —

विक्रमाङ्कदेवचरितस्याङ्ग्लभाषानुवादः श्रीमता सुरेशचन्द्रबैनर्जीमहोदयेन श्रीमता अमलकुमारगुप्तमहोदयेन च सम्बोधिप्रकाशनकलिकात्तातः प्रकाशितः । अस्मिन् पुस्तके विक्रमाङ्कदेवचरितस्य सर्वेषामपि पद्यानां आङ्ग्लानुवादो वर्तते । येन संस्कृतभाषानभिज्ञानां केवलमाङ्ग्लभाषाविदामपि बिल्हणस्य काव्यकौशलपरिचयः सञ्जायते ।

दशमं पुस्तकम्—

पुस्तकमिदं चौखम्बासंस्कृतसीरिजप्रकाशनात् प्रकाशितं श्रीमद्भिः पाण्डेयरामचन्द्रमहोदयैः सम्पादितं, हिन्दीटीकया सह सर्गद्वयात्मककलेवरं वरीवर्ति ।

एकादशं पुस्तकम्—

पुस्तकमिदं श्रीमद्भिः हरिदत्तशास्त्रिमहोदयैः सम्पादितं मेरठनगरात् प्रकाशमभजत् ।

टिप्पण्यः

चरितचन्द्रिका—

विक्रमाङ्कदेवचरितस्य प्रथमपुस्तके अर्थावगमसौकर्यार्थं विषमस्थलार्थाववोधिनी चरितचन्द्रिकानाम्नी टिप्पणी वर्तते । डा० ब्युल्हरमहोदयेन स्वकीये विक्रमाङ्कदेवचरिते (द्वितीय-तृतीयपुस्तके) इयं टिप्पणी नोद्धृता । श्रीमद्भिः मुरारिलालशर्मभिः जैसलमेरबृहज्ज्ञानकोषभाण्डारस्थाद्घस्तलिखितात् पुस्तकात् महता परिश्रमेण सङ्गृहीतेयं टिप्पणी चरितचन्द्रिका नाम्नी विक्रमाङ्कदेवचरि-

तस्य सरस्वतीभवनसंस्करणे प्रकाशिता। अस्या टिप्पण्या लेखकस्य नाम दौर्भाग्येण कालकवलितमेवास्ति। १२८६ ई० वर्षतः प्राचीनेऽस्मिन्पुस्तके विद्यमानाया अस्याः प्राचीनता नास्ति सन्दिग्धा। श्रीमुरारिलालनागरमहोदयैरनधिगतसकलार्था तथैवोपस्थापिता। अस्या लेखकः 'अस्य शब्दार्थो नावगम्यते' इत्यादि लिखित्वा स्वीयगर्वशून्यपाण्डित्यस्य परिचयं दत्तवान्। डा० व्युल्हरमहोदयेन तृतीयपुस्तकस्य संस्करणे द्वितीयपुस्तकात् कृतः पाठभेदः पादटिप्पण्यां लिखितोऽपि न तत्र साकल्येनोपलभ्यते। द्वितीयपुस्तकस्थः शुद्धोऽपि पाठस्तृतीयपुस्तकटिप्पण्यां विपर्यासितोऽवलोक्यते। किन्त्वियं टिप्पणी द्वितीयपुस्तकाद् भिद्यत एव।

रामावतारशास्त्रिणां टिप्पणी—

षष्ठपुस्तकस्य सम्पादकेन क्वचित्स्वेच्छाकल्पिताः पाठाष्टिप्पण्यामुल्लिखिताः सन्ति।

डा० रामकृष्णभाण्डारकरविवरणम्—

डा० रामकृष्णभाण्डारकरमहोदयैः द्वितीयं तृतीयञ्च पुस्तकमवलोक्य पाठद्वये तुलनात्मकं समीक्षणं कृत्वा तृतीयपुस्तकाच्छुद्धतराः पाठभेदाः स्वीयविवरणग्रन्थे प्रकाशिताः[1]।

विक्रमाङ्कदेवचरितस्य महाकाव्यत्वम्—

कवते वर्णयति, कौति, कुवते (शब्दायते) वेति कविः। 'कुङ्' शब्दे इति भौवादिकात्तौदादिकाद्वा, 'कु' शब्दे इत्यस्माद्वा धातोः 'अच इ' सूत्रेण इप्रत्यये कृते शाब्दिक्या व्युत्पत्त्या कविशब्दो निष्पद्यते। यास्काचार्यमते मेधावीति कविशब्दस्यार्थः। कविः क्रान्तदर्शनो भवति कवते वेति व्युत्पत्तिश्च निरुक्ते समुपलभ्यते। कवते इति रूपस्य वैदिकनिघण्टौ गत्यर्थकधातुरूपेषु पाठात् 'गत्यर्थाः सर्वेऽपि ज्ञानार्था भवन्ति' इति न्यायात्कविशब्दस्य क्रान्तदर्शित्वं सङ्गच्छते। कवेर्भावः कर्म वा काव्यमिति व्युत्पत्त्या 'गुणवचनब्राह्मणादिभ्यः कर्मणि' इति सूत्रेण ष्यन् प्रत्यये कृते काव्यपदस्य सिद्धिर्भवति।

प्रायः सर्वेषामपि साहित्याचार्याणां काव्यलक्षणेषु किञ्चित्किञ्चिदन्तरं वर्तते। अतस्तेषु मतभेदविवेचनमत्र गौरवाय स्यादिति कृत्वा केवलं मम्मटाचार्यादीनां प्रामाणिकानि मतान्येव सङ्गमय्य प्रदर्श्यन्ते। मम्मटकाव्यलक्षणम्—

१. विक्र० (मु० ला० ना०), पृ० ४।

'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति लक्षणानुसारं श्रुतिकट्वादिदोषरहितं प्रसादादिगुणोपेतं स्फुटास्फुटालङ्कारैरलङ्कृतञ्च काव्यमित्युपर्युक्तलक्षणस्य निष्कर्षः । विक्रमाङ्कदेवचरितमपि नित्यदोषाभावात्प्रसादादिगुणयुक्तत्वादुपमोत्प्रेक्षाद्यलङ्कारैरलङ्कृतत्वात्काव्यकोटिमापद्यते । विश्वनाथकविराजस्य 'वाक्यं रसात्मकं काव्यम्,' तथा च जगन्नाथपण्डितराजस्य 'रमणीयार्थप्रतिपादकः शब्दः काव्यम् इति रसपरककाव्यलक्षणस्य लक्ष्येषु वीरशृङ्गारादिभिर्विशेषतया रसान्वितत्वाद्विक्रमाङ्कदेवचरितं प्रधानतमं लक्ष्यमिति नात्र कस्यापि काचिद्विप्रतिपत्तिः । काव्यस्य दृश्यश्रव्यभेदयोः श्रव्यत्वं श्रव्येष्वपि महाकाव्यत्वमस्य निर्विवादम् ।

महाकाव्यनियमनिर्वाहः—

(१) संस्कृतकाव्यशास्त्राचार्याननुसृत्य सर्गबद्धा रचना, यत्र अष्टाधिकाः सर्गाः सन्ति सैव रचना महाकाव्यनामभाग्भवति । प्रत्येकस्मिन्सर्गे पञ्चविंशत्यधिकानि पद्यानि भवितव्यानि । उपर्युक्तयोर्द्वयोरपि महाकाव्यनियमयोर्निर्वाहः सम्यग्रूपेण विक्रमाङ्कदेवचरितेऽवलोक्यते । यतो हि विक्रमाङ्कदेवचरिते अष्टादश सर्गाः सन्ति, येषु सर्वेष्वपि ७० । तोऽप्यधिकानि सुललितानि पद्यानि विद्यन्ते ।

(२) महाकाव्यनियमेषु सुरोऽथवा धीरोदात्तगुणगणान्वितः सत्कुलोत्पन्नः क्षत्रियो वा काव्यनायको भवति । महाकविना बिल्हणेन चालुक्यकुलभूषणं विक्रमादित्यं (षष्ठं) महाकाव्ये नायकपदे प्रतिष्ठाप्य उक्तमहाकाव्यनियमस्य आदर्शोन्मुखमुदाहरणं प्रस्तुतम् ।

(३) महाकाव्ये शृङ्गारवीरशान्तादिष्वेक एव रसः प्राधान्येन भवति अन्ये च रसा अङ्गरूपेण निवेशनीया इति नियमोऽपि अत्र महाकविना सम्यग्रूपेण निर्वाहितः । अस्मिन् महाकाव्ये वीर एव प्रधानो रसः, अन्ये रसास्त्वङ्गभूता विद्यन्ते । अङ्गभूतरसेष्वपि शृङ्गारस्यैव प्राधान्येन प्रयोगोऽस्य काव्यस्य सौन्दर्यं वर्धयति ।

(४) महाकाव्येषु नाटकीयपञ्चसन्धीनां विधानं निश्चितमस्ति । अस्मिन् प्रबन्धे प्रकृतमहाकाव्येऽपि पञ्चसन्धीनां विवेचनं कथानकविवेचनात्मकेऽध्याये करिष्यते ।

(५) महाकाव्यानामैतिहासिकं सज्जनाश्रितं काल्पनिकं वा कथानकं काव्यशास्त्रसम्मतमस्ति[1] । महाकविना बिल्हणेन विक्रमाङ्कदेवचरितस्य कथाभागो

---

१. काव्यादर्शः १।१५ ।

नूतनेतिहासाद् गृहीतः, अतोऽस्य कथानकस्येतिहासोद्भवत्वमुपर्युक्तमहाकाव्य-लक्षणस्य विक्रमाङ्कदेवचरितलक्ष्यत्वं प्रमाणयति ।

(६) चतुर्वर्गफलप्राप्तिरूपकाव्यप्रयोजनमपि महाकाव्यलक्षणेष्वेकतमम् । अत्र च सर्वेषामाचार्याणामैकमत्यम् । आचार्यविश्वनाथकविराजमते तु तेष्वेक-मेव फलं भवति । परं भामहमते चतुर्वर्गप्रयोजने सत्यपि विशेषतया उपदेशस्यैव प्राधान्यमुक्तम् । प्रकृतमहाकाव्यमपि चतुर्वर्गादिकाव्यफलप्रदानक्षममिति नात्र सन्देहः । अस्य कर्तुरेव विक्रमाङ्कदेवाद्धनप्राप्त्यादिकं प्रमाणरूपेण ग्राह्यम् ।

(७) काव्यप्रारम्भे आशीर्वादात्मकं नमस्कारात्मकं वस्तुनिर्देशात्मकं मङ्ग-लाचरणञ्च महाकाव्यलक्षणान्तर्गतम् । क्वचित् सज्जनप्रशंसा खलनिन्दापि भवति मङ्गलाचरणे । प्रकृतमहाकाव्ये प्रथमसर्गस्य प्रथमश्लोकतोऽष्टमश्लोक-पर्यन्तं नमस्कारात्मकं मङ्गलाचरणं कृतमिति । सज्जनप्रशंसात्मकं दुर्जन-निन्दात्मकं वा मङ्गलाचरणमपि दृष्टिपथमवतरति । नमस्कारात्मके प्रथमे मङ्गलाचरणपद्ये एव 'कंसरिपोः कृपाणः' इति कृपाणनिर्देशेन वीररसमयमस्य कथानकमिति सङ्केतोऽस्ति ।

(८) प्रत्येकं सर्गं महाकाव्यस्य एकस्मिन्नेव छन्दसि उपनिबध्य तस्यैव सर्गस्यान्ते छन्दसः परिवर्तनमनिवार्यम् । उक्तनियमस्य निर्वाहः प्रकृतमहा-काव्ये सम्यक् सञ्जातः । प्रथमे सर्गे उपजातिवृत्तमस्ति, अन्तिमे पद्ये शार्दूल-विक्रीडितेन वृत्तपरिवर्तनमवलोक्यते । एवमन्येष्वपि सर्गेषु एष वृत्तनियमः सम्यक् परिपालितोऽस्ति ।

(९) काव्योत्कर्षदृष्ट्या काव्यस्य मुख्यमङ्गं वर्णनमस्ति । सन्ध्यासूर्येन्दु-रजनीप्रदोषदिनप्रातर्मध्याह्नशैलर्तुवनसागरसम्भोगविप्रलम्भमुनिस्वर्गपुरयज्ञरण-प्रयाणमन्त्रणापुत्रोदयादीनां वर्णनानि महाकाव्येष्ववश्यं भवन्ति, परं भामहमतेन वर्णनेषु लोकस्वभावातिक्रमणं नैव युक्तम् । विक्रमाङ्कदेवचरिते विविधस्थलेषू-क्तवर्णनानां मनोरमं रूपमवलोक्यते[1] ।

(१०) कवेरितिवृत्तस्य नायकस्य इतरस्य वा नाम्नि महाकाव्यस्य नाम-करणव्यवस्था विद्यते । इमामेव व्यवस्थामाधारीकृत्य नायकस्य विक्रमाङ्क-

---

१. सन्ध्यावर्णनम् ११।१-१२, रजनीवर्णनम् ११।१२-२५, इन्दुवर्णनम् १२।२५-४३, पुत्रोदयवर्णनम् २।५७-९०, प्रातःवर्णनम् ११।७३-९५, ऋतुवर्णने वसन्तवर्णनम् ७।३-७७, ग्रीष्मवर्णनम् १२।१-७८, वर्षावर्णनम् १३।१५-९०, शरद्वर्णनम् १४।२३-४६, हेमन्तवर्ण-नम् १६।१-१६, शिशिरवर्णनम् १६।४७-५२, रणप्रयाणवर्णनम् १५।१-८७, मृगयावर्णनम् १६।१७-४६ ।

देवस्य नाम्नि एव प्रकृतमहाकाव्यस्य विक्रमाङ्कदेवचरितमिति नाम नितरां सङ्गच्छते। अन्यच्च भामहमते अन्यस्य कस्यचिदुत्कर्षं प्रदर्शयितुं नायकस्य वधो न निर्देष्टव्यः। निर्देशश्चेदावश्यकस्तर्ह्युपक्रमे तस्य स्तवनं न कर्तव्यम्। उपर्युक्तभामहमतस्यापि प्रकृतमहाकाव्ये सम्यङ् निर्वाहोऽवलोक्यते। अतो महाकाव्यलक्षणानि[1] सर्वांशतो लक्ष्येऽस्मिन् महाकाव्ये सम्यक् सङ्घटन्ते। न कुत्रापि तेषामतिक्रमणमवलोक्यते।

शैली—

किरातार्जुनीयशिशुपालवधादिभ्य उत्तरवर्तितत्वादपि तेषामलङ्कारप्रधानक्लिष्टरचनाशैलीप्रभावो विक्रमाङ्कदेवचरिते नास्तीति सत्यम्। किरातार्जुनीयशिशुपालवधयोः यथा पाण्डित्यप्रदर्शनप्रयासो वरीवर्ति न तस्य च्छायापि विक्रमाङ्कदेवचरितेऽवलोक्यते। नैतस्येदं कारणमस्ति यद् बिल्हणे भारविमाघादिभ्यः पाण्डित्ये न्यूनतासीत्। अस्येदमेव कारणमस्ति यदसौ काव्ये सारल्यस्य सारस्यस्य च महत्त्वं जानाति स्म। यथा लालित्ययोजनया कालिदासकाव्यानि सजीवानि सन्ति तथैव बिल्हणेनापि सरला सरसा ललिता च शैली समाश्रिता।

बिल्हणस्य विशिष्टशैल्याः संस्कृतकाव्यवाङ्मये विशिष्टं स्थानमस्ति। यतो हि प्रभावोत्पादकं व्यञ्जकत्वमस्यां वर्तते। विक्रमाङ्कदेवचरितस्य प्राञ्जला सरसा च भाषा कुत्रचिदपि भावाभिव्यक्तिं न बाधते। अस्य उदात्ता मधुरा गम्भीरा च भाषा सहृदयमनोभावान् रसमयान् विदधाति। भाषायां दीर्घसमासानां नितरामभावो ललितपदैः लालित्यपूर्णानां लघुसमासानां समावेशश्चापि अस्य शैलीं सहृदयहृदयावर्जकतां प्रापयति। वैदर्भीं प्रति विशिष्टोऽनुरागः बिल्हणस्य समवलोक्यते। विक्रमाङ्कदेवचरिते वैदर्भ्याः बाहुल्येन प्रयोगो दरीदृश्यते, न केवलं वैदर्भ्याः प्रयोग एवाऽत्र अपितु स्वयं वैदर्भी मुखरिता इव काव्येऽस्मिन् दरीदृश्यते—

> अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमिः।
> वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम्[2] ॥

उपर्युक्तपद्ये कविवरेण वैदर्भ्याः श्रवणामृतस्यानभ्रवृष्टित्वेन, सरस्वतीविभ्रमजन्मभूमित्वेन, पदानां सौभाग्यलाभे प्रतिभूरूपेण च प्रतिपादनं तां प्रति तस्य परमाकर्षणं प्रकटयति। अत एवास्मिन्काव्ये वैदर्भ्याः सुसंस्कृतं स्वरूपं प्रायः सर्वत्र दृष्टिपथमवतरति। यद्यपि यत्र कुत्रचिद् गौडीपाञ्चाल्योरपि प्रयोगोऽवलोक्यते, परं प्राधान्यं वैदर्भ्या एवास्ते।

१. साहित्यदर्पणः ६।३१५-३२७।
२. विक्र० २।६।

३

कथानकं तदौचित्यञ्च

कथानकम्—

प्रातःसन्ध्यावन्दनरते विधातरि पाकशासनः धर्मध्वंसिनां ध्वंसनार्थं धरायां कस्यचिदवर्ण्यवीर्यस्यावश्यकतेति निवेदयामास[१]। ततः सन्ध्याजलपूर्णचुलुके विधातुर्विलोचनव्यापारेण तस्मात्त्रैलोक्यरक्षणक्षमसुभट आविर्भूय[२] सुनासीरं सान्त्वयित्वा शत्रुसन्दोहविनाशदीक्षां जग्राह। स एव चालुक्यकुलस्य मूलपुरुषः समभूद् यस्मिन् हारीतमानव्यनामानावनादिपुरुषावभूताम्[३]। तद्वंशोद्भवा वीरा भूपा अयोध्यां निवासस्थानं चक्रुः[४]। तेषु केचन दिग्विजयकाङ्क्षिणो दक्षिणस्यां दिशि निवासं विदधुः[५]। तदनु चालुक्ये कुले विपुलपराक्रमः तैलपो भूपो बभूव[६]। तदनन्तरं दुर्धर्षशौर्याश्रयः सत्याश्रयाभिधो भूमिपोऽभवत्[७]। ततश्च समरभूमौ भूयोभूयोऽवाप्तविजयो जयसिंहो नाम नरपतिरलञ्चकार चालुक्यकुलं निजजन्मना। तस्माच्च विख्यातकीर्तिस्त्रैलोक्यापरनामधेय आहवमल्लमहीपश्चालुक्यकुले जन्म लेभे[८]। बहुष्वाहवेषु मल्लोऽयमेव आहवमल्लो मालवराजधानीं धारानगरीं जिगाय[९]। डाहलोर्वीश्वरस्य कर्णस्य ऐश्वर्यमपि धूलि-

---

१. विक्र० १।४५।
२. विक्र० १।५५।
३. विक्र० १।५८।
४. विक्र० १।६३।
५. विक्र० १।६४।
६. विक्र० १।६८-७३।
७. विक्र० १।७४-७८।
८. विक्र० १।७९-८६।
९. विक्र० १।९३-९६।

साच्चकार[1] । द्रविडप्रकाण्डस्यापि कीर्तिं विरसीचकार[2] । सकलासु दिक्षु अवाप्तविविधाहवविजयोऽसावाहवमल्लो राजधानीपदमलङ्कर्तुं पुराग्रगण्यं कल्याणपुरं निर्मापयामास[3] । सकलसम्पत्तिविभूषितेऽपि पुरेऽस्मिन् वसतिं स्वीकुर्वन्नयं राजा अनपत्यताजन्यदु:खेन दु:खितो बभूव । ततः सहधर्मिण्या सह विमृश्य राज्यसम्बन्धिप्रबन्धजातं मन्त्रिषु विनिक्षिप्य मनोरथावाप्तये तपस्तपनतत्परोऽभूत् । पार्वतीपतिपरिचर्यापरायणश्चासौ 'त्वयि भवानीदयितः प्रसन्नोस्ति, अतस्त्वदीया जाया तनयत्रितयस्य प्रसवित्री भवित्री । तत्र मध्यमसुतः शिवानुग्रहविशेषवशाद् विपुलबलो भविता' इत्याकाशवाणीमाकर्ण्य पारणाविधिं व्यधत्त ।

किञ्चित्कालानन्तरं पुरन्दरनिभोऽसौ नृपः शुभमुहूर्ते स्वकीयमहिष्या सुन्दरं सुतमवाप्य तज्जनितहर्षप्रेरितोऽतिसमृद्धमुत्सवं सम्पादयन् परां प्रसन्नतामधिजगाम । यतो हि तस्य (नृपस्य) ज्येष्ठः कुमारोऽनपत्यतातृषातृषितानां चकोराणामिव राजकुलनेत्राणां तृषां स्वोज्ज्वलाननसोमेन (चन्द्रेण) शमयाञ्चकार, अत एव तस्य 'सोमः' (सोमेश्वरः) इति यथार्थमेव नामकरणं बभूव । पुनश्च कालक्रमेण गर्भवती राज्ञी दैवज्ञप्रतिपादिते शुभे मुहूर्ते प्रसूतिगृहं प्रविश्य गुणगणान्वितेऽनन्यराजगृहीतजन्मनि शुभे लग्ने भगवतः शङ्करस्य कृपया चक्रवर्तिसम्राजः चिह्नैरङ्कितं सुतमजीजनत्[4] ।

वीरबालोचितविशिष्टचेष्टानुमानैः तेजसा भावितो विक्रमस्य परिचयं ददतस्तस्य बालस्य विक्रम इति यथार्थमेव नामकरणं कृतं तदीयपित्रा । शैशवावस्थायामेव राजकुमारविक्रमः सर्वविधलिपिज्ञाने चतुरतामाससाद । प्रतिभाजुषस्तस्य मुखे शारदा वासमाससाद, अत एवासौ सौष्ठवसम्पन्नकाव्यनिर्माणे वचनरचनायाञ्च प्रागल्भ्यमधिजगाम ।

एतस्मिन्नन्तरे एव राजमहिषी स्वकीयां तृतीयां सन्ततिं जनयामास । तृतीयराजसुतो 'जयसिंह' इति संज्ञामलभत । किञ्चित्कालानन्तरं समस्तासु शास्त्रशस्त्रविद्यास्वधिगतनैपुण्यं स्वकीयविक्रमाभिधानं मध्यमं पुत्रं सङ्ग्राममहोत्सवार्थं लालायितं दृष्ट्वा नृपतिराहवमल्लः साम्राज्यधुरं स्वयमेव वहन् युवराजपदे च तं नियोक्तुं चिन्तयामास[5] । तदनु राजकुमारविक्रमस्य कर्णकुक्षौ वार्तेयमपतत् । एतस्मात् कारणादेकस्मिन् दिवसे स्वपितरमुपगम्या-

---

१. विक्र० १।१०२-१०३ ।

२. विक्र० १।१४-१७ ।

३. विक्र० १।१ ।

४. विक्र० २।८५ ।

५. विक्र० ३।२८ ।

तिशयविनम्रभावेन जनकं जगाद—'सर्वेऽपि राजानो मदीयामाज्ञां पालयन्ति,[१] दानायोपभोगाय च नास्ति मम द्रव्याभावो भवतामनुग्रहेण सर्वमपि सुलभं मम। कृपया युवराजपदे मदीयनियोगविचारः स्थगनीयः'[२] इति एतां पुत्रस्योक्तिं निशम्य राजा प्रोवाच—'हे वत्स ! कथं विरुद्धमाचरसि मदभीप्सितस्य। तव जन्मनः कृते कियन्मया तपस्तप्तमिति त्वं न वेत्सि ! भगवान् चन्द्रमौलिरेवैतत्सर्वं वेत्ति। अतो मम मनोरथविरोधं विहाय मदभीप्सितस्याचरणं कृत्वा मदीयामाज्ञां पालय' इति। कुन्तलपतेः वचांस्याकर्ण्य महता खेदेन चेखिद्यमानचेता राजसूनुरित्थं प्रत्यब्रवीत्—'महाराजाधिराजस्य नीतिनिपुणस्य तत्रभवतः पुरतो मया किमपि भाष्यमाणं कवीनां समक्षं वाचालता सुधामयूखस्य च पुरतः सौन्दर्यमद एव प्रतिभाति, तथापि भक्तिपूर्वकं किमपि वच्मि। हे देव ! अस्माकं चालुक्यकुलं मर्यादाप्रतिष्ठापकमस्ति, यदीदमेव कुलमाचारमर्यादां परित्यज्य तद्विरुद्धवृत्तिमाचरिष्यति तर्हि महानर्थस्यास्तित्वे कलिकालरूपगजोऽङ्कुशराहित्येन स्वतन्त्रविचरणेन धर्मभ्रंशतामापादयिष्यति। अग्रजे स्थिते यौवराजभावे नास्ति ममाधिकारः[३]। अतो ममाग्रज एव युवराजपदवीमधितिष्ठतु। अहन्तु आक्रान्तदिगन्तर उभयोरपि भवतोः पादातिको भूत्वा स्थास्यामि[४]। क्रमविपर्यासस्तु महतेऽनर्थाय कल्पते।' कर्णाटपतिः पुत्रादेवैवंविधं श्रोत्रपवित्रं वचनं निशम्याश्चर्यचकितो भूत्वा पुनरब्रवीत्—'शौर्यादिगुणग्रामहीने सोमेश्वरे स्वभावचपलेयं श्रीः कथं स्थिरतां समुपैष्यति ! सोमेश्वराय राज्यप्रदानप्रतिबन्धकत्वे न मे कोऽपि दोषः। यदि ते वर्ततेऽत्र जिज्ञासा तर्हि ज्योतिषिककुलं पृच्छ। तैस्तस्य साम्राज्याधिग्रहणप्रतिबन्धकत्वे तदीयपापग्रहा एव प्रमाणमिति प्रतिपादितम्[५]। तथा च चन्द्रचूडाभरणः भगवान् शिवोऽपि साम्राज्याधिग्रहणं तवैव प्रत्यपादयत्' इति स्वकीयजनकेनाऽऽहवमल्लेनाभिधीयमानो विक्रमः कुमारः पुनरब्रवीत्—'यद्यपि राज्यप्रदानग्रहा ममाग्रजस्य प्रतिकूला एवञ्च पार्वतीपरमेश्वरोऽपि तम्प्रति दयाविहीनस्तथापि तैरेव ग्रहैर्भवान् कृतकृत्यो भविष्यति, अतोऽग्रजराज्याधिकारग्रहणरूपापकीर्तिभ्योऽहं रक्षणीयः'[६], इत्यादिभिश्चित्रविचित्रैर्वचोभिरुदारस्वभावोऽसौ कुमारः पितुः हर्षं संवर्धयन् स्वाग्रजस्य

---

१. विक्र० ३।३०।
२. विक्र० ३।३०।
३. विक्र० ३।३५।
४. विक्र० ३।३९।
५. विक्र० ३।४९।
६. विक्र० ३।५२।

सोमदेवस्यैव यौवराज्ये नियुक्तिमकारयत् । तदनन्तरं स्वकीयपितुराज्ञया राजकुमारो विक्रमादित्यः रणयात्रार्थं प्रतस्थे । सर्वप्रथमञ्च चोलानाक्रान्तवति तस्मिन् चोलनरेशो राजधानीं परित्यज्य पलायितः[1] । तदीया काञ्चीनगरी लुण्ठिताभूत्[2] । विक्रमदेवः शरणागतं मालवदेवं पुनस्तदीये निष्कण्टके राज्ये प्रतिष्ठापयामास । अन्यैरपि बहुराजैः स्वकन्याप्रदानपुरस्परं स्वकीयं राज्यं तस्मै समर्पितम् । सङ्गरोपप्लवेऽखर्वगर्वोन्नतकन्धरान् हतवतस्तस्यात्युन्नतस्य राजसुतस्यासिप्रहाराद्रक्षणोपायः पराजयस्वीकृतिमन्तरा प्रतिपक्षक्ष्माभृतां कृते नापर आसीत् । मलयाद्रौ[3] विक्रमः केरलनरेशान् हत्वा तेषां रक्तप्रवाहेण समुद्रं मलीमसं विधाय अगस्त्यद्वारा चुलुके समुद्रपानभयान्मोचयामासवारिधिम्[4] । सिंहलदेशस्य नृपो विक्रमस्य शरणं स्वीकृतवान् । स्वकीयाप्रतिहतभुजबलशौर्येण वेङ्गिराजं हत्वा तस्य स्त्रीवैंधव्यव्रताचरणे नियोजितवान्[5] । चक्रकोटनृपतिं विजित्य सर्वानपि तस्य दन्तिनोऽपहृतवान्[6] ।

दिशो विजित्य निवर्तमानस्य विक्रमस्य मनसि उद्वेगः सहसा समजायत । वामनेत्रस्य मुहुर्मुहुः स्पन्दनेन तेन स्वकीयजनकस्य स्वास्थ्यहानिरनुमिता तथा चासावितथमनुभूतवान् यत्केचनादृश्या जनास्तत्कर्णपथे तस्य जनकस्य स्वास्थ्याननुकूलतामकथयन्निव । विजितविविधवस्तुवृन्दञ्चापशकुनजन्यानिष्टव्यापारनिवृत्तिहेतवे वेदविद्विप्रेभ्यो दातुं कृष्णानदीवेलायामेवाप्रयाणञ्चक्रे । तस्मिन्नेवावसरे कल्याणपुरात्समागतं विवर्णवदनं सम्मुखे समुपस्थितं मुख्यदूतं ददर्श । दूतश्चासावप्रियां वार्तां कथयितुमनिच्छन्नतिदीर्घं निःशश्वास । ततः समीपागतं दूतं पितृप्रियो राजसूनुरपि कुशलिनः तातपादा इति सकौतुकं पप्रच्छ । दूतोऽसौ मन्दं मन्दमुपविश्यावधारयन्नश्रुबिन्दून्नित्थमनुत्साहसहितया गिरा जगाद—अनुपमपराक्रमेण भवता पाण्ड्यराजः, चोलनरेशः, सिंहलाधिपादयोऽन्येपि बहवो राजानः पराभवं प्रापिता इति सुखमयीमवस्थामनुभूतवान् श्रीमान् महाराजः परं दाहज्वराक्रान्तोऽसौ नृपतिर्मलयजागुरुक्षोदच्छुरितोऽपि शान्तिं नासादयन् भवन्निविडाश्लेषामृतमाचकाङ्क्ष इति । शिवसायुज्यमवाप्य जीवनजराजन्यविडम्बनान्निराकर्तुमल्पैरेवाहोभी राजाधिराजस्तुङ्गभद्रामवाप ।

---

१. विक्र० ३।६६ ।
२. विक्र० ३।७६ ।
३. विक्र० ४।२ ।
४. विक्र० ४।१८ ।
५. विक्र० ४।२९ ।
६. विक्र० ४।३० ।

तत्रावतीर्य स्नात्वा च पार्वतीपतिपादपद्मोपासनापरोऽभवत् । सकलदेवाधिदेवं महादेवं ध्यात्वा दानपात्रेभ्यः प्रभूतं हाटकं प्रदाय वीचितूर्यनादैः सह शिवपुरीमारुरोह[1] । इति दूतमुखादिमानि वचांसि श्रुत्वा नेत्राभ्यामश्रुवर्षां वर्षन् गलनालेनोच्चैराक्रन्दन् मृदुस्वभावो जनकमरणदुःखाद्धरणितले लुलोठ, रुरोद विललाप च ।

तत्पश्चात् परेतस्य पितुः क्रियादिविधिं विधाय स्वाग्रजावलोकनकामनाकुतूहलेन नोदितः कल्याणपुरं प्रति प्रस्थितः महतीं शोकमुद्रामाकलयन् शोकसूचकनिःशब्दसैन्यसमूहेन स्वल्पैरहोभिरेव कल्याणपुरं प्रविवेश[2] । तदनन्तरं कञ्चित्कालं यावदुभावपि भ्रातरौ सौमनस्येनायापयताम् । गुणगरिष्ठोऽपि विक्रमदेवो ज्येष्ठं भ्रातरं पितृतुल्यममंस्त । दिग्विजये आसादितं सकलमपि द्रव्यजातं तस्मै समार्पयत् । तदनु कैश्चिदेव दिनैः सोमेश्वरः पापरतो बभूव, येन निष्कलङ्कं चालुक्यकुलं कलङ्काङ्कमाससाद । अधिकाधिककरादानादिभिः प्रजापीडनादिषु विक्रमस्यापि सहमतिरस्तीति प्राकाशयत्तदग्रजः । तत्पापपीडितं मन्त्रिमण्डलमपि विक्रम एव सत्तां गृह्णीयादिति व्यापारपरं बभूव, परं विक्रमः स्वयमेव मन्त्रिवर्गस्याग्रहं न स्वीचकार। सुधांशुसुधाधवलिम्ना धवलीभूतस्य चालुक्यकुलस्य कालुष्यापनयनाय कृतप्रयत्नोऽपि दुर्नयाध्वाध्वनीनमग्रजं तस्मात्पथः निवारयितुं न शशाक । दुष्कर्मजापयशोंऽशग्रहणभीत्या कुसरणिमनुसरतो भ्रातुरपि त्यागो वरीयानिति विचिन्त्य कल्याणनगराद्विनिर्जगाम । स्वयं कुमार्गे प्रवृत्तो जयसिंहमपि न तत्र प्रवर्तयेदिति कृत्वा स्वानुजमपि सह निनाय, इति वृत्तमसहमानेन सोमेश्वरेण विक्रमं ग्रहीतुं पृष्ठतः प्रहितं प्रभूतं बलं चूर्णितं समभूद् विक्रमविक्रमेण ।

कुमार्गगामिनो मम भ्रातूराज्यापहरणे द्राविडादयो राजानः समर्था न भवेयुरिति विचिन्त्य तुङ्गभद्रां प्राप्य रणकामनया चोलसम्मुखवर्ती बभूव । कञ्चित्कालं वनवासमण्डलमध्युष्य मलयनरेशं पूर्वप्रदर्शितपराक्रमान् संस्मारयन् पुरत उच्चचाल । एतस्मिन्नेवान्तरे कोङ्कणाधिपो जयकेशी तस्मै प्रार्थितादप्यधिकं धनं समार्पयत् । आलुपेशश्च रणचापलं परित्यज्य विक्रमान्महतीं समृद्धिमाप ।

ततः द्रविडेश्वरस्य दूतः विक्रमान्तिकमागत्य 'चोलभूपालस्त्रिभुवनसुन्दरीं स्वां सुतां भवत्सङ्गिनीं विधातुं चिकीर्षति' इति विनिवेद्य विक्रमस्वीकृतिं च

---

१. विक्र० ४।६८ ।

२. विक्र० ४।८९ ।

लब्ध्वा प्रत्यवर्तत। ततश्च चोलनरेशः तुङ्गभद्रायास्तटे गुणनिधानाय विक्रमाय विभूतिभरेण सहैव त्रिभुवनसुन्दरीं स्वनन्दिनीं समर्प्य जामातुराज्ञामवाप्य स्वराजधानीं प्रस्थितः। चोलनरेशादधिगतं धनं सर्वमपि कुन्तलेश्वरसूनुरतिथिजनेभ्यः प्रादात्। प्रसन्नचित्ते द्रविडेश्वरे गते गुणानुरागी कर्णाटवल्लभसूनुः क्षणे क्षणे तदर्थमुत्कण्ठितोऽभूत्।

किञ्चित्कालानन्तरं विक्रमदेवः क्रूरदैवदुराग्रहेण द्रविडेश्वरस्यानवसरे एव स्वर्गारोहणं शुश्राव। अतिकोमलेन चेतसा गुणानुरागकारणात्तथातिशयप्रेमवशाच्चिरं यावदश्रुप्रवाहं प्रवहन् बहुविधं विललाप। चोलनरेशस्य मृत्योरनन्तरं तस्योत्तराधिकारप्राप्तये विप्लवः समजनि। विप्लवसमाचारञ्चाकर्ण्य दुःखदुःखेन विक्रमश्चोलनरेशस्य वीरराजेन्द्रस्य पुत्रमधिराजराजेन्द्रं राज्यसिंहासने उपवेशयितुं प्रस्थितः कतिपयैरहोभिरेव काञ्चीं प्रविवेश[1]। तत्र शत्रुसैन्यसंघातं संहत्य चोलनरेशस्य युवराजं राज्येऽभिषिच्य मासं यावत् काञ्च्यामेव निवासं कृत्वा तुङ्गभद्रां प्रति ययौ। काञ्चीतो विक्रमाङ्कदेवे निष्क्रान्ते स्वल्पान्येव दिनानि व्यतीतान्यासन् यदा राजिगोपनामा वेङ्गिदेशनृपतिः राजेन्द्रचोलोऽधिराजराजेन्द्रं हत्वा तस्य राज्यं स्वायत्तीचकार। वृत्तमिदमाकर्ण्य आक्रमणाय सज्जीभूतो विक्रमादित्यदेवः आक्रमणकाङ्क्षया समायान्तं स्वाग्रजमपि पृष्ठतो रोद्धुं प्रायतत[2]। एवञ्च दुष्टग्रहगृहीतं शत्रुणा सम्मिल्य आक्रान्तुं समागतं स्वाग्रजमवलोक्य नेत्राभ्यां वाष्पाम्बुप्रवाहं मुञ्चन् चिन्तयामास, यदेष महतः क्लेशस्य विषयो यत्सहजभ्रात्रोः युद्धं संसारेऽपकीर्तिं जनयिष्यति, यतो हि न्यायमार्गाच्च्युतोऽयं मदीयाग्रजो मम रिपुणा सह सन्धाय मामेव हन्तुं समुपस्थितः, अत इदानीं केन प्रकारेणैनमनाहतमेवास्मात्सङ्गरस्थलादपनयामीति बहुविचारपुरस्सरं सन्देशराशिं सोमेश्वरसविधे प्राहिणोत्, यत्सम्भवतः कदाचित्कुकृत्यादस्मान्निवर्तेतेति, परं भ्रष्टमतिरसौ युद्धनिवर्तनात्मकान् समग्रान्नपि सन्देशान्न स्वीचकार। अस्वीकृतसर्वसन्देशो वीरविक्रमो भ्रातृहत्यारूपपातकात् संविविजे। इदं भ्रातृसंहननरूपमसत्कर्म कुतः समुपस्थितम्, स्वर्गस्थो मदीयजनक आहवमल्लो भ्रातृघातकं मां किं वक्ष्यतीति चिन्तापरमाहवमल्लसुतं विक्रमाङ्कदेवं स्वप्ने शशिशेखरो भगवान्नभ्यधात्—'हे पुत्रक ! त्वमिह जगति देवानां महत्कार्यं सम्पादयितुमवतारितोऽसि तत्किमर्थमिदानीं धैर्यधनस्य तव चित्तं तत्कार्यसम्पादनावसरे समुपस्थिते विकल्पदोलान्दोलितमस्ति। शीघ्रमेव तवाग्रजस्य सोमेश्वरस्य सकलमपि सुखहेतुपुण्यं क्षीणतामेष्यति। यतो हि

१. विक्र० ६।१०।

२. विक्र० ६।६-१०।

अतिशयकुकर्मनिरतानां प्राक्तनपुण्यसञ्चयोऽपि सत्वरमेव नंक्ष्यति । अतो रिपुविमर्देऽधिज्यकार्मुको भव । यतो हि भूमौ तावकीना स्थितिः धर्मपरिपन्थिप्रमाथायैव कल्पते ।

प्रातः उद्बुद्ध्य स्वप्नगतं गिरितनयादयितवचनं संस्मृत्य तदलङ्घ्यञ्च परिभाव्य सङ्गरार्थं सन्नद्धो बभूव । तदनन्तरं भीषणे सङ्ग्रामे प्रवृत्ते जयश्रीर्विक्रमाङ्कदेवमशिश्रियत । विक्रमेण प्रमाथ्यमानो वेङ्गिनरेशः सङ्गरधरां परित्यज्य पलायमानोऽज्ञातस्थाने निवासं विदधे । सोमेश्वरश्च निगडबन्धनमाससाद । स्वानिष्टकाङ्क्षिणं भ्रातरं युद्धे पराजित्यापि भ्रातृवत्सलो विक्रमादित्यः पुनस्तस्मै राज्यप्रदाने मतिं बबन्ध । परं तस्येष्टदेवो भगवान् गौरीपतिस्तं तत्कर्मणो निवारयामास[1] ।

ततः कल्याणनगरं समागम्य महता समारोहेण आत्मनो राज्याभिषेकञ्चकार[2] । आत्मनोऽनुजं जयसिंहं वनवासमण्डलस्य अधिपतित्वेन नियोजयामास । राज्याभिषिक्तेन रिपुदोर्दण्डदलनक्षमेण विक्रमाङ्कदेवेन प्रजामनोरथानापूर्य सकला दिशः स्वायत्तीकृताः । चौलनरेशस्य प्रतापं पुनः शीतलतां प्रापय्य अन्यान् राज्ञः पराजित्य कल्याणनगरमागत्य स्वीयं धनुर्विश्रामयामास ।

विक्रमाङ्कदेवे कल्याणं प्रविष्टे भुवनविजयिनः कामदेवस्यानन्यमित्रं मधुस्तत्र जजृम्भे । तदानीमेव एका महदाश्चर्यान्विता कथा राज्ञो विक्रमाङ्कदेवस्य कर्णगोचरतामगात्, यत् कर्हाटदेशनृपतेः स्मरस्य विजयप्रशस्तिरिव सकल-लोकलोचनसंवननमुपगता राजपुत्री गिरिजादयिताज्ञया कस्यापि कृतिनः कुमारस्यावाप्तये स्वयम्वरक्रियां चिकीर्षतीति । चन्द्रलेखेवातिशयशोभामाकलयती चन्द्रलेखाभिधा राजकन्या नामग्रहणमात्रेणैव तन्मानसमाविवेश । चन्दलदेव्यामनुरक्तो रतिपतिशराहतो वीरोऽपि विक्रमोऽहर्निशं गण्डपाण्डुतामासादयन् लोकत्रितयचिन्तापहारकोऽपि चन्द्रलेखा मदनुकूलतामासादयिष्यति न वा इति चिन्ताक्रान्तो बभूव । नितान्तमेकान्तवासेन अन्तःपुररमणीभिः सह संलापपरिहारेण आत्मकामातुरतागोपने कृतप्रयत्नस्यापि विक्रमभूपतेः कामातुरता ताडितडिण्डमाभूत् । कामचातकाय दिव्याम्बुधारामिव चन्द्रलेखावार्तामादाय एको दूतः नृपतिमुपगम्येत्थं व्यजिज्ञपत्— 'स्मरशरव्यतामापन्ना भवन्नामश्रवणमात्रेण भवत्यनुरक्ता चन्दलादेवी सर्वमपि जीवलोकं भवन्मयं पश्यति । तस्याश्च पिता पार्वतीदयितस्य स्वयम्वरकरणरूपाज्ञां लब्ध्वाऽन्यै राजभिर्याचितामपि तां कस्मैचिद् अपि न प्रयच्छति । भवता सह सान्द्ररागोऽसौ प्रार्थनाभङ्गभयाद्भवन्तं

---

१. विक्र० ६।६३ ।

२. विक्र० ६।६८ ।

तद्विषयकवार्तां न वक्ति । हे महीपाल ! स्वयम्वरावसरोऽपि नेदीयानेवास्ति । तस्मादुत्तिष्ठ स्वयम्वरं कुरु । विजयश्रीरिवासौ चन्द्रलेखा तव भार्यात्वं प्राप्नोतु' इति । दूतमुखादीदृशीं वाचमाकर्ण्य जवोत्तरङ्गैस्तुरङ्गमैर्मन्मथराजधानीं कर्हाटराजपुत्रीं चन्दलां जायात्वेनावाप्तुं प्रस्थितः ।

ततः कर्हाटनृपतिना कृतातिथ्योऽसौ स्वयम्वरोत्कण्ठितराजचक्रां स्वयम्वर-भुवमवाप । क्षणेनैव क्षौमाम्बरप्रस्फुरदुत्तरीया मृगलोचना चन्द्रलेखा तत्राविरासीत् । तामवलोक्य सर्वमपि राजन्यचक्रं परमौत्कण्ठ्येन चकितचकितं सम्बभूव । तदनन्तरं कयाचित्प्रतीहारयामिकया क्रमशो रामवंशीयकुमारचेदिराजकान्यकुब्जेश्वरपार्थकुलकुमारकालिञ्जरक्ष्माभृद्गोपाचलक्ष्मापतिमालवेन्द्रगुर्जरराजपाण्ड्यनरेशचोलभूपाश्च प्रदर्श्य वर्णिताः । परं सर्वानपि वर्णितराजकुमारान्परित्यज्य पतिम्वरा चन्दला विक्रमाङ्कदेवकण्ठे संवरणस्रजं चिक्षेप । विक्रमाङ्कदेवपराक्रमसंत्रस्तो न तत्र कोऽपि भूपोऽक्रमं कर्तुं समर्थोऽभूत् । परिणीतचन्दलेन विक्रमदेवेन वसन्तर्तौ पुष्पावचयदोलान्दोलनसुरापानादिसुखेन सममेव चन्द्रलेखया सह कामकेलिसुखमनुभवता कानिचन दिनानि कर्हाटराजधान्यामेव व्यतियाप्य कल्याणपुरमागत्य सहैव प्रियया वर्षर्तोः सुखमन्वभूयत ।

ततश्च सितमेघैः पलितशिरसि वसन्तर्तौ कश्चिदाप्तजनो विक्रमाङ्कदेवं रहसि निवेदयामास[१]—'हे राजन् ! अहं किमपि कर्णकठोरवचनं निवेदयितुमिच्छामि कृपया मां क्षमस्व। यतो हि ईश्वराः स्वकार्यासिद्धिमसिद्धिं वाऽविचिन्त्य सेवकानां सत्सेवयैव सन्तोषमनुभवन्ति । निजाग्रजस्याभ्युदयमिच्छता भवता वेङ्गिराजमवजित्य वनवासमण्डले शासकत्वेन नियुक्तो जयसिंहो नीतिवर्त्मातिवर्तते[२] । अविशङ्कचित्तेन तेन न्यायच्युतेन प्रजापीडनरतेन भुवो निर्जनाः कृताः वात्सल्यप्रेमाभिभूतेन भवता दत्तैर्मत्तैर्गजैर्भवदनुजस्तत्कर्म कर्तुं प्रवृत्तो यच्चिन्तनमपि पापाऽऽवहम् । असौ कुकर्मनिरतस्सर्वमाटविकमण्डलं करतलगतश्चकार । द्रविडेश्वराय सततोपहारदानैः साहाय्यादानाय प्रयतते, बहुभिश्च भेदोपायैर्भवद्बलस्य नाशमिच्छति[३] । सत्वरमेव कृष्णानदीतटे भवतः साम्मुख्यं विधास्यति ।' इत्युक्त्वा गुप्तचरे विरते शरच्चन्द्रामलो विक्रमाङ्कदेवो झटिति किमपि नावोचत् । यतो हि धैर्यधना न सहसा कामपि क्रियां विदधति[४] । 'अहं

---

१. विक्र० १४।१ ।

२. विक्र० १४।४ ।

३. विक्र० १४।१२ ।

४. विक्र० १४।१४ ।

नीतिमार्गपरिच्युतमग्रजं पूर्वमेव शल्यमिव मनसि धारयामि, इदानीं ममानुजोऽपि तमेव मार्गमनुसरतीति कथं सह्यम्'। इत्यादिभिर्विचारैः पृथिवीपतिर्विक्रमादित्यदेवः सन्तप्तोऽपि कोपपरवशो नाभूत्। यतो हि दैवदुर्विपाकास्पदबान्धवास्ताहक्षाणामनुशयाय भवन्ति न तु क्रोधाय। चारविशारदेन जयसिंहषड्यन्त्रविषये सम्यग्बोधितो नीतिचतुरः पुनरपि सर्वतोभावेन सत्यमिदं वृत्तमिति गुप्तचरैर्विज्ञाय किमत्र कार्यमिति चिन्ताक्रान्तो बभूव। इत्थं भूते व्यतिकरे चन्द्रलक्ष्मीविस्तारविशारदं मेचकमेघाक्रान्तं नभः शुभ्रं कुर्वती शरत्समाजगाम। अनुजविद्रोहचिन्तादग्धो नृपस्तासु कन्दर्पकरदीपिकास्विव शरच्चन्द्रिकास्वपि प्रसन्नतां नाससाद। विक्रमाङ्कदेवप्रहितान्सान्त्वनाक्रमान् समवाप्यापि दुर्नयानिललङ्घितोऽसौ कुलकलङ्क एकमपि सान्त्वनावचनं न स्वीचकार[1]। 'कोऽस्या विपदः प्रतिकारोपायः', इति चिन्तयति विक्रमाङ्के बाहुबलगर्वगर्वितः सिंहदेव आक्रमणार्थं सज्जीभूय कृष्णानदीतटमाजगाम। बहवोऽन्ये नृपा विक्रमाङ्कदेवमपहाय जयसिंहबलमाश्रितवन्तः। स्वविनाशसूचकान् कुकर्मक्रमान् कुर्वन्नपि चिरं यावत् कुन्तलनृसिंहक्रोधपात्रं नाभूत्, परं नितरां निरङ्कुशोऽसौ तस्यानुजोऽहर्निशं दुर्वचनप्रयुक्तसन्देशपरम्परां प्राहिणोद्विक्रमदेवस्य सविधे। तस्य चापलपरम्पराप्रेरितः पृथिवीपतिः जयसिंहं सत्वरमभिययौ[2]। पूर्वं कृष्णानदीतटे सैन्यविरामं विधाय नीतिनिपुणोऽसौ सामनीत्यैवानुजं सान्त्वयिन्तुं प्रयासपरायणोऽभवत्। यतो हि भाग्यव्यत्यासे बुद्धिर्निरन्तरं निरङ्कुशतां भजतीतिकारणादग्रजसान्त्वनामस्वीकृत्य तत्सन्धिप्रयासान् वितथीचकार जयसिंहः। अवितथप्रयत्नो विक्रमदेवो युद्धाय सज्जीभूय मदान्धगजमारुह्य युद्धभूमिं विवेश। ततश्च वीररससागरमुन्मथ्य विजयसुधाहरणोद्यतैर्भटैः प्रलयकालभयङ्करं युद्धं पक्षद्वये समारभ्यत। तस्मिन् युद्धे रिपूनवजित्य कुन्तलक्ष्मापतिश्शत्रोः गजतुरगादिश्रियमादाय विजयध्वजालङ्कृतां राजधानीं विवेश। अरण्यप्रान्तात्प्राप्तं कुलकलङ्कमपि स्वानुजं दयोद्भूतबाष्पबिन्दुवृन्दो गद्गदपदावल्या संलप्य सन्तोष्य च तस्यापराधं चक्षमे[3]। तदनन्तरं अन्तःपुरेण सह मृगयाविनोदार्थं गतो विक्रमो वराहयूथानां केसरिणां रङ्कुमृगाणामाखेटकं कृत्वा तत्रैव शिशिरशोभया सेवितोऽभूत्। राजधानीमागत्य धर्मेण प्रजां पालयन् तस्या भौतिकीं दैवीमपि रुजं जहार।

---

१. विक्र० १४।४६।

२. विक्र० १४।५७।

३. विक्र० १५।८७।

अथ कालक्रमेण तत्समानाकारास्त्रयः कुमाराः स्वजन्मभिश्चालुक्यकुलमलञ्चक्रुः। धर्मोद्धरणधुरन्धरो धरादयितश्च बहून् मन्दिरतडागाग्रहारादीन् निर्माप्य कलिकालकलङ्कशमनश्चकार। पुनश्च चोलचमूचङ्क्रमणञ्चारमुखादाकर्ण्य काञ्चीमभिययौ। तत्र च खरशरशरव्याणि रिपुभटवदनानि मुद्रयित्वा चोलेन्द्रं पलायितुं विवशीचकार। कल्याणपुरमागत्य च श्रीराम इव प्रजां पालयन् चिरं यावद् राज्यश्रियं सेवयाम्बभूव।

इत्यस्ति मुख्यं कथानकं महाकाव्यस्यास्य। अन्या चापि काश्मीरनरेशसम्बन्धिनी खण्डा कथैका गौणरूपेण विक्रमाङ्कदेवचरितस्याष्टादशे सर्गे महाकविना बिल्हणेनोपन्यस्तास्ति।

कथानकौचित्यम्

उचितार्थविशेषेण प्रबन्धार्थः प्रकाश्यते।
गुणप्रभावभव्येन विभवेनेव सज्जनः[1] ॥

उक्तपद्यमाधारीकृत्य कथानके तदौचित्यस्य परमावश्यकता वर्तते इति निश्चप्रचम्। विक्रमाङ्कदेवचरितस्य कथानकेऽपि उक्तदृष्ट्या औचित्यसमावेशो वरीवर्ति। विक्रमाङ्कदेवचरितस्य कथानकमैतिहासिकमस्ति। काव्यशास्त्राचार्यैरपि काव्ये ऐतिहासिककथानकस्यैव महत्त्वमङ्गीकृतमस्ति। विक्रमाङ्कदेवचरितरचनाकाले काव्यस्यास्य कथानकं नासीदैतिहासिकम्। अस्यैतिहासिकता पश्चात्संवृत्ता इति सत्यम्। परं काव्याशास्त्राचार्यैस्तस्य पुरुषस्य चरित्रमपि काव्ये उपादेयं कथितम्, यः खलु भविष्ये ऐतिहासिको महापुरुषः सम्पत्स्यते[2]। विक्रमाङ्कदेवचरितमेकं प्रबन्धकाव्यमस्ति। प्रबन्धकाव्ये च जीवनस्य सरसं चित्रणं भवति। तत्र च घटनावर्णनानि परस्परं स्वाभाविकक्रमेण गुम्फितानि भवन्ति। तत्र च रसानुभूतिजनकानां हृदयस्पर्शिनाञ्च वृत्तानामेव सापेक्षता भवति। कुत्रचिच्च सङ्क्षिप्तघटनानां विस्तरम्, तथा चान्यत्र नितान्तनूतनानां घटनानां कल्पनमपि कविः कर्तुं शक्नोति। असौ काव्ये रसोपयोगिनमेव कथांशं गृह्णाति। रसविरोधिनमनुपयोगिनञ्चांशं परित्यजति। अभीष्टरसनिष्पत्तये काल्पनिककथांशमपि सृजति[3]। तुलसीरामायणकथाभागेषु वाल्मीकिरामायणाद्वैभिन्न्यं स्पष्टमेव। उत्तररामचरिते नाटकस्य दुःखान्तत्वपरिहाराय

---

१. औचित्यविचारचर्चा ३।१३।

२. इतिहासकथोद्भूतमितरद्वा सदाश्रयम्—काव्यादर्शः १।१५।

३. ध्वन्यालोकः ३।६६-६७।

अन्ते सीतारामयोर्मिलनं परिकल्पितमस्ति । अभिज्ञानशाकुन्तले च दुर्वाससः शापस्य कल्पनाऽपि महाकविना कालिदासेन दुष्यन्तचरित्रस्य रक्षार्थमेव परिकल्पिताऽस्ति ।

अत्र काव्ये सर्वप्रथमं कथानकस्य उपक्रमे एव इन्द्रविधात्रोः संवादः काल्पनिकोऽस्ति, एष खलु संवादः काव्यकथानकोपक्रमं सौन्दर्यविशेषेण विभूषयितुं कल्पितोऽस्ति । अस्मिन् विषये च बिल्हणोऽपि तावदेव सफलो बभूव यावत् कुमारसम्भवे कालिदासः । अतो नात्र संशयो यदुक्तसंवादकल्पनया कथानकोपक्रमस्य वैशिष्ट्येन शोभातिशालिता सम्पद्यते ।

नायकस्य पूर्वजानां कथावर्णनप्रसङ्गे केषाञ्चित् परित्यागोऽपि समुचित एव । अन्यथा कथानकेऽनावश्यकविस्तरेण तस्य रोचकतायां दुष्प्रभावनिवेशः सम्भाव्य आसीत् । येषाञ्च नायकपूर्वजानां परिचयः कविना प्रदत्तोऽस्ति तस्य सङ्क्षेपोऽप्युक्तदृष्ट्या समीचीन एव । विक्रमाङ्कदेवस्य कथायाः कथानकत्वेन स्वीकरणे कविना महदौचित्यं समीक्षितमिति प्रतीयते । यतो हि पार्वतीपरमेश्वरकथानके देवादिविषयकरतिं वर्णयन् कालिदासोऽपि आलोचकानामालोच्यो बभूव ।

आहवमल्लस्य तपश्चरणेन पुत्रप्राप्तिरूपकल्पनाया वैशिष्ट्येन काव्यकथानके आद्योपान्तं सम्बन्धो वर्तते । कथानकस्योक्तांशो वैविध्येन प्रभावयति महाकाव्यमिदम् । प्रथमन्तु तपोमाध्यमेन कथानकस्य पवित्रीकरणमस्ति । यथा कालिदासस्य कुमारसम्भवे पार्वतीतपसा तत्कथानकस्य पवित्रीकरणं सङ्गच्छते । द्वितीयम्—भगवतः शिवस्य तपश्चर्यायां तस्य स्वकीयं शैवत्वसंसाधनमपि कारणमस्ति । तृतीयञ्च—नायकस्य धीरोदात्तचरित्रे अग्रजराज्यापहरणादिदोषपरिहरणं कारणमस्ति । चतुर्थम्—विक्रमाङ्कदेवस्य अतुलबलत्वे सर्वविजेतृत्वे सार्थकत्वस्य प्रतिपादनाय तपश्चरणेनाशरीरिण्या वाचा च तनयत्रितयवरप्रदानादिकथांशस्य औचित्यं संसिध्यति ।

सोमेश्वरं परित्यज्य तदनुजाय विक्रमाय राज्यप्रदानादिरूपात्मकः कथांशोऽपि काल्पनिको वर्तते। अत्रापि कल्पनायामौचित्यद्वयं वर्तते। तत्र आहवमल्लस्य सोमेश्वरं व्युत्सृज्य विक्रमाय राज्यप्रदानाऽऽग्रहेण, विक्रमस्य तत्र निस्पृहाप्रदर्शनेन च उभयोः संवादमाध्यमेन कथानके राजनीतिकतत्त्वविनिवेश एव प्रथममौचित्यम्। सोमेश्वरविक्रमवैमनस्ये विक्रमस्य निर्दोषत्वप्रकाशनञ्च द्वितीयमौचित्यम् ।

चतुर्थसर्गेऽपशकुनशान्त्यर्थं विक्रमस्य सर्वस्वदानविषयकवार्तां कथयित्वा पुनस्तत्रैव दिग्विजयविजितवस्तुजातस्य सोमेश्वराय समर्पणरूपवार्ताया औचित्ये शङ्कावकाशः स्वाभाविक एव । परन्तु कथानकस्य सूक्ष्मसमीक्षणेन शङ्कायाः

परिहारोऽपि सञ्जायते । कविना कुत्रचिदपि तेन सर्वस्वदानं कृतमिति नोक्तम् । तेन हि 'दुर्निमित्तशान्तये सर्वस्वदानमालोक्यासौ कृष्णानदीतटेऽप्रयाणं चक्रे' इत्युक्त्वा तदग्रिमे पद्ये 'तत्क्षणमेव राजधानीतः पितृमरणसन्देशमादाय दूतः समाजगाम' इत्युक्तम् । कविप्रतिपादितेन सन्दर्भेण कथांशे वदतोव्याघातत्वं नोपपद्यते ।

दूतसन्देशमाध्यमेन आहवमल्लस्य मृत्योर्वर्णनमपि अधिकमौचित्यपूर्णं वर्तते । उचिते देशे काले च करुणरसस्य निष्पत्तिहेतवे उपर्युक्तपद्धत्या मृत्युवर्णनमधिकमौचित्यमावहति। पितृमृत्युवर्णनं महत्कारुणिकं भवति । तन्मृत्युवृत्तान्तं दूरस्थसुतो यदि शृणोति तर्हि कारुण्यं द्वैगुण्यं भजते । अतो दूतमुखेन पितृमरणवार्तामाकर्ण्य विलपतो विक्रमस्य वर्णने करुणो रसः कथांशं साक्षादुपकरोति । एतेन प्रतीयते यत् कृतदिग्विजयं विक्रमं दूतमुखेन पितृमृत्युं विश्राव्य करुणरसस्य निष्पत्यै समुचितोऽवसर आसादितः कविना । दूतस्य दुःसन्देशाऽऽनयनात्प्रागेवापशकुनवर्णनाऽपि अतीवौचित्यवती ।

विक्रमस्य निर्दोषत्वसंसाधनाय तेनाग्रजाय दिग्विजयावाप्तवस्तुजातसमर्पणं यत्कविना कल्पितं तदपि यथास्थानमौचित्यवच्च । सोमेश्वरस्य दुश्चरित्रपरायणत्ववर्णनमपि काल्पनिकं वर्तते । तस्याप्यौचित्यं विक्रमस्य चरित्रे भ्रातृराज्यापहरणादिदोषस्य परिहारायैव वर्तते ।

चोलनरेशस्य कन्याप्रदानप्रस्तावं दूतमुखादाकर्ण्य विक्रमः पुनरपि गुप्तचरमाध्यमेन तत्प्रस्तावस्य सत्यतामवगत्यैव तुङ्गभद्रातटमगच्छदिति यत्कविना प्रतिपादितं तदपि सङ्गतं वर्तते । अन्यथा कस्मिंश्चिदपि शत्रौ विश्वासः कदाचिद् घातकोऽपि स्यादिति कृत्वा विक्रमस्य राजनीतौ चातुर्य्याभावशङ्कासमुदयो भवितुमर्हति ।

शत्रुसाहाय्यं विदधता भ्रात्रा सह युद्धं यद्यपि विक्रमचरित्रे न कमपि दोषमावहति, तर्ह्यपि तेन सह समरकरणे परममक्रमं मन्वानो बाष्पाकुलाक्षो विक्रमो नोद्यतो बभूव । बहून्यनयवचनानि च तत्पार्श्वे प्राहिणोत् जयसिंहः । विक्रमेण सामनीतिप्रयोगमन्तरेव दण्डनीतिप्रयोगेण भ्रातुर्बलं (चालुक्यबलम्) नाशितमित्यनौचित्यमत्र सम्भाव्यमासीत् । तस्य परिहारः कविनोक्तसन्दर्भेण कृतोऽस्ति ।

योद्धुमनुद्यतस्य विक्रमस्य भगवता शङ्करेण नोदनमपि कथानकस्य काल्पनिकोंऽशोऽस्ति । अत्र हि कल्पनाया वैशिष्ट्येनौचित्यं वर्तते । यतो हि योद्धुमकृतनिश्चयेन पुनस्तेन युद्धनिश्चयो हेतोरभावादनुचित एव । तत्रौचित्याभिनिवेशायैव उक्तकल्पनाया याथार्थ्यं सिध्यति । युद्धे विजितायापि सोमेश्वराय पुनाराज्यप्रदानकृतमतिर्विक्रमो भगवता शङ्करेण भूयो न्यषेधीति कथांशोऽपि

काल्पनिकः । अत्रापि विक्रमचरित्रस्योच्चतमत्वं प्रतिपादयितुमुक्तकल्पनायाः कथांशे प्रयोगोऽकारि । व्यावहारिकदृष्ट्या ऐतिहासिकदृष्ट्या च उक्तकल्पनायाः कथांशे प्रयोगस्य नास्त्यौचिती । पौराणिककथानकाऽऽधृतेषु महाकाव्येषु एव एतादृशीनां कल्पनानामुपयोगः स्वाभाविकः, ऐतिहासिकमहाकाव्येषु चासौ नितान्तमव्यावहारिकः प्रतीयते ।

जयसिंहस्य विद्रोहस्तु नास्ति काल्पनिकः, परं विद्रोहवर्णनप्रसङ्गे जयसिंहद्वारा विक्रमाय दुर्वचनपरम्पराप्रेषणं काल्पनिकं प्रतीयते । कविः दुर्वचनपरम्पराप्रेषणरूपकाल्पनिककथांशं सन्निवेश्य जयसिंहविक्रमयोर्भाविनि युद्धे जयसिंह एव दोषभागिति संसाधयितुमचेष्टत । उक्तचेष्टया विक्रमचरित्रस्योच्चत्वं कथानकस्य रुचिकरत्वमपि असिध्यत् । कृतापराधाय विद्रोहिणेऽनुजाय क्षमादानेनापि नायकस्य क्षमावत्तेति धीरोदात्तगुणस्तदीयनीतिनैपुण्यञ्च प्रतिपाद्यं कवेरस्तीति प्रतीयते ।

कथानकस्यान्ते पुनश्चोलराज्येऽभियानवर्णनेन काव्यकथानकं वीररसप्रधानमित्यभिधानं महदौचित्यमावहति, यतो हि काव्यस्यान्ते अङ्गिनो रसस्य स्थितिरवश्यं भवति । कथानके प्रबन्धौचित्यनिर्वाहणे कविः पूर्णसाफल्यमाप । किम्बहुना कथानके औचित्यं सम्यक्तया निर्वाहयितुमेव महाकविना ऐतिहासिकपक्षोऽप्युपेक्षितः केषुचित्स्थलेषु ।

आधिकारिकं प्रासङ्गिकञ्च वृत्तम्

द्विविधं कथावस्तु मुख्यं गौणञ्च । मुख्यं कथावस्तु आधिकारिकं गौणञ्च प्रासङ्गिकमुच्यते[1] । कथानकस्य प्रधानफलस्य स्वामी अधिकारी[2] तस्य इतिवृत्तमाधिकारिकमुच्यते । प्रसङ्गवशात्समागतमितिवृत्तं प्रासङ्गिकं[3] कथ्यते ।

---

१. वस्तु द्विधा । तत्राधिकारिकं मुख्य गौणं प्रासङ्गिकं विदुः ।
दशरूपकम् १।११ ।

२. अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः ।
तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकम् ॥
दशरूपकम् १।१२ ।

३. प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः—
दशरूपकम् १।१३ ।

तच्चाधिकारिकवस्तुनः सहायकं भवति । विक्रमाङ्कदेवचरिते विक्रमादित्यस्य जीवनसम्बन्धि इतिवृत्तं तु आधिकारिकम्, इन्द्रब्रह्मासंवादस्तैलपसत्याश्रयजयसिंहाहवमल्लादीनामितिवृत्तजातं प्रासङ्गिकम् । विक्रमादित्यस्येतिवृत्ते च सहायकमतस्तत्प्रासङ्गिकं वस्तु गौणमस्ति । काव्यशास्त्राचार्याः काव्यकथानके नाटकस्य सर्वेषां सन्धीनां[1] सर्वासाञ्च कार्यावस्थानामनिवार्यत्वं प्रत्यपादयन् । तेषाञ्च रसाभिव्यक्तौ साहाय्यार्थं सन्निवेशो न केवलं शास्त्रज्ञानावबोधाय[2] ।

विक्रमाङ्कदेवचरिते बीज-बिन्दु-पताका-प्रकरी-कार्याणां पञ्चप्रकृतीनां स्थितिः समवलोक्यते ।

बीजम्—

पूर्वं स्वल्पमुद्दिष्टं पश्चाच्च विस्तरं यदधिगच्छेत्तद्बीजम्[3] । अष्टमसर्ग विक्रमाङ्कदेवस्य चित्ते चन्द्रलेखाया अनुपमं सौन्दर्यमाकर्ण्य ताम्प्रत्यासक्तेरुत्पत्तिर्बीजम् ।

बिन्दुः—

अवान्तरकथायां विच्छिन्नायामपि प्रधानकथाया अविच्छेदो बिन्दुप्रकृतिरुच्यते[4] । चन्दलाया विरहेन सन्तप्तो विक्रमादित्यः कामचिह्नगोपनेऽसमर्थः सन्नुपवने विरहव्यथां क्षणमात्रं विस्मृतवान्, परं पुनःदूतमुखाच्चन्दलाया वृत्तान्तमाकर्ण्य विस्मृतवेदनां पुनः ससमार, अतोऽत्र बिन्दुप्रकृतिरस्ति ।

पताका—

या प्रासङ्गिका कथा दूरव्यापिनी स्यात् सा पताकेत्युच्यते[5] । अत्र हि आहवमल्लस्य कथा दूरव्यापिनी अस्ति । अतोऽत्र पताका प्रकृतिरिति ।

---

१. सर्वे नाटकसन्धयः—

दशरूपकम् १।२२ ।

२. सन्ध्यङ्गघटनं वापि रसाभिव्यक्त्यपेक्षया ।
न तु केवलया शास्त्रस्थितिसम्पादनेच्छया ।।

ध्वन्यालोकः ३।३८ ।

३. स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा । दशरूपकम् १।१७ ।

४. अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् । दशरूपकम्

५. सानुबन्धं पताकाख्यम्—दशरूपकम्

प्रकरी—

प्रसङ्गादागतमेकदेशे स्थितं चरितं प्रकरीति[1] नाम । प्रकरीप्रकृतौ नायकस्य किमपि स्वीयं फलान्तरं न भवति । अत्र इन्द्रब्रह्मणोः संवादः प्रकरीत्यस्ति ।

कार्यप्रकृतिः—

यत्प्रधानं साध्यं, यदर्थं सर्वे उपायाः समनुष्ठीयन्ते, यत्सिध्यर्थं सामग्री एकत्रीक्रियते तत्कार्यार्थप्रकृतिः[2] । अत्र हि विक्रमादित्यस्य राज्याभिषेकः शत्रुविजयश्चेति कार्यद्वयमस्ति ।

फलेच्छुभिः प्रारब्धस्य कार्यस्य पञ्चावस्था भवन्ति, ताश्च आरम्भ-यत्न-प्राप्त्याशा-नियताप्ति-फलागमनामभिः प्रसिद्धाः[3] ।

आरम्भावस्था—

आहवमल्लस्य पुत्रप्राप्त्यौत्सुक्यमेवात्र आरम्भावस्था ।

यत्नावस्था —

फलाप्राप्तौ तदर्थं त्वरोपेतप्रयत्नो यत्नावस्थोच्यते । पुत्रप्राप्तिरूपफलानवाप्तौ तत्प्राप्तये तपश्चरणनिश्चयोऽत्र यत्नावस्थास्ति ।

प्राप्त्याशा—

फलाप्राप्तौ उपायापाययोः शङ्कायामपि प्राप्तेरेव यत्राधिका सम्भावना भवेत्तत्र प्राप्त्याशावस्था भवति। अत्र आकाशवाण्या राजपुत्रत्रितयस्य वरप्रदानं प्राप्त्याशावस्थाऽस्ति ।

नियताप्तिः—

अपायस्य अभावे प्राप्तिः नियताप्तिरुच्यते । अत्र राजमहिष्या गर्भधारणं नियताप्तिरूपा कार्यावस्था वर्तते ।

---

१. प्रकरी च प्रदेशभाक्—दशरूपकम् ।

२. अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धनम् ।
समापनं तु यत्सिध्यै तत्कार्यमिति सम्मतम् ॥ दशरूपकम् ६।६९-७०

३. अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥द० रू० १।१६ ।

४. उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः । द० रू० १।२१ ।

५. अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता । द० रू० १।२१ ।

फलागमः—

समग्रफलस्य प्राप्तिः फलागमावस्था भवति[1]। अत्र त्रयाणामपि पुत्राणां जन्म फलागमरूपा कार्यावस्था वर्तते।

सन्धयः—

कथानके पञ्चसन्धीनां (मुख-प्रतिमुख-गर्भ-विमर्शोपसंहृतीनाम्) योगः अत्र सम्यगुपलभ्यते।

मुखसन्धिः—मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवा[2]। काव्येऽस्मिन् प्रथमतः तृतीयसर्गं यावत् यत्र बीजेन प्रारम्भावस्थायाः योगः तत्र मुखसन्धिरस्ति।

प्रतिमुखसन्धिः—बिन्दुप्रयत्नानुगमाद् यत्र फलप्रधानोपायस्य विकासः लक्ष्यालक्ष्यश्च भवेत्तत्र प्रतिमुखसन्धिः[3]। अत्र चतुर्थसर्गस्य कथांशः प्रतिमुखसन्धिः।

गर्भसन्धिः—पञ्चमसर्गे पूर्वसन्धिषु प्रकटीभूतस्य फलप्रधानोपायस्य ह्रास-विकासौ वर्तेतेऽत्र गर्भसन्धिः।

विमर्शसन्धिः—पञ्चदशे सर्गे बीजार्थः गर्भसन्धितोऽधिकं विकसितोऽत्र विमर्शसन्धिः।

उपसंहृतिसन्धिः—सप्तदशे सर्गे विक्रमेणेक्ष्वाकुणेव शासनमुपसंहृतिसन्धिः।

---

१. समग्रफलसम्पत्तिः फलयोगो यथोदितः। तत्रैव

२. द० रू० १।२४।

३. तत्रैव १।३।

४

ऐतिहासिकदृष्ट्या विवेचनम्

चालुक्यकुलोत्पत्तिः—

चालुक्यकुलोत्पत्तिविषये सिद्धान्तबाहुल्यं वर्त्तते । एषु प्रथमोऽग्निकुल-सिद्धान्तोऽस्ति । एनमनुसृत्योच्यते यदाबुपर्वते एकदा वसिष्ठोऽयष्ट, यज्ञमण्डपात् प्रथमं चौलुक्यस्याथवा चालुक्यस्योत्पत्तिरभूत् । परन्तु मतस्यास्य पुष्ट्ये न कोऽपि शिलालेखः, न ताम्रपत्रं, नापि चैतिहासिकमितिवृत्तमुपलभ्यते। पाश्चात्यसोलङ्कीतिकुलोत्पन्नस्य विक्रमादित्यस्य शिलालेखे लिखितमस्ति यच्चालुक्य-कुलोत्पत्तिश्चन्द्रवंशाद्बभूव, यो वंशः ब्रह्मणः पुत्रादत्रित आविर्बभूव[1] ।

पूर्वीयसोलङ्कीकुलोत्पन्नस्य राजराजप्रथमस्य (वि० सं० १०७६-११२० = ई० सं० १०२२-१०६३) एकस्मिन् ताम्रलेखे लिखितमस्ति यद् भगवतः पुरुषो-त्तमस्य नाभिकमलाद्ब्रह्मा प्रादुर्बभूव। राजभिरेभिरयोध्यायां शासनं कृतम् । अस्मिन्नेव वंशे समुत्पन्नो विजयादित्यः दक्षिणां दिशं विजेतुमयासीत् । अस्मिन्नेव वंशे राजराजो बभूव[2] । कथनस्यास्य समर्थनं राजराजस्य पितुः विमलादित्यस्य (वि० सं० १०७५ ई० सं० १०१८) एकेन ताम्रपत्रेण सञ्जायते[3] ।

बिल्हणस्य चुलुकसिद्धान्तोऽपि कुमारपालकालीनप्रशस्तौ स्वल्पपरिवर्तनेन सह व्यक्तोऽस्ति । तद्यथा—

---

१. "ओं स्वस्ति समस्तजगत्प्रसूतेर्भगवतो ब्रह्मणः पुत्रस्यात्रेः नेत्रसमुत्पन्नस्य यामिनीकामिनीललामभूतस्य सोमस्यान्वये सत्यत्यागशौर्यादिगुणनिलयः केवलं निजध्वजिनीजवक्षपितप्रतिपक्षक्षितीशवंशः श्रीमानस्ति चालुक्यवंशः ।"

—इण्डि० एण्टी० खण्ड २१, पृ० १२७ ।

२. इण्डि० एण्टी० खण्ड० १४, पृ० ५५-५५ ।

३. एण्डि० एण्टी० खण्ड० ६, पृ० ३५१-५८ ।

नमस्यन्नपि निजचुलुके पुण्यगङ्गाम्बुपूर्णे
सद्यो वीरं चुलुक्याह्व्यमसृजदिमं येन कीर्तिप्रवाहैः ।
पूतं त्रैलोक्यमेतन्नियतमनुहरन्त्येव हेतोः फलं श्रीः
वंशः कोऽपि ततो बभूव विविधाश्चर्यैकलीलास्पदम्[1] ॥

केचन जनाः चालुक्यकुलमूलं कन्नडवंशमामनन्ति,ताननुसृत्य चालुक्या इतिहासस्य कस्मिंश्चिदज्ञातकाले उत्तरतः दक्षिणभारतमाजग्मुः । चालुक्यानां कथनमस्ति यत्तेषामयोध्यायां राज्यमासीत् । परमिदं नास्ति ऐतिहासिकं तथ्यम्[2] ।

परं महाकविः बिल्हणश्चालुक्यानामयोध्यायां राज्यं सुस्पष्टं प्रत्यपादयत्—

प्रसाध्य तं रावणमध्युवास यां मैथिलीशः कुलराजधानीम् ।
ते क्षत्रियास्तामवदातकीर्तिं पुरीमयोध्यां विदधुर्निवासम्[3] ॥

तेषां चालुक्यकुलोत्पन्नक्षत्रियाणां वंशजा विजिगीषया दक्षिणस्यां दिशि पदं चक्रुरिति बिल्हणस्य सङ्केतः[4] । परं के सन्ति ते चालुक्यवंशजा यैः दक्षिणस्यां दिशि पदमकारि, इतिविषये इत्थं सम्भाव्यते—

चालुक्या उत्तरभारतस्य साहसिनः सूर्यवंशिनः क्षत्रिया आसन् । ते शनैः शनैः राजस्थान-मालव-गुर्जरदेशमार्गेण कर्णाटकप्रदेशमाजग्मुः । अस्य वंशस्य राजा प्रथमजयसिंहः स्वप्रतिवेशिनः राष्ट्रकूटान् कदम्बांश्च निर्जित्य राज्यस्थापनमकार्षीत् । तदनन्तरं रणरागः प्रथमः, पुलकेशिकीर्तिवर्म-मङ्गलेशादयः राजानो बभूवुः, ये दक्षिण-दिशः अतिविस्तृते दिग्विभागे चालुक्यानां सत्तायाः प्रसारमकार्षुः । पुलकेशिना प्रथमेन[5] वातापी[6] (वादामी) स्वकीयराजधानीत्वेन स्वीकृता । अस्य वंशस्य शक्तिमान् प्रतापी राजा पुलकेशी द्वितीय आसीत् । असौ (६०८) ईस्वीये वर्षे सिंहासनमवाप्य 'पृथ्वीवल्लभसत्याश्रयः' इत्युपाधिं प्राप्नोत् । उत्तरस्यां दक्षिणस्यां च दिशि सुदूरदेशेषु विजयमवाप ।

---

१. एपिग्राफिया इण्डिका खण्ड १, पृ० २९६ ।

२. प्राचीन भारत (एनशेण्ट-इण्डियायाः हिन्द्यामनुवादः), पृ० २५७ ।

३. विक्र० १।६३ ।

४. जिगीषवः केऽपि विजित्य विश्वं विलासदीक्षारसिकाः क्रमेण ।
चक्रुः पदं नागरखण्डचुम्बिपूगद्रुमायां दिशि दक्षिणस्याम् ॥
—विक्र० १।६४ ।

५. अनेन राज्ञा अश्वमेधयज्ञा अन्ये यज्ञा अपि कृताः ।

६. बीजापुरमण्डले 'वादामी' नाम्नी ।

एषां विजयानां विस्तृतं वर्णनं चालुक्यानाञ्च आरम्भिकैतिहासः (अइहोलस्य) एकस्मिन् जैनमन्दिरे भित्तौ अङ्किते अभिलेखे समुट्टङ्कित उपलभ्यते। यः ६३४-३५ तमे वर्षे अलिख्यत[1]। प्रशस्तिमिमां कश्चिज्जैनकविः व्यरचयद् य आत्मानं भारविकालिदासाविव मन्यतेस्म।

अनेनैव अभिलेखेन बिल्हणसङ्केतितचालुक्यानां दक्षिणविजयस्य सम्यक् पुष्टिः सञ्जायते।

अस्मादेव लेखाद् ज्ञायते यत्पुलकेशिना द्वितीयेन कादम्बानां राजधान्यां वनवास्यामधिकारः[2] कृत आसीत्। तथा चायं मैसूरस्य गाङ्गान् पराजित्य उत्तरस्यां मौर्यान् पराभूय जलसेनया द्वारापुर्यां (मुम्बईसविधे एलिफेण्टानवद्वीपनगरे) अधिकारमकार्षीत्। उत्तरस्यां च तेन लाट-मालव-गुर्जराणां केचिद् भागा विजिता आसन्।

येषु दिनेषु पुलकेशी द्वितीयो दक्षिणस्यां स्वशक्तिवर्द्धने प्रयतमान आसीत्तदानीमेव उत्तरस्यां हर्षवर्धनोऽपि स्वराज्य-सङ्घटने संलग्न आसीत्। महत्त्वाकाङ्क्षाप्रेरितस्य साम्राज्यद्वयस्यापि परस्परं सङ्घर्षोऽवश्यम्भावी आसीत्। अइहोलशिलालेखेन, ह्वेनत्साङ्गविवरणेनापि ज्ञायते यत् हर्षवर्धनः पुलकेशिना पराजित आसीदिति[3]। अनेन पराजयेन हर्षो दक्षिणस्यां दिशि स्वाधिपत्यं स्थापयितुं न प्राभवत्।

विन्ध्यप्रदेशात् पुलकेशी प्राचीं प्रति जगाम। तत्र दक्षिणकौशलान् कलिङ्गांश्च पराजितवान्। पुनश्च समुद्रतटमार्गेण दक्षिणाभिमुखमागच्छन् पिष्टपुरस्य (पीठापुरम्) दुर्गमधिकृतवान्। पुनः कावेर्याः पारङ्गत्वा चौलपाण्ड्यकेरलान् स्वायत्तीकर्तुं प्रायतत। एभिर्विजयैः पुलकेशी (द्वितीयः) विन्ध्यस्य दक्षिणतः समस्तभारतस्य एकातपत्रं प्रभुत्वमधिजगाम। तथा च उत्तरस्यामपि केषुचिद् भूभागेषु तस्याधिकार आसीत्। तस्य कीर्तिः भारतस्य बहिर्देशेष्वपि प्रससार। एवमप्युच्यते यत्तस्य पारसीकनरेशेन द्वितीयेन सह पत्राणामुपहाराणाञ्च आदानप्रदानादिकमासीदितीतिहासग्रन्थेषूपलभ्यते। चालुक्यराजाय्यणवंशचरितनाम्नि

---

१. एपिग्राफिया इण्डिका, भागः षष्ठः, पृ० १।

२. वनवासी=तन्नाम्नी नगरी।

३. अस्य युद्धस्य स्थानसमयौ अज्ञातौ, केचिज्जना युद्धमिदं पुलकेशिनो राज्यारोहणस्य वर्षत्रयानन्तरं (६।१२-१३ ई० समये) समभूदिति मन्यन्ते। सम्भवतो युद्धमिदं ६३४-३५ ई० तमे वर्षेऽभूदिति अनुमीयते।

हस्तलिखित-काव्ये समयनिर्देशेन सह अस्मिन् विषये विस्तृतं विवरणमुपलभ्यते[1], येन च ज्ञायते यज्जयसिंहप्रथमतोऽपि प्राक् चालुक्यराजान उत्तरतो दक्षिणां दिशं समाजग्मुः। तदनुसारं सर्वप्रथममयोध्यातो निर्गत्य विजयादित्य-नाम्ना राज्ञा दक्षिणस्यामागतम्। विजयादित्योऽयोध्याया राज्ञः चित्रकण्ठस्य अनुज आसीत्। अयं भ्रातुः कलहकारणाद् दुःखितो भूत्वा मित्रैर्बन्धुभिः परिवारेण च सह १४३ तमे शके वर्षे दक्षिणां दिशं प्रस्थाय चौवलिनामकं ग्राममाप। अयमेव कल्याणी-चालुक्यवंशस्य मूलपुरुष आसीत्। १४३ तमे शकेऽब्दे दक्षिणभारते पल्लववंशीय-त्रिलोचननाम्नो राज्ञो नर्मदाया दक्षिणे भागे शक्तिसम्पन्नं राज्यमासीत्। अस्य (त्रिलोचनस्यापि) इतिहास-ग्रन्थेषु नाम नोपलभ्यते। चालुक्यवंशीयविजयादित्यो नर्मदायास्तटे चौवलिग्रामे माहेश्वरमन्दिरसन्निधौ कानिचन दिनानि न्युष्य नर्मदापारमाजगाम। तत्र अजन्तायां दानादिकञ्च कृत्वा ब्राह्मणान् सन्तोष्य किञ्चित्कालमुवास।

---

१. स मानी विजयादित्यः पूर्वशक्तिसमन्वितः।
बुद्धिमान् नीतिनिपुणो धर्मकर्मरतः सदा॥१॥
कदाचिच्चित्रकण्ठेन तद्भ्रात्रा विमनायितम्।
तस्मात्त्यक्त्वा राजधानीमयोध्यां स्वकुलागताम्॥२॥
धीरो मनस्वी वीरोऽसौ प्रस्थितो दक्षिणां दिशम्।
स्वकलत्रादिभिर्युक्तो नर्मदायास्तटेऽगमत्॥३॥
रामवेदाब्जसंख्याके (१४३) शके चौवलिनामके।
ग्रामे निवसतिं चक्रे श्रीमहेश्वरसन्निधौ॥४॥
संतीर्य नर्मदां पश्चात्सर्वैः स्वैरनुयायिभिः।
अजन्तां विपुलां प्राप सर्वसौख्यप्रदायिकाम्॥५॥
दानमानैश्च सन्तर्प्य विप्रान्वेदविदां वरान्।
उवास कतिचित्कालमजन्तायां महाबली॥६॥
आसीद्राज्यं नर्मदायाः दक्षिणे भुवि विश्रुतम्।
पल्लवान्वय-सञ्जात-त्रिलोचननृपस्य च॥७॥
त्रिलोचनो महावीरो धर्म-कर्म-रतस्सदा।
पालयामास तद्राज्यं रामराज्यमिवाद्भुतम्॥८॥
समापन्ने विपत्काले बुद्धिर्बुद्धिमतामपि।
विपर्ययं समायाति दुर्दैवाभिहता सदा॥९॥
विजयादित्यराजोऽसौ दुर्भाग्याभिहतस्तदा।
आक्राम्यति स्म तद्राज्यं शक्तित्रयसमन्वितम्॥१०॥

पल्लववंशीयस्य त्रिलोचनस्य शक्तिपुरुषार्थयोः सूचनामवाप्य दुर्भाग्यतो विजयादित्यस्त्रिलोचनमाक्रान्तवान् । भीषणे युद्धे विजयादित्यो वीरगतिमवाप । तस्य च गर्भवतीं राज्ञीमादाय तस्या भ्राता पलायमानो 'मुडिवेडु' ग्रामे सोमयाजिनो

तत्राभूत्सुमहद्युद्धं वीराणां लोमहर्षणम् ।
शस्त्रैः खण्डित-गात्राणां वीराणां रक्तसंस्रवैः ॥११॥
युद्धभूमिः शोणितेन समस्ता च परिप्लुता ।
व्याप्ता मुण्डैर्भुजैः पादैः खण्डितैश्च समन्ततः ॥१२॥
तदा त्रिलोचनस्यायं मदोन्मत्तो मतङ्गजः ।
मर्दयन्परसैन्यानि प्रचचाल महाबली ॥१३॥
विजयादित्यराजोऽपि दृष्ट्वा तं समुपस्थितम् ।
बहुधा छिन्नवर्मा स पुरतः संरुरोध तम् ॥१४॥
पदे पदे बाणघातैः निषिद्धोऽपि महाबलः ।
चकार शत्रुसैन्यानां गर्जंस्तु कदनं महत् ॥१५॥
ततस्त्रिलोचनेनासौ हृदि बाणेन ताडितः ।
पपाताश्वात्ततः सैन्यं तस्य सर्वं पलायितम् ॥१६॥
गृहीत्वा विजयादित्यभार्यां गर्भवतीं तदा ।
तद्भ्राता तु कथञ्चिच्चागात्तया सह दुखितः ॥१७॥
मुडिवेडुग्राममध्ये विष्णुभट्टं तपस्विनम् ।
वेदवेदाङ्गतत्त्वज्ञं ब्राह्मणं सोमयाजिनम् ॥१८॥
विलोक्य पूर्णगर्भां तां शरणागतवत्सलः ।
स्वाश्रयं प्रददाति स्म पुत्रीमिव ररक्ष च ॥१९॥
पतिशोकाभिभूता सा राज्ञी तत्रावसत्तदा ।
पालयन्ती स्वगर्भञ्च व्रतं वैधव्यजं समम् ॥२०॥
अथ काले शुभे राज्ञी सुतमेकमजीजनत् ।
चन्द्रप्रभं दिव्यदेहं लक्षणैः शोभनैर्युतम् ॥२१॥
दृष्ट्वैतद्विष्णुभट्टेन तन्नामकरणं कृतम् ।
विष्णुरित्यभिधानेन बालस्य शुभलक्ष्मणः ॥२२॥
अयमेव प्रसिद्धोऽभूत् विष्णुवर्धन-संज्ञया ।
चालुक्यवंशजां कीर्तिं वर्धयन्निजशौर्यतः ॥२३॥
कदम्बगङ्गवंशीयान् राज्ञो युद्धे विजित्य च ।
नर्मदातः सेतुबन्धं यावद्विस्तीर्णमद्भुतम् ॥२४॥

विष्णुभट्टस्य शरणमाजगाम। किञ्चित्कालानन्तरं राज्ञी तेजस्विनं पुत्रमजीजनत्। यस्य विष्णुरिति नामकरणमभूत्। अयमेव राजपुत्रः कालान्तरे विष्णुवर्धननाम्ना प्रसिद्धः प्रतापी राजाऽभूत्। अयं कदम्बवंशीयान् गाङ्गान् च विजित्य अनेकसहस्रग्रामाणां साम्राज्यम् आ च सेतोः समस्थापयत्। अस्य पराक्रमातिशयेन प्रभावितः काञ्चीनरेशः (पल्लववंशीयः) महता समारोहेण अस्मै स्वकीयां कन्यकामदात्। अस्य पुत्रो विजयादित्यः (द्वितीयः) अभूत्। विजयादित्यस्य (द्वितीयस्य) पुत्रो जयसिंहोऽभूत्, यो हि वल्लभेन्द्रोपाधिभिर्विभूषितोऽभूत्। सम्भाव्यते, यदयमेव जयसिंहः प्रथमजयसिंहः स्यात्, येन च पुनः अधिगतशक्तीन् कदम्बवंशीयान् गङ्गवंशीयांश्च क्षत्रियान् पराजित्य चालुक्यक्षत्रियाणां राज्यं सुस्थिरं कृतं स्यात्। विजयादित्य-विष्णुवर्धन-जयसिंह-पुलकेशिप्रभृतिभिर्बहुभिश्चालुक्यराजैः दक्षिणस्यां चालुक्यसत्तास्थापनार्थं महानुद्योगः कृत आसीत्, अतः सम्भाव्यते यदेतस्मादेव कारणाद् बिल्हणेन न कस्यचिदेकस्यापि राज्ञो नामनिर्देशः कृतः, अपि तु 'जिगीषवः केऽपि' इति बहुवचनोपन्यासेन बहूनां सङ्केतः कृतः। तथा च तस्य वर्ण्यविषयो विक्रमाङ्कदेवचरितमासीन्न तु तदीयवंशावलीवर्णनम्।

यत्र बिल्हणस्य विक्रमाङ्कदेवचरितेऽपि च अय्यणवंशचरिते चालुक्यानामयोध्यानिवासस्य विषये, अयोध्यातो दक्षिणगमनविषये चैकमत्यमस्ति,[1] तत्रैव

जित्वा पञ्चाशत्सहस्राधिकलक्षस्य सप्तकान्।
ग्रामान्संस्थापयामास राज्यं स्वं दक्षिणापथे ॥२५॥

अस्योत्कटप्रतापेन प्रीतः पल्लववंशजः।
काञ्चीश्वरो महाराजो हर्षेण विनयेन च ॥२६॥

प्रादात्कन्यां निजां तस्मै सुन्दरीं गुणगुम्फिताम्।
दासीदाससमायुक्तामाभूषणविभूषिताम् ॥२७॥
विजयादित्यनामाभूत् तत्सूनुर्भूरिविक्रमः।
जयसिंहस्ततो जातः वल्लभेन्द्रादिनामधृत् ॥२८॥

चालुक्यराजाऽय्यणवंशचरितम्—द्वितीयः सर्गः।

विक्रमाङ्कदेवचरितभूमिकातः (भारद्वाजमहोदयस्य)।

१. श्रीरामचन्द्राद्भुतराजधानीं पुरीमयोध्यां सुसिषेविरे नृपाः॥
—अय्यणवंशचरितम् १।६३

ते क्षत्रियास्तामवदातकीर्तिं पुरीमयोध्यां विदधुर्निवासम्॥
—विक्र० १।६३।

चालुक्यकुलोत्पत्तिविषये तस्यादिपुरुषाणां विषये च मतभेद आस्ते। अय्यण-वंशचरिते चालुक्यकुल-प्रसूतिः विष्णोरंशाज्जाता[1] इति वर्णितम्। विक्रमाङ्क-देवचरिते चालुक्यकुलोद्भवो ब्रह्मणः सन्ध्याचुलुकाद्वर्णितः[2]।

परमत्रेदमवधेयं यद् यादृशी युक्तियुक्ता व्युत्पत्तिश्चालुक्यकुलस्योद्भवविषये विक्रमाङ्कदेवचरित उपलभ्यते न तादृशी व्युत्पत्तिर्युक्तिर्वा विष्णोरंशादुत्पत्तिविषयेऽय्यणवंशचरिते। तथा चाय्यणवंशचरितस्य पाण्डुलिपौ येषां राज्ञां क्रमबद्धा नामावली वर्तते, न तेषु हारीतमानव्ययोः नामनी दृश्येते। बिल्हणेन तु बहून् एतत्कुलप्रसूतान् राज्ञः परित्यज्य हारीतमानव्ययोः नामनी महता आदरेण निर्दिष्टे।[3] विद्वद्वरः श्रीमान् विश्वनाथशास्त्री भारद्वाजोऽय्यणवंशचरितनामावल्यां हारीतमानव्ययोर्नामाभावेन अनुमानं करोति यन्नास्तां हारीतमानव्यनामानौ चालुक्यौ कावपि ऐतिहासिकौ राजानौ। किन्तु हारीतमानव्यनामनी चालुक्यानां राज्ञां गोत्रे स्तः। ताम्रपत्रेषु शिलालेखेषु चेति शब्दौ (हारीतमानव्यौ) अवलोक्येमौ चालुक्यवंशीयौ राजानावास्तामित्यवगत्य, अनयोरुल्लेखश्चालुक्यकुल-पूर्वजराजसु कृतो बिल्हणेनेति। हारीतमानव्यशब्दयोः क्रमशो हारीतस्, मानव्यस् इति गोत्रपरकशब्दाभ्यां सम्बन्धोऽस्ति। चालुक्यवंशीया राजानः कुलगुरुगोत्रमेवात्मगोत्रं मन्यन्ते स्म। मानव्यसम्बन्धे प्राचीनताम्रपत्रैः शिलालेखैश्च सिध्यति यच्चालुक्यवंशीया राजानः मानव्यगोत्रीया आसन्। सम्भाव्यते च यन्मानव्य-गोत्रीय-कुलगुरोः प्राक्तनाः कुलगुरवो हारीतगोत्रीयाः स्युः। मानव्यगोत्रीय-कुलगुरोर्वंशनाशकारणाद् भारद्वाजगोत्रीयकुलगुरुकारणादस्य वंशस्य भारद्वाज-गोत्रं समभूत्[4]। अस्याः सम्भावनायाः मूलं श्रीमतां विश्वनाथशास्त्रिभारद्वाज-महोदयानां मध्यप्रदेशे दमोहस्थचालुक्यवंशीयसरदार श्री ए० ए० पाटील-विश्रामप्राप्तकलेक्टरमहोदयैः सह परामर्श एवास्ति। पुलकेशिनोऽनन्तरमस्मिन्कुले बहवो राजानः बभूवुः, येषां काले वातापीचालुक्यानां कुलं क्रमशो ह्रासतामा-

---

१. श्रूयतां सावधानेन चेतसेमं पुरातनम्।
चालुक्यकुलजातानामैतिह्यमिदमद्भुतम्॥ १।४७
विष्णोरंशात् समुद्भूतो वंशो यो वैष्णवो भुवि।
तद्वंशजानां नामानि पुण्यानि निगदामि वः॥ १।४८॥

२. विक्र० १।४५-५५।

३. विपक्षवीराद्भुतकीर्तिहारी हारीत इत्यादिपुमान्स यत्र।
मानव्यनामा च बभूव मानी मानव्ययं यः कृतवानरीणाम्॥

४. विक्रमाङ्कदेवचरितभूमिका—श्रीविश्वनाथशास्त्रिभारद्वाजमहोदया-नाम्, ३।१४।

सादयदास्त[1]। अष्टमशताब्द्या राष्ट्रकूटराज्यसंस्थापकेन दन्तिदुर्गनामकेन राज्ञा चालुक्यराजानं कीर्तिवर्माणं (द्वितीयम्) पराजित्य वातापी नगरी स्वायत्तीकृता[2]। चालुक्यानामवशिष्टां शक्तिं दन्तिदुर्गानन्तरं तदीयः पितृव्यः कृष्णो विनाशितवान्। इत्थं (७६० ईस्वीयशताब्द्याम्) वातापिचालुक्यानां सत्ताऽन्तं जगाम। ततश्च दशमशताब्द्या अन्ते राष्ट्रकूटानां सत्ताप्यन्तमाससाद। राष्ट्रकूटानां पतनानन्तरं तैलपेन (द्वितीयेन) चालुक्यानां सत्ता पुनः स्थापिता। इदञ्च राजकुलं कल्याणीचालुक्यकुलमिति नाम्ना जगति प्रसिद्धिमभजत। यद्यपि तैलपः (द्वितीयः) आत्मानं वातापिचालुक्यानां वंशजम्[3] एव मन्यते तर्हि अपि कल्याणीचालुक्यकुलमितिहासे वातापिचालुक्यकुलाद् भिन्नं सर्वथा स्वतन्त्रमस्तित्वमधिजगाम। इदमेव कुलं बिल्हणस्य वर्ण्यो विषयः, यतो हि इदमेव कुलं तदीयकाव्यनायकः स्वजन्मनालञ्चकार।

वातापि-चालुक्यकल्याणी-चालुक्यवंशयोरतिरिक्तं वेङ्गी-चालुक्य-गुर्जर-चालुक्यनामभ्यां प्रसिद्धं चालुक्यानामन्यत्कुलद्वयमपीतिहासे स्वीयमस्तित्वं प्रमाणयति।

वेङ्गीचालुक्यवंशः—

पुलकेशिना (द्वितीयेन) कृष्णागोदावर्योः मध्यवर्तिनं प्रदेशं विजित्य स्वानुजो विष्णुवर्धनस्तत्र शासनाधिकारिरूपेण नियुक्तः, असौ च ६३२ तमे खिष्टाब्दे स्वकीयस्वातन्त्र्यस्य घोषणामकार्षीत्[4]। तदा प्रभृति अयं वंशः स्वतन्त्ररूपेण आ द्वादशीं शताब्दीं राज्यं कुर्वन्नासीत्।

गुर्जरचालुक्यशाखा—

प्रायः ६४० खिष्टाब्दे चालुक्यवंशीयमूलराजेन[5] सारस्वतमण्डलं (सरस्वतीतटवर्तिनं प्रदेशम्) विजित्य स्वतन्त्रराज्यस्य स्थापना कृता। अन्हिलपट्टणस्थाने च (अद्यत्वे पाटणनाम्ना प्रसिद्धे) स्वकीया राजधानी निर्मिता।

अन्यच्चालुक्यकुलत्रयस्य गभीरमैतिहासिकं विवेचनं नास्माकमभिमतं प्रसङ्गान्तरभिया। पूर्वोक्तकुलत्रयस्य कल्याणीचालुक्यकुलेन सह कियान् सम्बन्ध इति स्पष्टीकर्तुं परिचयमात्रमुदाहृत्येदानीं कल्याणीचालुक्यवंशस्य बिल्हणप्रतिपादितानामैतिहासिकतथ्यानामेव विवेचनं क्रियते।

---

१. भारतीय इतिहास का परिचय, पृ० १२३।

२. भारतीय इतिहास का परिचय, पृ० १२४।

३. प्राचीन भारत, पृ० ३५८।

४. तदेव, पृ० २६१।

५. गुर्जरचालुक्यवंशः चालुक्यवंश इत्यपि व्यवह्रियते।

महाकविर्बिल्हणः, कल्याणीचालुक्यानां सत्तासंस्थापकेन तैलपेन कृतं राष्ट्रकूटानां सत्तायाः समूलनिर्मूलनं यदवर्णयत्तदितिहाससम्मतमेव[1]। यतो हि सर्वेषु इतिहासग्रन्थेषु अस्यैतिहासिकतथ्यस्य समर्थनमेवावलोक्यते।

तैलपः (६७३-६६७ ई०) मालवनरेशान्नप्याक्रान्तवान्। मालवनरेशञ्च बन्दीकृत्य जघान, इति पुरातनसाधनैः प्रमाणीक्रियते[2]।

बिल्हणो राष्ट्रकूटेषु तैलपस्य विजयन्त्ववर्णयत्, परं परमारैः सह तदीययुद्धानां विषये मौनमेवावललम्बे। परमारभूपतिना मुञ्जेन सह तदीयसङ्घर्षोऽतीव महत्त्वमादधाति। तस्य परमारभूपतिना मुञ्जेन सह अनेकानि युद्धानि बभूवुः। अन्तिमे युद्धेऽसौ (मुञ्जः) निगडबन्धनं प्राप्य पञ्चत्वमाससाद[3]। कविरिमं प्रसिद्धमैतिहासिकमुदन्तं न निबध्नन्, आलोचकानाम.लोचनविषयतामुपजगाम[4]। अत्रेदमपि कारणं सम्भाव्यते यद् राष्ट्रकूटेषु तैलपस्याद्भुतशौर्यवर्णनानन्तरं तस्य मुञ्जेन पराजयप्रसङ्गवर्णनं रसविच्छित्तिं जनयति। बन्धनस्थितश्च मुञ्जः तैलपेन मारित इति वर्णनेऽपि तस्य हेयतामेव पश्यता बिल्हणेन प्रसिद्धमप्यैतिहासिकं वृत्तमिदं न वर्णितं स्वकीयविक्रमाङ्कदेवचरित इति। मुञ्जस्य उत्तराधिकारी परमारनरनाथो भोजः मुञ्जवैरस्य प्रतीकारमकार्षीत्। कोऽभूत्तदीयप्रतीकारशोधपात्रमत्र विद्वत्सु नास्त्यैकमत्यम्। तैलप एव भोजप्रतीकारपात्रमिति डा० ब्युह्लरमहोदयो मन्यते। श्रीमान् डा० रामकृष्णभण्डारकरमहोदयः 'मुञ्ज-वैरप्रतिशोधं भोजः विक्रमादित्यादगृह्णात् स च

---

१. श्रीतैलपो नाम नृपः प्रतापी क्रमेण तद्वंशविशेषकोऽभूत्।
क्षणेन यः शोणितपङ्कशेषं संख्ये द्विषां वीररसञ्चकार॥
विश्वम्भराकण्टकराष्ट्रकूटसमूलनिर्मूलनकोविदस्य।
सुखेन यस्यान्तिकमाजगाम चालुक्यचन्द्रस्य नरेन्द्रलक्ष्मीः॥

विक्र० १।६८-६९।

२. मु० ना० विक्रमाङ्कदेवचरितभूमिका, पृ० १९।

३. तैलपः षट्वारं मालवराज्यमाचक्राम षट्वारमेव मुञ्जेन पराजितः। पुनश्च तदीयाक्रमणानां समाप्तये मुञ्जः तैलपमाक्रान्तवान्, दुर्भाग्यवशात् पराजयमासाद्य निगडबन्धनमवाप। तत्र च मुक्तये प्रयतमानो यमसदनं प्रापितः।

प्राचीन भारत पृ० २८१।

४. संस्कृतसाहित्यस्येतिहासः कीथमहोदयस्य (हिन्द्यामनुवादः डा० मङ्गलदेवशास्त्री), पृ० १८९।

युद्धे वीरगतिं लेभे' इति प्रतिपादयति[1] श्रीमान् एच० सी० राय महोदयः श्रीमान् वेङ्कट ग्रय्यरमहोदयश्चापि भण्डारकरमहोदयस्य मतमिदमनुमोदयतः[2] श्रीमान् म० म० पं० ग्रोझामहोदयस्तु जयसिंहस्यैव भोज-प्रतीकार-पात्रत्वं वक्ति[3]। श्रीमान् डी० सी० गाङ्गुलीमहोदयोऽपि तन्मार्गमेवावलम्बते[4]। परं तेन तत्प्रमाणतया इदं वचनमुपन्यस्तम्। गुर्जरभीम—(१०२०-१०६४ ई०) राज्ये भोजश्चालुक्यानाचक्राम। तदात्वे विक्रमादित्यः नासीद्भूतले इति भोज-प्रबन्ध-चिन्तामणिग्रन्थाभ्यां प्रमाणीभवति। नास्ति तावत्प्रबन्धग्रन्थानां प्रामाणिकत्वम्। किञ्च भोजस्य प्राथमिको लेखः (१०२० तम-खिष्टाब्दीयः) जयसिंहस्य लेखश्च (१०१८ ई० वर्षीयः) उपलभ्यते। भोजो राज्यसिंहासनप्राप्त्यनुपदमेव चालुक्यनृपं प्रत्यकरोत् इति सर्वसम्मतोऽर्थः। भोजराज्यारम्भस्य विक्रमादित्यमृत्योरस्ति सन्निहितत्वम्। जयसिंहराज्यसमाप्तेस्तु (१०४२ तम ई० वर्षस्य) स कालोऽत्यन्तं विप्रकृष्टः। अचिरं शासकस्य विक्रमादित्यस्य च न लभ्यते विशेषवृत्तम्, एतच्च तस्य भोज-प्रतिहिंसापात्रत्वं निःसंशयं प्रमाणयति[5]।

सत्याश्रयः ९९७तः १००८ ईस्वीयवर्षपर्यन्तं शशास, जयसिंहश्च १०१५तः १०४२ ईस्वीयवर्षपर्यन्तं शासनमकरोत्[6]। अनयोर्मध्यवर्तिनि काले १००८तः १०१५ तम—ईस्वीयवर्षपर्यन्तं को नाम नृपतिश्चालुक्यराज्यधुरमवहत् इति न निर्दिशति महाकविर्बिल्हणः काव्येऽस्मिन्। तस्मिन् काले सत्याश्रयस्य भ्रातृव्यो दशवर्मा (यशोवर्मणः पुत्रः) जयसिंहस्य ज्येष्ठो भ्राता १००८तमादीस्वीयवर्षतः १०१४ तमेस्वीयवर्षं यावद्राज्यमकरोत्। तद्भ्राताय्यणोऽपि (द्वितीयः) १०१४ तः १०१५ ईस्वीयवर्षं यावच्छासनमकरोत्[7]।

ग्रनयोः शासनकालोऽतीव स्वल्पः। अतः, ग्रनयोः शासनकाले नेतादृशी कापि घटना घटिता स्यात् यया बिल्हणस्य अभिमतं सिध्येत्। यतो हि बिल्हणः महाकाव्यदृष्ट्योत्कर्षजनकान्येवोदन्तजातानि निबद्धवानिह काव्ये। जयसिंहा-

---

१. ग्रर्ली हिस्ट्री ग्राफ दक्कन, पृ० ६१।

२. इण्डिया एपिग्राफिया, पृ० ११८ पादटिप्पणी ५४ डी० एच० एन० ग्राई०, पृ० ८६७।

३. सो० प्रा० इ०, पृ० ८७।

४. एच० पी० डी०, पृ० ९१।

५. विक्रमाङ्कदेवचरितभूमिका (श्रीमुरारिलालनागरस्य), पृ० २०।

६. जयसिंहस्य कण्ठे इन्द्रेण परिजातमालार्पणं कृतमिति यदुक्तं तत् तस्य युद्धे मृत्युं सूचयति। व्युलहरस्य विक्रमाङ्कदेवचरितभूमिका, पृ० २७।

७. एस० ग्राइ० एस० ग्राइ०, पृ० ५८ सो० प्रा० इ०, पृ० ८३ टिप्पण्याम्।

नन्तरं तदीयः सुतनयः त्रैलोक्यमल्लापरनामधेय आहवमल्लः (१०४२-१०६८ ई०) चालुक्यसिंहासनमध्यतिष्ठत्[1] । अयं हि चालुक्यनरेशः कल्याणनगरं निर्मापयामासेति बिल्हणः स्पष्टं कथयति—

चकार कल्याणमिति क्रमादसौ पुरं परार्ध्यं पृथिवीपुरन्दरः ।
यदुच्चहर्म्यावलिदीपसम्पदा विभाव्यते कज्जलसन्निभं नभः[2] ॥

परं डा० व्युह्लरोक्तिः न समीचीना । डा० व्युह्लरमहोदयेन येन कारणेन कल्याणनगरस्य अस्तित्वमाहवमल्लादपि प्राक्तनमनुमितं तत्र 'कार्तिकेयपरिरक्षणप्राप्तकल्याणपरम्परेति, प्रवर्द्धमानपरमकल्याणविजयोद्यमे' इत्यादिषु कल्याणपदं मङ्गलार्थं सङ्केतयति न तु नगरार्थम्[3] ।

भोजे[4] कर्णे[5] तथा चोलेषु[6] आहवमल्लस्य बिल्हणेन ये विजयाः प्रतिपादिताः, ऐतिहासिकग्रन्थानां परिशीलनेन तेषां याथार्थ्यं प्रतीयते प्रामाणिकमेव । श्रीमान् आर० जी० भण्डारकरमहोदयः बिल्हणोक्तं तथ्यं समर्थयन् लिखति यत्सर्वप्रथममाहवमल्लः (सोमेश्वरः) प्रथमशत्रुं चोलनरेशं विजितवान् । तदनन्तरञ्च धारानगर्यां भोजनरेशमाचक्राम[7] । तथा च भोजो

---

१. अस्य यथार्थं नाम सोमेश्वरः । डा० व्युह्लरमहोदयोऽस्य कालः १०४०-१०६९ अस्ति इति लिखति । विक्रमाङ्कदेवचरितभूमिका—मुरारिलालशर्मणाम्, पृ० २० ।

२. विक्र० २।१ ।

३. बाम्बे गजट०, पृ० २१५-३३५ टिप्पणी १ ।

४. दीपप्रतापानलसन्निधानाद् बिभ्रत्पिपासामिव यत्कृपाणः ।
प्रमार-पृथ्वीपतिकीर्तिधारां धारामुदारां कवलीचकार ॥
विक्र० १।९१ ।

५. विशीर्णकर्णा कलहेन यस्य पृथ्वीभुजङ्गस्य निरर्गलेन ।
सङ्गच्छतेऽद्यापि न डाहलश्रीः कर्पूरताडङ्कनिभैर्यशोभिः ॥
विक्र० १।१०२ ।

६. दोर्दण्डदर्पाद्द्रविडप्रकाण्डं यः सम्मुखं धावितमेकवीरम् ।
अभाजनं वीररसस्य चक्रे बाणोत्करच्छिद्रपरम्पराभिः ।
विक्र० १।११४ ।

७. अर्ली हिस्ट्री आफ दक्कन इति नाम्नि ग्रन्थे ८२तमे पृष्ठे ।

धारानगरीं परित्यज्य पलायितुं विवशो बभूव । श्रीरमेशचन्द्रमजूमदारमहोदयः सोमेश्वरस्य युद्धानां विषये उक्ततथ्यं समर्थयति—"चोलैः सह युद्धसङ्घर्षे रतोऽपि विक्रमादित्यो राजान्तरैः सह युद्धावसरमासादयन्नासीत् । असौ न केवलमुत्तरीयकोङ्कणं विजितवान्, अपि तु गुर्जरं देशं मालवदेशमप्याचक्राम । कलचुरिकर्णमपि आक्रान्तवान् । असौ पूर्वस्यां दक्षिणकौशलदेशे पश्चिमदिशि केरलदेशेऽप्याक्रमणान्यकरोत्[1] ।" श्रीमान् फ्लीटमहोदयः स्वकीये एपिग्राफिया इण्डिकानाम्नि पुस्तके बिल्हणप्रतिपादितमाहवमल्लस्य चोलनरेशे विजयं समर्थयन् लिखति—कृष्णातटे 'कोप्पम' इति स्थाने (१०५२ अथवा १०५३ ई० वर्षे) सम्पन्ने युद्धे सोमेश्वरः (आहवमल्लः) तदानीन्तनं चौलनरेशं पराजितवान् जघान च[2] । ऐतिहासिकग्रन्थानामनुशीलनेन सुस्पष्टं प्रतीयते यत्कोप्पमयुद्धात् प्राक् सोमेश्वरः काञ्चीं स्वायत्तीचकार[3] । उक्ततथ्येन काञ्चीविजयसम्बद्धस्य बिल्हणवचसः प्रामाणिकत्वं सुस्पष्टं भवति[4] ।

काव्यापकर्षदृष्टया बिल्हणश्चालुक्यनरेशानां पराजयविषये मौनमवलम्बते, परमैतिहासिकदृष्ट्या समीक्षणं कुर्वद्भिरस्माभिर्बिल्हणेनासङ्केतितेषु चालुक्यनरेशानां (जयसिंहाहवमल्लादीनाम्) पराजयेषु दृष्टिपातं कुर्वद्भिस्तेषां विवेचनं कर्तव्यमेव । 'कोप्पम' युद्धे राजाधिराजः (चोलनरेशः) मृत्युमाप, तदीया सेना च अस्तव्यस्ततामगात्तथापि तदीयो भ्राता राजेन्द्रदेवः (चौलः) सेनां पुनरपि एकत्रीकृत्य युद्धं प्रारभ्य विजयप्राप्तौ साफल्यमवाप । सोमेश्वरस्य च बहवः सेनापतयः बान्धवाश्च वीरगतिमाप्नुवन् । सोमेश्वरश्च पलायितः । राजन्द्रदेवः युद्धभूमावेव स्वकीयं राज्याभिषेकमकरोत्[5] । ऐतिहासिकेऽस्मिन्कोप्पमयुद्धे पक्षद्वयमेव स्वकीयविजयस्योद्घोषणामकरोत् । राजाधिराजः (१०५२) राजेन्द्रः (१०५०-६३) एवं वीरराजेन्द्र इतीमे सर्वेऽपि चोलराजानश्चालुक्यैः सह युद्धान्यकुर्वन् । अभिलेखेष्वेभिः स्वविजयानामुद्घोषणाश्च कृताः सन्ति ।

राजाधिराजस्येयं घोषणास्ति यदसौ १०३९ ईस्वीये वर्षे काम्पिलेतिस्थाने चालुक्यराजप्रासादं भस्मसादकरोत् । राजेन्द्रस्येदं कथनमस्ति यत्तेन स्वकीयेन

---

१. एन्शेण्ट इण्डिया (हिन्द्यामनुवादः), पृ० ३६० ।
२. एपिग्राफिया इण्डिका, १२।२९८ ।
३. प्राचीन भारत (एनशेन्ट इण्डिया पुस्तकस्य हिन्द्यनुवादे), पृ० ३५९।
४. कौक्षेयकः क्ष्मातिलकस्य यस्य पीत्वातिमात्रं द्विषतां प्रतापम् ।
आलोडच वाष्पाम्बुभिराचचाम चोलीकपोलस्थलचन्दनानि ।।
५. एन्शेण्ट इण्डिया (हिन्द्यामनुवादः), पृ० २५९ ।

भ्रात्रा सह चालुक्यान् युद्धे जयता अग्रेऽग्रे च विजयमासादयता कोल्हापुरमिति स्थाने विजयस्तम्भप्रतिष्ठानमकारि[1] इति। राजेन्द्रस्योत्तराधिकारिणो वीर-राजेन्द्रस्येदं कथनमस्ति यदसौ पञ्चवारं सोमेश्वरं पराजितवान्[2]। राजाधि-राजस्य (चौलस्य) घोषणायाः समर्थनमितिहासग्रन्थेषु वक्ष्यमाणाः सन्दर्भाः सूचयन्ति—

राजाधिराजः (चौलनरेशः) आहवमल्लस्य राज्यमाचक्राम। प्रतिरोध-प्रयत्नशीलं तदीयं सैन्यत्रयं क्रमशः त्रिषु स्थानेषु पराजितवान्, विजयञ्चासादयन् कल्याणपुरमाससाद। कल्याणपुरञ्च सम्यक् विलुण्ठ्य प्रभूतञ्च धनमादाय प्रत्यावर्तत। तथा चासौ १०४७ ईस्वीयवर्षे १०५१-५२ तमे ईस्वीये वर्षे चापि वारद्वयं सोमेश्वरमाक्रान्तवान्। अन्तिमे चाभियाने असावसाफल्यमाप[3]। न केवलमाहवमल्लस्य पराजयानां निर्देशः बिल्हणेन नाकारि, अपितु सत्याश्रय-जयसिंहादीनामपि ऐतिहासिकपराजयानां विषये तस्य मौनमेव वयमवलोकयामः। परन्तु इतिहासः कथयति यत् सत्याश्रयजयसिंहावपि पराजयावसरमलभता-मिति।

प्रमारनरेशः सिन्धुराजः सत्याश्रयं पराजित्य मुञ्जात् विजितान् प्रदेशान् पुनः प्रमारराज्येन अयोजयत्[4]। कलचुरिकोकल्लस्य (द्वितीयस्य) अपि कथन-मस्ति यत्तेनापि सत्याश्रयः पराजित आसीदिति[5]। सत्याश्रयस्य शासनकालः ९९७ तः १००८ पर्यन्तमस्ति। ९९९ तमे स्वीयाद् वर्षात् पूर्वमेव चौलैः गाङ्गवाडीनोलम्बवाडीत्याख्यातं चालुक्यानां प्रदेशद्वयं स्वायत्तीकृतमासीत्। तदनन्तरं ते रत्तपदीस्थानस्य साढेसातलखेति प्रसिद्धं प्रदेशमाक्रम्य पादा-क्रान्तमकुर्वन्। अयं प्रदेशश्चालुक्यानामेवाधिकारे आसीत्। तस्य विजयस्य सर्वप्रथममुल्लेखो राजराजस्य चौलस्य (१००७-८) शासनकाले द्वाविंशतितमे वर्षे लिखिते अभिलेखे उपलभ्यते।

चौलसैन्यं देशमिमं विलुण्ठ्य स्त्रीः शिशून् ब्राह्मणांश्चापि जघान, युवतीनां

---

१. प्राचीन भारत श्रीगोरखनाथ चौबे, पृ० ३०२।

२. ऐन्शेण्ट इण्डिया (प्राचीन भारत), पृ० ३६०।

३. अस्मिन्नेव अभियानेऽसौ पञ्चत्वं गतः इति पूर्वं प्रतिपादितम्।

४. प्राचीन भारत डा० परमेश्वरीलाल गुप्तः, पृ० ३५८।

५. तदेव, पृ० ३५८।

सतीत्वमप्यपाहरत्[1]। इतिहासग्रन्थानामध्ययनेन वार्तेयं स्पष्टीभवति यज्जयसिंहो मुसाङ्गीतिस्थाने पराजयमलभत[2]।

उक्ततथ्यानामनुसन्धानेन स्पष्टीभवति यदिमे चालुक्या भूपतयः बहुषु युद्धेषु पराजयान् प्राप्नुवन्। बिल्हणस्यापि बहुवारं चौलैः सह चालुक्यानां युद्धनिर्देशः पूर्वोक्तं तथ्यमप्रत्यक्षरूपेण समर्थयति। परं प्रत्यक्षरूपेण बिल्हण एकमपि पराजयं न निरदिशत्। अत्र च काव्यापकर्ष एव हेतुरिति सम्भाव्यते। द्वितीयञ्चात्र कारणमिदमपि भवितुमर्हति यद्बिल्हणः महाकविः विक्रमाङ्कदेवचरितस्य महाकाव्यत्वपक्ष एव अधिकतया दत्तावधान आसीत् न तु ऐतिहासिकपक्षे। एतस्मात्कारणात् तेन विक्रमाङ्कदेवं व्युत्सृज्य अन्येषां चालुक्यानां राज्ञां जीवनेन सम्बद्धानि वर्ण्यान्यप्युदन्तजातानि न निबद्धानि। यतो हि तस्य प्रतिपाद्यं विक्रमाङ्कचरित्रमेव न त्वन्येषां समेषां चालुक्यानां राज्ञां चरित्राणि। यत्र तेन वर्ण्यानि वृत्तान्यपि न वर्णितानि तत्र अवर्ण्याणां पराजयानां वर्णनस्य कथैव नोदेति।

अत्रेयं पट्टिका, या च समकालशासकानां राज्ञां नामावल्या अन्योन्याक्रमणानाञ्च ज्ञानं सुस्पष्टयति[3]—

पश्चिमचालुक्याः	प्रमाराः	चौलाः	प्राच्यचालुक्याः
तैलपः (९७३-९७)	मुञ्जः (९४५-९५)	राजराजः १मः (९८५-१०१६ ई०)	
सत्याश्रयः (९९७-१००८)	सिन्धुराजः (९९५-१०१०)		
विक्रमादित्यः (५मः) (१००८-१४)		राजेन्द्रचोलः गाङ्गैकोण्ड-चौलः (१०१२-१०४३)	विमलादित्यः (१०११-२१)

---

१. सत्याश्रयस्य होतुरभिलेखे। बाम्बे गजेटियर खण्ड १, २, ४३३। तथा च फ्लीट्महोदयश्च डाईनस्टी आफ दि कन्नडी डिस्ट्रिक्ट। तथा च दि आक्सफोर्ड हिस्ट्री आफ इण्डिया स्मिथमहोदयस्य, पृ० २०२।

२. प्राचीन भारत, गोरखनाथ चौबे, पृ० ३०१।

३. विक्रमाङ्कदेवचरितम्, मुरारिलालशर्मणाम, परिशिष्टम् (घ)।

समकालं शासितवतां राज्ञां नामावली

अय्यण: (२य:) (१०१४-१५)	भोज: (१०१०-५५)	राजाधिराज: (१०१५-१०५२)	राजराज: (१०२२-१०६२)
जयसिंह: (१०१५-४२)		राजेन्द्रदेव: (१०५२-६३)	
सोमेश्वर: (१म:) (१०४२-६८)		वीरराजेन्द्र: (१०६३-७०)	
सोमेश्वर: (२य:) (१०६८-७६)	जयसिंह: (१०५५-६०)	अधिराजराजेन्द्र: (१०७० ई०)	राजेन्द्रचौल: (२य:) (१०६३-७० ई०)
विक्रमादित्य: (षष्ठ:) (१०७६-११२७ ई०)	उदयादित्य: (१०६०-१०८७ई०)	राजेन्द्रचौल:(२य:) (१०७०-१११८ई०)	कुलोत्तुङ्गचौल:(१म:)

विक्रमाङ्कदेवचरितस्य (२६-४३) प्रथमसर्गस्य पद्यैः प्रतीयते यत्तस्य राज्यावाप्तेरनन्तरमेव तदीयमहिषी तनयत्रयमसौष्ट परमितिकवेर्वचनमसङ्गतं प्रतिपादयन् श्रीमुरारिलालनागरमहोदयः प्रतिपादयति विक्रमाङ्कदेवचरितभूमिकायाम्---'चिन्त्यमेतद् बिल्हणवचनम्। १०४२ ईस्वीयवत्सरसन्निधौ स राज्यमासादयामास, ३० मार्च १०६८ ईस्वीयदिवसे च पञ्चत्वमञ्चति स्मेति पञ्चविंशतिवर्षाणि शशास, बिल्हणोक्तौ सत्यत्वेनाभ्युपगतायां तद्देहावसानसमये त्रिभिरपि तत्तनयैरल्पवयस्कैरेव भाव्यम्। परं चौलदेशराजाधिराजस्य (प्रथमस्य) १०४६ ईस्वीयवर्षस्य लेखेनेदं प्रमाणीक्रियते यदस्य ततः पूर्वं सोमेश्वरेण सह युद्धमभूत, यत्र हि विक्रमादित्योऽपि सहायोऽभूत्। आहवमल्लस्य तृतीयः पुत्रो जयसिंहोऽपि १०६६ ईस्वीयवर्षात्प्रागेव युद्धायालमभवत्[1] इति।'

श्रीनागरमहोदयानां मतं समीचीनं प्रतिभाति, यतो हि महामहोपाध्यायडा० गौरीशङ्करओझामहोदयैः स्वकीयेतिहासपुस्तके समर्थितं मतमिदम्[2]। विक्रमाङ्कदेवचरितभूमिकायां डा० व्युह्लरमहोदयेन बिल्हणप्रतिपादितस्याहवमल्लतृतीयपुत्रस्य जयसिंहस्यास्तित्वे सन्देहलेशं प्रकटयता अद्य यावत् प्रकाशितेषु लेखेषु सोमेश्वरप्रथमस्य तृतीयः पुत्रो न निर्दिष्ट इति प्रत्यपादि[3]। परमद्यत्वे

१. विक्रमाङ्कदेवचरितभूमिका, श्रीमुरारिलालशर्मानागरमहोदयानाम्, पृ० २१।

२. सो० प्रा० इ०, पृ० ६२-६३ टिप्पणी।

३. विक्रमाङ्कदेवचरितभूमिका डा० व्युह्लरस्य, पृ० ३०।

विष्णुवर्धनविजयादित्यनामकस्य तस्य चतुर्थपुत्रस्याप्यस्तित्वं स्वीकृतमितिहासकारैः[1] ।

महाकविर्बिल्हणः विक्रमाङ्कदेवचरितस्य द्वितीये सर्गे राजमहिषीं 'नरेन्द्रसुन्दरी' 'नरनाथसुन्दरी' इत्यादिभिः पर्यायैः समुल्लिखन् किमासीत्तस्या नामेति किमपि सुस्पष्टं निर्देशं न चकार। इतिहासे सोमेश्वरस्य (प्रथमस्य) षट्संख्याका महिष्य आसन्निति समुल्लिखितं समुपलभ्यते[2] । १—चन्द्रिकादेवी २—मैलादेवी ३—लीलादेवी ४—होयसालदेवी ५—केतलादेवी । तथा च सोमेश्वरजयसिंहादीनां प्रसवित्री वाचाला देवी । पित्रा प्रदीयमानस्य युवराजपदस्य परित्यागसन्दर्भे बिल्हणस्य विक्रमं प्रति पक्षपात इतिहासकोविदानामनभिमत एवास्ते । श्रीमुरारिलालशर्मनागरमहोदयः एभिश्शब्दैर्पक्षपातमिममनभिमतं स्वीकरोति—'बिल्हणः सर्वत्र विक्रममेव देवदयादृष्टिभाजनं योग्यतरञ्च प्रतिपादयन् तस्य निर्दोषत्वमसाधयत् । सत्यमेव कविर्विक्रमाङ्कदेवचरितस्य यथासाध्यमत्यर्थं सर्वात्मनोत्कर्षं साधयितुमचेष्टत । एतेन डा० व्युह्लरमहोदयैरन्यैश्चेतिहासकोविदैः कविर्नितान्तमुपहासास्पदं नीतः[3] ।'

डा० व्युह्लरमहोदयः कविवर्णितविक्रमदिग्विजयं न क्षोदक्षमं मन्यते। अस्मिन् विषये व्यूह्लरमहोदयस्य कथनमस्ति यदेषां युद्धानां कालानुसारं क्रम-निर्णयः न सुकरः। परं विक्रमस्य अन्तिमो विजयः दक्षिणस्यामेवाभूदिति निश्चप्रचम् । बिल्हणः प्रथमं पित्राज्ञया विक्रमो विजययात्रार्थं निष्क्रान्त इति प्रतिपाद्य तृतीये चतुर्थे च सर्गे सकलानि युद्धानि सहैव वर्णयामास इति व्युह्लरमतं चेत्प्रामाणिकं मन्येत, तर्हि विषयसाङ्कर्यमापद्यते[4] । "युद्धान्तराणां विषये कालक्रमस्य निर्णेतुमशक्यत्वेऽपि गाङ्गकुण्डवेङ्गीचक्रकोटानां विजयोऽनुक्रममेवाभूदिति प्रतिपादयन् श्रीहीरालालमहोदयः व्युह्लरमतमंशतो निराचकार । विक्रमादित्यः षष्ठः पितुः शासनकाल एव बहुवर्षाणि यावत् चालुक्यारातिभिस्सहायुध्यत । कविरिमानि युद्धानि तृतीयसर्गस्यान्ते चतुर्थसर्गस्यारम्भे च दिग्विजयव्याजेन वर्णयामास । यद्यपि नात्र प्रमाणं यदिमानि युद्धानि एकस्मिन्नेव काले बभूवुः, तर्ह्यपि

१. एच० आइ० एस० आइ०, पृ० ७८, ३३५, ए० आइ० पृ० ११४, २२०, २३८ ।

२. अर्ली हिस्ट्री आफ दक्कन (जी० याजदानी), पृ० ३४६ ।

३. विक्रमाङ्कदेवचरितभूमिका (डा० व्यूह्लरमहोदयस्य), पृ० ३१ ।

४. विक्रमाङ्कदेवचरितभूमिका (श्री मुरारिलालनागरमहोदयस्य), पृ० २३ ।

तत्राव्यवधानमेव कवेराशयः। उक्तमाशयमनवगच्छता डा० व्युह्लरमहोदयेन यत् कविरुपहासतां नीतस्तदसङ्गतमेव[1]।

कश्चायं मालवेन्दुः यं विक्रमादित्यः निष्कण्टकराज्ये समस्थापयत्[2]? प्रश्नस्यास्य समुचितमुत्तरं विक्रमाङ्कदेवचरितभूमिकायामित्थं समुटङ्कितं श्रीमुरारिलालशास्त्रिनागरमहोदयैः—

'मालवेशाय साहाय्यदानमधिकृत्य ओझामहोदयस्त्वेवमाह— 'विक्रमादित्यो यस्मै मालवाय साहाय्यमददात् स परमारवंशोद्भवो जयसिंहः स्यात्, यो हि भोजराजादनन्तरं धारासिंहासनमधिरुरोह। किन्तु तदात्वे तद्राज्यं शत्रुसेनासमाविष्टमासीत्, यां सेनां निराकर्तुं स नासीदलम्। ततश्च तद्बान्धव उदयादित्यस्तद्राज्यमपाहरत्, एवञ्च जयसिंहः स्वराज्यस्य पुनः प्राप्तिकामनया कल्याणमगादिति सम्भाव्यते। किन्तु स उदयादित्यं निरस्य मालवराज्यस्य पुनरासादने समर्थोऽभवदिति नोपलभ्यते। यतो हि जयसिंहस्य ताम्रशासनं १०५५ खिष्टाब्दीयमुपलभ्यते। १०५९तमे खिष्टाब्दे च उदयादित्यः शशासेति उदयपुरस्य (ग्वालियर) शिलालेखादवगम्यते। एवञ्च प्रागुक्तवर्षद्वयाभ्यन्तरे कदाचित् जयसिंहः साहाय्यमयाचतेति[3]। चिन्त्यमेतत् श्रीमतः डी० सी० गाङ्गुलिमहोदयस्य परमारवंशेतिहासविषयमिमं विशदयन् ओझामहोदयस्य मतस्यासङ्गतिं बिल्हणोक्तेर्याथार्थ्यञ्च प्रमाणीकरोति[4]। कलचुरिकर्ण-चालुक्यभीमयोः[5] समवेतबले भोजदेवबले च युध्यमाने एव भोजोऽसाध्यरोगग्रस्तः सन् पञ्चत्वमगात्, तदा तदुत्तराधिकारी जयसिंह आहवमल्लात् साहाय्यमयाचत। आहवमल्लो विक्रममस्मिन्कार्ये न्ययुङ्क्त, विक्रमसाहाय्येन स भूयोऽपि निजराज्यमाससाद। स किलानेकवर्षाणि शास्ति स्म, परन्तस्य राज्यान्तकालो न निश्चीयते। सोमेश्वरः द्वितीयः १०६८ ईस्वीयवर्षे राज्यमलभत। स खलु भीमोत्तराधिकारिणा कर्णेन (१०६३-१०९४ ई०) सङ्गत्य जयसिंहराजधानीमाचक्राम। तस्मिंश्च तुमुले युद्धे जयसिंहः प्राणानत्याक्षीत्। तस्मिन्नुपरते तदरातिषु च

---

१. विक्रमाङ्कदेवचरितभूमिका— श्रीमुरारिलालनागरमहोदयस्य, पृ० २३।

२. स मालवेन्दुं शरणं प्रविष्टमकण्टकं स्थापयति स्म राज्ये। श्लोकार्धः ३।६७।

३. सोलंकियों का प्राचीन इतिहास पृ० ९३-९४ टिप्पणी।

४. विक्रमाङ्कदेवचरितभूमिका—मुरारिलालशर्मणः पृ० २४।

५. चालुक्यभीमः (प्रथमः)।

नाचिराय धारामधिकृतवत्स्वपि जयसिंहक्रमानुयायिना उदयादित्येन शाकम्भरीपतिचाहमानवंशोद्भवदुर्लभ—(तृतीय) नृपतिसाहाय्येन निरस्तास्ते शत्रवः, धारा च भूयोऽपि परमारवंशजैरध्यकारि[1] । श्रीमता ओझामहोदयेन यः शिलालेखः प्रमाणत्वेनोपन्यस्तः स वस्तुतः १५१३ ईस्वीयवर्षीयो नितान्तं खण्डितश्च वर्तते । उदयादित्यः १०५९ ईस्वीयवत्सरे उदयपुरमन्दिरं निर्ममे इति तत्रास्ति नूनं लिखितम्, परं स सदा साधारणनृपतिरूपेण उदयपुरस्य शासनमकार्षीन्न पुनर्धाराधीशतयेति निश्चितम्[2] ।

प्राच्यचालुक्यवंशजे राजराजे (वेङ्गिदेशाधिपतौ) (१०६२ ई० वर्षे) दिवमुपगते विक्रमस्तद्राज्यमभिययौ, तदात्वे जयसिंहो धाराधीशतया विक्रमपक्षमवालम्बत । सोमेश्वरश्च (द्वितीयः) गुर्जरराजकर्णेन सङ्गत्य जयसिंहमाक्रान्तवान् ।[3] कर्णश्च प्रायशः १०६३ ईस्वीयवत्सरे राज्यसिंहासनमारुरोह । एभिः प्रमाणैः प्रमाणीभवति यज्जयसिंहः १०७० ईस्वीयवर्षं यावच्छास्ति स्म, उदयादित्यस्य धाराधीशत्वं (१०५९ ई० वत्सरे) सर्वथैवासम्भाव्यमिति श्रीमुरारिलालशास्त्रिणां विवेचनं पूर्णतयेतिहाससम्मतमेव वर्तते ।

सोमेश्वरः (द्वितीयः)—

सोमेश्वरः (द्वितीयः) सोमेश्वर (प्रथमस्य) मृत्योरनन्तरं १०६८ ईस्वीय–वर्षे चालुक्यसत्तामधिजगाम । बिल्हणः विक्रमाङ्कदेवचरिते'सोमेश्वरस्य दुर्विनीतत्वमन्यायपरायणत्वञ्च प्रत्यपादयत्[4] । परं तस्येदं दुश्चरित्रत्वं प्रजापीडनत्वादिकं बिल्हणोक्ति विक्रमाङ्कस्य अभिलेखञ्च विहाय अन्यैतिहासिकग्रन्थेषु न कुत्राप्यवलोक्यते । यत्र च तस्य दुर्विनीतत्वमनीतिपरायणत्वञ्चेतिहासग्रन्थेषु प्रतिपादितं दरीदृश्यते तत्र प्रमाणरूपेण बिल्हणवचनविक्रमाभिलेखावेव मन्येते । अतः कोऽपि निष्पक्षालोचकः अस्मिन् विषये बिल्हणवचनविक्रमाभिलेखयोः प्रामाण्यं स्वीकर्तुं नार्हति । यतो हि बिल्हणस्य विक्रमं प्रति पक्षपातः महाकाव्येऽस्मिन् बहुषु स्थलेषूपलभ्यते । बिल्हणः विक्रमाङ्कदेवस्य राजकविरासीत्तथा च विक्रमाङ्कदेवचरितमहाकाव्यं तेन स्वाश्रयदातुः जीवनकाल एव लिखितम्, अतस्तस्य समक्षमेव तज्जीवनसम्बद्धायाः कस्यापि घटनायाः (यया तच्चरित्रे स्वल्पमपि दूषणं सूच्येत) वर्णनं न सम्भवम् । तथा च यद्यसौ स्वनायकस्य चरित्रदोषान्

---

१. एच० पी० डी, पृ० १२७-१३६ ।
२. एच० पी० डी०, पृ० १३० नोट ।
३. विक्रमाङ्कदेवचरितभूमिका श्रीमुरारिलालनागराणाम्, पृ० २५ ।
४. विक्र० १४।६७-११३ ।

अवर्णयिष्यत्तर्हि तस्य काव्यमपि महाकाव्यदृष्ट्या हेयतामगमिष्यत् । यतो हि काव्येषु नायकस्य दोषोल्लेखो नियमविरुद्धोऽस्ति[1] । इदमेव कारणमस्ति यन्महाकविना बिल्हणेन तस्य (सोमेश्वरस्य) दुश्चरित्रपरायणत्वं वर्णितम् । अतो वयं सप्रमाणं कथयितुं समर्थाः यन्नास्ति सोमेश्वरस्य (द्वितीयस्य) दुश्चरितपरायणत्वमितिहाससम्मतम् । विश्वस्ततथ्यानामभावे विक्रमाभिलेखबिल्हणवचस्स्वीकरणं न न्यायसङ्गतम्[2] । इतिहासग्रन्थेषु बिल्हणकथनस्य पुष्टिमन्तरा सन्देह एव प्रदर्शितः । इतिहासे यथा—

बिल्हणेन प्रतिपादितं यत् सोमेश्वरः दुष्टः क्रूरश्च राजा आसीत्, कर्तव्यञ्च उपेक्षते स्म, इति राजकवेः कथने पूर्णसत्यताऽस्ति न वा इति सन्दिग्धम्[3] । यद्यपि सोमेश्वरः शौर्यपराक्रमादिषु विक्रमस्य समानतां कर्तुं न समर्थः तथाप्यसौ नासीत्कापुरुषः । चौलराजो वीरराजेन्द्रः सोमेश्वरमाचक्राम, सोमेश्वरश्च तं पराजितवान् । सोमेश्वरः उत्तरस्यामभियाने मालवप्रदेशमाक्रम्य तं प्रदेशं कञ्चित् कालं यावदधिकृतवान् ।

विक्रममपि वारद्वयमाक्रान्तवान् । अत ऐतिहासिकदृष्ट्या विवेचनेन तस्य शौर्यस्य प्रमाणान्युपलभ्यन्त एव । केवलं भ्रातृकलहं परित्यज्य तस्य शासनकाले न काचिदपि दुरवस्था इतिहासकारैः समर्थिता । यत् किञ्चिद्दुरवस्थावर्णनमितिहासग्रन्थेषु दृष्टिपथमायाति तत्सर्वं बिल्हणवचसामेवानुसरणम्,[4] इति विषयस्य पुष्टिः डा० व्युह्लरस्य मतमनुमोदयता श्रीमुरारिलालशर्मनागरमहोदयेन स्वकीयविक्रमाङ्कदेवचरितभूमिकायामित्थं कृता—

बिल्हणः सर्वत्र विक्रममेव विशेषतो देवदयादृष्टिभाजनं योग्यतरञ्च प्रतिपादयन् तस्यानिर्दोषत्वमसाधयत् । सत्यमेव कविः विक्रमाङ्कदेवचरितस्य यथासाध्यमत्यर्थं सर्वात्मनोत्कर्षं साधयितुमचेष्टत । एतेन डा० व्युह्लरमहोदयैः

---

१. यत्स्यादनुचितं वृत्तं नायकस्य रसस्य वा ।
विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत् ॥
—साहित्यदर्पणः

२. We ought not to trust inscriptions of Vikramaditya, or Bilhana in this matter without the presence of confirmation from some less biased source.
अर्ली हिस्ट्री आफ दक्कन—जी० याजदानी, पृ० ३५५ ।

३. प्राचीन भारत—रमेशचन्द्र मजूमदार, पृ० ३६०-३६१ ।

४. एन्शेण्ट इण्डिया—वी० डी० महाजन, पृ० १४८९ ।

अन्यैश्चापीतिहासकोविदैः कविर्नितान्तमुपहासास्पदत्वं नीत[1] इति विक्रमाङ्कदेवचरितचर्चायां डा० महावीरप्रसादद्विवेदिमहोदयेन वारं वारं महाकवेर्विक्रमं प्रति पक्षपातस्य आलोचनाऽकारि[2]। कैश्चिदितिहासकारैर्विक्रमस्यापि राज्यलोभपरायणत्वं प्रतिपादितम्। परं बिल्हणः तस्य दोषान्न वर्णयन् न दोषभाग्भवितुमर्हति। यतो हि महाकाव्यदृष्ट्या विक्रमाङ्कदेवस्य धीरोदात्तनायकगुणप्रतिपादनं नान्यथा सम्भवमासीत्।

सोमेन सह वैमनस्यकारणाद् राजधानीं परित्यज्य जयसिंहेन समं वनवासमण्डलं प्रति व्रजतः ससैन्यस्य विक्रमस्य पृष्ठे प्रहितस्य सोमेश्वरबलस्य संक्षयः इतिहासे बिल्हणोक्तदिशैव स्वीकृतः।

एनमेत्य जयकेशिपार्थिवः प्रार्थितादधिकमर्पयन्धनम्।
निश्चलामकृत हासचन्द्रिकां कोङ्कणप्रणयिनीमुखेन्दुषु ॥ ५।१५।

अत्र हि पद्ये विक्रमायाधिकधनस्यार्पणं येन जयकेशिना कृतमसौ जयकेशी द्वितीय आसीदिति व्युह्लरमतं न समीचीनम्[3]। कादम्बलेखैः जयकेशिनः प्रथमस्यैव विक्रमाय धनार्पणं सिध्यति[4]। यतो हि असावेव सामन्तषष्ठदेवस्य पुत्र आसीत् यः खलु आहवमल्लस्य सामन्तनृपतिरासीत्। अयं हि जयकेशी (प्रथमः) विक्रमादित्य-चोलभूपालयोः मैत्रीमकारयत्[5]। श्रीमद्भिः मुरारिलालशास्त्रिभिश्च सप्रमाणं जयकेशिनो विक्रमाय कन्यार्पणं प्रतिपादितं यन्न महाकविना बिल्हणेन निबद्धम्[6]। चोलनराधिपेन वीरराजेन्द्रेण सह विक्रमस्य विवाहसम्बन्धः पूर्णतयेतिहाससम्मतोऽस्ति। प्रायः सर्वैरेव इतिहासकारैः अस्य सम्बन्धस्य निर्देशः स्वकीयेषु इतिहासग्रन्थेषु कृतोऽस्ति।

एवञ्च विक्रमाङ्कदेवश्यालमधिराजराजेन्द्रं हत्वा राजिगस्य (कुलोत्तुङ्गस्य) चोलराज्येऽधिकारोऽपि यद् बिल्हणेन वर्णितस्तत्रापि बिल्हणम् ऐतिह्या अनुसरन्ति। अयमेव कुलोत्तुङ्गश्चोलचालुक्य—(वेङ्गीचालुक्य) वंशयोः ऐक्य-

---

१. विक्रमाङ्कदेवचरितभूमिका (श्रीमुरारिलालशर्मणाम्), पृ० २२।
२. विक्रमाङ्कदेवचरितचर्चा, पृ० २४, Skt. Lit.—Keith, p. 155.
३. विक्रमाङ्कदेवचरितम् (श्रीविश्वनाथशास्त्रिभारद्वाजमहोदयानाम्) टिप्पणी, भागः प्रथमः, पृ० २६७।
४. सोलंकियों का प्राचीन इतिहास, पृ० १०६।
५. विक्रमाङ्कदेवचरितभूमिका (मुरारिलालशर्मणाम्), पृ० २६।
६. विक्रमाङ्कदेवचरितभूमिका (मुरारिलालशर्मणाम्), पृ० २६।

मकरोत्[1]। विक्रमः स्वश्यालकस्य हन्तारं राजिगं काञ्चीशासनाच्च्यावयितुं प्रायतत, परं न तत्र साफल्यमवापेति इतिहासग्रन्थेभ्योऽवगम्यते[2]।

(राजिगे) कुलोत्तुङ्गेऽपि मातृपक्षत्वाच्चोलरक्तमासीत्। अस्य पितामहः राजराजस्य (प्रथमस्य, चोलस्य) पुत्रीं कुन्दव्वयारनाम्नीमुपयेमे, तथा चास्य पितापि राजराजः नरेन्द्रः (प्रथमः) परकेसरिणो राजेन्द्रस्य (गङ्गैकोण्डचोलस्य) कन्याममङ्गदेवीं परिणिन्ये। अयं (कुलोत्तुङ्गः) परकेसरिणो राजेन्द्रदेवस्य (चोलस्य) पुत्रीं मधुरान्तकीमूढवान्। अतोऽनेन विक्रमश्यालकमधिराजराजेन्द्रं पराजित्य चोलशासनं स्वायत्तीकृत्य चोलप्राच्यचालुक्यवंशयोः परस्परमेकीकरणं कृतम्। अस्य हि कुलोत्तुङ्गस्य बिल्हणप्रतिपादितं राजिग इति नामधेयमस्ति। अधिराजराजेन्द्रस्य विक्रमश्यालकत्वमपीतिहाससम्मतं वरीवर्ति[3]।

---

१. हिस्टोरिकल इन्स्क्रिप्शन आफ इण्डिया, पृ० ८२-८३।

२. प्राचीन भारत—मजूमदारमहोदयकृतः एन्शेण्ट इण्डिया इत्यस्य अनुवादः, पृ० ३६१।

३. एपिग्राफिया इण्डिका, पृ० १३३।

कल्याण-पश्चिम-चालुक्याः

तैलपः (तैलः द्वितीयः) (९७३-९७ ई०)

सत्याश्रयः (९९७-१००८ ई०) | दशवर्मा यशोवर्मा

(सत्याश्रयः) कन्यापल्लववैरिविनोलम्बपत्नी | कुन्दः (कुन्दिगः) (१०१९-३१ ई०) वर्षेषु वनवासशासकः

(दशवर्मा) विक्रमादित्यः (५मः) (१००८-१४ ई०) | अय्यणः (२यः) | कन्या अक्कादेवी | जयसिंहः (३यः) जगदेकमल्लः चोलराजेन्द्रेण प्रथमेन युयुधे

(जयसिंहः) सोमेश्वरः (१मः) (आहवमल्लः, त्रैलोक्यमल्लः) (१०४२—३० मार्च १०६८) (चोलराजत्रयेण युयुधे) | कन्या—हला (आवलादेवी)

(सोमेश्वरः १मः) सोमेश्वरः (२यः) | विक्रमादित्यः (षष्ठः) (त्रिभुवनमल्लः, विक्रमाङ्कः) | जयसिंहः (४र्थः) नोलम्बवाडी-वनवासी-शासकः | विष्णुवर्द्धनः विजयादित्यः

(विक्रमादित्यः षष्ठः) जयकर्णः त्रैलोक्यमल्लः (अल्पायुः) | सोमेश्वरः (३यः) (११२७-३८) | कन्या मैलालदेवी

अधिराजराजेन्द्रस्य सत्तायां कुलोत्तुङ्गेन विहितो विप्लवः काञ्चीतः तुङ्गभद्रागमनानन्तरं बभूवेति बिल्हणवाक्यं नाभिमतमितिहासविशेषज्ञानाम् । ताननुसृत्य नासीत्तत्र दिनानामन्तरम्[1] । तत्रावश्यं मासानामवधिना भवित-

---

१. अर्ली हिस्ट्री आफ दक्कन—श्री जी० याजदानी, पृ० ३५० ।

व्यम् । इतिहासग्रन्थानामध्ययनेन प्रतीयते यत्सोमेश्वरशासनेऽपि विक्रमो युवराजोपाधिं वनवासमण्डले शासकत्वेन नियुक्तिञ्चालभत । परं कविर्वृत्तान्तमिमं न न्यवध्नात् ।

सोमेश्वरस्य राजिगेन सह संगत्य विक्रमेऽप्याक्रमणं यद् बिल्हणेनावर्णि तत् सर्वैरपीतिहासकारैः याथातथ्येन स्वीकृतम् । विक्रमेण क्रियमाणाः सोमेश्वरेण सह सन्धिप्रयत्ना अथवा शान्तिप्रयत्नाः सम्भवतः कविकल्पिताः स्युः, यतो हि तत्रैतिह्यानां मौनमेवावलोक्यते । युद्धे विक्रमस्यैव विजये न कोऽपि विचिकित्सालेश इतिहासेऽवलोक्यते । सोमेश्वरस्य कारागृहे किमभूदित्यत्र बिल्हणो न किञ्चिदपि सङ्केतितवान् परं तस्य तत्र (कारागृहे) हननमनुमीयते इतिहासकारैः[1] ।

विक्रमे शासति जयसिंहस्य विद्रोहमवलम्ब्य बिल्हणवचनानीतिहासानुशीलनेन पूर्णतया यथार्थानि सिध्यन्ति । प्रायः सर्वेष्वेवेतिहासग्रन्थेष्वैतिह्या अस्मिन्विषये बिल्हणमक्षरशः समर्थयन्ते । बिल्हणवर्णितस्य चारुतरस्य विक्रमशासनस्यापि प्रशंसा इतिहासग्रन्थेषु दृष्टिपथमवतरति[2] ।

बिल्हणप्रतिपादितविक्रमसुशासनस्य साक्षिरूपेण मिताक्षराकर्तुः विज्ञानेश्वरपण्डितस्य पद्यान्यपि वर्तन्ते मिताक्षराभूमिकायाम् ।

काश्मीरेतिहासविवेचनम्—

बिल्हणो न केवलं चालुक्यवंशजानामेव राज्ञामितिहासं स्वकीयकाव्ये निबबन्ध, काश्मीरभूपालानामपि संक्षिप्तमितिहासं विक्रमाङ्कदेवचरितस्याष्टादशतमे सर्गे न्यवध्नात् । यथा चालुक्यकुलेतिहासस्य तेनोज्ज्वल एव पक्षो वर्णितः नेतरस्तथैव काश्मीरेतिहासस्याप्यनुज्ज्वलः पक्षो न वर्णितः । बिल्हणवर्णितस्य राज्ञोऽनन्तदेवस्य दयादाक्षिण्यपराक्रमादिगुणानां[3] दरदादिदेशीयनृपाणां पराजयस्य[4] पुष्टिश्च राजतरङ्गिणीनामैतिहासिककाव्यात्सम्यक्त्वेन सञ्जायते ।

---

१. R. G. Bhandarkar—Early History of Deccan, p. 93.

२. तदेव, पृ० ९३ ।

३. भवभक्तिव्रतस्नानत्यागशीलादिभिर्गुणैः ।
कृतिनाऽनन्तदेवेन मुनयोऽपि विनिर्जिताः ॥
राजतरङ्गिणी ७।२०१ ।

४. राजतरङ्गिणी—७।१७६ ।

बिल्हणोदितं सुभटाविषयकं मठनिर्माणादिकं तस्याश्च धर्मपरायणत्वमपि[1] राजतरङ्गिणीसम्मतमेव[2]। अस्मिन्विषये (मठनिर्माणादौ) बिल्हणस्य उक्तिः कल्हणोक्तिं सर्वात्मनानुसरति।

कीर्तिज्योत्स्नास्नपितभुवनश्रीरधिष्ठानमध्ये
शोभाज्येष्ठं मठमकुरुत स्वीयनामाङ्कितं सा।
यस्मिन्विद्यारसिकमनसामास्पदे दैशिकानां
का नामाक्ष्णोर्व्रजति न सुधावर्तिनां नर्तितश्रीः[3] ॥
चक्रे धाम त्रिनयनगुरोः सा वितस्तासमीपे
कामारातेः शिखरनिकरक्षुण्णनक्षत्रमार्गम्[4] ॥

उक्तश्लोकद्वयस्यैतिहासिकी यथार्थता राजतरङ्गिण्याः पद्येन स्पष्टीभवति—

सुभटापरनामा सा गौरीश्वरविधायिनी।
पुण्यं वितस्तापुलिने निर्ममे सुभटामठम्[5] ॥

विक्रमाङ्कदेवचरिते विजयक्षेत्रे भट्टाग्रहारनिर्माणं बिल्हणेन यदुक्तं तत्कल्हणेन स्वकीयराजतरङ्गिण्यामनुमोदितम्। तद्यथा विक्रमाङ्कदेवचरिते—

लग्नाः शृङ्गैर्नभसि विजयक्षेत्रभट्टाग्रहाराः
प्राकारत्वं कलिभयभिदे येन धर्मस्य नीताः ॥ १८।३९।

राजतरङ्गिण्याम्—

अष्टोत्तरं चाग्रहारशतं श्रीविजयेश्वरे।
ब्राह्मणेभ्यो महापुण्यं विद्वद्भ्यः प्रत्यपादयत् ॥ ७।१८४।

बिल्हणोक्तिस्तु अनन्तदेवस्य भट्टाग्रहारनिर्माणं कथयति, कल्हणोक्तिः सुभटायाः, इति तयोरत्र भेदः। परमिदमत्र सम्भाव्यते यत् सुभटायाः प्रेरणयैवानन्तदेवेनाग्रहारा निर्मापिताः स्युः। इति सम्भावनयैवात्र विरोधपरिहारो भवितुमर्हति। श्रीविश्वनाथभारद्वाजमहोदयैः सम्पादिते विक्रमाङ्कदेवचरिते सुभटा-

---

१. विक्र० १८।४०-४६।
२. राजतरङ्गिणी ७।१५०-१५१, विक्र० १८।४०-४६।
३. विक्र० १८।४४।
४. विक्र० १८।४६।
५. राजतरङ्गिणी ७।१८०।

भ्रातुः क्षितिपतिशब्देन सङ्केतः कृतः[1]। परमिदमत्र सन्दिग्धम्, किं क्षितिपतिस्तस्य नामास्ति ? अथवा क्षितिपतिशब्देन शब्दार्थग्रहणमेव तदभीष्टम् ? कल्हणस्य राजतरङ्गिणीतः सुभटायास्त्रयो भ्रातर आसन्नित्यनुमीयते, एकस्य नाम कल्लनोऽन्यस्य आशाचन्द्रोऽपरस्य सिल्लनश्च। विक्रमाङ्कदेवचरिते 'यस्य भ्राता क्षितिपति' रिति क्षात्रतेजोनिधानमित्यादिभिः शब्दैः अनन्तदेवस्य कोऽपि भ्राता क्षितिपतिनामा आसीदिति बिल्हणस्य सङ्केतः, परं क्षितिपतिरयं नासीदनन्तस्य सहोदरोऽपितु पितृव्यपुत्र आसीत्[2]। अनन्तदेवस्य शौर्यादिवर्णनमेवाकरोद्बिल्हणः विक्रमाङ्कदेवचरितस्यान्तिमे सर्गे, परमनन्तदेवस्यान्तिमेषु दिनेषु या दुर्दशा समभूत्तत्सङ्केतोऽपि नावलोक्यते महाकाव्येऽस्मिन्। किमत्र कारणम् ? तथा च कलशो महान् दुराचारी[3] राजासीत्, परं कलशस्य दुराचारसङ्केतोऽपि विक्रमाङ्कदेवचरिते नावलोक्यते। इतिहासानुशीलनेन प्रमाणीभवति यत्कलशः स्वपितुः जीवनावसर एव राज्यमासाद्य विटैः प्रलोभितः सन् दुराचारपरायणोऽभूत्। तदीयदुराचारदुःखाक्रान्तस्तदीयजनकोऽनन्तदेवो राजधानीं परित्यज्य सभार्यो विजयक्षेत्रे[4] वसतिं स्वीचकार। तत्रापि तस्य पुत्रेण कलशेन

---

१. यस्य भ्रातेति स्थाने यस्या भ्रातेति पाठः समुचितः। विक्र० १८। ४७, टिप्पणी।

२. पुत्रो विग्रहराजस्य क्षितिराजाभिधस्ततः।
राज्ञः पितृव्यजो भ्राता कदाचित्पार्श्वमाययौ ॥
राजतरङ्गिणी ७।२५१।

३. दुराचारपरायणेन कलशेन पितृष्वसया तथा चात्मस्वस्रा सहापि सम्भोगोऽकारीति राजतरङ्गिणीतः प्रतीयते।
कल्लनाख्या स्वसा राज्ञो नागाख्या च तदात्मजा।
परदारप्रसक्तेन भोक्तुं नैवावशेषिता ॥ रा० त० ७।२९३।
राजा चौर्यरतौत्सुक्यात्प्रतिगेहं परिभ्रमन्।
स्वदारालिङ्गनैः प्रीतिं क्षणदासु न लब्धवान् ॥ ७।३०५।
तत्रासीदिन्दुराजस्य स्नुषा परमपुंश्चली।
स्वगृहे दत्तसङ्केता नक्तं कलशभूभुजः ॥ रा० त० ७।३०८।

४. निषेधादनुगन्तॄणां ततः क्रुद्धो धराधवः।
उषित्वा विजयक्षेत्रं गन्तुं प्रावर्ततोद्यतः ॥
तं प्रयान्तं सपत्नीकं प्राप्तं पद्मपुरान्तिकम्।
अवोचन्नेत्य तत्रस्था विशावट्टादयो द्विजाः ॥ रा० त०। ७।३६-३७।

अनन्तदेवस्य सर्वस्वं भस्मसात्कृतम्[1]। अनन्तदेवश्च पुत्रदुःखदुःखितः गुदेऽसिधेनुं प्रवेश्य[2] पञ्चत्वमाससाद।

अत्रेदमेव सम्भाव्यते यत् बिल्हणस्य काश्मीरेभ्यः निष्क्रमणावसरे उक्तान्युदन्तजातानि न घटितानि स्युः। बिल्हणश्च कलशराज्यावाप्त्यनन्तरं सत्वरमेव काश्मीरेभ्यो निश्चक्राम। अतः पूर्वोक्तोदन्तानभिज्ञ एव स्यात्।

बिल्हणवर्णिता कलशनृपतेः दिग्विजययात्रा किमैतिहासिकी अथवा काल्पनिकी इति विचार्यते। बिल्हणः प्रतिपादयति, यत्कलशभूपतिः स्वकीयदिग्यात्रासु कादम्बर्यां वर्णितमच्छोदं सरोऽवलोकितवान्,[3] तथा कैलाशं यावद्गत्वा[4] प्रत्यावर्तमानो मानसाद्यक्षकन्यामप्यानीतवान्[5]। तेन कृतः स्त्रीराज्यविजयः,[6] यमुनाक्षेत्रस्य[7] कौरव[8]—(कुरु) क्षेत्रस्यापि विजयो बिल्हणाभिमतोऽस्ति।

कल्हणेन राजतरङ्गिण्यां विशदरूपेण काश्मीरदेशस्येतिवृत्तं वर्णितमस्ति। तेन कलशस्याद्भुतशौर्यशालित्वं स्वीकुर्वतापि बिल्हणोदिता कलशस्य दिग्यात्रा न कुत्रापि अनुमोदिता। अतः कलशस्येयं दिग्यात्रा सन्दिग्धा एव प्रतिभाति। बिल्हणेन प्रतिपादितं कलशस्य पुत्रत्रितयमितिहाससम्मतमेव। तत्र हर्षस्य कवितोत्कर्षत्वे[9] यदुल्लेखो वर्तते विक्रमाङ्कदेवचरिते स तु यथार्थ एव, न तु तत्रास्ति कोपि शङ्कावकाशः। यतो हि राजतरङ्गिण्यामपि अस्मिन्विषये सङ्केताः समुपलभ्यन्ते—

---

१. यदा पुनस्तयोर्दार्ढ्यमाढ्यत्वान्न व्यहीयत।
तदा सेर्ष्यः स दुष्पुत्रो रात्रौ वह्निमदापयत्॥

तेनाग्निनोर्वरीशस्य सर्वोपकरणैः समम्।
भस्मावशेषमभवद्विजयेश्वरपत्तनम्॥ रा० त० ७।४०८-९।

२. रा० त० ७।४४७।

३. विक्र० १८।५३।

४. विक्र० १८।५४।

५. विक्र० १८।५५।

६. विक्र० १८।५७।

७. विक्र० १८।६२।

८. विक्र० १८।६३।

९. विक्र० १८।६४।

अत्रान्तरे राजसूनुः हर्षः सोत्कर्षपौरुषः ।
गुणैर्लेभे प्रकाशत्वमन्यभूपालदुर्लभैः ॥
सोऽशेषदेशभाषाज्ञः सर्वभाषासु सत्कविः ।
कृत्स्नविद्यानिधिः प्राप ख्यातिं देशान्तरेष्वपि ॥

हर्षोत्कर्षविजयमल्लेषु सत्तासङ्घर्षो बिल्हणेन नैव प्रतिपादितः । परन्तु कल्हणेन सङ्घर्षस्यास्य विशदरूपेण प्रकाशनमकारि[1] । अत्रापि सत्तासङ्घर्षे बिल्हणस्याज्ञानमेव कारणं सम्भाव्यते । एवञ्च कल्याणनगरं काश्मीरदेशादतीव दूरमतो दूराविक्यातसमाचारादानप्रदानादिकं नासीत्सुकरम् ।

१. राजतरङ्गिणी, ७।७४८-९१६ ।

लोहरवंशः

सिंहराजः (लोहराधिपतिः)

- *उदयराजः
  - *विग्रहराजः
    - *क्षितिराजः
      - *भुवनराजः
  - सङ्ग्रामराजः (१००३-२८ ई०)
    - हरिराजः
    - अनन्तः (१०२८-६३ ई०)
      - कलशः (१०६३-८९ ई०)
        - हर्षः
        - उत्कर्षः
        - विजयमल्लः
- दिद्दा (९८०।१-१००३) काश्मीरनृपतिक्षेमगुप्तपत्नी (९५०-५८ ई०)
  - सङ्ग्रामराजः (दिद्दादत्तकतनयः)

*ईदृशचिह्नाङ्कितैः न शासितं काश्मीरराज्यम्[1] ।

---

१. मुरारिलालशर्मा—विक्रमाङ्कदेवचरितभूमिकायां परिशिष्टे ।

५

कविसङ्केतितभौगोलिकस्थानपरिचयः

आन्ध्रदेशः—

आन्ध्रदेशोऽयं गोदावरीकृष्णानद्योर्मध्ये वरीवर्ति[1] । ह्वेनत्साङ्गयात्राविवरणेऽपि अस्य निर्देशोऽस्ति । अस्य देशस्य राजधानी धनकटकनाम्ना अथवा अमरावतीतिनाम्ना विख्याता आसीत् ।[2] ह्वेनत्साङ्गमनुसृत्य आन्ध्रस्य प्राचीना राजधानी एलूरतः पञ्चक्रोशार्धं यावदुत्तरदिशि वेङ्गीतिनाम्ना प्रथितासीत् । अस्मिन्देशे सप्तगोदावरी वहतीति अनर्घराघवे प्रतिपादितमवलोक्यते[3] । अस्य देशस्याधिष्ठातृदेवो महादेवभीमेश्वरोऽस्ति । पुरा आन्ध्रसाम्राज्यं सातवाहनसाम्राज्यमथवा सातकर्णीसाम्राज्यमप्युच्यते स्म । तत्साम्राज्यराजधानी श्रीकाकुलमासीद्याधुना कृष्णयापवाहिता नाममात्रशेषाऽस्ति । एकादशशताब्द्यामान्ध्रदेशान्तर्गते वेङ्गीराज्ये चालुक्यनरेशानामधिकारो विक्रमाङ्कदेवचरितेऽपि वर्णितोऽस्ति । शक्तिसङ्गमतन्त्रे आन्ध्रदेशपरिचय इत्थं समुपलभ्यते—

जगन्नाथादूर्ध्वभागे अर्वाक् श्रीभ्रमराम्बिका ।
तावदन्ध्राभिधो देशः सौराष्ट्रं शृणु साम्प्रतम्[4] ॥

काश्मीरदेशः—

पीरपाञ्चालेतिनामपर्वतमालाया एवं हिमालयस्य प्रमुखपर्वतश्रेणीनां मध्ये ८५० क्रोशार्धं यावल्लम्बम् ३५ अथवा २५ क्रोशार्धं यावदायतं क्षेत्रं काश्मीरनाम्ना व्याह्रियते स्म ।[5] राजतरङ्गिणीवर्णनेन प्रतीयते यत्प्राचीनकाले काश्मीरक्षेत्रे एकं महत्सर आसीत्, यत्खलु कश्यपेन ऋषिणा वराहमूलसविधे पर्वतं भित्वा प्रवाहितम्[6] । अतः कश्यपनाम्ना एव तत्क्षेत्रस्य काश्मीरेति नाम

---

१. दि एन्शेण्ट ज्योग्रेफी आफ इण्डिया (कनिंघम), पृ० ४४५ ।
२. ज्यो० डि०, पृ० ७ ।
३. अनर्घराघवम्, सप्तमोऽङ्कः २०३ ।
४. शक्तिसङ्गमतन्त्रे तृतीये भागे षष्ठेऽध्याये ४३ ।
५. हिन्दीविश्वकोशे, २।३९९ ।
६. राजतरङ्गिणी (डा० स्टाइन) खण्डः १, पृ० ५ ।

सञ्जातम् । प्रद्युम्नपर्वते (हारी इति प्रसिद्धे) कश्यपस्य आश्रमस्थानमासीदिति प्रतिपाद्यते । डा० विलसनमतमनुसृत्य कश्यपपुरादेव काश्मीरेति नाम सञ्जातं परं मतमिदं डा० स्टाइनमहोदयानुसारं न समीचीनम् । तमनुसृत्य काश्मीरदेशः कदापि कश्यपपुरनाम्ना न व्याह्रियते स्म[१]। अस्य देशस्य सर्वदा काश्मीरनाम्नैव व्याहारः तत्सम्मतः । टोलमी (Ptolemy) काश्यपीरियास्थानस्य परिचयः मुलताननामस्थानेन सम्वृत्तोऽस्ति । खासाजातिसम्बन्धेनापि खस्मीर (काश्मीर) व्याहारोनुमीयते[२] । परं पौराणिकीं कश्यपकथामाधारीकृत्य कश्यपसम्बन्धेनैव काश्मीरेतिनामकरणमधिकं सङ्गच्छते । अस्य देशस्य वर्णनं बिल्हणेन काव्येऽस्मिन्नितरां सुरम्यैः शब्दैः कृतमस्ति । ईस्वीये ६३१ तमे वर्षे चीनदेशीयह्वेनत्साङ्गनामयात्रिणाप्यत्रागतम् । तस्य यात्राविवरणेऽपि काश्मीरदेशस्य वर्णनं समुपलभ्यते[३] । शक्तिसङ्गमतन्त्रे काश्मीरदेशस्य परिचय इत्थमस्ति प्रतिपादितः—

शारदामठमारभ्य कुङ्कुमाद्रितटान्तकम् ।
तावत्काश्मीरदेशः स्यात्पञ्चाशद्योजनान्तकः[४] ॥

पुराणेष्वपि अनेकस्थलेष्वस्य देशस्य वर्णनं समुपलभ्यते ।[५] ।

कामरूपदेशः—

कामरूपदेश इदानीन्तन असमप्रदेशो वरीवर्ति । पुराणेषु तन्त्रेषु च कामरूपदेशस्य महापीठमिति नामोपलभ्यते । योगिनीतन्त्रेऽस्य विस्तरः करतोयातः दिक्करवासिनीं यावत्प्रतिपादितः । अस्य ईस्वीयतृतीयशताब्द्याः पूर्वेतिहासः पौराणिककथासूपलभ्यते । तदनुसारं वराहविष्णुना पृथिवीपुत्रेण नरकेण चात्र एकस्य राजवंशस्य स्थापना अकारि ।[६] बृहद्धर्मपुराणमनुसृत्य ब्रह्मपुत्रनदस्योत्तरदिशि अश्वक्रान्तपर्वते भगवतः कृष्णस्य नरकासुरेण सह युद्धं समभूत् ।[७] नरकासुरस्य पुत्रो भगदत्तः महाभारते युद्धे दुर्योधनस्य साहाय्यमकरोदित्यस्ति महाभारते सङ्केतः[८] । पुराणेष्वस्य राजधानी प्राग्ज्योतिषनाम्ना व्याहृता

१. एन्शेण्ट ज्योग्रेफी आफ काश्मीर (डा० स्टाइन), पृ० ११ ।
२. हिन्दीविश्वकोशे २।३६ ।
३. दि एन्शेण्ट ज्योग्रेफी आफ इण्डिया (कनिङ्घम), पृ० १०६ ।
४. शक्तिसङ्गमतन्त्रे ३।६।६ ।
५. वराहपुराणे अध्याये ५६ ।
६. हिन्दीविश्वकोशे २।४५६ ।
७. बृहद्धर्मपुराणम्, मध्यखण्डः, अध्यायः १०, ब्रह्मपुराणम्, अध्यायः ५१, ज० रा० ए० सो० १६००, पृ० २५ ।
८. महाभारते उद्योगपर्व, अध्यायः ४ ।

अस्ति,,[१] सा च इदानीन्तना 'गौहाटी' अथवा कामाक्षा एवास्ति[२]। नीलध्वजेन राज्ञा वर्तमानकामतापुरेऽपि कामरूपराजधानी निर्मापितासीत्[3]। ईस्वीयसप्तमशताब्द्यां चीनयात्रिणा ह्वेनत्साङ्गेनात्राप्यागतम्। तेन हि तदानीन्तनकामरूपस्य महान् विस्तरोऽस्ति प्रतिपादितः[४]। शक्तिसङ्गमतन्त्रे कामरूपदेशस्य परिचयः इत्थमुपलभ्यते—

कालेश्वराच्छ्वेतगिरिं त्रिपुरान्नीलपर्वतम्।
कामरूपाभिधो देवि गणेशगिरिमूर्धनि[५]॥

कुन्तलदेशः—

चालुक्यानां समये कुन्तलदेशस्य सीमा उत्तरदिशि नर्मदां यावद् दक्षिणस्यां तुङ्गभद्रां यावत्पश्चिमदिशि 'अरब' सागरं यावत्पूर्वदिशि च गोदावरीं यावदासीत्। अस्य देशस्य राजधानी नासिकनगरे कल्याणनगरे चाभवत्कालभेदेन[६]। तत्पश्चान्महाराष्ट्रदेशस्य दक्षिणो भागः कुन्तलदेशोऽकथ्यत[७]। अस्मिन्देशे मैसूरदेशस्य औत्तरभूभागोऽपि सम्मिलित आसीत्[८]। दशकुमारचरितमनुसृत्य देशोऽयं विदर्भदेशाधीन आसीत्[९]। परं दशमशताब्द्यां विदर्भनगरस्थितिः कुन्तलदेशान्तर्गतावलोक्यते[१०]। उत्तरवर्तिशिलालेखेषु देशोऽयं कर्णाटनाम्ना व्याहृतः। विक्रमाङ्कदेवचरितेऽपि कुन्तलदेशः कर्णाटदेशपर्यायत्वेनोक्तो वर्तते।

---

१. कालिकापुराणे अध्यायः, ३८।
२. ज० रा० ए० सो० १९००, पृ० २५।
३. दि एन्शेंण्ट ज्योग्रेफी आफ इण्डिया (कनिङ्घम), पृ० ४२२।
४. The territory is estimated at 1667 miles in circuit. This large extant shows that it must have comprised whole valley of the Brahmaputra river or Modern Assam, together with Kasavihar and Bhutan.
५. शक्तिसङ्गमतन्त्रे भागस्तृतीयः, ६।१०।
६. इण्डियन एण्टीक्वेरी, खण्ड २२, १८९३, पृ० १८२।
७. अर्ली हिस्ट्री आफ दक्कन (डा० आर० जी० भण्डारकर) सैक० १२, वामनपुराणे अध्यायः १३।
८. जरनल आफ दि रायल एशियाटिक सोसायटी, १९११, पृ० ८१२।
९. दशकुमारचरितम्, अध्यायः ८।
१०. कर्पूरमञ्जरी (राजशेखरस्य), अङ्कः १।

कुरुक्षेत्रस्थानम्—

विक्रमाङ्कदेवचरितस्य १८।६३ तमे पद्ये कुरुक्षेत्रस्य सङ्केतः समुपलभ्यते। अयं देशः वर्तमानहरियाणाराज्ये स्थानेश्वर (थानेसर) इति नाम्ना इदानीं व्याह्रियते। स्थाणुसरः इति नामतः स्थानेश्वरस्योत्पत्तिः। अयं देशः भारतवर्षस्य प्राचीनतमेषु प्रसिद्धतमेषु च स्थानेष्वेकतमः। चीनदेशयात्रिणा ह्वेनत्साङ्गेन कुरुक्षेत्रस्य विस्तरः ११६७ क्रोशार्धं यावत् चतुर्दिक्षु प्रतिपादितः[1]। अस्मिन् क्षेत्रे बहूनि सरांसि सन्ति, येषु कुरुक्षेत्र-सन्निहितानि स्थाणुनामानि प्रधानानि सन्ति। स्थानेश्वरस्य सर्वतः ३६० तीर्थस्थानानि सन्ति। महाभारतयुद्धमपि स्थानेश्वरं परितः विशाले क्षेत्रे समभूत्। स्थानेश्वरस्य पश्चिमदिशि महाभारतयुद्धे वीरगतिमवाप्तवतां वीराणां दाहसंस्कारस्थानमस्ति[2]। सरस्वतीदृषद्वत्योर्मध्यवर्ती अयं देशो मनुस्मृतौ ब्रह्मदेशनाम्ना व्याहृतः[3]। अयं देशः हिन्दूनां प्रसिद्धतीर्थस्थानमस्ति। कुरुक्षेत्रस्य माहात्म्यं पुराणादिषु अनेकत्र वर्णितमुपलभ्यते[4]।

कर्हाट्देशः—

विक्रमाङ्कदेवचरितस्य ८।२ पद्ये कर्हाट्देशस्य नामनिर्देशोऽवलोक्यते। अस्य देशस्य राजकन्यया सहैव विक्रमाङ्कदेवचरितनायकस्य विवाहसम्बन्धोऽस्ति प्रतिपादितः। वर्तमानसतारामण्डलस्य क्षेत्रे कर्हाट्देश आसीत्। कोल्हापुरात् ४० क्रोशार्धानि यावदत्रैव कृष्णाकोयनानद्योः सङ्गमोऽस्ति[5]। अस्य देशस्य प्राचीना राजधानी काराष्ट्रनगरं प्रतिपाद्यते।[6]

गौडदेशः—

सम्पूर्णोऽपि वङ्गदेशः गौडदेशनाम्ना व्याह्रियते स्म। अस्य देशस्य राजधानी अपि गौडाभिधाना गङ्गाया वामतटे स्थितासीत्, या इदानीं गङ्गाप्रवाहे प्रवहनवशान्नामावशेषाऽस्ति।[7] गौडदेशेऽपि बिल्हणेन विक्रमाङ्कदेवस्याक्रमण-

---

१. भारतभ्रमण, पृ० ४५७।

२. आर्केलाजिकल सर्वे आफ इण्डिया, रिपोर्ट १४।८६-१०६।

३. मनुस्मृतिः, २।३४।

४. व्यासस्मृतिः, अध्या० ४, शङ्खस्मृतिः, अध्या० १४, लिङ्गपुराणम्, अध्या० २६, वामनपुराणम्, अध्या० २२, ३३-३५, मत्स्यपुराणम्, अध्या० १०८, पद्मपुराणम्, सृष्टिखण्डे अध्या० १८, अग्निपुराणम्, अध्या० १०८।

५. ज्यो० डि०, पृ० ९२।

६. स्कन्दपुराणे सह्याद्रिखण्डे।

७. ज्यो० डि०, पृ० ६३।

सङ्केतोऽस्ति कृतः । शक्तिसङ्गमतन्त्रे गौडदेशस्य स्वरूपं वक्ष्यमाणरूपेण प्रतिपादितमस्ति—

> **वङ्गदेशं समारभ्य भुवनेशान्तगः शिवे ।**
> **गौडदेशः समाख्यातः सर्वविद्याविशारदः[1] ॥**

चोलदेशः—

विक्रमाङ्कदेवचरिते अनेकेषु स्थलेषु चोलदेशस्य नाम समुट्टङ्कितं वर्तते । अयं देशः कुन्तलदेशस्य प्रतिवेशी आसीत् । उत्तरदिशि दक्षिणपिनाकिनीं यावत् दक्षिणदिशि च नैलूरतः पुडकोट्टई-पर्यन्तं वर्तमानेन भूभागेन सहैव कुर्गपर्यन्तं भूभाग आसीच्चोलदेशान्तर्गतः । अस्य देशस्य द्रविडदेशोऽपि नामान्तरं वरीवर्ति । अनेनैव राज्येन सह विक्रमाङ्कदेवस्य तत्पूर्वजानाञ्च चिरन्तनः सङ्घर्षोऽस्ति स्पष्टीकृत ऐतिहासिकविवेचने । एकादशशताब्द्यामस्य देशस्य राजधानी काञ्चीनगरी आसीत् ।

त्रिगर्तदेशः—

विक्रमाङ्कदेवचरितस्य १८।३८ तमे पद्ये त्रिगर्तदेशस्य समुल्लेखो वरीवर्ति । तिसृभिः (इरावतीशतद्रुविपाशाभिः) नदीभिः सम्यगभिषिक्तो देशस्त्रिगर्तः । हेमकोशमनुसृत्य त्रिगर्तदेशो वर्तमानजालन्धरदेशः एतन्नाममण्डलस्य च परितः स्थितो भूभाग एवास्ते[2] । उपलब्धशिलालेखैरपि उक्तं तथ्यं प्रमाणीभवति[3] । परं कनिङ्घममतमनुसृत्य काङ्गडाप्रदेशः (वर्तमानहिमाचलप्रदेशान्तर्गतः) त्रिगर्तदेश आसीत्[4] ।

तुक्खारदेशः—

बलखेति नाम्ना व्याह्रियमाण एव तुक्खारदेशः[5] । अयं देश उत्तमाश्वानां कृते प्रसिद्धः[6] । महाभारते राजतरङ्गिण्यां बृहत्संहितायामपि अस्य नामनिर्देशः

---

१. शक्तिसङ्गमतन्त्रे, ३।६।३८ ।
२. आर्केलाजिलक सर्वे आफ इण्डिया रिपोर्ट, ५।१४८ । (ज० ए० एस० बी० १८८० १० ।
३. एपिग्राफिया इण्डिका, १।१०२, ११६ ।
४. बृहत्संहिता अध्याय १४, राजतरङ्गिणी (स्टाइन) खण्ड १, पृ० ८१ ।
५. राजतरङ्गिणी (स्टाइन) १।१३६ ।
६. नकुलस्य अश्वचिकित्सितम्, अध्या० २ ।

समवलोक्यते[१]। बाल्हीकदेशस्य परिचयः इत्थमस्ति शक्तिसङ्गमतन्त्रे प्रतिपादितः—

काम्बोजदेशमारभ्य महाम्लेच्छान् तु पूर्वके।
बाल्हीकदेशो देवेशि अश्वोत्पत्तिपरायणः[२] ॥

तैलङ्गदेशः—

आन्ध्रप्रदेशान्तर्गतः 'तिलङ्गाना' इति नाम्ना वर्तमानः प्रदेश एव तैलङ्गदेशः[३]। अयं देशः गोदावरीकृष्णानद्योर्मध्ये वर्तते। 'तिलङ्गान' इति त्रिकलिङ्गस्य अथवा त्रिलिङ्गस्यापभ्रंशोऽस्ति[४]। अशोककालीनशिलालेखेषु अस्य देशस्य सत्यपुत्र इति नामोपलभ्यते[५]। तैलङ्गप्रदेशस्य प्राचीना राजधानी गोलकुण्डानगरमासीदित्यपि भौगोलिकानुसन्धानेन परिज्ञायते।[६] तैलङ्गदेशस्य परिचयः शक्तिसङ्गमतन्त्रे इत्थमुपलभ्यते—

श्रीशैलं तु समारभ्य श्रीरङ्गान्तं वरेश्वरि।
तैलङ्गदेशो देवेशि ध्यानाध्ययनतत्परः[७] ॥

दरद्देशः—

अयं देशः काश्मीरदेशस्योत्तरदिशि दरदिस्तानेति नामा वर्तते। अस्य समुल्लेखो विक्रमाङ्कदेवचरिते १८।३४ तमे पद्ये वर्तते। राजतरङ्गिण्यामपि अस्य देशस्य परिचयः समुपलभ्यते[८]।

---

१. महाभारते सभापर्व अध्या० ५१, बृहत्संहितायाम् अध्या० १६, राजतरङ्गिणी (स्टाइन), खण्ड १, पृ० १३६।
२. शक्तिसङ्गमतन्त्रे, ३।६।२८।
३. टौनेमहोदयस्य प्रबन्धचिन्तामणिः, पृ० ४५।
४. ज्यो० डि०, पृ० २०४।
५. दि बौद्ध स्तूप आफ अमरावती (बरगेस), पृ० ४५।
६. ज० ए० एस० बी० भागः ७, पृ० १२८।
७. शक्तिसङ्गमतन्त्रे, ३।६।२८।
८. Their (Darda's) seats extend from Chitral and Yasin across Indus regions of Gilgit, Chilas and Bungi to the Vishen Ganga Valley in the immediate North of Kashmir.
—Rajatarangini (Dr. Stein), Vol. I, p. 47.

दार्वाभिसारदेशः

अस्य देशस्य नामोल्लेखः विक्रमाङ्कदेवचरिते १८।३८ तमे पद्ये वर्तते। श्रीनगरात्पश्चिमे दिग्विभागे चन्द्रभागावितस्तानद्योर्मध्यवर्ती पर्वतीयभूखण्डो दार्वाभिसारनाम्ना व्याह्रियते स्म। राजपुर्या भूखण्डोऽपि एतस्यान्तर्गत एव आसीत्[1]। दार्वाभिसार इति देशपरकनामनिर्देशो महाभारतेऽपि वर्तते[2]।

पाण्ड्यदेशः—

वर्तमानतिन्नवली तथा मदुराभूखण्ड एव पुरा पाण्ड्यदेशनाम्ना व्याह्रियते स्म। अस्मिन्देशेऽपि विक्रमाक्रमणसमुल्लेखो बिल्हणेन कृतोऽस्ति विक्रमाङ्कदेवचरिते।[3]।

मालवदेशः

कुन्तलदेशस्योत्तरदिशि मालवदेश आसीत्। अस्य सीमानः शक्तिसङ्गमतन्त्रे वक्ष्यमाणरूपेण प्रतिपादिताः—

अवन्तितः पूर्वभागे गोदावर्यास्तथोत्तरे।
मालवाख्यो महादेशो धनधान्यपरायणः[4]॥

सप्तमशताब्द्यामस्य सीमा निर्देक्ष्यमाणरूपेण समुपलभ्यते—

'उत्तरदिशि बदरीपर्यन्तं पश्चिमदिशि वलभीपर्यन्तं पूर्वदिशि उज्जैनपर्यन्तं दक्षिणदिशि च महाराष्ट्रपर्यन्तम्[5]।'

अस्य देशस्य राजधानी धारानगरी इति नाम्ना प्रसिद्धासीत्। ततः पूर्वं मालवदेशस्य राजधानी अवन्तिनगरी अपि समभूदित्यपि भौगोलिकानुसन्धानेन प्रतीयते। मयूरहलायुधवाग्भटप्रभृतयो विद्वांसो मालवभूपतीनामेवाश्रिता आसन्। अस्य देशस्य नाम पुराणेष्वपि परिकीर्तितं वर्तते[6]। अस्मिन्नपि देशे बिल्हणेन चालुक्याऽऽक्रमणानि प्रतिपादितानि सन्ति[7]।

स्त्रीराज्यम्—

अयं देशो हिमालयक्षेत्रे ब्रह्मपुत्रादुत्तरदिशि वर्तते। वर्तमानगढवालकुमायूं-

---

१. राजतरङ्गिणी (डा० स्टाइन), खण्डः १, पृ० ३२।
२. महाभारते वनपर्व, अध्या० ५१।
३. विक्र० ४।४५।
४. शक्तिसङ्गमतन्त्रे, ३।६।२१।
५. ज्योग्रेफी आफ एन्शेण्ट इण्डिया (कनिङ्घम्), पृ० ४१४।
६. ब्रह्माण्डपुराणे, पूर्वखण्डे, अध्या० ४८।
७. विक्र० १।९४।

क्षेत्रमेवासीद् पुरा स्त्रीराज्यमिति प्रमाणीभूतम्[1]। अत्रत्यैव शासिका अर्जुनेन सह युद्धमकार्षीत्[2]। वराहमिहिरस्य बृहत्संहितायामपि स्त्रीराज्यस्य समुल्लेखो वर्तते।[3] ह्वेनत्साङ्गेनापि हिमालयक्षेत्रे स्त्रीशासनस्य प्रतिपादनं कृतमस्ति।

वनवासमण्डलम्—

वरदातुङ्गभद्रानद्योर्मध्ये पर्वतीयप्रदेश एव वनवासमण्डलमासीत्। मण्डलमिदं कुन्तलराज्यान्तर्गतमेवासीदेकादशशताब्द्याम्[4]। अस्य मण्डलस्य राजधानी वनवासीनाम्ना प्रथितासीत्।

बाहुप्रदेशः—

अयं प्रदेशः वर्तमानजम्बूप्रदेशस्य पर्वतप्रदेश एव आसीत्। जम्बूनगरसविधे तौषीनद्या वामतटे बाहुदुर्गस्य विद्यमानत्वादयमेव प्रदेशः बाहुप्रदेश इति सम्भाव्यते।

आलुपप्रदेशः—

कुत्रासीदयं प्रदेश इति प्रतिपादनं दुष्करम्। सम्भाव्यते यदयं प्रदेशः वर्तमानगोआसविधे क्वचिदासीत्[5]।

लोहरदेशः—

अयं देशोऽद्यत्वे लारमण्डलमुच्यते। सिन्धुनद्याः समतलभूभागे प्रवेशं यावत्काश्मीरक्षेत्रमेव लोहरदेश आसीत्[6]।

नगराणि

अयोध्या—

अयोध्येति नाम भारतवर्षस्य प्राचीनतमं प्रसिद्धतमञ्च नगरमस्ति। सरयूनद्या दक्षिणतटे विद्यमानं नगरमिदं भगवतो रामस्य जन्मभूमिरस्ति इति रामायणादिभिर्ज्ञायते। प्राचीनोल्लेखाननुसृत्य नगरमिदं कौशल (कोसल) जनपदस्य राजधानी आसीत्[7]।

इदमेव नगरं चालुक्यकुलमूलपुरुषाणां मूलस्थानमासीत्[8]। इदानीं नगर-

---

१. ज्यो० डि०, पृ० १९४।
२. जैमिनीयभारते, अध्या० २२।
३. बृहत्संहिता, १४।२२।
४. विक्रमाङ्कदेवचरितचर्चा, पृ० ४४।
५. तदेव, पृ० ४५।
६. दि एन्शेण्ट ज्योग्रेफी आफ काश्मीर, पृ० २०९।
७. रामायणम्, बालकाण्डम् ५।५।
८. विक्र० १।६३।

मिदं वर्तमानोत्तरप्रदेशे फैजाबादेति मण्डले वर्तते । अत्र चीनदेशीययात्रिणा ह्वेनत्साङ्गेनाप्यागतम् । तमनुसृत्य तदानीं नगरेऽस्मिन् विंशति बौद्धमन्दिराणि सहस्रत्रयं भिक्षूणाञ्चासीत्[1] । अत्र हि हिन्दूनां बहूनि मन्दिराणि सन्ति, एतस्मादेव कारणान्नगरमिदं हिन्दूनां प्रसिद्धं तीर्थस्थानमस्ति । अस्य नाम वेदेष्वप्युपलभ्यते[2] ।

कल्याणनगरम् (कल्याणी)—

हैदराबादान्तर्गतवीदरस्थानात्षट्क्रोशार्धं यावत्पश्चिमदिशि वर्तते । इदमेव नगरं विक्रमाङ्कदेवचरितनायकस्य राजधानी आसीत् । अस्य नगरस्य निर्माणमाहवमल्लेन राज्ञा कारितमासीत्[3] । अस्य नगरस्य वैभववर्णनं वर्णनाध्याये नगरवर्णनप्रसङ्गे प्रतिपादितं वर्तते ।

कान्यकुब्जनगरम्—

कान्यकुब्जनगरं भारतवर्षस्य प्राचीनं नगरमस्ति । कुशपुत्रेण कुशनाभेन अस्य नगरस्य निर्माणं कारितमासीत्[4] । वायुना अस्मिन्नगरे कन्याः कुब्जाः कृता आसन्निति हेतोः नगरमिदं कान्यकुब्जसंज्ञां लब्धवदिति प्रतिपाद्यते[5] । इदमेव नगरं गाधिराजस्य राजधानी अपि आसीत्[6] । अस्य नगरस्य महोदयः, महोदया, गाधिपुरम्, गाधिनगरम् इत्यादीनि नामान्यपि लभ्यन्ते[7] । भवभूतिबाणश्रीहर्षप्रभृतयो विद्वांसः कान्यकुब्जेश्वराणामेवाश्रिता आसन् ।

काञ्ची—

विक्रमाङ्कदेवचरिते ४।२८, ६।१०, ९।१२९ तमेषु पद्येषु काञ्चीनगर्या नामोपलभ्यते । इयं नगरी दक्षिणभारतीयनगरीषु प्रसिद्धतमासीत् । एकादशशताब्द्यामियं चोलानां राजधानी आसीत् । तस्मिन्काले इयमतिवैभवसम्पन्ना नगरी आसीत् । बिल्हणेन अस्यां विक्रमाङ्कदेवचरिते विक्रमादित्यस्य अधिकारोऽपि प्रतिपादितोऽस्ति । तत्कालीनमन्दिराणां ध्वंसावशेषा अप्यस्याः प्राक्तनं गौरवं शंसन्ति । मद्रासनगरतः ४५ क्रोशार्धं यावद् दूरे पश्चिमदक्षिणदिग्विभागे

---

१. हिन्दीविश्वकोशः, १।२०८ ।

२. ऋग्वेदे, अष्टचक्रानवद्वारादेवतानां पूरयोध्या ।

३. विक्र० २।१ ।

४. रामायणम्, १।३२।६ ।

५. रामायणम्, १।३३-३५ ।

६. राजतरङ्गिणी, ३।१३३ ।

७. प्राचीनभारत में नगर तथा नगरजीवन, पृ० ८४ ।

स्थितेयं नगरी काञ्जीवरमिति नाम्ना इदानीं व्याह्रियते। इय नगरी क्रमशः पल्लवचोलविजयनगरराजसत्तासु परममभ्युदयमाससाद। सर्वैरपि राजभिरत्र विविधानि मन्दिराणि भव्यभवनानि च निर्मापितान्यासन्[1]।

इयं नगरी हिन्दूनां प्रसिद्धा तीर्थस्थली अस्ति। सप्तमोक्षदासु नगरीष्वनन्यतमा च वर्तते[2]।

खोनमुषग्रामः—

जयवनात् (वर्तमानजैवनग्रामात्) क्रोशं यावदुत्तरदिशि वर्तमानः 'खनमुह' नामको ग्राम एव प्राचीनः 'खोनमुष' इति नामा ग्रामो वर्तते[3]। अयमेव महाकवेर्बिल्हणस्य जन्मग्रामो वरीवर्ति, अत एव अस्य वर्णनं बिल्हणेन महता समादरेण कृतमस्ति काव्येऽस्मिन्[4]।

गाङ्गकुण्डम्—

नगरमिदं कावेरीनद्यास्तटे तञ्जौरतो दक्षिणपूर्वदिशि विद्यमानमासीत्।

गोपाचलनगरम्—

अस्य नगरस्य नाम विक्रमाङ्कदेवचरिते ६।१०६ तमे पद्ये समुपलभ्यते। वर्तमानग्वालियरनगरमेव पुरा गोपाचलनगरमिति व्याह्रियते स्म[5]।

चक्रकोटनगरम्—

नगरमिदं जगदलपुरात्पश्चिमदिशि कुन्तलाऽऽन्ध्रसीमाप्रदेशे स्थितमासीत्।

चम्पानगरम्—

इदं नगरं वर्तमानहिमाचलप्रदेशे 'चम्बा' इति नाम्नेदानीं व्याह्रियते। अस्य हि पश्चिमदिशि पश्चिमोत्तरदिशि च किश्तवाडक्षेत्रम्, दक्षिणदिशि दक्षिण-

---

१. हिन्दीविश्वकोशः, पृ० ४१६।

२. अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारावती चैव सप्तैता मुक्तिभुक्तिदाः॥
एतान्यन्यानि पुण्यानि क्षेत्राणि वसुधातले।
तेषु पुण्यतमा काञ्ची कलिकल्मषनाशिनी॥
काञ्चीमाहात्म्ये १।५६-६०।

३. व्युल्हरज रिपोर्ट, पृ० ५, दि एन्शेण्ट ज्योग्रेफी आफ इण्डिया (कनिङ्घम), पृ० ९८, दि एन्शेण्ट ज्योग्रेफी आफ काश्मीर (डा० स्टाइन), पृ० १६६, राजतरङ्गिणी, १।९०।

४. विक्र० १८।७१।

५. ज० ए० सो० बं०, पृ० ४०६।

पूर्वदिशि काङ्गडाक्षेत्रम्, पूर्वदिशि पूर्वोत्तरदिशि च लद्दाखक्षेत्रमस्ति[1]। चीनदेशीययात्रिणा ह्वेनत्साङ्गेन स्वीययात्राविवरणे अस्य क्षेत्रस्य नगरस्य च उल्लेखो नास्ति कृतः। अतस्तदानीं चम्पाक्षेत्रस्य स्थितिः काश्मीरराज्यान्तर्गतत्वेन सम्भाव्यते।

चेदी—

चेदीतिनाम नगरं चन्देरीतिनगरस्यैव नामान्तरमस्ति[2]। जबलपुरात्षट्क्रोशार्धं यावद्दूरे तेवरेत्याख्यमुपनगरमेव (त्रिपुरी) चेदीति व्याह्रियते स्म[3]। प्राचीनचन्देरी (चेदी) नामनगरस्य भग्नावशेषा वर्तमाननगरस्योत्तरपश्चिमदिशि अष्टक्रोशार्धं यावत्प्रसृता विद्यन्ते[4]। डा० व्युल्हरं जनरलकनिङ्घमञ्चानुसृत्य बुन्देलखण्डस्य दाहलमण्डलस्यापि चेदीति नाम्ना व्याहार आसीत्[5]।

जयवनस्थानम्—

श्रीनगरसविधे वर्तमानसिंहपुरात् (Simpor) क्रोशार्धद्वयं यावद्दूरं पश्चिमदिशि वर्तमानो 'जैवन' इति नाम ग्राम एव प्राचीनं जयवनमिति नाम स्थानमस्ति[6]।

दाहलनगरम्—

चेदीदाहलयोर्नास्ति भेदः[7] (द्रष्टव्यश्चेदीप्रसङ्गः)।

धारा—

धारा इति नाम नगरी मालवराज्यस्य राजधानी आसीत्। वर्तमानधारानगरम् ('धार' इत्याख्यम्) एकक्रोशार्धं यावल्लम्बम् एकक्रोशार्धं यावदायतम् एकक्रोशं यावच्च परिधियुतं वर्तते।

धारानगरस्य भोजकालीनं विद्यावैभवं प्रबन्धचिन्तामणिभोजप्रबन्धादिभिः परिज्ञायते। महाकविना बिल्हणेनापि (भोजे दिवंगते) अत्र समागतम्[8]।

---

१. भारतभ्रमण, पृ० ४८४।

२. राजस्थान (टाड), १।४३ टिप्पण्याम्।

३. एपिग्राफिया इण्डिका, १।२२०-२५३।

४. ज० ए० सो० बं०, १९०२, पृ० १०४ टिप्पण्याम्।

५. विक्र० डा० व्युह्लर १८।९५ टिप्पणी, आर्केलाजिकल सर्वे आफ इण्डिया, रिपोर्ट ९।१०६।

६. एन्शेण्ट ज्योग्रेफी आफ काश्मीर (स्टाइन), पृ० १६६।

७. विक्रमाङ्कदेवचरिते (भूमिकायां डा० व्युल्हरमहोदयस्य) विक्रमाङ्कदेवचरितचर्चा, पृ० २०।

८. विक्र० १८।९६।

पद्मपुरम्—

श्रीनगरात्पञ्चषट्क्रोशार्धं यावद्दक्षिणपूर्वदिशि वितस्तातटे विद्यमानमिदानीन्तनं पाम्पुरं नाम नगरमेव पुरा पद्मपुरं व्याह्रियते स्म । ईस्वीयनवमशताब्द्यां तदानीन्तनकाश्मीरनरेशस्य (बृहस्पतेः) पद्मनामा मातुलोऽस्य निर्माणमकार्षीत्[1] । पद्मपुरं कुङ्कुमोत्पादनेऽतिप्रसिद्धमस्ति ।

प्रवरपुरम्—

काश्मीरराज्यस्य वर्तमानं ग्रीष्मकालिकं राजधानीनगरं श्रीनगरमेव पुरा प्रवरपुरमथवा प्रवरसेनपुरमित्यभिधीयते स्म[2] । (ईस्वीयषष्ठशताब्द्या आरम्भे) अस्य नगरस्य निर्माणं राज्ञा प्रवरसेनेन कारितमासीत्[3]। एतस्मात्पूर्वं सम्राजा अशोकेन वासिता श्रीनगरी एव काश्मीरराज्यस्य राजधानी आसीत् । वितस्तातटयोः सुशोभमानं नगरमिदमनुपमया प्राकृतिकलक्ष्म्या ललामभूतमस्ति । बिल्हणस्यानेन सह विशिष्टोऽनुरागो दृश्यते । एतस्मादेव कारणाद्बिल्हणकृतं प्रवरपुरवर्णनमतितरां हृदयसम्वेद्यं वर्तते । बिल्हणकालेऽपि नगरमिदं विपुलवैभवास्पदमासीदिति विक्रमाङ्कदेवचरितपद्यैः प्रतीतिपथमवतरति[4] । बिल्हणमनुसृत्य अत्रत्या ललना अपि धाराप्रवाहरूपेण संस्कृतं प्राकृतञ्च वक्तुं प्रभवन्ति स्म[6] । अत्रत्यविद्यावैभवस्य[7] काव्यवैभवस्य[8] च समुचितं वर्णनं काव्येऽस्मिन् वरीवर्ति ।

प्रयागनगरम्—

गङ्गायमुनयोः सङ्गमस्थाने वर्तमानमिलाहाबादनगरमेव प्रयागनाम्ना व्याह्रियते । इदं नगरमतितरां प्राचीनमस्ति । अस्य नाम ऋग्वेदेऽपि समुपल-

---

१. ज्यो० डि०, पृ० १४३, दि एन्शेण्ट ज्योग्रेफी आफ काश्मीर, पृ० १६७ ।
२. दि एन्शेण्ट ज्योग्रेफी आफ इण्डिया (कनिङ्घम) (सं० सुरेन्द्रनाथ मजूमदारशास्त्री), पृ० ११२ ।
३. तदेव, पृ० १११, राजतरङ्गिणी ३।३३६-३६३ ।
४. दि ज्योग्रेफी आफ एन्शेण्ट इण्डिया, पृ० ११० ।
५. विक्र० १८।१-२, १४-१५, १६।२०, २३, २६, २८-३२ ।
६. विक्र० १८।६ ।
७. विक्र० १८।४, ५, ८, २५, ६८, ७६, ७९, ८१, ८२, ८६ ।
८. विक्र० १८।४, ६, ७, १६, ६४, ६५, ७२, ८४, ८५ ।

भ्यते[१] । अत्र ब्रह्मा अयष्ट इति कृत्वैवास्य नाम प्रयागः[२] समभूत्[३] ।

रामायणे महाभारते पुराणेषु चानेकत्र प्रयागस्य माहात्म्यं वर्णितमुपलभ्यते[४] । प्रयागे दानप्रदानस्यापि माहात्म्यं संस्कृतवाङ्मये बहुत्र दृश्यते[५] । महाकविना बिल्हणेनापि अत्र आगत्य प्रयागस्तीर्थनाथोऽस्तीति प्रतिपाद्य विविधं धनं विप्रेभ्यो दत्तमासीत्[६] ।

ईस्वीयवर्षारम्भात् ३०० वर्षाणि पूर्वं सेल्यूकसाधिकारिणा मेगस्थनीजेन, ४१४ ईस्वीयवर्षे फाहियानेन सप्तमशताब्द्याञ्च ह्वेनत्साङ्गेनाप्यत्रागतम् । एषां यात्राविवरणे प्रयागस्य तात्कालिकी स्थितिः प्रतिपादिता वर्तते । १५७५ ईस्वीयवर्षे अकबरनाम्ना सम्राजा प्रयागस्य नाम परिवर्त्य इलाहाबादस्य स्थापना अकारि[७] ।

आदिकालात्प्रयागनगरं हिन्दूनां प्रसिद्धं तीर्थस्थानमस्ति । अद्यत्वेऽप्यत्र तीर्थयात्रिणः महत्या श्रद्धया प्रत्यहं समायान्ति कुम्भादि पर्वसु तु लक्षसंख्यासु श्रद्धोपेता जना अत्र समायान्ति ।

मथुरा—

मथुरानामनगरस्य नामोल्लेखो विक्रमाङ्कदेवचरिते १८।८७ पद्ये समु-

---

१. सितेऽसिते सङ्गमे तत्राप्लुतासो दिवमुत्पतन्ति यो वै तन्वं विसृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते । ऋग्वेदे (खिलसूक्तम्) १०।८५ ।

२. महाभारतम्, वनप० ८५।१६ ।

३. यत्रायजत भूतात्मा पूर्वमेव पितामहः ।
प्रयागमिति व्याख्यातं तस्माद् भारतसत्तम ॥
महाभारते वनप० ८५।१६ ।

४. रामायणेऽयोध्याकाण्डे सर्गः ५४ ।

५. महाभारते वनप० ८५।७६-८१, अध्या० ८४, अनु० प० अध्या० २५ :
तथा सर्वेषु लोकेषु प्रयागं पूजयेद् बुधः ।
पूज्यते तीर्थराजस्तु सत्यमेव युधिष्ठिर ॥ मत्स्यपुराणे १०६।१५, अग्निपुराणे स्वर्गखण्डे अध्या० १११, पद्मपुराणे स्वर्गखण्डे अध्या० ५४ ।

६. विक्र० १८।६१ ।

७. भारतभ्रमण, १८६१ ।

पलभ्यते । महाकविर्बिल्हणोऽप्यत्रागत्य अत्रत्यां पण्डितमण्डलीं शास्त्रार्थे पराजितवान् । मथुरानगरस्य गणना भारतवर्षस्य प्राचीनतमेषु नगरेषु क्रियते । अस्य वर्णनं पाणिनेरष्टाध्याय्यामप्युपलभ्यते[1] ।

अस्य नगरस्य संस्थापको भगवतो रामस्यानुजो लक्ष्मण आसीत् । असौ किल मधुपुत्रं लवणनामकं राक्षसं हत्वा अस्य नगरस्य स्थापनामकार्षीत्[2] । अस्ति च इदमेव नगरं भगवतः कृष्णस्यावतारस्थानम् । अत्रैव भगवता कृष्णेन स्वमातुलः कंसो हतः । भक्तध्रुवोऽपि अत्रैव तपस्तप्तवान्[3] । अस्य नगरस्य मेथोरा, मदूरा, शौरीपुरम्, सौर्यपुरञ्च नामान्युपलभ्यन्ते प्राचीनग्रन्थेषु[4] । कालिन्दीकूले स्थितं नगरमिदं हिन्दूनां प्रसिद्धं तीर्थस्थलं वरीवर्ति । अस्य हि माहात्म्यं संस्कृतवाङ्मयेऽनेकस्थलेषु वर्णितमुपलभ्यते[5] ।

वनवासी—

वरदातुङ्गभद्रानद्योर्मध्ये विद्यमानस्य वनवासमण्डलस्य राजधानी वनवासीनाम नगरमासीत्[6] (द्रष्टव्यं वनवासमण्डले) ।

वृन्दावनम्—

मथुरातः षट्क्रोशार्धं यावदुत्तरदिशि यमुनानद्या दक्षिणतीरे प्रख्याततीर्थं वृन्दावनमिति नाम वर्तते । अत्र हि भगवता कृष्णेन विविधविधाः शैशवक्रीडाः कृता आसन्[7] । महाकविना बिल्हणेनात्रागत्य कतिचिद्वासरा यापिता आसन्नि-

---

१. अष्टाध्यायी, ४।२।८२ ।
२. वाल्मीकिरामायणम्, उत्तरकाण्डे ७३-८३, देवीभागवतम् ४।२०, विष्णुपुराणम्, प्रथमोंशः अध्या० १२, हरिवंशपुराणे विष्णुपर्वणि अध्या० ५६, ५८ ।
३. श्रीमद्भागवतम्, स्कन्धः ४ अध्यायः ८, तपोभूमि, पृ० २७८ ।
४. प्राचीन भारत के नगर तथा नगर जीवन, पृ० ७५ ।
५. वराहपुराणम्, अध्या० १४६-१४८, १५१-१५२, १५४, १५७, १६०, १६२-१६३, १७०-१७१, गरुडपुराणे प्रेतकल्पे अध्या० २७, पद्मपुराणे पातालखण्डे अध्या० ६६, ८३, ६१ ।
६. विक्रमाङ्कदेवचरितभूमिकायां (डा० व्युलहरस्य), पृ० ३४ टिप्पण्याम् ।
७. श्रीमद्भागवते पुराणे विस्तरेण भगवतः कृष्णस्य बालचरित्रं वर्णितमस्ति ।

त्यस्ति तेन विक्रमाङ्कदेवचरितेऽतीव श्रद्धया प्रतिपादितम्[१] । अत्रत्यानि मनोरमाणि देवमन्दिराणि सौन्दर्येऽनन्यतमानि वर्तन्ते । वृन्दावनस्यापि माहात्म्यमनेकत्र पुराणादिषु वर्णितमुपलभ्यते[२] ।

वेङ्गी—

गोदावरीकृष्णानद्योर्मध्ये किस्तनामण्डले एलूरसरसः पञ्चक्रोशार्धं यावदुत्तरदिशि विद्यमानं वेङ्गीतिनाम नगरं पुरा आन्ध्रदेशस्य राजधानी आसीत्[३] । इदानीं नगरमिदं वेङ्गीति व्याह्रियते[४] । बिल्हणेन विक्रमाङ्कदेवचरिते विक्रमादित्यस्य वेङ्ग्यां विजयप्रतिपादनं कृतमस्ति[५] । सप्तमशताब्द्यामपि पुलकेशिनः (द्वितीयस्य) भ्राता विष्णुवर्धनोऽत्र चालुक्यसाम्राज्यस्थापनामकार्षीत्[६] । वेङ्गीनामराजधानीकारणादेव कृष्णागोदावर्य्योर्मध्यवर्ती प्रदेशो वेङ्गीदेशोऽप्युच्यते स्म ।

राजपुरी—

पुञ्छक्षेत्राद्दक्षिणपूर्वदिशि काश्मीरक्षेत्राच्च दक्षिणदिशि जम्बूप्रान्तान्तर्गतं 'राजोरी' नगरमेव पुरा राजपुरीति नाम्ना व्याह्रियते स्म[७] ।

त्रिपुरी—

चेदीत्रिपुर्य्योर्नास्ति भेदः । (द्रष्टव्या चेदी) ।

वाराणसी—

गङ्गानद्या वामतटे वाराणसीति नाम नगरमस्ति । वरुणायास्तथा चास्या मध्ये स्थितं नगरमिदं वाराणसीति संज्ञां भजते[८] । अस्य काशीबनारसनामभ्यामपि व्याहारो भवति । बौद्धजातकेषु वाराणस्याः काशीजनपदस्य राज-

---

१. विक्र० १८।८७ ।

२. पद्मपुराणे पातालखण्डे, अध्या० ६९, ७५, वराहपुराणे अध्या० १४७ ।

३. ज्यो० डि०, पृ० ७, गरुडपुराणे अध्या० ५५ ।

४. स्केच आफ दि डायनैस्टीज आफ सदर्न इण्डिया, पृ० ११ ।

५. तेनानास्पदमात्मीयप्रतापोत्कर्षरागिणा ।
चक्रेऽनङ्गप्रतापस्य वेङ्गिभूपाङ्गनाजनः ॥ विक्र० ४।२९ ।

६. ज्यो० डि०, पृ० २९ ।

७. तदेव, पृ० १६५ ।

८. एन्शेण्ट ज्योग्रेफी (कनिङ्घम), पृ० ४९९ ।

धानीत्वेनोल्लेखो बहुत्रावलोक्यते[1]। नगरमिदं हिन्दूनां प्रसिद्धं तीर्थं वर्तते। अत्र गङ्गास्नानेन महतः पुण्यस्य प्राप्तिर्भवतीति कृत्वैव बिल्हणोऽप्यत्रागत्य गङ्गास्नानं कृत्वाऽऽत्मानं कृतकृत्यमकरोत्[2]। वाराणसीं प्रति गङ्गां प्रति च बिल्हणस्य विशिष्टोऽनुरागो दृश्यते काव्येऽस्मिन्।

आदिकालादेव वाराणसीनगरं विद्याकेन्द्रमासीत्। सत्यप्रतिज्ञेन राज्ञा हरिश्चन्द्रेणात्रैव चाण्डालत्वमङ्गीकृतमभूत्[3]। बौद्धानामपि नगरमिदं प्रसिद्धं केन्द्रमैतिहासिकञ्च स्थानं वर्तते। भगवता बुद्धेनात्रैव सारङ्गनाथस्थाने बुद्धधर्मस्य प्रथमोपदेशः कृत आसीत्[4]। इदानीमप्यत्रोपलब्धास्तत्कालीना भग्नावशेषा अस्य नगरस्यैतिहासिकतां प्रतिपादयन्ति। अत्र हि बहूनि देव-मन्दिराणि वर्तन्ते, येषु काशीविश्वनाथमन्दिरमतितरामैतिहासिकं प्रसिद्धञ्च वर्तते[5]।

इदानीमपि नगरमिदं संस्कृतविद्यायाः प्रधानकेन्द्रमस्ति। अत्र हि काशी-विद्यापीठम्, वाराणसेयसंस्कृतविश्वविद्यालयो हिन्दूविश्वविद्यालयश्चेति त्रयो विश्वविद्यालयाः सन्ति। तथा बह्व्यः पाठशालाः सन्ति यासु वेदशास्त्राण-मध्ययनाध्यापनादिकञ्च भवति। १०१८ ईस्वीये वर्षे गजनीवास्तव्येन महमूदेन, ११९४ ईस्वीयवर्षे मोहम्मदगौरिणा च लुण्ठनादिभिर्नगरमिदं ह्रासतां प्रापि-तम्। अवरङ्गजीवेन (औरङ्गजेबेन १६५८ तः १७०७ ईस्वीयवर्षं यावद् दिल्लीशासकेन) अत्रत्यानि बहूनि मन्दिराणि विनाश्य तेषु मसजिदानां निर्माणमकारि[6]। अस्य नगरस्य माहात्म्यमपि पुराणादिष्वनेकत्र वर्णितमुप-लभ्यते[7]।

---

१. प्राचीन भारत में नगर तथा नगरजीवन, पृ० १२२।

२. विक्र० १८।९२।

३. मार्कण्डेयपुराणम्, अध्या० ७।

४. भारतभ्रमण, पृ० ६६।

५. तदेव १।२२।

६. भारतभ्रमण—१।२२।

७. लिखितस्मृतिः, श्लो० ११, शङ्खस्मृतिः, अध्या० १४, महाभारते वनपर्वणि अध्या० ८४, शिवपुराणे द्वितीयखण्डे अध्या० १७, लिङ्ग-पुराणे पूर्वार्धे अध्या० ९१, मत्स्यपुराणे अध्या० १८३, गरुडपुराणे प्रेतकल्पे अध्या० २७। कूर्मपुराणे ब्राह्मीसंहितायाम् अध्या० ३०-३१, अग्निपुराणे अध्या० ११२, शिवपुराणे प्रथमखण्डे अध्या० २, द्वितीयखण्डे अध्या० १७।

नद्यः

कालिन्दी—

हिमालयान्तर्वर्तिनि बन्दरपुच्छेतिनामपर्वमालायां कलिन्ददेशः कलिन्दपर्वतश्च स्तः। इदमेव कालिन्दीनद्या उद्गमस्थानम्। एतस्मात्स्थानात्काश्चन लघ्व्यो धारा विनिस्सृत्य यमुनोत्रीस्थाने एकत्रीभूय कालिन्दीसंज्ञां यमुनासंज्ञां वा लभन्ते। यमुनोत्रीस्थानं गङ्गोत्रीस्थानादविदूर एवास्ते। कलिन्ददेशादथवा तन्नामकपर्वतादुद्गतेत्यर्थमेव यमुनायाः कालिन्दीति नाम समभूत्। रामायणमनुसृत्य कलिन्दपर्वतो यमुनापर्वत उच्यते स्म[1]।

हिमालयाद्विनिस्सृत्येयं नदी देहरादूनक्षेत्रे समायाति। किञ्चिद् दक्षिणभागे तदनन्तरं पूर्वभागे वहन्ती प्रयागस्थाने गङ्गया सह सङ्गच्छते। सङ्गमस्थानं महत्पवित्रं हिन्दुतीर्थस्थानमनयोः सङ्गमकारणादेव समजायत। अस्यास्तटे मथुराऽऽगरादिल्लीनगराणि विद्यमानानि सन्ति। चर्मण्वतीबेतवादिनद्योऽस्याः सहायिका नद्यः सन्ति।

कृष्णा अथवा कृष्णावेणी—

विक्रमाङ्कदेवचरिते १४।१३-५१-७१ पद्येषु कृष्णा अथवा कृष्णावेणीति नाम समुपलभ्यते। सतारामण्डलान्तर्गतमहाबलेश्वरपर्वतमालायामस्या निर्गमनस्थानमस्ति, यत्र च महाबलेश्वरमहादेवस्य मन्दिरमपि वर्तते। सतारानाम नगरमपि अस्यास्तटान्नातिदूरे वर्तते। अत्रान्तरे वेणी नदी कृष्णायां पतति। द्वयोः सयुङ्क्तप्रवाहस्यैव कृष्णावेणीति नाम सञ्जायते। महाराष्ट्रे मद्रासे (इदानीं तमिलनाडु) आन्ध्रप्रदेशे च वहन्ती 'विजयवाडा' इति स्थानसविधे मच्छलीबन्दरेति स्थाने वङ्गकच्छे निपतति। अस्यास्तटे महाबलेश्वर, विजयवाडा, मच्छलीबन्दरप्रभृतीनि नगराणि सन्ति। मलप्रभा, गतप्रभा, भीमा, तुङ्गभद्रा, वारणा, पञ्चगङ्गा, दुग्धगङ्गा (दूधगङ्गा) प्रभृतयो नद्यः कृष्णायाः सहायिकाः सन्ति। कृष्णासहायिकाया मलप्रभेति नाम्न्यः नद्या एव तटे प्राचीनचालुक्यानां वातापीति नाम्नी राजधानी आसीत्[2]। भारतस्यान्यनद्य इवेयमपि पवित्रा नद्यस्ति। अस्यास्तटे हिन्दूनां प्रसिद्धानि मन्दिराणि बौद्धानां ध्यानावासा जैनानां गुहाश्च सन्ति। कृष्णकर्णामृतलेखको विल्वमङ्गलोऽपि अस्यास्तट एव न्यवसत्[3]।

---

१. रामायणे कि० का०, श्लो० ४३।

२. हमारे भारत की नदियां, पृ० ७६।

३. ज्यो० डि०, पृ० १०४।

चन्द्रभागा—

विक्रमाङ्कदेवचरिते १८।६१ पद्ये चन्द्रभागेति नद्यर्थकं नाम समुपलभ्यते। अस्या उद्गमस्थानं लौहित्यं सरोऽस्ति[१]। इदं सरः लद्दाखप्रदेशस्य दक्षिणे भागे लाहुलेति नाम्नि स्थाने वर्तते[२]। एतस्मात्स्थानाच्चन्द्रा भागा च द्वे नद्यौ निर्गच्छतः, तयोः सयुङ्क्तप्रवाहस्यैव चन्द्रभागेति नामास्ति। इदानीमियं चिनाबेति नाम्ना व्याह्रियते। इयं जम्बूप्रदेशस्य पर्वतीयक्षेत्रेभ्यो निर्गत्य पाकिस्ताने वहन्ती झङ्गेति नगरस्याधस्ताद्वितस्तायां पतति। जम्बूप्रदेशस्य तौषी (तवी) नदी अस्याः सहायिका अस्ति। रियासी-विराटनगर-(अखनूर) गुजरात-मुलतानेत्यादीनि नगराणि अस्यास्तटे स्थितानि सन्ति।

चर्मण्वती—

विक्रमाङ्कदेवचरिते ६।१०३ पद्ये चर्मण्वतीति नद्यर्थकं नाम समुपलभ्यते। इयं नदी विन्ध्यपर्वतस्यात्युन्नतजनपवेति नाम पर्वतमालाया निस्सरति[३]। उक्तपर्वतमालातः चम्बलचम्बेलगम्भीरेति नाम्नीनां पृथक्पृथङ् निस्सृतानां तिसृणां जलधाराणां संयुक्तप्रवाह एव चर्मण्वती (चम्बल) नाम्ना व्याह्रियते। अस्या उत्पत्तिविषये श्रूयते यद्राजा रन्तिदेवो यज्ञे बहूनां गवां दानेन चर्मण्वतीं भुवि आनीतवानिति[४]। इयं हि उत्तरदिशि तदनन्तरं पूर्वोत्तरदिशि वहन्ती इटावासविधे यमुनायां पतति। अस्यास्तटे ऋणतम्बूर-(रणथम्भौर) कोटा-धवलपुरनामानि नगराणि सन्ति।

ताम्रपर्णी—

अस्या नद्या नामोल्लेखो विक्रमाङ्कदेवचरिते १२।२७ पद्ये वर्तते। इयं नदी अगस्त्यकूटपर्वतान्निःसरति[५]। ऋषिरगस्त्योऽस्मिन् पर्वते न्यवसदिति कथ्यते। अस्या नद्या नाम ताम्रवर्णाप्यासीत्[६]। इयं हि मत्स्यमृगयाकृते प्रथितास्ति।

तुङ्गभद्रा—

विक्रमाङ्कदेवचरिते ४।५६, ६२, ६३ पद्येषु तुङ्गभद्रेति नाम समुपल-

---

१. कालिकापुराणे, अध्याये ८२ तमे।
२. हमारे भारत की नदियां, पृ० ५१।
३. ज्यो० डि०, पृ० ४८।
४. हमारे भारत की नदियां, पृ० २६, महाभा० द्रोणप० अध्या० ६७।
५. आर्केलाजिकल सर्वे आफ सदर्न इण्डिया (स्वेल), ख० १, पृ० ३०३।
६. ब्रह्माण्डपुराणम्, अध्या० ४६।

भ्यते । मैसूरराज्ये वावावुदानेत्याख्यस्थानस्य सविधे गङ्गमूलस्थानात्तुङ्गा भद्रा चेति नाम्न्यौ जलधारे निस्सरतः । 'कुद्रीमुखम्' (कूडली) स्थानस्य सविधे तयोः परस्परं संयोगेन तुङ्गभद्रेति नाम सञ्जायते । इयं कृष्णानद्याः सहायिका नद्यस्ति । एवञ्च कुर्नूलनगरस्य समीपे तुङ्गभद्राकृष्णयोः सङ्गमः सञ्जायते । कुमुदवती-हरिद्रा-वरदादि-नद्योऽस्याः सहायिकाः सन्ति । भारते स्वतन्त्रे सञ्जाते अस्यास्तटे विशालस्य तुङ्गभद्राबन्धस्य निर्माणं समभूत् ।

जह्नुकन्या—

विक्रमाङ्कदेवचरितस्य १८।३४ पद्ये जह्नुकन्येति नाम समुपलभ्यते । जह्नुकन्येति गङ्गानद्या नामान्तरमस्ति । परं गढवालदेशस्य दक्षिणे भागे जह्नुपर्वताज्जाह्नवीति नाम्नी एका जलधारा निस्सृतास्ति, गोमुखस्थानसविधे गोमुखसदृशहिमाच्छन्नपर्वतकन्दरातोऽन्यैका धारा भागीरथीति नाम्नी निस्सरति । भागीरथी जाह्नवी च गङ्गोत्तरीस्थानस्याधस्तात् परस्परं मिलतः[1] । पौराणिककथामनुसृत्य जह्नुनामा ऋषिः पञ्चसु स्थानेषु गङ्गाप्रवाहे परिवर्तनञ्चकार[2] ।

इयं नदी उत्तरप्रदेशे पश्चिमोत्तरबिहारप्रदेशे बङ्गप्रदेशे च वहन्ती सार्धपञ्चसहस्रक्रोशार्धं यावन्मार्गं विलङ्घ्य बङ्गकच्छे (बङ्गाल की खाड़ी) निपतति । अस्यास्तटयोः हरिद्वार-कान्यकुब्ज-कानपुर-प्रयाग-वाराणसी-पाटलिपुत्र-प्रभृतीनि बहूनि नगराणि वर्तन्ते । रामगङ्गा-यमुना-गोमती-सरयू-गण्डकी-कोशी नाम्न्योऽस्याः सहायिका नद्यः सन्ति ।

पयोष्णी—

मध्यभारते 'पेन' अथवा पेनगङ्गेति नाम्ना व्याह्रियमाणा पयोष्णी नदी वर्धानद्याः सहायिका नद्यस्ति । अस्या वर्णनं भागवतपुराणे पद्मपुराणेऽपि समुपलभ्यते[3] ।

वितस्ता—

अस्मिन् काव्ये १८।१, १०, ४६ पद्येषु वितस्तानद्या नाम बिल्हणेन प्रयुक्तमस्ति । इयं नदी श्रीनगरादुत्तरपूर्वदिशि पीरपाञ्चालपर्वतमालाया वेरीनागस्थाने तन्नाम्न एव स्रोतसो निर्गच्छति । इयं पश्चिमदिशं प्रति पश्चिम-

---

१. हिमालय मौन्टेन्स् (फ्रेजर), पृ० ४२७ ।

२. ज्यो० डि०, पृ० ६१ ।

३. भागवतपुराणे ५।१६।१७, पद्मपुराणे उत्तरखण्डे अध्याये ४१ तमे ।

दक्षिणदिशं प्रति च वहति । अस्या उद्गमस्थानं महद्रम्यमस्ति । अत्र शाहजहां-कालीने लेखे 'यदि क्वचित्पृथिव्यां स्वर्गोऽस्ति तर्हि अत्रैव अत्रैव' इत्यादिकं लिखितमस्ति ।

सिन्धुनद्याः सहायिकासु नदीषु पश्चिमतमा शाखा इयमेवास्ति। वितस्ताया द्वयोस्तटयोः काश्मीरदेशस्य राजधानी स्थिता शोभते । श्रीनगरान्निर्गत्येयं वुल्लरनाम्नि सरसि पतति । ततश्च निर्गत्य वराहमूलं (वारामूला) प्रति वहति । ततश्च भारतस्य (काश्मीरस्य) पाकाधिकृतक्षेत्रे वहन्ती सिन्धुनद्या सह सङ्गममधिगच्छति । अद्यत्वे इयं झेलमनाम्नापि व्याह्रियते । ऋग्वेदे निरुक्ते काशिकावृत्तौ च अस्या वितस्तेति नाम समुपलभ्यते[1]। अस्या अन्यान्यपि नामानि सन्ति[2] ।

मधुमती—

विक्रमाङ्कदेवचरिते १८।५ पद्ये मधुमतीति नद्यर्थकं नाम समुपलभ्यते । इदानीमियं 'मोहवार' अथवा 'मोधवार' इति नाम्ना व्याह्रियते । इयं रानोदेतिस्थानसविधे निर्गच्छति । तथा च मालवेत्याख्यप्रदेशे सिन्धुनद्यां पतति[3] ।

सरयूनदी—

विक्रमाङ्कदेवचरिते ६।४१ तमे पद्ये सरयूनद्या बिल्हणेन निर्देशोऽकारि । इयं खलु हिमालयपर्वतस्य 'कुमायूं' इतिनामपर्वतमालातो निस्सरति। इयं घाघरा-देवेति नामभ्यामपि व्याह्रियते । प्रसिद्धा नगरी अयोध्या अस्या एव तटे वर्तते । इयं 'छपरा' इति स्थानात्सप्तक्रोशार्धं यावद्दूरं गङ्गायां पतति । महाभारतेऽस्या मानसेन सरसा सह सम्बन्धस्योल्लेखोप्यवलोक्यते[4] ।

सरांसि

मानसम्—

मानसं नाम अतिपवित्रं महत्सरस्तिब्बतदेशस्य पश्चिमे भागे उत्तरतो हिमाच्छादितकैलाशशिखरस्य दक्षिणतश्च गुर्लामान्धातेति शिखरस्य मध्ये वरीवर्ति । मूरक्राफ्टमनुसृत्येदं सरः पूर्वदिशातः पश्चिमदिशां प्रति १५ क्रोशार्धं

---

१. ऋग्वेदे १०।७५।५, निरुक्ते ९.३२६, काशिकावृत्तौ १।४।३१ ।

२. It is Hydaspes of Greeks, Vitamsa of Buddhists and Hydaps of Ptolemy—History of Geography of Ancient India, B. C. Law, p. 135.

३. आर्केलोजिकल सर्वे आफ इण्डिया, रिपोर्ट, ११।३०८ ।

४. महाभारते अनुशासनपर्वणि अध्याये १५५ तमे ।

यावल्लम्बम्, उत्तरतः दक्षिणदिशं प्रति ११ क्रोशार्धं यावदायतञ्च वर्तते[१]। अस्य गम्भीरताऽष्टषष्ट्युत्तरशतद्वयपाद-(फीट) दघ्ना। अस्य परिक्रमा पञ्च दिनेषु कर्तुं शक्यते। परिक्रमायां गुम्बेति नामान्यष्टविश्रमस्थानानि सन्ति[२]। इदं सरः विश्वस्य समस्तसरःसु सुन्दरतमं प्रसिद्धतमं पवित्रतमं प्राचीनतमञ्चास्ति[३]। तिब्बतभाषायामस्य 'त्सोमाफाम' अथवा 'त्सोमावाङ्ग' इति नामान्तरं विद्यते।

श्रीस्वामीप्रणवानन्दमहोदयः मानससौन्दर्यप्रभावितः सन्निति समचकथत्, 'यत्कोऽपि स्वर्गीयः कविरेव स्वीयाद्भुतेन ऐन्द्रजालिकेन कौशलेन तत्रत्यं सूर्योदयं सूर्यास्तञ्च वर्णयितुं प्रभवति[४]। जैनसाहित्येऽस्य सरसः पद्मह्रद इति नाम अपि समुपलभ्यते[५]। मानसे स्नानेनेन्द्रासनं प्राप्यते,[६] उत्तरमानसयात्रया नरः पापात्प्रमुच्यते,[७] इत्यादिकं माहात्म्यं संस्कृतसाहित्येऽनेकस्थलेषु समीक्ष्यते[८]।

अच्छोदं सरः—

विक्रमाङ्कदेवचरितस्य १८।५३ तमे पद्ये अच्छोदसरसो वर्णनं समुपलभ्यते। अस्य सरसो वर्णनं कादम्बर्यां बाणभट्टेनाप्यस्ति कृतमित्यपि तत्रैव विल्हणस्य सङ्केतः। इदं सरः काश्मीरप्रान्तस्य मार्तण्डक्षेत्रात्षट्क्रोशार्धं

---

१. एशियाटिक रिसर्चेज, खण्ड १२, पृ० ३३५।

२. J. A. S. B.—1838, p. 316.

३. Mansarover is the holiest, the most fascinating, the most inspiring, the most famous of all the lakes in the world, the most ancient that the civilization knows.

—History of Kailash & Mansarover, p. 7.

४. It is only the inspired poet or the divine artist with his magic colours that can, for instance, describe and represent adequately the beauty and grandeur of sunrise and sunset on the lake.—M. K. M., p. 7.

५. हिस्ट्री आफ कैलास मानसरोवर, पृ० १०।

६. कू० पु० उपरिभागे अध्या० ३६।

७. म० भा० अनु० पर्वणि अध्या० २५।

८. रामायणे बा० का० अ० २४, वा० पु० अ० ४७, मत्स्य० पु० अध्या० १२१।

यावद्दूरेऽस्ति। इदं सरः अद्यत्वे 'अच्छावल' इति नाम्ना व्याह्रियते। अस्य तटे सिद्धाश्रमः कश्चिदासीदिति बृहन्नारदीयपुराणादवगम्यते[1]। अच्छावल-ग्रामोऽपि अत्र वर्तते[2]।

पर्वताः

काञ्चनभूधरः—

श्रीकृष्णशास्त्रिणमनुसृत्यायं पर्वतः मैसूरराज्यान्तर्गतस्य सिद्धपुरस्य पश्चिम-भागे 'मास्की' इति नाम्ना इदानीं व्याह्रियते। अस्मिन् स्थाने श्रीकृष्णशास्त्री-महोदयोऽशोककालीनशिलालिखितां राजविज्ञप्तिमासादितवान् यया एतत्प्रतीयते यदशोकाधिकृतशासकचतुष्टयेन अध्युषितचरेषु चतुर्षु स्थानेष्वेकतमं काञ्चन-भूधरस्थानमपि (सुवर्णाद्रिस्थानम्) आसीत्। डा० व्युह्लरमहोदयोऽस्य पर्वतस्य स्थितिं क्वचित्पश्चिमसमुद्रतटे प्रत्यपादयत्[3]।

कैलासः—

विक्रमाङ्कदेवचरिते १८।३६ पद्ये कैलासपर्वतस्य नामोल्लेखः समुपलभ्यते। न केवलं विक्रमाङ्कदेवचरिते एव अपितु संस्कृतवाङ्मयेऽन्यत्रापि बहुषु स्थलेषु अस्य पवित्रपर्वतस्य नामोल्लेखो दृश्यते[4]।

अयं पर्वत उत्तरप्रदेशस्य अल्मोडास्थानात् २४० क्रोशार्धं यावद्दूरे तथा च ल्हासेतिनामतिब्बतराजधानीतः ८०० क्रोशार्धदूरे स्थितोऽस्ति[5]। कैलास-शिखरस्योच्चता समुद्रतलात् २२०२८ पादौ (फीट) अस्ति, अस्य परिक्रमा ३२ क्रोशार्धा च वर्तते[6]। कैलासपर्वतो हिमालयपर्वतमालायाः सुन्दरतमं

---

१. बृहन्नार० पु० अध्या० १।
२. एन्शेण्ट ज्योग्रेफी आफ काश्मीर, पृ० १८०।
३. ज्यो० डि०, पृ० १९८।
४. महाभारते वनपर्वणि अध्या० १४४, ब्रह्माण्डपुराणे अध्या० ५१, विक्रमोर्वशीये अङ्कः ४, श्रीकण्ठचरिते—

शशिशुभ्रः कीर्णभासो हासो धनपतेर्दिशः।
गिरिरस्तीह कैलासो निवासो वृषलक्ष्मणः॥

५. कैलासमानसरोवर, पृ० ६।
६. तदेव, पृ० ७।

स्थानमस्ति[1] । अयं पर्वतः पार्वतीशिवयोः निवासस्थानमुच्यते,[2] विक्रमाङ्कदेवचरितेऽपि एतद्विषयकः सङ्केतः समुपलभ्यते[3] । अत्र मानसराक्षसतलगौरीकुण्डादीनि सरांसि अपि सन्ति, येभ्यः सिन्धुशतद्रुब्रह्मपुत्रादयो नद्यः निस्सरन्ति । अत्रत्यपर्वतगुहासु सीतारामादिहिन्दुदेवमूर्तयोऽपि सन्ति, परं तासु इदानीं बौद्धभिक्षुकानामधिकार आस्ते[4] ।

क्रौञ्चपर्वतः—

अयं पर्वतः तमिलनाडु—(मद्रास) प्रान्ते कृष्णामण्डलान्तर्गतमल्लिकार्जुनस्थानाद्द्वादशक्रोशदूरेऽस्ति। इदानीमयं पर्वतः कुमारस्वामीति नाम्ना व्याह्रियते। अत्र हि पर्वते कार्तिकेयस्वामिनो मन्दिरमस्ति । हरिवंशपुराणेऽस्य वर्णनमित्थं समुपलभ्यते—

मैनाकस्य सुतः श्रीमान् क्रौञ्चो नाम महागिरिः ।
पर्वतप्रवरः शुभ्रो नानारत्नसमन्वितः[6] ॥

अस्मिन्नेव क्रौञ्चपर्वते क्रौञ्चो नाम राक्षसः (मयदानवपुत्रः) क्रौञ्चारिणा (कार्तिकेयेन) हत इति कृत्वैव अस्य पर्वतस्य नाम क्रौञ्च इति सञ्जातम् । तद्यथा मृगेन्द्रसंहितायाम्—

क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हेमकन्दरे ।
स्कन्देन युद्ध्वा सुचिरं चित्रमायी सुमायिना ॥

---

१. 'Kailasa far surpasses in glory any other peak of the Indian Himalaya that I have ever seen. It is full of majesty, a king mountain.' H. Strachery in J. A. S. B. 1848, p. 158. The perpetual snow-clad peak of the holy Kailasa of hoary antiquity and celebrity, the spotless design of nature's art, of most bewitching and over-powering height, has vibration of the Supreme order from the spiritual point of view.—Kailas Mansarover, p. 6.

२. कैलासमानसरोवर, पृ० ७ ।

३. विक्र० १८।३६ ।

४. हिमालयदर्शन, पृ० ६७ ।

५. तपोभूमि, पृ० २६८ ।

६. हरिवंशपुराणम्, १६।१३ ।

स शैलस्तस्य दैत्यस्य ख्यातचित्रेण कर्मणा ।
केतुतामगमत्तस्य नाम्ना क्रौञ्चः स उच्यते ।।

कालिञ्जरभूधरः—

विक्रमाङ्कदेवचरिते ६।१०६ पद्ये कालिञ्जरपर्वतस्य नाम समुपलभ्यते । कालिञ्जरपर्वतोऽतिप्रसिद्धोऽस्ति, अस्य नाम संस्कृतवाङ्मयेऽन्यत्रापि बहुषु स्थलेषु प्रसिद्धतीर्थरूपेण वर्णितमुपलभ्यते । महाभारतमनुसृत्य मेधाविकतीर्थसविधे कालिञ्जरनामकः पर्वतोऽस्ति, यत्र देवह्रदतीर्थे स्नानेन सहस्रगोदानफलं प्राप्यते[1]। लिङ्गपुराणमनुसृत्य २३ तमे द्वापरयुगे यत्र पर्वते शिवोऽवतीर्य कालं धक्ष्यति स एव पर्वतः कालिञ्जरपर्वतो भविष्यति[2] ।

कूर्मपुराणमनुसृत्य जगति कालिञ्जरनामकमेकं तीर्थस्थानमस्ति यत्र भगवता महेश्वरेण कोपाग्निदग्धः कालः पुनर्जीवितः । शिवपुराणमनुसृत्य चित्रकूटाद्-दक्षिणतः लोकत्रये प्रसिद्धः कालिञ्जरपर्वतोऽस्ति यत्र बहुभिस्तपस्तप्त्वा सिद्धि-रधिगता[3] ।

बुन्देलखण्डस्य बान्दामण्डले स्थितेऽस्मिन्पर्वते कालिञ्जरदुर्गे नीलकण्ठमहा-देवस्य स्थानमस्ति, तीर्थस्थानञ्च कोटितीर्थनाम्ना प्रसिद्धम्[4] । इदानीमस्य मूले कालिञ्जरनामोपनगरं वर्तते[5] ।

प्रद्युम्नक्षितिधरः—

विक्रमाङ्कदेवचरिते १८।१५ पद्ये प्रद्युम्नक्षितिधर इति नाम समुपलभ्यते । अयं पर्वतः सम्प्रति हरि-(हारी) पर्वतनाम्ना व्याह्रियते । अयं पर्वतः श्रीनगरा-त्क्रोशार्धत्रयं यावद्दूरे अस्ति । अत्र हि सारिकाभगवत्या मन्दिरमपि वर्तते, अत एवायं पर्वतः सारिका-पर्वतनाम्नापि व्याह्रियते[6] ।

प्रालेयाद्रिः—

प्रालेयाद्रिरिति नाम्ना कवेः हिमालयं प्रति सङ्केतः । हिमालयस्य न केवलं विक्रमाङ्कदेवचरिते एव प्रत्युतान्यत्रापि संस्कृतवाङ्मये ससम्मानं वर्णनमनेक-स्थलेषूपलभ्यते ।[7]

---

१. महाभारते वनपर्व, अध्या० ८५ ।
२. लिङ्गपुराणे पूर्वार्द्धे अध्या० २४ ।
३. कूर्मपुराणे (ब्राह्मीसंहितोत्तरार्धे) अध्या० ३५ ।
४. शिवपुराणे खण्ड ८ अध्या० २ ।
५. ज० ए० सो० ब० १७, पृ० १७१ ।
६. ज्यो० डि०, पृ० १८२ ।
७. मार्कण्डेयपुराणम्, अध्या० ५४-५५ ।

मलयगिरिः—

अयं गिरिः पश्चिमतटानां दक्षिणे भागे वर्तते[1]। कावेरीनद्या दक्षिणभागे ट्रावनकोर-प्रत्यन्तपर्वत उच्यते। अयमेव अगस्त्यकूटनाम्नापि व्याह्रियते। अत्र हि अगस्त्यस्य निवासोऽपि स्वीक्रियते[2]। अस्मादेव पर्वतात् ताम्रपर्णी नद्यपि निस्सरति[3]।

---

१. ज्यो० डि०, पृ० १२२।

२. इण्डियन एण्टिक्वेरी, १३।३६१।

३. तपोभूमि, पृ० १८८।

६

आदानम् (काव्यान्तरप्रभावः)

कैश्चिदालोचकैः बिल्हणोऽनुकरणशीलः कविरासीदिति महता क्षोभेण प्रतिपादितम् । अत्रेदं विचारणीयं यत्किं समस्तमेव महाकाव्यमनुकरणाधृतम् ? किम्महाकाव्येऽस्मिन् नूतनानां काव्यसौष्ठवानामाविष्कारा न सन्ति ? तत्रेदमुत्तरमस्ति यत्केषुचित्स्थलेष्वेवान्यकवीनां प्रभावो वर्तते न तु सर्वत्र । महाकाव्ये च बिल्हणानुस्यूतानां नूतनकाव्यसौष्ठवानां नास्ति न्यूनता अपि तु वर्तते बाहुल्यम् । अत्रापीदं विचारणीयं यत्किं काव्येऽस्मिन्ननुकृतोंऽश एवाधिकं सौष्ठवमावहति नेतरः ? मन्मत्या तु यस्मिन्नंशे अन्यकवीनां प्रभावः समवलोक्यते स तु रम्यः, यस्मिश्चांशे केवलं बिल्हणप्रतिभाप्रभाव एवास्ति स च रम्यतरः । एवञ्चात्रेदमपि विचारणीयं यन्नास्त्येतादृशः कोऽपि कविः यस्य काव्येषु प्राक्तनकवीनां प्रभावः न दृष्टिगोचरीभवेत् । परं ते सर्वेऽपि अनुकरणशीला आसन्निति नैव वक्तुं शक्यते । किम्बहुना कविकुलगुरोः कालिदासस्य रचनास्वपि आदिकवेर्वाल्मीकेरत्यधिकः प्रभावः समीक्ष्यते । इदमत्रोदाहरणम्—

कच्चित्क्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनोद्देशे मया विरहिता त्वया[1] ॥

उक्तरामायणपद्ये केवलं कच्चिदिति स्थाने 'सर्व' इति प्रयुज्य सम्पूर्णमपि पद्यं याथातथ्येन प्रयुक्तमस्ति । तद्यथा—

सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनोद्देशे मया विरहिता त्वया ॥[2]

उक्तपद्ययोः सत्यपि अत्यधिकसाम्ये न कोऽप्यालोचकः कालिदासोऽनुकरणशील इति कथयितुं समर्थोऽभूत् ।

लोकेऽपि प्रायो दृश्यत एव यत्प्राणिनः पितृभ्यां जन्मासाद्य स्वकीयस्वतन्त्रास्तित्वस्वामिनो भवन्ति । यद्यपि पुत्रस्य शिरासु पितृणां रक्तं वहति तथापि तस्य पृथगस्तित्वं स्वीक्रियते । एवमेव शिक्षायाः प्राप्त्यै काव्यरसस्य स्वादाय अथवा

---

१. वालमीकिरामायणम्, अरण्य० ६४।२९-३० ।
२. विक्रमोर्वशीयम्, ४।२७ ।

काव्यरचनानामभ्यासाय काव्यकर्मणि प्रेरणार्थं वा कवयः प्राक्तनकवीनां काव्यानामध्ययनं कुर्वन्ति, तदध्ययनस्य सूक्ष्मः संस्कारविशेषः तेषां स्मृतिपटले स्थायितामेति । स एव संस्कारविशेषः तेषां रचनासु यत्र कुत्रचित्परिस्फुटितो भवति । काव्यकारणत्रितयेऽपि व्युत्पत्तेर्विशिष्टं स्थानं वरीवर्ति । व्युत्पत्तिं विना कोऽपि कविः काव्यरचनायां प्रागल्भ्यमधिगन्तुं नैव समर्थो भवितुमर्हति । यतो हि व्युत्पत्तिरेव काव्यकर्मणि कारणम्[1], कारणाभावे च कार्योत्पत्तिरसम्भवा । व्युत्पत्तिप्रागल्भ्यायैव कवीनां कृते प्राक्तनकाव्यानामध्ययनमावश्यकमस्ति । अध्ययनेन ये संस्कारास्तेषां धिषणासु स्थितिं लभन्ते ते संस्कारा एव तेषां पैतृकसम्पत्तयः सन्ति । अत एषां संस्काराणां प्रभावः प्रायः नवीनकवीनां रचनासु केषुचित्स्थलेषु अवतरत्येव । कस्यचित्कवेः नूतनायां रचनायां प्राक्तनकवीनां प्रभावे साम्ये च सत्यपि यद्यसौ स्वप्रतिभया विशिष्टां रसनिष्पत्तिं कर्तुं सफलीभवति तर्हि तदीया रचना नूतनैव मन्तव्या नानुकृतिः । उक्तञ्चानन्दवर्धनाचार्येण—

पूर्वदृष्टा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः[2] ॥

अस्मिन्विषये विचारयता डा० चण्डिकाप्रसादशुक्लेनाप्युक्तम्—

स्वकाव्ये कस्यचित्प्राक्तनकवेर्विषयशैलीस्वीकारात् कश्चिदपि कविरुत्कृष्टकवीनां गणनायां न गण्यत इति न । काव्योत्तमतां परीक्ष्यमाणैरस्माभिस्तस्य मार्मिकपक्षाय प्राथम्यं प्रदेयम् । यदि कवेर्भावुकहृदयेन वस्तुविशेषस्य मार्मिकपक्षमादाय स्वीयकाव्ये तस्य सौम्याभिव्यक्तिः कृता स्यात्तर्हि तदीयं काव्यं नितान्तमभिनवमुच्चकोटिकञ्च भवितुमर्हति[3] । अस्मिन्नेव विषये दण्डिनापि प्रतिपादितम्—

सम्वादास्तु भवन्त्येव बाहुल्येन सुमेधसाम्[4] ।

प्रतिभाशालिनः कविद्वयस्य रचनासु साम्यन्तु भवितुमर्हत्येव, परं तत्र आलेख्यप्रख्यसमानता प्रतिबिम्बकल्पसमानता च हेया, न तु तुल्यदेहितुल्यसमानता । वस्तुतः साम्यमिदं काव्येषु उपजीव्योपजीवकभावेन तिष्ठति । आचार्येण दण्डिना साम्यमिदमाहरणमिति पदेनोक्तम् । परं डा० चण्डिकाप्रसादशुक्लेनाऽऽहरणस्य स्थाने प्रयुक्तमादानमिति पदं वस्तुतः रम्यतरं वरीवर्ति । स्वयं महाकविर्बिल्हणः पूर्वन्तु

१. रुद्रटस्य काव्यालङ्कारः १।१४ ।
२. ध्वन्यालोकः ।
३. नैषधपरिशीलन, पृ० १०६ ।
४. काव्यमीमांसा, म० सू० वि०, पृ० १९६

काव्यार्थचौरेभ्यः कवीन् सावधानान् करोति परं, पश्चान्न तत्र कवीश्वराणां कापि क्षतिरिति स्वीकरोति—

साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः ।
यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति[1] ॥

एवञ्च—

गृह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः कापि कवीश्वराणाम् ।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः[2] ॥

विक्रमाङ्कदेवचरितस्य समीक्षणेन स्पष्टीभवति यन्महाकविर्बिल्हणो यत्र कुत्रापि प्राक्तनकवीनां काव्यार्थमगृह्णात्तत्रैव स्वाद्भुतकाव्यप्रतिभाप्रभावेण नूतनतया रम्यतया च विभूष्य तमर्थमात्मसादकरोद्, अतो नासौ दोषभाक् । इदानीमध्यायेऽस्मिन् केषु स्थलेषु प्राक्तनकवीनां प्रभावोऽस्ति काव्येऽस्मिन्निति विषये विचार्य्यते ।

रघुवंशप्रभावः—

रघुवंशस्य सर्वाधिकः प्रभावः विक्रमाङ्कदेवचरिते परिलक्ष्यते । उभयोरेव महाकाव्ययोरुपक्रमे वर्ण्यस्य राजवंशस्य गुरुत्वमात्मनो बुद्धेश्च लघुत्वं महत्साम्यमावहति—

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनाऽस्मि सागरम्[3] ॥
गिरां प्रवृत्तिर्मम नीरसापि मान्या भवित्री नृपतेश्चरित्रैः ।
के वा न शुष्कां मृदमभ्रसिन्धुसम्बन्धिनीं मूर्धनि धारयन्ति[4] ॥

उक्तयोः पद्ययोर्भावसाम्यं सुस्पष्टं परिलक्ष्यते ।

यथा रघुवंशे कालिदासः स्वप्रबन्धस्य परीक्षार्थं सतः प्रार्थयते तथैव बिल्हणोऽपि स्वप्रबन्धं विदुषां बुद्धिशाणफलके कषणार्थं प्रस्तौति । तद्यथा रघुवंशे—

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा[5] ॥

---

१. विक्र०, १।११ ।
२. विक्र० १।१२ ।
३. रघु० १।२ ।
४. विक्र० १।२८ ।
५. रघु० १।१० ।

तद्यथा विक्रमाङ्कदेवचरिते—

उल्लेख-लीला-घटनापटूनां सचेतसां वैकटिकोपमानाम् ।
विचारशाणोपलपट्टिकासु मत्सूक्तिरत्नान्यतिथीभवन्तु[1] ॥

रघुवंशे रघुः स्व-सुप्रबन्धेन पूर्वजान् विस्मारयामास । विक्रमाङ्कदेवचरिते च नृपतिराहवमल्लो गुणाधिकतया पूर्वजानजयत् । अत्रापि सुस्पष्टं साम्यं दृष्टि-गोचरीभवति उभयत्र । तद्यथा रघुवंशे—

मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः[2] ॥

तद्यथा विक्रमाङ्कदेवचरिते—

अन्यायमेकं कृतवान् कृती यश्चालुक्यगोत्रोद्भववत्सलोऽपि ।
यत्पूर्वभूपालगुणान्प्रजानां विस्मारयामास निजैश्चरित्रैः[3] ॥

रघुवंशे सुदक्षिणाया गर्भस्थितिवर्णनं तथा च विक्रमाङ्कदेवचरिते नृपते-राहवमल्लस्य महिष्याश्च गर्भावस्थावर्णनमपि केषुचिदंशेषु तुल्यतामावहतः । गर्भस्थितौ स्त्रीणां मुखवर्णः पाण्डुः जायते । द्वयोरपि महाकाव्ययोर्गर्भवत्योः पाण्डुमुखवर्णनमपि किञ्चित्साम्यमाकलयति[4] । कालिदासवर्णितस्य सगर्भायाः सुदक्षिणायाः श्यामलचूचुकद्वयस्य वर्णनप्रभावो विक्रमाङ्कदेवचरिते सगर्भाया विक्रममहिष्याः श्यामलचूचुकवर्णने दृश्यत एव, इदमत्रोदाहरणम्—

दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयम् ।
तिरश्चकार भ्रमराभिलीनयोः सुजातयोः पङ्कजकोशयोः श्रियम्[5] ॥

---

१. विक्र० १।१६ ।

२. रघु० ४।६ ।

३. विक्र० १।१०१ ।

४. शरीरसादादसमग्रभूषणा मुखेन साऽलक्ष्यत लोध्रपाण्डुना ।
तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी ॥
—रघु० ३।२ ।

स्थितस्य गर्भे प्रभयेव कस्यचिद् विलिप्यमानां स्फटिकामलत्विषः ।
स गण्डपालीं बिसदण्डपाण्डुरां ददर्श देव्याः पृथिवीपतिस्ततः ॥
—विक्र० २।६० ।

अत्र हि लोध्र-पाण्डुत्वं बिसदण्डपाण्डुत्वं च समानतामाकलयतः ।

५. रघु० ३।८ ।

मृगीदृशः श्यामलचूचुकच्छलात् कुचद्वये भूपसुतोपयोगिनि ।
प्रभावसंक्रान्तरसायनौषधीदलद्वयं नीलमिव व्यराजत[1] ॥

उभयत्र हि चूचुकनीलिमासाम्यम् । कालिदासवर्णितस्य पुंसवनादिक्रियावर्णनस्य बिल्हणवर्णितेन पुंसवनक्रियावर्णनेनापि साम्यं दृष्टिगोचरीभवति । तद्यथा रघुवंशे—

यथाक्रमं पुंसवनादिकाः क्रियाः[2] ।

विक्रमाङ्कदेवचरिते—

यथाक्रमं पुंसवनादिकर्मसु[3] ॥

उभयोरपि नृपयोः पुत्रजन्मजनितहर्षोऽपि 'ननन्द पारिप्लवनेत्रया नृपः' तथा च "क्वचिन्न माति स्म मुदा नरेश्वरः", इति पद्यांशद्वये प्रायः समान एव । रघुवंशे कालिदासेन भिषग्भिर्गर्भपरीक्षणं वर्णितम् । विक्रमाङ्कदेवचरिते बिल्हणेनापि गर्भवत्या भिषग्भिर्गर्भपरीक्षणं वर्णितम् ।

तद्यथा रघुवंशे—

भिषग्भिराप्तैरथ गर्भभर्मणि[4] ।

विक्रमाङ्कदेवचरिते च—

भिषग्भिरापादितसर्वभेषजम्[5] ।

रघुवंशे कालिदासेन यथा शुभे लग्ने रघोर्जन्म शंसितं[6] तथैव विक्रमाङ्कदेवचरिते बिल्हणेनापि विक्रमस्य जन्म शुभलग्ने समभूदिति[7] प्रतिपादितम् ।

---

१. विक्र० २।६६ ।
२. रघु० ३।१० ।
३. विक्र० २।७८ ।
४. रघु० ३।१२ ।
५. विक्र० २।८० ।
६. ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसम्पदम् ।
असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम् ॥
रघु० ३।१३ ।
७. अलभ्यत प्राक्तनचक्रवर्तिना न जन्म यत्राद्भुतधाम्नि केनचित् ।
तथाविधं लग्नमवाप्य नन्दनः शिवप्रसादान्नृपतेरजायत ॥
विक्र० २।८५ ।

विक्रमाङ्कदेवचरिते विक्रमाङ्कदेवजन्मनि 'परं प्रसादं ककुभः प्रपेदिरे[१]' इत्यादि-वर्णने 'दिशः प्रसेदुः'इति[२] रघुवंशे अ्रजजन्मवर्णनस्य प्रभावः सुस्पष्टं परि-लक्ष्यते ।

रघुवंशे पुरोधसा कृतस्य जातकर्मणोऽपि प्रभावो विक्रमाङ्कदेवचरिते वर्तते । तद्यथा रघुवंशे—

स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते[३] ।

विक्रमाङ्कदेवचरिते च—

अ्रथ समुचिते कर्मण्यास्थापरेण पुरोधसा[४] ।

सुतजन्मोपलक्ष्य राजभवनयोरनुष्ठीयमानेषु क्रियाकलापेष्वपि प्रायः उभयत्र साम्यमेव । उभयत्र नामकरणस्य याथार्थ्यमपि साम्यं प्रकटयति । रघुवंशे—

श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः ।
अ्रवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसम्भवम्[५] ॥

विक्रमाङ्कदेवचरिते—

स विक्रमेणाद्भुततेजसा च चेष्टाविशेषानुमितेन बालः ।
श्रीविक्रमादित्य इति क्षितीन्दोरवाप विख्यातगुणः समाख्याम्[६] ॥

एवञ्च—

स सोमवन्नेत्रचकोरपारणां चकार गोत्रस्य यदुज्ज्वलाननः ।
यथोचितं सोम इति क्षमापतेस्ततः प्रसन्नादभिधानमाप्तवान्[७] ॥

शिशोरङ्गुलिग्रहणेन प्रथमचलनं तथा प्रथममनुभाषणञ्च पित्रे महदानन्ददायकं भवति । उक्तभावानां समानरूपेण वर्णनं रघुवंशे विक्रमाङ्कदेवचरिते च समवलोक्यते । तद्यथा रघुवंशे—

उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।
अ्रभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः[८] ॥

---

१. विक्र० २।८६ ।
२. रघु० २।१४ ।
३. रघु० २।१८ ।
४. विक्र० २।६१ ।
५. रघु० ३।२१ ।
६. विक्र० ३।१ ।
७. विक्र० २।५८ ।
८. रघु० ३।२५ ।

विक्रमाङ्कदेवचरितेऽपि—

यदुत्थितः सोऽङ्गुलिसंग्रहेण यत्किञ्चिदव्यक्तमवोचतापि ।
अभीक्ष्णमक्ष्णोः श्रवसोश्च तेन क्षमापतेः संवननं बभूव[1] ॥

चूलकर्मसम्पादन[2]-विद्याध्ययन[3]-वर्णने चापि किञ्चित्प्रभावो रघुवंशस्य विक्रमाङ्कदेवचरितेऽवलोक्यत एव । राज्ञोः जलविहारवर्णनप्रसङ्गेऽपि कालिदासबिल्हणवर्णनयोः साम्यं वरीवर्ति । तद्यथा रघुवंशे—

स नौविमानादवतीर्य रेमे विलोलहारः सह ताभिरप्सु ।
स्कन्धावलग्नोद्धृतपद्मिनीकः करेणुभिर्वन्य इव द्विपेन्द्रः[4] ॥
क्रीडासरस्तामरसावतंसमुद्वेलहेलाञ्चितपादचारः ।
विवेश ताभिः सह भूमिपालः करेणुभिः सार्धमिव द्विपेन्द्रः[5] ॥

अत्रोभयोः करेणुभिः सार्धं द्विपेन्द्रयोरिव जलप्रवेशो महत्साम्यमावहति

विक्रमाङ्कदेवचरितस्य चन्द्रलेखास्वयम्वरे रघुवंशस्य इन्दुमतीस्वयम्वरस्य अत्यधिकः प्रभावः सुस्पष्टं दृष्टिगोचरीभवति । रघुवंशस्य षष्ठे सर्गे अजस्य स्वयम्वरमञ्चारोहणमेवञ्च विक्रमाङ्कदेवचरितस्य नवमे सर्गे विक्रमाङ्कदेवस्य स्वयम्वरहेमासनारोहश्च बहुतुल्यतामावहतः—

वैदर्भनिर्दिष्टमसौ कुमारः क्लृप्तेन सोपानपथेन मञ्चम् ।
शिलाविभङ्गैः मृगराजशावस्तुङ्गं नगोत्सङ्गमिवारुरोह[6] ॥

---

१. विक्र० ३।८ ।

२. रघु० ३।२८, विक्र० ३।६ ।

३. परां प्रतिष्ठां लिपिषु क्रमेण जगाम सर्वासु नरेन्द्रसूनुः ।
पुण्यात्मनामत्र तथाविधानां निमित्तमात्रं गुरवो भवन्ति ॥
विक्र० ३।१७ ।

अत्र हि रघुवंशस्थवक्ष्यमाणपद्यस्य प्रभावो दरीदृश्यते—
अथोपनीतं विधिवद्विपश्चितां विनिन्युरेनं गुरवो गुरुप्रियम् ।
अबन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ॥
रघु० ३।२९ ।

४. रघु० १६।६८ ।

५. विक्र० १०।७० ।

६. रघु० ६।३ ।

सोपान-पङ्क्ति स विलङ्घ्य तत्र तरङ्गमालामिव राजहंसः ।
सौवर्ण-पद्मप्रभमारुरोह हेमासनं मन्मथशासनेन[1] ॥

काव्यद्वयेऽपि स्वयम्वरागतराजचक्रमध्यवर्तिनोरजविक्रमाङ्कयोर्वर्णनं प्रायः समानमेव—

तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये ।
रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः[2] ॥

रराज भूपैः परिवारितोऽसौ शुभ्रे स्थितः सद्मनि कुन्तलेन्द्रः ।
यूथे प्रविष्टः करिपोतकानां दुग्धाब्धिमध्यस्थ इवामरेभः[3] ॥

उक्तयोः द्वयोरपि पद्ययोर्यत्र कालिदासोऽजोपमानं पारिजातमङ्गीकरोति तत्रैव बिल्हणोऽपि विक्रमोपमानममरेभं स्वीकरोति । अत्र स्वर्गीयोपमानस्योपयोगे बिल्हणः कालिदासशैलीमनुससार । अजं विक्रमं स्वयम्वरमण्डपे विलोकयतां नृपाणां मनांसि इन्दुमतीचन्द्रलेखयोः कथं निराशास्पदानि बभूवुरिति वर्णनमुभयत्र समानमेव । तद्यथा रघुवंशे—

काकुत्स्थमालोकयतां नृपाणां मनो बभूवेन्दुमतीनिराशम्[4] ।

विक्रमाङ्कदेवचरितेऽपि—

स दुर्लभा चन्द्रमुखी नरेन्द्रैः सिंही कुरङ्गैरिव मन्यते स्म[5] ॥

यथा अजविक्रमाङ्कयोः स्वयम्वरस्य मण्डपारोहणे साम्यं तथैव इन्दुमतीचन्द्रलेखयोः स्वयम्वरमञ्चावगमने साम्यमवलोक्यते—

मनुष्यवाह्यं चतुरस्रयानमध्यास्य कन्या परिवारशोभि ।
विवेश मञ्चान्तर-राजमार्गं पतिंवरा क्लृप्तविवाहवेशा[6] ॥

आविर्बभूवाथ पतिंवरा सा क्षौमाम्बरप्रस्फुरदुत्तरीया ।
मृगेक्षणा दुग्धपयोधिमुग्धतरङ्गलेखानुगतेव लक्ष्मीः[7] ॥

अत्रोभयत्रैव पतिंवरेति समानशब्दप्रयोगेण साम्यम् । रघुवंशे स्वयम्वरमण्ड-

---

१. विक्र० ६।४४ ।
२. रघु० ३।६ ।
३. विक्र० ६।४५ ।
४. रघु० ६।२ ।
५. विक्र० ६।४६ ।
६. रघु० ६।१० ।
७. विक्र० ६।६४ ।

पागतामिन्दुमतीमवलोक्य समागतराजलोकस्य विचित्रचेष्टनावर्णनं यथा कालिदासेनाकारि तथैव बिल्हणेनापि चन्द्रलेखामवलोकितवतां राज्ञां विचित्रविचेष्टितानि वर्णितानि—

तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।
प्रवालशोभा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः[1] ॥
तदीयवक्त्रेन्दुविलोकनेन सान्द्रोल्लसद्रागपयोनिधीनाम् ।
तत्रागतानां पृथिवीपतीनामासन्विचित्राणि विचेष्टितानि[2] ॥

कश्चिद्राजा करस्थलीलाकमलं भ्रामयन्नासीत्[3] । अन्यः रत्नानुविद्धाङ्गदकोटिलग्नं प्रालम्बं यथास्थानमकार्षीत्[4] । अपरस्तिर्यग्संसर्पिनखप्रभेण पादेन स्वर्णनिर्मितपादपीठं लिखितवान्[5] । इतरश्च सुहृदालापतत्परः स्वकीयं वाग्वैदग्ध्यं प्रादर्शयत्[6] । रेखाध्वजचिह्नचिह्नितेन करेण अक्षान् कश्चित् सलीलमुदीरयामास[7]। रघुवंशे यथाभागमवस्थितेऽपि किरीटे कस्यचिन्महीपालस्य करव्यापा-

---

१. रघु० ६।१२।

२. विक्र० ९।७५।

३. कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफम्।
रजोभिरन्तः परिवेषबन्धि लीलारविन्दं भ्रमयाञ्चकार ॥
रघु० ६।१३।

४. विस्रस्तमंसादपरो विलासी रत्नानुविद्धाङ्गदकोटिलग्नम् ।
प्रालम्बमुत्कृष्य यथावकाशं निनाय साचीकृतचारुवक्त्रः ॥
रघु० ६।१४।

५. आकुञ्चिताग्राङ्गुलिना ततोऽन्यः किञ्चित्समावर्जितनेत्रशोभः ।
तिर्यग्विसंसर्पिनखप्रभेण पादेन हैमं विलिलेख पीठम् ॥
रघु० ६।१५।

६. निवेश्य वामं भुजमासनार्धं तत्सन्निवेशादधिकोन्नतांसः ।
कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोऽभूत् ॥
रघु० ६।१६।

७. कुशेशयाताम्रतलेन कश्चित्करेण रेखाध्वजलाञ्छनेन ।
रत्नाङ्गुलीयप्रभयानुविद्धानुदीरयामास सलीलमक्षान् ॥
रघु० ६।१८।

रात्मकविलासानुभावो यथा कालिदासेन प्रतिपादितस्तथैव बिल्हणेनापि एकस्य राज्ञश्चूडामणिस्थाननिवेशात्मकोऽनुभावो विक्रमाङ्कदेवचरिते निबद्धोऽवलोक्यते। बिल्हणस्योक्तभावे यद्यपि नास्त्यक्षरशोऽनुकरणं तथापि तस्मिन् कालिदास-भावस्य च्छाया दृश्यत एव—

कश्चिद्यथा भागमवस्थितेऽपि स्वसन्निवेशाद्व्यतिलङ्घिनीव ।
वज्रांशुगर्भाङ्गुलिरन्ध्रमेकं व्यापारयामास करं किरीटे[1] ॥

चूडामणेः कोऽपि परिश्लथस्य स्थाने निवेशाय कृताभिलाषः ।
लीलासरोजं मुकुटे बबन्ध पुराङ्गनाभिः परिहास्यमानः[2] ॥

अस्मिन्प्रसङ्गे कालिदासप्रयुक्तं लीलारविन्दमिति[3] पदं बिल्हणः लीलासरोज-मिति[4] किञ्चित्परिवर्त्य प्रयुक्तवान् ।

उत्कृष्यमाणं निजहारदाम समस्तभूपालविभूषणेभ्यः ।
वक्षःस्थलेनोन्नमितेन दूरं कश्चिन्नरेन्द्रः प्रकटीचकार[5] ॥

अत्र हि हारापहारभावेऽपि कालिदासस्य अस्मिन् पद्ये च्छायावलोक्यते । तद्यथा

विस्रस्तमंसादपरो विलासी रत्नानुविद्धाङ्गदकोटिलग्नम् ।
प्रालम्बमुत्कृष्य यथावकाशं निनाय साचीकृतचारुवक्त्रः[6] ॥

बिल्हणेन निबद्धस्य कस्यचिद्राज्ञो गोष्ठीमिषेण वाक्पटुत्वप्रकाशनमपि रघुवंशस्थ-कालिदासीयपद्यमनुसरति । तद्यथा बिल्हणः—

गोष्ठीमिषेण स्वयमेवमेव प्रकाशयन्वाचि पटुत्वमन्यः ।
आकृष्य ताम्बूलकरङ्कमध्यात् कर्पूरदानं विदधे बहुभ्यः[7] ॥

कालिदासः—

निवेश्य वामं भुजमासनार्धे तत्सन्निवेशादधिकोन्नतांसः ।
कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोऽभूत्[8] ॥

उभयत्रापि वाक्पटुत्वप्रकाशनकर्पूरदानसुहृत्समाभाषणवामभुजासनार्धसन्निवेशा-

---

१. रघु० ६।१९ ।
२. विक्र० ९।७८ ।
३. रघु० ६।३ ।
४. विक्र० ९।७६ ।
५. विक्र० ९।७६ ।
६. रघु० ६।१४ ।
७. विक्र० ९।८२ ,
८. रघु० ६।१६ ।

दयो विलासा गोष्ठीवैदग्ध्यसूचकाः सन्ति। रघुवंशे पादेन हेमपीठविलेखनं[1] विक्रमाङ्कदेवचरिते च नखैस्ताम्बूलदलविलेखनमपि[2] समानाभिप्रायद्योतके भवितुमर्हतः। यथा अक्षोदीरणैः[3] राज्ञः हस्तयोः शुभचिह्नानां प्रदर्शनमपि प्रयोजनमस्ति रघुवंशे, तथैव विक्रमाङ्कदेवचरितेऽपि ताम्बूलकरङ्कवाहस्य ताडनेन[4] कूजद्वलयकरप्रदर्शनमेव प्रयोजनम्। यद्यपि बिल्हणोदितासु राजचेष्टासु कालिदासस्य प्रभावः सुस्पष्टं परिलक्ष्यते तर्ह्यपि बिल्हणेन स्वयंवरागतराजलोकस्य कतिपयानि एवंविधानि विचेष्टितानि वर्णितानि सन्ति येषां वर्णनवैचित्र्ये न कस्याप्यन्यकवेः प्रभावः अपि तु बिल्हणस्यैव बुद्धिकौशलं प्रकटीभवति। तानि यथा—

कण्ठस्फुरत्पञ्चमकाकलीकः कश्चिद्वचलीकस्मितमाततान।
संग्रथ्य कश्चित्कतिचित्पदानि गाथाकवित्वं कथयाम्बभूव[5]॥

अनुद्गतस्वेदमपि क्षितीन्दुरुद्धूल्य कर्पूररजोभिरङ्गम्।
कर्णद्वये कुण्डलयोश्चकार वृथैव कश्चित्परिवर्तनानि[6]।

हेमासनं वस्त्रनिवेशनेन तुङ्गत्वमानीय वृथा ववल्ग।
नवीनतारुण्यनिवेदनार्थमजातकूर्चेन मुखेन कश्चित्[7]॥

रघुवंशस्येन्दुमतीस्वयम्वरे सुनन्दया कृतस्य नृपवंशावलीवर्णनस्य पद्धतिरेव विक्रमाङ्कदेवचरिते प्रतिहाररक्ष्या समाश्रितास्ति। यथा रघुवंशे प्रतीपनामकस्य[8] राज्ञः परिचयोत्कर्षाय तत्पूर्वजानां[9] शौर्यवर्णनं कालिदासश्चकार, तथैव बिल्हणोऽपि रामकुलोद्भवस्य राजकुमारस्य तथा च अर्जुनकुलजस्य कुमारस्य वर्णनात्प्राक् तयोः पूर्वजानां[10] शौर्यं वर्णयामास।

---

१. रघु० ६।१५।
२. विक्र० ९।८१।
३. रघु० ६।१८।
४. विक्र० ९।८१।
५. विक्र० ९।८६।
६. विक्र० ९।८०।
७. विक्र० ९।८३।
८. रघु० ६।४१।
९. रघु० ६।३८-४०।
१०. विक्र० ९।९०, १०१-१०३।

कालिदासः सहस्रार्जुनकृतं रावणपराभवं संस्मार्य[1] वर्ण्यकुलस्य पराक्रमातिशयं वर्णयाम्बभूव, बिल्हणश्च रामकृतं रावणपराभवं[2] वर्णयित्वा तत्कुलजराजसुतस्य विक्रमातिशयं प्रकटीचकार। अतः स्पष्टमेव साम्यं तत्रावलोक्यते। रघुवंशे सुनन्दया प्रदर्श्यमाने राजनि इन्दुमती कुमुद्वतीव भानुमति भावं न बबन्ध[3]। विक्रमाङ्कदेवचरिते च प्रतिहाररक्षी चन्दलां चूतानुबन्धे मुग्धां भ्रमरीं कर्णिकारमिवान्यं राजानं प्रदर्शयामास[4]। अत्रोऽत्र भावसाम्यं दृग्गोचरीभवति।

अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन्मनसो रुचिस्ते।
सिप्रातरङ्गानिलकम्पितासु विहर्तुमुद्यानपरम्परासु[5]॥
अनेन सार्धं सरयूवनान्ते कूजन्मयूरीमुखरे विहृत्य।
विलासवातायनसेवनेन श्लाघ्यामयोध्यां नगरीं विधेहि[6]॥

उक्तपद्यद्वयस्यापि 'अनेन' इति पदोपक्रमेण तथा चैकस्मिन् 'सह' इति पदस्य अन्यस्मिंश्च सार्धमिति शब्दस्य प्रयोगेण एवञ्चैकत्र सिप्रातटे विहरणमन्यत्र सरयूवनान्ते भ्रमणेन सममस्तीति सूच्यते। यथा अजवधूर्भवित्रीन्दुमती अजं प्रति गच्छन्ती मार्गेऽन्यराजबाधां विलङ्घ्याबाधगत्या अजं प्रति जगाम, तथैव अन्यत्र कृताग्रहापि सा चन्दला सान्द्रानुरागेण चालुक्यनृपोन्मुखाभूत्। तद्यथा रघुवंशे—

नृपं तमावर्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री।
महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव[7]॥

एवञ्च विक्रमाङ्कदेवचरिते—

तमित्थमन्यत्र कृताग्रहा सा विलङ्घ्य चालुक्यनृपोन्मुखाऽभूत्।
उत्तालवेला परिवर्तितापि तरङ्गिणी नोज्झति पूर्वमार्गम्[8]॥

---

१. रघु० ६।४०।
२. विक्र० ८।८८-९०।
३. बबन्ध सा नोत्तमसौकुमार्या कुमुद्वती भानुमतीव भावम्।
रघु० ६।३६।
४. विक्र० ९।९३।
५. रघु० ६।३५।
६. विक्र० ९।९१।
७. रघु० ६।५२।
८. विक्र० ९।३०।

रघुवंशे वर्ण्ये राजनि श्रीश्च सरस्वती च उभेऽपि स्थितिमाकलयत इति सुनन्दोक्तिः—

निसर्गभिन्नास्पदमेकमस्मिन्द्वयं स्थितं श्रीश्च सरस्वती[1] च ।

उक्तभावं विक्रमाङ्कदेवचरिते राजवर्णननिपुणा प्रतिहारधुरन्धरा एभिश्शब्दैः प्रकटीचकार—

वदामि सौभाग्यगुणं किमस्य यत्र स्थिते श्रीश्च सरस्वती च ।

अत्र हि भावसाम्येन सहैव श्रीश्च सरस्वती चेत्यत्र शब्दसाम्यमप्यवलोक्यते । समानयोगादिति विक्रमाङ्कदेवचरितभावे प्रभावो भवितुमर्हति[2] ।

तया स्रजा मङ्गलपुष्पमय्या विशालवक्षःस्थललम्बया सः[3] ।

कालिदासोक्तपद्योपक्रमस्य वक्ष्यमाणविक्रमाङ्कदेवचरितपद्यार्धोपक्रमेण शब्दसाम्यम् । तद्यथा—

तया स्रजा कण्ठनिवेशभाजा मत्तालिमालाकलभाङ्कृतेन[4] ।

रघुवंशे इन्दुमत्यजसंयोगे पौराणां वाक्यं विक्रमाङ्कदेवचरिते चन्दलाविक्रमाङ्कयोः सदृशयोगे पौराङ्गनानां वाक्यमपि किञ्चित्साम्यमावहति । तद्यथा रघुवंशे—

इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः[5] ॥

तद्यथा विक्रमाङ्कदेवचरिते—

उदचरदिति वाणी तत्र पौराङ्गनाना-
मिह हि सदृशयोगः कस्य न प्रीतिहेतुः[6] ॥

रघुवंशे सुनन्दा इन्दुमतीं पाण्डचनरेशस्य वरणाय प्रेरयन्ती कथयति—

---

१. रघु० ६।२९ ।

२. त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन ।
रघु० ६।७९ ।
कीर्तिविधेरस्तु समानयोगात्कामस्य कामं फलतु प्रयासः ।
विक्र० ९।१४६ ।

३. रघु० ६।८४ ।

४. विक्र० ९।१४८ ।

५. रघुवंशे पद्यार्धम् ६।८५ ।

६. विक्र० पद्यार्धम् ९।१५१ ।

तमालपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु[1] ।

एवञ्च विक्रमाङ्कदेवचरिते प्रतिहारगोष्ठी पार्थकुलप्रसूतनृपवर्णनप्रसङ्गे चन्दलामभिधत्ते—

एनं समालोकय रन्तुकामा चर्मण्वतीतीरवनस्थलेषु[2] ।

अत्र हि मलयस्थलीषु रन्तुं कामनायां चर्मण्वतीतीरवनस्थलेषु च रन्तुं कामनायां साम्यमवलोक्यते । द्वयोरेव महाकाव्ययोः पतिम्वरे यान् नरेशान् व्यतीयतुः तेषां दशा प्रायः समानैव[3] । रघुवंशे इन्दुमत्या विक्रमाङ्कदेवचरिते चन्दलया च अजविक्रमाङ्कयोः कण्ठयोः स्वयम्वरस्रजोरर्पणमपि प्रायः समानमेव । रघुवंशे तद्यथा—

सा चूर्णगौरं रघुनन्दनस्य धात्री कराभ्यां करभोपमोरूः ।
आसञ्जयामास यथाप्रदेशं कण्ठे गुणं मूर्तमिवानुरागम्[4] ॥

विक्रमाङ्कदेवचरिते तद्यथा—

लज्जानिरासे निभमात्रकेण वाक्येन तेन प्रतिहाररक्ष्याः ।
पतिम्वरा संवरणस्रजं तां श्रीविक्रमाङ्कस्य चकार कण्ठे[5] ॥

पतिम्वरावरणवञ्चितानां म्लानमनोरथानां राज्ञां वर्णनमपि उभयत्र समानमेव । तद्यथा रघुवंशे—

सेनानिवेशान्पृथिवीक्षितोऽपि जग्मुर्विभातग्रहमन्दभासः ।
भोज्यां प्रति व्यर्थमनोरथत्वाद्रूपेषु वेषेषु च साभ्यसूयाः[6] ॥

---

१. रघु० ६।६४ ।

२. विक्र० ६।१०३ ।

३. सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिम्वरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥
रघु० ६।६७ ।

मध्येन येषां वसुधापतीनां जगाम सा कामवशीकृतानाम् ।
स्वयंवरस्रग्रजसैव पूर्णास्तेषां दृशः साश्रुजला बभूवुः ॥
विक्र० ६।१११ ।

४. रघु० ६।८३ ।

५. विक्र० ६।१४७ ।

६. रघु० ७।२ ।

तद्यथा विक्रमाङ्कदेवचरिते—

यथागतेनैव पथा गतेषु भूपेष्वथ म्लानमनोरथेषु[1] ।

उभयत्र समत्सरा अपि भूपा अक्रमं कर्तुं न साहसञ्चक्रुरिति[2] सादृश्यम् ।

लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।
सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे[3] ॥

उक्तरघुवंशपद्यस्य भावं (शुद्धसन्ततेरनिवार्यत्वरूपम्) बिल्हणः कथं प्रौढिप्रकर्षेणात्मसाच्चकारेत्यवलोकनीयम्—

किमश्वमेधप्रभृतिक्रियाक्षमैः सुतोऽस्ति चेन्नोभयलोकबान्धवः ।
ऋणं पितॄणामपनेतुमक्षमाः कथं लभन्ते गृहमेधिनः शुभम्[4] ॥

अन्यत्रापि बहुषु स्थलेषु विक्रमाङ्कदेवचरिते प्रौढिप्रकर्षेण कालिदासस्य भावानात्मसात्कृतवान्बिल्हण इति विषये बहूनि प्रमाणान्युपलभ्यन्ते। रवेरुत्तरदिग्गमन-वर्णनप्रसङ्गे महाकविकालिदासस्य भावो यथा—

जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः ।
दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयं नगमत्यजत्[5] ॥

इमं भावं महाकविर्बिल्हणः स्वकीयप्रतिभारागेण रञ्जयित्वा वक्ष्यमाणपद्ये आत्मसाच्चकार ।

रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम् ।
उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम्[6] ॥

एवमेवात्रापि—

सुवदनावदनासवसम्भृतस्तदनुवादिगुणः कुसुमोद्गमः ।
मधुकरैरकरोन्मधुलोलुपैर्बकुलमाकुलमायतपङ्क्तिभिः[7] ॥

बकुलवृक्षस्य सुवदनावदनासवसम्भृतत्वं, तदनुवादिगुणेन तत्कुसुमोद्गमत्वञ्च यदवर्णि कालिदासेन तस्याधिकं सुस्पष्टं सरलतरञ्च रूपं बिल्हणेन वक्ष्यमाण-पद्ये प्रस्तुतम्—

---

१. विक्र० १०।४ ।
२. रघु० ७।३; विक्र० १०।३ ।
३. रघु० १।६९ ।
४. विक्र० २।३४ ।
५. रघु० ९।२५ ।
६. विक्र० ७।६ ।
७. रघु० ९।३० ।

अरोचकी पादपजातिमध्ये जाने नितान्तं बकुलद्रुमोऽयम् ।
चैत्रेऽपि यः पुष्पविकासहेतोर्गण्डूषमाकाङ्क्षति ते मृगाक्षि[1] ॥

कालिदासस्य रघुदिग्विजयाधार एव बिल्हणेन विक्रमदिग्विजयस्य कल्पनाऽकारि[2]। यद्यपि बिल्हणेन स्वप्रतिभाप्रभावेण प्रौढिप्रकर्षेण च तत्र मौलिकताविनिवेशाय प्रयत्नः कृतः तथा च तस्य प्रयत्नः पर्याप्तसाफल्यमप्यधिजगाम, तर्हि अपि तत्र कालिदासप्रभावस्य दर्शनं भवत्येव ।

दिशां विजेतू रघोः सर्वासु दिक्षु यशसां प्रसारो बभूवेति प्रसङ्गे इक्षुच्छायनिषादिन्यो ग्रामस्त्रियोऽपि तस्य यशोगानपरायणा आसन्निति कालिदासः वर्णयामास—

इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः[3] ॥

तस्यैव भावस्य चित्रणं बिल्हणः कृतदिग्विजयस्य विक्रमस्य प्रालेयशुद्धं यशः पूर्वाद्रेः कटकेषु सिद्धवनिता गायन्तीति वर्णयन् वक्ष्यमाणपद्ये कृतवान् ।

गायन्ति स्म गृहीतगौडविजयस्तम्बेरमस्याहवे
तस्योन्मूलितकामरूपनृपतिप्राज्यप्रतापश्रियः ।
भानुस्यन्दनचक्रघोषमुषितप्रत्यूषनिद्रारसाः
पूर्वाद्रेः कटकेषु सिद्धवनिताः प्रालेयशुद्धं यशः[4] ॥

उभयत्र हि नारीजनकृतं रघुविक्रमयोर्यशोगानं महत्साद्दश्यमावहतीति पश्यन्तो वयं बिल्हणः कालिदासाद्दायाद्यमगृह्णादिति कथयितुं शक्नुमः । संयति तुरगखुरैरुत्थापितो रेणुः सूर्यमुपरुरोधेति कालिदासस्य भावः—

उत्थापितः संयति रेणुरश्वैः सान्द्रीकृतः स्यन्दनवंशचक्रैः ।
विस्तारितः कुञ्जरकर्णतालैर्नेत्रक्रमेणोपरुरोध सूर्यम्[5] ॥

---

१. विक्र० १०।२५ ।

२. विक्रमः महान् शक्तिशाली राजा बभूव। तेन च निकटस्थाः राजानः युद्धेषु पराजिता आसन्निति मन्यमानैरप्यैतिह्यैः बिल्हणवर्णितस्य दिग्विजयस्य पुष्टिर्न कृता प्रत्युत तत्र सन्देह एव प्रकटितः, अत एव बिल्हणेन विक्रमदिग्विजयस्य कल्पनाकारीति लिखितम् ।

३. रघु० ४।२० ।

४. विक्र० ३।७४ ।

५ रघु० ७।३९ ।

बिल्हणेन विक्रमाङ्कदेवचरिते पद्यद्वयेन प्रकटितः । प्रथमं पद्यम्—

अब्धिषु स्थलपथीकृतेषु नः पूर्यते जवविधौ कुतूहलम् ।
इत्यकुर्वत दिगन्तगोचरं नूनमस्य तुरगाः क्ष्मारजः[1] ॥

अत्र हि तुरगः क्ष्मारजसा अब्धिस्थलपथीकरणभावः तुरगखुरोत्थापितरजसा सूर्यावरोधात्मकेन कालिदासस्य भावेन प्रेरितोऽवलोक्यते । द्वितीयं पद्यम्—

उन्मदद्विरदहस्तशीकरश्रेणिभिर्नभसि तस्य दर्शिताः ।
रेणुहारितपथस्य भास्वतश्चूर्णिता इव रथेन तारकाः[2] ॥

अत्र हि भास्वतः पथः रेणुना हारितत्वं, कालिदासपद्यस्य रजसा सूर्योपरोधभावानुप्राणितमिवावभाति । युद्धे ध्वजाङ्कितमत्स्या अथवा तदाकाराः पताका वास्तविकमत्स्या इव प्रतीयन्ते इति वर्णनमुभयत्र समानमेव ।
तद्यथा रघुवंशे—

मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि ।
बभुः पिबन्तः परमार्थमत्स्याः पर्याविलानीव नवोदकानि[3] ॥

विक्रमाङ्कदेवचरितेऽपि—

कथमपि विनिपत्य सञ्चरन्तः क्षतजतरङ्गवतीषु चिह्नमस्याः ।
सुरयुवतिविलोचनानि संख्ये विदधुरकृत्रिममत्स्यशङ्कितानि[4] ॥

संयति प्राणत्यागेन वीराः स्वर्गं प्राप्नुवन्तीति भावस्य कालिदासस्य रघुवंशे बिल्हणस्य विक्रमाङ्कदेवचरिते च चित्रणमवलोक्यते, तेन उभयोः सादृश्यं प्रतिपादयितुं शक्यते । तद्यथा रघुवंशे—

परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव ।
अमर्त्यभावेऽपि कयोश्चिदासीदेकाप्सरःप्रार्थितयोर्विवादः[5] ॥

अस्मिन्पद्ये युद्धे समकालमुत्क्रान्तवाय्वोर्वीरयोः स्वर्गेऽपि एकाप्सरः प्राप्तये विवादः कालिदासेन वर्णितः । कालिदासस्यायं भावः बिल्हणेन याथातथ्येन न गृहीतः, प्रत्युत स्वकीयप्रतिभया तत्र किञ्चित्परिवर्तनं कृत्वाऽऽत्मसात्कृतः—

---

१. विक्र० १४।६२ ।
२. विक्र० १४।६५ ।
३. रघु० ७।४० ।
४. विक्र० ६।७२ ।
५. रघु० ७।५३ ।

कयात्रमाला प्रथमं समर्पिता
न वेद्मि वादे युवयोस्तदन्तरम् ।
तदेष सौभाग्यनिधिर्भटाग्रणीः
करोतु वाचा स्वयमेव निश्चयम्[1] ।।

तत्र (कालिदासपद्ये) एकाप्सरसः प्राप्तये भटद्वयोर्विवादः, अत्र (बिल्हणपद्ये) अप्सरसोः भटस्यैकस्यावाप्तये विवादः इत्येव परिवर्तनम् । अनेन परिवर्तनेन यद्यपि बिल्हणपद्यं मौलिकमिवाभाति तथापि गम्भीरसमीक्षणेन तत्र कालिदास-प्रभावो दृग्गोचरीभवत्येव । रणभूमेर्मृत्योः पानभूमिरूपेण वर्णनस्योभयत्र दर्शनादपि[2] पूर्वस्यापरस्मिन् प्रभावः प्रमाणीभवति रघुवंशविक्रमाङ्कदेवचरित-योर्वक्ष्यमाणपद्ययोरपि सादृश्यमवगम्यते । पितुराहवमल्लस्य युवराजपद-प्रदानाग्रहमस्वीकुर्वतो विक्रमस्य पितरं प्रत्युक्तिः—

चालुक्यवंशोऽपि यदि प्रयाति पात्रत्वमाचारविपर्ययस्य ।
अहो महद्वैशसमाः किमन्यदनङ्कुशोऽभूत्कलिकुञ्जरोऽयम्[3] ।।

ईदृशीवोक्तिरश्वमेधयज्ञाश्वमपहृत्य गच्छन्तं मघवन्तं प्रति रघोरपि रघुवंशे वर्तते—

त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्याः खलु दिव्यचक्षुषा ।
न चेत्स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः[4] ।।

उक्तपद्यद्वयेन कालिदासबिल्हणयोर्महद्भावसादृश्यं प्रकटीभवति ।

---

१. विक्र० १७।६१ ।

२. शिलीमुखोत्कृत्तशिरःफलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव ।
रणक्षितिशोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः ।।
रघु० ७।४९ ।

तदेव विक्रमाङ्कदेवचरिते—
रुधिरभृतकपालपङ्क्तिमध्ये मदकरटी विनिपत्य कर्णतालैः ।
शिशिरमिव चकार पानपात्रप्रणयिनमासवमागतस्य मृत्योः ।।
विक्र० ६।७९ ।

तथा च—
उपरि निपतितः कपालशुक्तेः श्रवणपुटः करिणः कृपाणलूनः ।
समरभुवि कृतान्तपानलीलाचषकपिधानविलासमाससाद ।।
विक्र० ६।८० ।

३. विक्र० ३।३६ ।

४. रघु० ३।४५ ।

तयोर्दिवस्पतेरासीदेकः सिंहासनार्धभाक् ।
द्वितीयापि सखी शच्याः पारिजातांशभागिनी[1] ॥

कालिदासस्यास्मिन्पद्ये राज्ञा कुशेन दिवस्पतेः सिंहासनार्धभागग्रहणमेवञ्च कुमुद्वत्याः शच्याः पारिजातांशग्रहणात्मकेन भावेन प्रेरितो बिल्हणोऽपि विक्रमाङ्कदेवचरिते उक्तभावमित्थं वर्णयामास—

यशोऽवतंसं नगरं सुराणां कुर्वन्नगर्वः समरोत्सवेषु ।
न्यस्तां स्वहस्तेन पुरन्दरस्य यः पारिजातस्रजमाससाद[2] ॥

कालिदासपद्ये सिंहासनार्धग्रहणेन बिल्हणपद्ये च पारिजातस्रजस आसादनेन राज्ञोः स्वर्लोकगमनमभिव्यज्यते । लीलावनरङ्गपीठे पतद्भिः कुसुमैः बिल्हणेन वक्ष्यमाणपद्ये लतापुरन्ध्रीणां लास्यमवर्णि—

लास्यं त्वयि प्रेक्षितुमागतायां लतापुरन्ध्र्यः कुसुमैः पतद्भिः ।
मृगाक्षि लीलावनरङ्गपीठे पुष्पाञ्जलिक्षेपमिवोद्वहन्ति[3] ॥

अत्रापि कालिदासस्य प्रभावः परिलक्षितो भवति । यथा—

अभिनयान्परिचेतुमिवोद्यता मलयमारुतकम्पितपल्लवा ।
अमदयत्सहकारलता मनः सकलिका कलिकामजितामपि[4] ॥

अत्र हि पद्यद्वयेऽपि लतासु नर्तकीत्वारोपणात्सादृश्यम् ।

असुभिरपि यियासुभिः प्रविश्य प्रतिभटमूर्धनि कोऽपि दत्तपादः ।
फलममनुत जन्मनोऽपि लब्धं यशसि रतिर्महतां न देहपिण्डे[5] ॥

अस्मिन्पद्ये वीराणां यशस्यास्थात्मकः शरीरेष्वनास्थात्मको यो भावो बिल्हणेन वर्णितस्तस्मिन्वक्ष्यमाणकालिदासपद्यस्य प्रत्यक्षप्रभावो नास्तीति न कोऽपि कथयितुं समर्थः—

किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः ।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु[6] ॥

यतो हि उभयोरपि पद्ययोर्महद्भावसादृश्यं वर्तते। सन्ततिशून्यस्य राज्ञो वक्ष्यमाणो-

---

१. रघु० १७।७ ।
२. विक्र० १।८६ ।
३. विक्र० १०।२३ ।
४. रघु० ९।३३ ।
५. विक्र० ६।७७ ।
६. रघु० २।५७ ।

क्तिरपि बिल्हणेन रघुवंशमहाकाव्यादेव गृहीता स्यादित्यपि सम्भवमेव प्रतिभाति—

फलेन शून्यः सुतरां दुनोति मामयं गृहस्थाश्रमधर्मपादपः[1] ॥

यतो हि उक्ताशयेन महत्साद्दश्यमावहमानोक्तिः रघुवंशमहाकाव्येऽपि दरीदृश्यते[2]।

प्रयागे गङ्गायमुनयोः सङ्गमवर्णनप्रसङ्गेऽपि बिल्हणे कालिदासप्रभावस्य सम्भावना निरर्थका न भवितुमर्हति, यद्यपि बिल्हणस्य गङ्गायमुनासङ्गमवर्णनं सङ्क्षिप्तं, कालिदासकृतवर्णनं तदपेक्षया विशदमस्ति[3] ।

कुमारसम्भवप्रभावः—

कुमारसम्भवे अभीप्सितार्थसिद्धये पार्वती तपोमार्गमनुससार । कालिदासस्य तपसा कार्यसाधनरूपामिमां प्रक्रियामनुसृत्यैव बिल्हणो महाराजस्य आहवमल्लस्य तपसा पुत्रप्राप्तिरूपोदन्तं वर्णयामास । केवलं तत्र फलवैभिन्न्यम् । कुमारसम्भवे पतिप्राप्तिकामनया तपश्चरणं विक्रमाङ्कदेवचरिते पुत्रप्राप्तिकामनया तपश्चरणं वर्णितम् । कुमारसम्भवे महाकाव्ये तपस्यतः शिवस्य वलिपुष्पावचयादिसेवार्थं पार्वत्या नियुक्तिः कालिदासेन कृता । तदनुसारमेव बिल्हणेन तपस्यत आहवमल्लस्य सेवार्थं तदीया राज्ञी नियुक्ता । उक्तकथनस्य प्रमाणत्वेन पद्यद्वयमुपन्यस्यते—

अवचितवलिपुष्पा वेदिसंमार्गदक्षा नियमविधिजलानां बर्हिषाञ्चोपनेत्री ।
गिरिशमुपचचार प्रत्यहं सा सुकेशी नियमितपरिखेदा तच्छिरश्चन्द्रपादैः[4] ॥

मृगाङ्कचूडस्य किरीटनिम्नगातरङ्गवातैरिव वारितश्रमा ।
उपाचरत्सम्यगसौ नराधिपं स्वहस्तलिप्तेश्वरमन्दिराजिरा[5] ॥

अत्र हि 'उपचचार, उपाचरत्, वेदिसंमार्गदक्षा, स्वहस्तलिप्तेश्वरमन्दिराजिरा, नियमितपरिखेदा तच्छिरश्चन्द्रपादैः, मृगाङ्कचूडस्य किरीटनिम्नगातरङ्गवातैरिव

---

१. विक्र० २।२९ ।
२. तया हीनं विधातर्मां कथं पश्यन्न दूयसे ।
सिक्तं स्वयमिव स्नेहाद् वन्ध्यमाश्रमवृक्षकम् ॥ रघु० १।७० ।
३. धर्मस्यैव व्युपरतकलेर्यत्र गीर्वाणसिन्धु-
स्रोतःकोशे विशति यमुनावेणिभङ्ग्या कृपाणः । विक्र० १८।९१,
तदेव, रघु० १३।५४-५७ ।
४. कुमारसम्भव १।६० ।
५. विक्र० २।४७ ।

वारितश्रमा' इत्यादिषु परस्परं साम्यमवलोक्य बिल्हणे कालिदासप्रभावस्य पुष्टिः सञ्जायते । हिमालयोऽभ्यर्थनाभङ्गभयेन अयाचितारं महादेवं सुतादान-प्रस्तावं न करोति । कुमारसम्भवस्यायं भावोऽपि बिल्हणस्य विक्रमाङ्कदेवचरिते दृष्टिपथमवतरति । कुमारसम्भवे अयं भावः—

अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक ।
अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थमिष्टेऽप्यवलम्बतेऽर्थे[1] ॥

असावेव भावो विक्रमाङ्कदेवचरितेऽपि—

तस्याः पिता कस्यचिदर्थिभावं न भूमिभर्तुः सफलं विधत्ते[2] ।
पिता तदीयः त्वयि सान्द्ररागः किं प्रार्थनाभङ्गभयान्न[3] वक्ति ।

अत्र हिमालयवच्चन्द्रलेखायाः पितापि विक्रमाय कन्यादानप्रस्तावात् प्रार्थना-भङ्गभयाद् बिभेति । अस्मिन्नपि सन्दर्भे भावसाम्यमवलोक्य विक्रमाङ्कदेवचरिते कुमारसम्भवस्यापि प्रभावः स्वीकर्तव्य एव ।

यथा कालिदासः स्वीयं काव्यं (कुमारसम्भवम्) काठिन्यपूर्णैः तपोभिरसा-धयत्तथैव बिल्हणोऽपि कठिनतपस्यावलेन स्वीयं विक्रमाङ्कदेवचरितं पवित्री-चकार । अर्थात् उभयत्रैव पात्राणां तपश्चरणानुकूलचरित्रेण काव्यपवित्री-करणस्य भावना कालिदासबिल्हणयोः समानरूपेणासीदिति प्रत्यक्षीभवति । उक्ता भावना बिल्हणेन कालिदासादेव समासादितासीदित्यपि कुमारसम्भव-विक्रमाङ्कदेवचरितयोरन्तःसाक्ष्येणानुमीयते । यतो हि राज्ञ आहवमल्लस्य तपश्चरणं कुमारसम्भवीयपार्वतीतपसः प्रेरणाफलमेवास्तीति नात्र सन्देहः । इदमत्रोदाहरणम्—

मृणालिकापेलवमेवमादिभिर्व्रतैः स्वमङ्गं ग्लपयत्यहर्निशम् ।
तपश्शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार[4] ॥

तपः स्वहस्ताहृतपुष्पपूजितत्रिलोचनः स्थण्डिलवासधूसरः ।
तथा स राजर्षिरसाधयद्यथा महर्षयोऽस्मादपकर्षमाययुः[5] ॥

---

१. कुमार० १।५२ ।
२. विक्र० ९।३६ ।
३. विक्र० ९।३७ ।
४. कुमार० ५।२९ ।
५. विक्र० २।४४ ।

कठिनतपश्चरणेन तपस्विनामपि तपसोऽपकर्ष उभयत्रावलोक्यते, अतोऽत्रापि कुमारसम्भवमहाकाव्यस्य प्रभावः प्रत्यक्षीभवति। चन्द्रलेखायाः सौन्दर्यवर्णने यद्यपि बिल्हणेन मौलिकाश्चमत्कृतयोऽपि सृष्टास्तर्हि अपि केषुचित्स्थलेषु तत्रापि कुमारसम्भवीयपार्वतीसौन्दर्यवर्णनस्य च्छाया अवलोक्यते एव। चन्द्रलेखाया ऊरुवर्णनप्रसङ्गे करिकरस्य कदलीस्तम्भस्य च तदूर्वोरुपमानबाह्यत्वं यदवर्णि बिल्हणेन तत्कालिदासवर्णितं पार्वत्या ऊरुवर्णनमाधारीकृत्यैव। तद्यथा कुमारसम्भवे—

नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः।
लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः[1] ॥

विक्रमाङ्कदेवचरिते च—

लम्भिताः कदलीस्तम्भास्तदूरुभ्यां पराभवम्।
अत्यन्तमृदुभिर्लब्धो जडैः क्व जयडिण्डिमः[2] ॥
मन्ये तदूरू सम्भाव्य हस्तसर्वस्वहारिणौ।
वहन्त्यस्पृश्यताहेतोर्मातङ्गत्वं मतङ्गजाः[3] ॥

वैदूर्यभूमितो रत्नशलाकोत्पत्तिरूपोपमानं कुमारसम्भवे विक्रमाङ्कदेवचरिते चापि उपमानत्वेन प्रयुक्तमवलोक्यते। तद्यथा कुमारसम्भवे—

'विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव'[4] ॥

विक्रमाङ्कदेवचरिते च—

'जाता रत्नशलाकेव श्रोणिवैदूर्यभूमितः'[5] ॥

कुमारसम्भवे पार्वत्या विक्रमाङ्कदेवचरिते च चन्द्रलेखायाः पादसौन्दर्यवर्णनप्रसङ्गे उभयोः पादद्वन्द्वेन कमलाल्लक्ष्मीग्रहणवर्णनं प्रायः समानमेव। तद्यथा कुमारसम्भवे—

आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थाम्[6] ॥

---

१. कुमार० १।३६।
२. विक्र० ८।१५।
३. विक्र० ८।१६।
४. कुमार० १।२४।
५. विक्र० ८।२५।
६. कुमार० १।३३।

विक्रमाङ्कदेवचरितेऽपि—

जाग्रतः कमलाल्लक्ष्मीं यज्जग्राह तदद्भुतम् ।
पादद्वन्द्वस्य मत्तेभगतिस्तेये तु का कथा[1] ॥

पार्वतीचन्द्रलेखयोर्गती हंसगतिमतिरिच्येते, अभिप्रायस्यास्य वर्णनं कालिदासस्य कुमारसम्भवे बिल्हणस्य च विक्रमाङ्कदेवचरिते स्वल्पेनैव भेदेनावलोक्यते। तद्यथा—

सा राजहंसैरिव सन्नताङ्गी गतेषु लीलाञ्चितविक्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धैरादित्सुभिर्नूपुरशिञ्जितानि[2] ॥

दृश्यन्ते मानसोत्तंसा राजहंसाः क्वचिद्यदि ।
गतौ चरणयोस्तस्याः प्रेक्ष्यते यावदन्तरम्[3] ॥

नायिकाङ्गनिर्माणरतस्य वेधसो लावण्यसारसमाप्तिरूपाशयो विक्रमाङ्कदेवचरिते कुमारसम्भवे च प्रायः समानरूपेणैव व्यक्तो दरीदृश्यते। कुमारसम्भवे—

वृत्तानुपूर्वे च न चातिदीर्घे जङ्घे शुभे सृष्टवतस्तदीये ।
शेषाङ्गनिर्माणविधौ विधातुर्लावण्यमुत्पाद्य इवास यत्नः[4] ॥

विक्रमाङ्कदेवचरिते च—

मन्ये समाप्तलावण्ये सारे सर्गे मृगीदृशः ।
अपूरयित्वैव गतो नाभिरन्ध्रं प्रजापतिः[5] ॥

अत्र हि कुमारसम्भवे जङ्घे सृष्टवतो विक्रमाङ्कदेवचरिते च नाभिरन्ध्रं सृजतो वेधसो लावण्यसामग्री समाप्तिमगादित्येव केवलमुभयोर्भेदः। एवमेव स्वल्पपरिवर्तनेनान्यत्रापि कालिदासस्य भावो बिल्हणस्य विक्रमाङ्कदेवचरिते समावेशितोऽवलोक्यते[6]।

---

१. विक्र० ८।१०।
२. कुमार० १।३४।
३. विक्र० ८।१२।
४. कुमार० १।३५।
५. विक्र० ८।३०।
६. तस्याः प्रविष्टा नतनाभिरन्ध्रं रराज तन्वी नवलोमराजिः।
नीवीमतिक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्चिः ॥
कुमार० १।३८।

नाभिरन्ध्रं प्रविष्टास्याः श्यामला रोमवल्लरी ।
त्रस्ता तिमिरलेखेव मेखलामणिकान्तितः ॥
विक्र० ८।२४।

उदरस्थत्रिवलिवर्णनप्रसङ्गेऽपि कालिदासबिल्हणयोरेकवाक्यता स्पष्टैवास्ते—

> मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला ।
> आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम्[1] ॥
> तदीयत्रिवलीमार्गसोपानारोहणश्रमः ।
> अनङ्गत्वादनङ्गस्य जातो रत्येकगोचरः[2] ॥

उभयत्रैव नायिकोदरस्थत्रिवलेः समानरूपेण कामदेवस्यारोहणसोपानत्वेन वर्णनं पूर्ववर्तिनः कवेः परवर्तिनि प्रभावं पुष्णाति । कुमारसम्भवस्य विक्रमाङ्कदेवचरितस्य वक्ष्यमाणपद्यैश्च प्रत्यक्षरूपेणाथवाऽप्रत्यक्षरूपेण बिल्हणे कालिदासस्य प्रभावः स्वीकरणीय एव । ओष्ठवर्णनप्रङ्गे यथा—

> पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
> ततोऽनुकुर्याद्विशदस्य तस्य ताम्रौष्ठपर्यस्तरुचः स्मितस्य[3] ॥
> सन्ततोदयसन्ध्येव वदनेन्दोरनिन्दिता ।
> तदोष्ठमुद्रालावण्यसमुद्रस्यैव विद्रुमः[4] ॥

उभयत्र हि ओष्ठयोः विद्रुमेण उपमानात्साम्यावलोकनात् कालिदासस्य बिल्हणे प्रभावो वरीवर्ति । अन्योऽन्योत्पीडयमानस्तनवर्णने बिल्हणे कालिदासप्रभावस्योदाहरणम्—

> अन्योऽन्यमुत्पीडयदुत्पलाक्ष्यास्स्तनद्वयं पाण्डु तथा प्रवृद्धम् ।
> मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम्[5] ॥
> मुखेन्दुचन्द्रिकापूरप्लाव्यमानौ पुनः पुनः ।
> शीतभीताविवाऽन्योऽन्यं तस्याः पीडयतः स्तनौ[6] ॥

अत्र हि स्तनद्वयोरन्योन्योत्पीडने साम्येनोक्तभावस्य पुष्टिस्सञ्जायते । कण्ठरवमाधुर्यवर्णनमवलोक्यापि बिल्हणे कालिदासस्य प्रभावः प्रतीयते । इदमत्रोदाहरणम्—

---

१. कुमार० १।३९ ।
२. विक्र० ८।३५ ।
३. कुमार० १।४४ ।
४. विक्र० ८।६६ ।
५. कुमार० १।४० ।
६. विक्र० ८।४७ ।

स्वरेण तस्याममृतस्रुतेव प्रजल्पितायामभिजातवाचि ।
अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितन्त्रीरिव ताड्यमाना[1] ॥
श्रोत्रपीयूषगण्डूषैः काकलीकलगीतिभिः ।
कण्ठः कुण्ठितचातुर्यो विपञ्चीपञ्चमध्वनेः[2] ॥

यद्यप्युक्तपद्ययोः परस्परं किञ्चिद्वर्णनभेदो वर्तते, तर्हि अपि कालिदासीय-पद्यस्य बिल्हणपद्ये नास्ति कोऽपि प्रभाव इति कथनं युक्तियुक्तं न भवितुमर्हति। एकत्र सौन्दर्यदिदृक्षया ब्रह्मणा नायिकासृष्टिवर्णनं कुमारसम्भवे विक्रमाङ्कदेव-चरिते च महत्साम्यमावहति । तद्यथा कुमारसम्भवे --

सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयैव[3] ॥

विक्रमाङ्कदेवचरिते च—

वक्त्रं निर्मलमुन्नता कुचतटी मध्यप्रदेशः कृशः
श्रोणिमण्डलमङ्गनाकुलगुरोर्देवस्य सिंहासनम् ।
कृत्वा चारुदृशश्चतुष्टयमिदं तुष्टाव मन्ये विधिः
हर्षाद्गद्गदगद्यपद्यरचनागर्भैश्चतुर्भिर्मुखैः[4] ॥

उक्तपद्यद्वयस्य सूक्ष्मसमीक्षणेन इत्थं प्रतीयते यथा बिल्हणस्य पद्यं कालिदास-पद्यस्य व्याख्यारूपेण निर्मितं स्यात् । यतो हि कालिदासपद्ये केवलं सर्वोपमा-द्रव्यसमुच्चयस्य यथाप्रदेशं विनिवेशः, एवञ्च एकस्थसौन्दर्यदिदृक्षैव प्रतिपादिता, परं बिल्हणपद्ये यथाप्रदेशं विनिवेशितानां नायिकाङ्गानां नामतो निर्देशः एवञ्च एकस्थसौन्दर्यं दृष्टवतो वेधसो महान् सन्तोषश्चापि वर्णितः। उक्तकारणाद् बिल्हणपद्यं कालिदासपद्यस्य व्याख्यानं चेदुच्येत मन्मत्या न तर्हि तत्र काप्यत्युक्तिः । उक्तसन्दर्भान्तर्गते पार्वतीचन्दलदेव्योः सौन्दर्यवर्णनप्रसङ्गे केषा-ञ्चित्पद्यानामाधारे यद्यपि मया बिल्हणे कालिदासप्रभावपुष्ट्यै प्रयत्नोऽकारि, तर्हि अपि सौन्दर्यवर्णनप्रसङ्गे विक्रमाङ्कदेवचरिते बिल्हणस्य मौलिकता न सन्दिग्धा । यतो हि चन्द्रलेखासौन्दर्यं विक्रमाङ्कदेवचरितस्य सम्पूर्णे सर्गे नव-सप्ततिसंख्याकैः पद्यैर्वर्णितम् । पार्वतीसौन्दर्यन्तु कालिदासेन केवलं सप्तदशभिः

१. कुमार० १।४५ ।
२. विक्र० ८।५३ ।
३. कुमार० १।४९ ।
४. विक्र० ८।८८ ।

पद्यैर्वर्णितम् । बिल्हणस्य यानि पद्यानि सन्दर्भेऽस्मिन्नुपन्यस्तानि तेषु कालिदास-प्रभावे सत्यपि बिल्हणस्य मौलिकप्रतिभाया दर्शनं न भवतीति न वक्तुं शक्यते ।

इन्द्रस्य ब्रह्मणोऽन्तिकगमनम्, तत्र च धर्मद्रुहां निवारणायावार्यवीर्यवीर-स्योत्पत्तयेऽभ्यर्थनमपि कुमारसम्भवद्वितीयसर्गस्थेन्द्रस्य ब्रह्मणोऽन्तिकगमनोदन्त-प्रेरितमेवास्तीति कथनं न युक्तियुक्तमिति न कथयितुं शक्यते । यतो हि उक्त-सन्दर्भसम्बन्धिनोर्निर्देक्ष्यमाणपद्ययोराशये न विशेषभेदः ।

तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये ।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः[1] ॥

धर्मद्रुहामत्र निवारणाय कार्यस्त्वया कश्चिदवार्यवीर्यः ।
रवेरिवांशुप्रसरेण यस्य वंशेन सुस्थाः ककुभः क्रियन्ते[2] ॥

त्रैलोक्यसम्मोहनविद्ययेव तया जयास्थां महतीं दधानः ।
तां धन्विनां धुर्यमपि प्रहर्तुं विलासधन्वा धनुराचकर्ष[3] ॥

धनुर्धरधुरन्धरेऽपि विक्रमाङ्के चन्द्रलेखया विजयाशामादधानस्य स्मरस्य धनु-राकर्षणवर्णने कुमारसम्भवस्य पद्यार्थद्वयच्छाया दृष्टिगोचरीभवति ।[4]

कुमारसम्भवमहाकाव्ये कालिदासीयसन्ध्यावर्णनस्य केषाञ्चिद् भावानां छाया बिल्हणीयसन्ध्यावर्णनस्थलेषु अवलोकयितुं शक्यते । यया रीत्या कालि-दासः सन्ध्यावर्णनप्रसङ्गे चक्रवाकदम्पतीदुःखं वर्णयामास, सैव रीतिः बिल्हणस्य विक्रमाङ्कदेवचरितेऽपि उपलभ्यते[5], अस्तङ्गच्छतः सूर्यस्य धाम दीर्घ-

---

१. कुमार० २।५१ ।
२. विक्र० १।४५ ।
३. विक्र० ९ । ५ ।
४. कुर्यां हरस्यापि पिनाकपाणेः धैर्यच्युतिं के मम धन्विनोऽन्ये ।
कुमार० ३।२ ।

एवञ्च—
उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श । कुमार० ३।६४ ।

५. दष्टतामरसकेसरस्रजोः क्रन्दतोर्विपरिवृत्तकण्ठयोः ।
निघ्नयोः सरसि चक्रवाकयोरल्पमन्तरमनल्पतां गतम् ॥
कुमार ८।३२ ।

चञ्चुसम्पुटगृहीतमृणालग्रन्थिसूत्रनिवहेन रथाङ्गः ।
विप्रयोगभयतो दयितायाः कण्ठपाशमिव कर्तुमियेष ॥

पादपशिखासु, गिरीणां मस्तकेषु गृहाणां शिखरेषु च दग्धकालवशतः शतखण्डं बभूव। बिल्हणेन वक्ष्यमाणपद्ये व्यक्ते उक्तभावे कालिदासवर्णितकुमारसम्भवीयसन्ध्यावर्णनान्तर्गतपद्यैकस्य प्रभावः सुस्पष्टं परिलक्ष्यते। बिल्हणीयं पद्यम्—

दीर्घपादपशिखासु गिरीणां मस्तकेषु शिखरेषु गृहाणाम्।
दग्धकालवशतः शतखण्डं धाम चण्डकिरणस्य बभूव[1]॥

कालिदासपद्यम्—

सिंहकेसरसटासु भूभृतां पल्लवप्रसविषु द्रुमेषु च।
पश्य धातुशिखरेषु भानुना संविभक्तमिव सान्ध्यमातपम्[2]॥

चन्द्रोदयवर्णनप्रसङ्गेऽपि बिल्हणकालिदासयोः साम्यं दृग्गोचरीभवति।

केतकपरागवच्चन्द्रमसश्चन्द्रिका पूर्वदिग्विभागे व्याप्तेति वर्णनं कुमारसम्भवे विक्रमाङ्कदेवचरिते च समानरूपेण वर्णितमुपलभ्यते। तदित्थम्—

नूनमुन्नमति यज्वनां पतिः शार्वरस्य तमसो निषिद्धये।
पुण्डरीकमुखि पूर्वदिङ्मुखं केतकैरिव रजोभिराहतम्[3]॥

प्रौढकेतकपरागविपाण्डु ज्योतिरत्र समये भ्रमति स्म।
नाकनायकनिकेतचकोरी पीतशेषमटवीमुदयाद्रेः[4]॥

उन्नतस्थलेषु चन्द्रमसश्चन्द्रिकाया निम्नस्थलेषु च तमसः स्थितिरपि प्रायः समानरूपेणैवोभयत्र वर्णिता। कुमारसम्भवे—

उन्नतेषु शशिनः प्रभा स्थिता निम्नसंश्रयपरं निशातमः।
नूनमात्मसदृशा प्रकल्पिता वेधसा हि गुणदोषयोर्गतिः[5]॥

क्रन्दति स्म न विवेद मृणालीं चञ्चुसम्पुटगतां लुठति स्म।
वल्लभाविरहहालहलेन व्याकुलः किमकरोन्न रथाङ्गः॥
विक्र० ११।५, ६।

१. विक्र० ११।७।
२. कुमार० ८।४६।
३. कुमार० ८।५८।
४. विक्र० ११।२७।
५. कुमार० ८।६६।

विक्रमाङ्कदेवचरिते च—

नीलतालफलपङ्क्तिसनाथा प्राच्यशैलवनभूमिरराजत् ।
निम्नया शशिकरैरुपगूढा ध्वान्तमस्तकपरम्परयैव[1] ॥

यथा कुमारसम्भवे नायको नायिकामुद्दिश्य सन्ध्यावर्णने सूर्यास्तवर्णनं चन्द्रोदयवर्णनञ्च करोति तथैव विक्रमाङ्कदेवचरिते नायको नायिकामुद्दिश्य वर्षावर्णनं करोति[2] ।

यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किम्पुरुषाङ्गनानाम् ।
दरीगृहद्वारविलम्बिबिम्बास्तिरस्करिण्यो जलदा भवन्ति[3] ॥

उक्तकालिदासप्रभावस्य वक्ष्यमाणबिल्हणभावेन सह साम्याधिक्याद्बिल्हणे कालिदासप्रभावस्य प्रामाणिकत्वं सिध्यति ।

स्मरातुराणां विदधासि दुर्दिनं प्रियाभिसाराय कुरङ्गचक्षुषाम् ।
रतोत्सवे काण्डपटत्वमेषि च त्वमग्रणीर्मेघ परोपकारिणाम्[4] ॥

उक्तपद्ययो रतोत्सवे मेघस्य काण्डपटत्वकार्ये महद्भावसाम्यं दृश्यते ।

कुमारसम्भवे कालिदासेन यथा गुहासु दिवाभीतस्यान्धकारस्य संरक्षणं[5] वर्णितं तथैव बिल्हणेन शीतर्तुभीतस्य समीरस्य चन्दनाद्रिगुहासु संरक्षणं वर्णितम्[6] । कालिदासबिल्हणाभ्यां समानरूपेण भ्रमरावलेरक्षरोपमानत्वेन प्रयोगः कृतः । कुमारसम्भवे—

---

१. विक्र० ११।३३ ।

२. कुमार० ८।३; विक्र० १३।९ ।

३. कुमार० १।१४ ।

४. विक्र० १३।७१ ।

५. दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ॥
कुमार० १।१२ ।

६. शीतर्तुभीत्या विविशुः समस्ताः किं कन्दरासीमनि चन्दनाद्रेः ।
यन्निःसरन्ति स्म हिमव्यपाये दिवा च रात्रौ च ततः समीराः ॥
विक्र० ७।४ ।

सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे ।
निवेशयामास मधुर्द्विरेफान् नामाक्षराणीव मनोभवस्य[1] ॥

विक्रमाङ्कदेवचरिते च—

सङ्क्रान्तभृङ्गीपदपङ्क्तिमुद्रं पौष्पं रजः क्ष्माफलके रराज ।
क्रमाल्लिपिज्ञानकृतक्षणस्य क्षुण्णं मधोरक्षरमालयेव[2] ॥

अत्र हि एकत्र मनोभवस्य नामाक्षराण्यन्यत्र च तस्य लिपिज्ञानाक्षराणीत्येव केवलं भेदः। अशोकपादपः कुसुमप्रसूतये नारीपादतलप्रहारमपेक्षते इति कविप्रसिद्धेरुभयत्र कुमारसम्भवे[3] विक्रमाङ्कदेवचरिते[4] च समावेशः समवलोक्यते। येषु स्थलेषु बिल्हणेन कालिदासशैल्या भावानाञ्चानुसरणं कृतं तेषु स्थलेषु कियान् परिवर्तनप्रयत्नोऽपि कृतः। यथा—

चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज ।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य[5] ॥

पुंस्कोकिलकूजनेन मनस्विनीमानविघातादिभावः कालिदासेन उक्तपद्ये प्रकटितः। असावेव भावो बिल्हणेनापि स्वीयकाव्येऽनुसृतः, परं तत्र तेन मानविघातहेतोः कोकिलकूजनस्य स्थाने दक्षिणानिलस्य हेतुत्वेन समावेशोऽकारि। इदमत्रोदाहरणम्—

मनस्विनीनां मनसोऽवतीर्य मानस्य वेगेन पलायितस्य ।
जीवग्रहायेव वसन्तमित्रं बभ्राम वायुः ककुभां मुखानि[6] ॥

एवमन्यत्र कोकिलकूजनमपि स्वल्पपरिवर्तनेन तत्कार्यहेतुत्वेनैव प्रयुक्तम् । तद्यथा—

---

१. कुमार० ३।२७।

२. विक्र० ७।३६।

३. असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि ।
पादेन नापैक्षत सुन्दरीणां सम्पर्कमासिञ्जितनूपुरेण ॥
कुमार० ३।२६।

४. अशोकशाखी निखिलद्रुमेषु धन्यस्त्वया पादतलाहतोऽयम् ।
तेषा प्रसन्नो हि विलासबाणः क्रीडन्ति दासैरिव यैर्मृगाक्ष्यः॥
विक्र० १०।२४।

५. कुमार० ३।३२।

६. विक्र० ७।४३।

वियोगिनीनामवशाल्लुलोठ कण्ठेषु लीलाकलपञ्चमो यः ।
तेनैव चक्रे मदनस्य कार्यं पुण्यैर्यशोऽभूत्पिकपञ्चमस्य[१] ॥

वसन्तर्तौ विलासिनीनां स्वेदोद्गमवर्णनञ्चापि पूर्वोक्तरीत्या स्वल्पपरिवर्तनेन बिल्हणेन कालिदासस्यानुसृतम्[२] । कुमारसम्भवे युद्धवर्णनप्रसङ्गे वीरकर-धृतकरवालानां चमत्कृतिवर्णनं यादृगस्ति, तादृगेव विक्रमाङ्कदेवचरितेऽप्युपलभ्यते[३] ।

विवाहार्थं समायातं हरं समीक्ष्यौषधिप्रस्थनारीणां विचेष्टितानि यथा कुमारसम्भवे कालिदासेन चित्रितानि तथैव बिल्हणेनापि विवाहानन्तरं चन्द्र-लेखया सह कल्याणं प्रविशन्तं विक्रमाङ्कं समालोक्य तत्रत्यनागरीणां विचेष्टि-तानि वर्णितानि विक्रमाङ्कदेवचरिते ।
कुमारसम्भवे—

तस्मिन्मुहूर्ते पुरसुन्दरीणामीशानसन्दर्शनलालसानाम् ।
प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि[४] ॥

विक्रमाङ्कदेवचरिते च—

अस्मिन्क्षणे कुन्तलपार्थिवस्य प्रवेशमाकर्ण्य पुराङ्गनानाम् ।
आसन्विलासव्रतदीक्षितानां स्मरोपदिष्टानि विचेष्टितानि[५] ॥

---

१. विक्र० ७।४४ ।

२. हिमव्यपाये विशदाधराणामापाण्डरीभूतमुखच्छवीनाम् ।
स्वेदोद्गमः किम्पुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु ॥
कुमार० ३।३३ ।
विलासिनीनां कुसुमोत्थरेणुकरम्बितस्वेदजलप्लुतानाम् ।
स्मरोष्मणा हेममयं शरीरं किञ्चिद्द्रवीभूतमिवाबभासे ॥
विक्र० १०।६० ।

३. खड्गा रुधिरसंलिप्ताश्चण्डांशुकरभास्कराः ।
इतस्ततोऽपि वीराणां विद्युतां वैभवं दधुः ॥ कुमार० १६।७ ।
महाभटानां करवालयष्टयः
समुच्छलद्वीररसोर्मिनिर्मलाः ।
विनिर्गताः कोशबिलोदरात्ततः
कृतान्तपाशोरगसन्निभा बभुः ॥ विक्र० १७।४५ ।

४. कुमार० ७।५६ ।

५. विक्र० १२।२ ।

अत्र हि भावसाम्येन सहैव 'तस्मिन्मुहूर्ते, अस्मिन्क्षणे' इत्यनयोः, 'पुरसुन्दरीणां, पुराङ्गनानाम्' इत्यनयोः, 'विचेष्टितानि, विचेष्टितानि' इत्यनयोश्च शब्दार्थ-साम्यमपि वर्तते । अस्मिन्नेव प्रसङ्गे राजदर्शनोत्सुकाभिः पुराङ्गनाभिः पादतल-स्थयावकेन मार्गाङ्कनवर्णनं यद्विक्रमाङ्कदेवचरितेऽस्ति तदपि कुमारसम्भवीयेन एकेन पद्येन साम्यमावहति । तद्यथा कुमारसम्भवे—

प्रसाधिकाऽऽलम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान[1] ॥

विक्रमाङ्कदेवचरितेऽपि—

नृपान्तिकप्राप्तिकृतोपकारे मार्गेऽवकीर्णे पदयावकाङ्कैः ।
प्रतिक्षणं कापि मृगायताक्षी पूजामिवाम्भोजदलैश्चकार[2] ॥

अत्र हि अलक्तकयावकयोः परस्परं पर्यायत्वेन साम्यम्—

प्रयासि हारत्रुटिमप्युपेक्ष्य भ्रष्टोत्तरीयापि न तिष्ठसि त्वम् ।
ध्रुवं प्रधावस्यवधीरणेन परिच्युतस्याधरवाससोऽपि[3] ॥

उक्तपद्योक्तराजावलोकनोत्सुकानां नागरीणां परिच्युतस्याधरवाससोप्यनवधानता याऽवलोक्यते, तस्यामपि कालिदासपद्यस्य प्रभावः दृग्गोचरीभवति—

जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः[4] ॥

यतो हि अत्रत्याधोवस्त्रस्य नीवेः प्रस्थानभिन्नत्वेन उक्तेन बिल्हणपद्येन साम्य-मवलोक्यते । कुमारसम्भवस्य मदनदहनप्रसङ्गस्यापि[5] विक्रमाङ्कदेवस्य बहुषु स्थलेषु[6] अवलोकनेन कुमारसम्भवप्रभावस्य पुष्टिर्भवति ।

संस्कृतकाव्यालोचकैः कालिदासग्रन्थानां यदुत्तरोत्तरं क्रमनिर्धारणमकारि, तस्मिन् प्रौढिप्रकर्षदृष्ट्या रघुवंशकुमारसम्भवयोरेव क्रमशः शीर्षस्थाने निश्चिते स्तः । काव्यमर्मज्ञेन बिल्हणेन तत्क्रमः पुरैव (ईस्वीयैकादशशताब्द्याम्) निश्चित आसीत् । यतो हि तेन रघुवंशकुमारसम्भवाभ्यामेवाधिक्येन दायाद्यमग्राहि ।

१. कुमार० ७।५८ ।
२. विक्र० १२।१७ ।
३. विक्र० १२।२३ ।
४. कुमार० ७।६० ।
५. कुमार० ३।७२ ।
६. विक्र० १८।१३ ।

कालिदासस्याभिज्ञानशाकुन्तलमालविकाग्निमित्रमेघदूतादीनामपि प्रभावो वर्तते विक्रमाङ्कदेवचरिते। परम् उक्तग्रन्थभावानां छाया विक्रमाङ्कदेवचरितस्य केषुचित्स्वल्पेष्वेव स्थलेषु दृश्यते, न हि रघुवंशकुमारसम्भवभावानामिव बहुपु स्थलेषु।

मालविकाग्निमित्रप्रभावः—

प्राचीनार्वाचीनकाव्यानां साधुवादविषये कालिदासस्य यादृशी विचारणास्ति तादृश्येव विचारणा बिल्हणस्यापि अस्मिन् विषये परिलक्ष्यते।

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः[1] ॥

उक्तकालिदासधारणां बिल्हणो वक्ष्यमाणपद्ये अनुसृतवान्—

प्रौढिप्रकर्षेण पुराणरीतिव्यतिक्रमः श्लाघ्यतमः पदानाम्।
अत्युन्नतस्फोटितकञ्चुकानि वन्द्यानि कान्ताकुचमण्डलानि[2] ॥

उक्तपद्ययोः प्राचीनकाव्यस्यैव श्रेष्ठतास्वीकरणे कालिदासबिल्हणविचारेषु सादृश्यावलोकनान्मालविकाग्निमित्रस्यापि विक्रमाङ्कदेवचरिते प्रभावः स्वीकर्तव्य एव। अभिज्ञानशाकुन्तलमालविकाग्निमित्रादीनां दृश्यकाव्यत्वकारणान्न तादृशः प्रभावः विक्रमाङ्कदेवचरिते यादृशः रघुवंशकुमारसम्भवयोरस्ति।

अभिज्ञानशाकुन्तलप्रभावः—

उड्डीय केऽपि निबिडीकृतचापदण्डे
चालुक्यभुभूजि गता गगनं कुरङ्गाः।
सप्तर्षिमण्डलसमीपमिव प्रविश्य
निर्बाधमाश्रममृगत्वमवाप्तुकामाः[3] ॥

विक्रमाङ्कदेवचरितोक्तपद्यावलोकनेन महाकविकालिदासस्य अभिज्ञानशाकुन्तलस्य तद्दृश्यं नयनपथमवतरति, यस्मिन् मृगयुः दुष्यन्त आश्रममृगं मृगयामृगोऽयमिति मत्वा महता वेगवता रथेनानुसरति। मृगोऽपि आत्मरक्षार्थं महता जवेनाश्रममभिधावति। ततश्च कोऽपि वैखानसः अभिधत्ते—राजन्! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः—

---

१. मालविकाग्निमित्रम् १।२।

२. विक्र० १।१५।

३. विक्र० १६।४१।

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ।
क्व बत हरिणकानां जीवितञ्चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते[1] ॥

शाकुन्तलस्थेन अनेन सन्दर्भेण बिल्हणभावस्य सादृश्याद्बिल्हणे शाकुन्तल-प्रभावस्य चर्चा न निराधारा ।

"सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः"[2]

उक्तशाकुन्तलोक्तौ सन्देहपदेषु वस्तुष्वन्तःकरणप्रवृत्तीनां प्रामाण्येन तेषां बलवत्ता यत्कालिदासेन स्वीकृता तस्य रूपान्तरं बिल्हणेनापि विक्रमाङ्कदेवचरिते स्वीकृतम्—

शुभाऽशुभानि वस्तूनि सम्मुखानि शरीरिणाम् ।
प्रतिबिम्बमिवायान्ति पूर्वमेवान्तरात्मनि[3] ॥

उभयत्रान्तरात्मन एव प्रभावप्रामाण्यस्य प्रयोजनत्वात्सादृश्यं न निर्हेतुकम् ।

जातः पापरतः कैश्चिद्दिनैः सोमेश्वरस्ततः ।
एषा भगवती केन भज्यते भवितव्यता[4] ॥

भवितव्यताया अवश्यम्भाविताविषये बिल्हणस्य इयमुक्तिः कालिदासस्यानयोक्त्या प्रभाविता प्रतीयते—

"...भवितव्यानां द्वाराणि भवन्ति सर्वत्र"[5]

अभिज्ञानशाकुन्तले भ्रमरस्य शकुन्तलायामाक्रमणं यत्कालिदासेन वर्णितं तस्य प्रभावो विक्रमाङ्कदेवचरितस्य पद्यद्वयेऽवलोक्यते । तद्यथाभिज्ञानशाकुन्तले—

शकुन्तला—अम्मो सलिलसेकसम्भ्रमोद्गतो नवमालिकामुज्झित्वा वदनं मे मधुकरोऽभिवर्तते (इति भ्रमरबाधां रूपयति)

राजा—(सस्पृहम्)—

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदुकर्णान्तिकचरः ।

---

१. शाकुन्तलम् १।१० ।
२. शाकुन्तलम् १।२१ ।
३. विक्र० ४।३४ ।
४. विक्र० ४।६७ ।
५. शाकुन्तलम् १।१६ ।

करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु[1] कृती ॥

शकुन्तला—न एष दुष्टो विरमति, अन्यतो गमिष्यामि ।
अयमेव भावो विक्रमाङ्कदेवचरितेऽपि—

काचित्क्षिपन्ती मधुपं विशन्तमितस्ततः पाणिसरोरुहेण ।
बाल्ये कृतं कन्दुकताडनेषु श्रमं मृगाक्षी बहु मन्यते स्म[2] ॥
क्षिप्तो मुखात्षट्चरणस्तरुण्या विवेश हस्ताम्बुजकोशमस्याः ।
तस्माद्विधूतः मुखमाजगाम लज्जा कुतः स्वार्थपरायणानाम्[3] ॥

उभयत्रापि भ्रमरविचेष्टितानि समानानि । वक्ष्यमाणपद्ये शकुन्तलानुरक्तो दुष्यन्तस्तां समीक्ष्यानुरागवशात्तस्या वीक्षणादीनि विचेष्टितानि निजानुकूलानि मन्यते ।

स्निग्धं वीक्षितमन्यतोऽपि नयने यत्प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्वं तत्किल मत्परायणमहो कामी स्वतां पश्यति[4] ॥

उक्तरीत्यैव चन्द्रलेखानुरक्तो विक्रमादित्यदेवोऽपि तस्या वीक्षणादीनि विचेष्टितानि स्वानुकूलानि मन्यते—

इयं मयि न्यस्यति नेत्रमालां मुहुः सखीनां किमपि ब्रुवाणा ।
सत्यैव साभूदनुरागवार्ता चिरात्प्रसन्नो भगवाननङ्गः[5] ॥

उक्तपद्यद्वयमाधारीकृत्यापि विक्रमाङ्कदेवचरितेऽभिज्ञानशाकुन्तलस्य प्रभावोऽस्तीति वक्तुं शक्यते ।

मेघदूतप्रभावः—

मेघदूतस्यच्छाया विक्रमाङ्कदेवचरिते दरीदृश्यते । मेघदूतस्यास्मिन् पद्ये—

---

१. शाकुन्तलम् १।२२ ।
२. विक्र० १०।६१ ।
३. विक्र० १०।६२ ।
४. शाकुन्तलम् २।२ ।
५. विक्र० ९।७३ ।

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श[1] ॥

प्रियावियुक्तयक्षमाध्यमेन कालिदासेन आषाढस्य प्रथमदिवसे मेघदर्शनस्य या कल्पनाऽकारि तामाधारीकृत्यैव बिल्हणेन नायकविक्रमाङ्कदेवेन मेघदर्शनस्य कल्पना कृतास्ति—

अपश्यदस्मिन्समये महीपतिः पयोदखण्डं मिलितार्कमण्डलम् ।
सकुण्डलं वारिमुचामनेहसः कुतोऽपि मूर्धानमिवार्धनिर्गतम्[2] ॥

उभयोः पद्ययोर्मेघदर्शनकल्पना समानैव परन्तु विक्रमाङ्कदेवचरिते नायकः प्रियामेव मेघस्वरूपं दर्शयति, मेघदूतनायकस्तु प्रियावियुक्तोऽस्ति, केवलमयमेव द्वयोर्भेदः। यद्यपि बिल्हणकल्पनायां मेघस्य स्वरूपं कालिदासमेघस्वरूपात् किञ्चित्परिस्फुटं तर्हि अपि मेघदर्शनस्य कल्पनायाः प्रेरणास्रोतस्तु मेघदूत एव भवितुमर्हति। मेघः वियोगिनां दूतकर्म कुरुते इति मेघदूते मुख्यभावस्य विक्रमाङ्कदेवचरितपद्ये दर्शनादपि मेघदूतस्य विक्रमाङ्कदेवचरिते प्रभावः पुष्यति।

वियोगिनां सङ्घटने भवत्समः परोऽस्ति जीमूत न दूतकर्मणि ।
वदन्ति नान्यैः सह याः कुलस्त्रियो ध्रुवं तदर्थं वहसि क्षणप्रभाम्[3] ॥

मेघं सम्बोध्य विभिन्नप्रकाराणां कल्पनानां सृष्टेरवलोकनात् विक्रमाङ्कदेवचरिते मेघदूतस्यांशतः प्रभावस्स्वीकरणीय एव।

विद्धशालभञ्जिकाप्रभावः—

विक्रमाङ्कदेवचरिते राजशेखरस्य विद्धशालभञ्जिकानाटिकायाञ्चापि केषुचित्स्थलेषु किञ्चित्साम्यमवलोक्य राजशेखरस्य बिल्हणे प्रभावोऽस्तीति कथयितुं शक्यत एव। तथा हि राजशेखरस्यवक्ष्यमाणपद्यस्य बिल्हणस्य कतिपयपद्येषु प्रभावः स्पष्टं दृक्पथमवतरति—

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः[4] ॥

---

१. मेघदूतम् १।२।
२. विक्र० १३।१५।
३. विक्र० १३।६६।
४. विद्धशालभञ्जिका १।२।

यस्य भ्राम्यद्भ्रमरपटलश्यामकेलिद्रुमाणा-
मारामाणामविरलतया कोप्यसौ सन्निवेशः ।
यस्मिन्रामाः कुसुमधनुषं दृग्भिरुन्मार्गभर्ग-
क्रोधज्वालाकिसलयचये सुप्तमुत्थापयन्ति[1] ॥

निर्दिष्टयोरुभयोरेव पद्ययोर्महादेवस्य क्रोधाऽग्निना भस्मीभूतस्य स्मरस्य रामादृग्भिरुत्थापनरूपेण समानभावसन्निवेशेन विक्रमाङ्कदेवचरिते विद्धशालभञ्जिकाप्रभावस्य प्रामाणिकत्वं सङ्गच्छते । प्रभातवर्णनप्रसङ्गेषु मानिनीनां मानग्रहविग्रहः पूर्वन्तूपायादिभिरपि न जायते पश्चाच्च (प्रभाते) विनैवोपायेन तत्सम्भवः समानरूपेणोभयत्र वर्णितः । विद्धशालभञ्जिकायां यथा—

मानो यासां खण्डितः शशिकरोत्करेण विस्तारिणा
हुङ्कारा न च पञ्चमस्यापि चिरं यासु स्थिताः कुण्ठिताः ।
प्रत्यूषानिललोलनेन ललनामुक्त्वा न मानग्रहं
चूडाचुम्बितवल्लभाग्रचरणा वर्तन्ते हि ताः साम्प्रतम्[2] ॥

विक्रमाङ्कदेवचरितेऽपि—

ये कुण्ठीकृतवल्लभप्रणतयः शास्त्रैरनङ्गस्य ये
न प्राप्ताश्च निशीथिनीपतिकरैः शैथिल्यवीथीमपि ।
ते निशङ्कविटङ्कतालुतुमुलप्रोतप्लुतप्लावितैः
छिन्नाः कुक्कुटकूजितैः मृगदृशां मानग्रहग्रन्थयः[3] ॥

बिल्हणेन विद्धशालभञ्जिकाभावोऽर्थवैपरीत्येनेत्थमङ्गीकृतः—

बाणाः श्वेतमयूखशाणकषणक्षुण्णाः क्षणात्कुण्ठतां
यातास्त्यक्तनयासु यासु निहिताः पञ्चापि पञ्चेषुणा ।
उत्तंसोत्पलपल्लवेऽपि पतिते दैवात्पुरः पादयोः
कण्ठाश्लेषकठोरकौतुकरसास्तिष्ठन्ति ताः कामिनाम्[4] ॥

विद्धशालभञ्जिकापद्ये कामिनीनां वल्लभपादयोः पतनं विक्रमाङ्कदेवचरितपद्ये च कामिनां वल्लभापादयोः पतनमेवार्थवैपरीत्यं वर्तते । वक्ष्यमाणविद्धशाल-

---

१. विक्र० १८।१३ ।

२. विद्धशालभञ्जिका १।१० ।

३. विक्र० ११।८३ ।

४. विक्र० ११।६० ।

भञ्जिकापद्यस्य भावा विक्रमाङ्कदेवचरितस्य पृथक् पृथक् पद्यानां पृथक् पृथक् चरणेषु दृष्टिगोचरीभवन्ति । विद्धशालभञ्जिकापद्यम्—

भिन्दानः सुन्दरीणां पतिषु रुषमयं हर्म्यपारावतेभ्यो
वाचालत्वं दधानः कवियितृषु गुणं प्रातिभं सन्दधानः ॥
प्रातःस्त्यस्तूर्यनादः स्थगयति गगनं मांसलः पांसुतल्पा-
दस्वल्पादुत्थितानां नरवरकरिणां शृङ्खलाशिञ्जितेन[1] ॥

उक्तपद्यस्य प्रथमचरणस्य प्रतिबिम्बमस्मिन् पद्यभागे दृश्यते—

"छिन्ना कुक्कुटकूजितैर्मृगदृशां मानग्रहग्रन्थयः[2] ।"

द्वितीयचरणस्य चास्मिन् पद्यभागे प्रतिबिम्बं वर्तते—

स्फुरति निरुपमोऽर्थस्तन्वते पाकमुद्रा-
परिचयमकवीनामप्यकाण्डे वचांसि[3] ॥

चतुर्थचरणस्य प्रतिविम्बमवलोक्यते वक्ष्यमाणपद्यांशे—

उन्मीलत्क्रमशृङ्खलाकलकलप्रेङ्खोलखेलैः पदै-
रुत्तिष्ठन्ति परागपुञ्जशयनात्स्वत्कुञ्जराग्रेसराः[4] ॥

वक्ष्यमाणसन्दर्भयोर्विरहिणीनां विरहश्वासैर्मलयमरुतः (दक्षिणवायोः) मांसलीकरणवर्णनसाम्यमपि विद्धशालभञ्जिकायाः विक्रमाङ्कदेवचरिते प्रभावं समर्थयति । विद्धशालभञ्जिकापद्ये यथा—

सुरतभरखिन्नपन्नगविलासिनीपानकेलिजर्जरितः ।
पुनरपि विरहश्वासैर्मलयमरुन्मांसलीक्रियते[5] ॥

विक्रमाङ्कदेवचरितपद्ये च—

विरूक्षणीयः सखि दाक्षिणात्यस्त्वया न वायुः परुषैर्वचोभिः ।
यत्कोपनिश्वासपरम्पराभिः पीनत्वमायात्ययमुष्णताञ्च[6] ॥

---

१. विद्धशालभञ्जिका १।१२ ।
२. विक्र० ११।८३ ।
३. विक्र० ११।८१ ।
४. विक्र० ११।८२ ।
५. विद्धशालभञ्जिका १।२८ ।
६. विक्र० ७।६ ।

धर्मशर्माभ्युदयप्रभावः—

हरिश्चन्द्रकृतेन धर्मशर्माभ्युदयेन सह विक्रमाङ्कदेवचरितस्य कतिपयस्थलानां साम्यमवलोक्य तस्यापि महाकाव्येऽस्मिन्प्रभावः स्वीक्रियते। चेतःकषपट्टिकासु लेखसमर्पणेन परीक्षितं काव्यरूपं सुवर्णलोकस्य भूषणं भवत्विति भाव उभयत्र समानरूपेण वर्णितः। धर्मशर्माभ्युदये—

> **दक्षैः साधुपरीक्षितं नवनवोल्लेखार्पणेनादराद्**
> **यच्चेतःकषपट्टिकासु शतशः प्राप्तप्रकर्षोदयम्।**
> **नानाभङ्गिविचित्रभावघटनासौभाग्यशोभास्पदं**
> **तन्नः काव्यसुवर्णमस्तु कृतिनां कर्णद्वयीभूषणम्[1]॥**

विक्रमाङ्कदेवचरिते च—

> **अलौकिकोल्लेखसमर्पणेन विदग्धचेतःकषपट्टिकासु।**
> **परीक्षितं काव्यसुवर्णमेतल्लोकस्य कण्ठाभरणत्वमेतु[2]॥**

अत्र हि भावसाम्येन सहैव चेतःकषपट्टिकासु, उल्लेखसमर्पणेन, परीक्षितम्, काव्यसुवर्णमित्यत्र च शब्दसाम्यमपि दृश्यते। नवनवोल्लेखस्थाने अलौकिकोल्लेख इति, नः स्थाने लोकस्य इति, चेतःकषपट्टिकासु इति स्थाने च विदग्धचेतःकषपट्टिकासु इति परिवर्तनेन उक्तभावे रमणीयतातिशय आधीयत बिल्हणेन।

> **एतां धनुर्यष्टिमिवैष मुष्टिग्राह्यैकमध्यां समवाप्य तन्वीम्।**
> **नृपानशेषानपि लाघवेन तुल्यं मनोभूरिषुभिर्जघान[3]॥**

नायिकाया मध्यभागस्य मुष्टिग्राह्यत्वात्कन्दर्पेण तत्कार्मुकीकरणं यदत्र पद्ये वर्तते तदेव बिल्हणेनास्त्यनुसृतम्—

> **युक्तं मध्ये कृशा तन्वी कार्मुकीकरणाय यत्।**
> **अत्रैव कुसुमास्त्रेण पीड्यते श्लिष्टमुष्टिना[4]॥**
> **स्तुत्वा दिने रात्रिमहश्च रात्रौ स्तौति स्म सा पूर्वमपूर्वतापात्।**
> **सम्प्रत्यहो वाञ्छति तत्र तन्वी स्थातुं न यत्रास्ति दिनं न रात्रिः[5]॥**

---

१. धर्मशर्माभ्युदये—कविप्रशस्तौ ८।

२. विक्र० १।२४।

३. ध० श०।

४. विक्र० ८।३६।

५. ध० श० १४।७०।

इह हि मदनपीडितानां दिने रात्रिप्रशंसा रात्रौ च दिनप्रशंसा तदनु च रात्रिदिनरहितस्थले निवासवाञ्छावर्णनं यदस्ति, तस्य प्रभावो विक्रमाङ्कदेवचरितस्यास्मिन् पद्येऽवलोक्यते—

गृह्णन्गुणानह्नि विभावरीणां दिनप्रशंसां विदधन्निशासु ।
क्रमादसौ तां क्षितिमाचकाङ्क्ष यत्र द्वयं नास्ति दिनं निशा च[1] ॥

ओषधिभिर्वशीकरणं कार्मणमुच्यते[2] । धर्मशर्माभ्युदये विक्रमाङ्कदेवचरिते च समानरूपेण कार्मणशब्दप्रयोगोऽवलोक्यते[3] । रसध्वनेरध्वनः श्रेष्ठत्वस्योभयत्र स्वीकृतत्वादपि तयोरन्योऽन्यमुपजीव्योपजीवकभावोऽस्तीति निश्चीयते ।

दोषानुरक्तस्य खलस्य कस्याप्युलूकपोतस्य च को विशेषः ।
अह्नीव सत्कान्तिमति प्रबन्धे मलीमसं केवलमीक्षते यः[4] ॥

अस्मिन्पद्ये दोषान्वेषणात्मकः खलस्य स्वभावो यदस्ति बिल्हणेनासौ वक्ष्यमाणपद्येऽनुसृतः—

कर्णामृतं सूक्तिरसं विमुच्य दोषे प्रयत्नः सुमहान् खलानाम् ।
निरीक्षते केलिवनं प्रविष्टः क्रमेलकः कण्टकजालमेव[5] ॥

स्वकीयं काव्यमसारमिति कथयित्वा नृपतेश्चरित्रैस्तदीयमान्यताभिधानात्मको भावः काव्यद्वये समानरूपेण वर्णितोऽवलोक्यते । धर्मशर्माभ्युदये—

एष्यत्यसाररसकाव्यमिदं मदीय-
मादेयतां जिनपतेरनघैश्चरित्रैः ।

---

१. विक्र० ६।४ ।
२. मूलैरोषधिभिर्यद्वशीकरणं तत्कर्मैव कार्मणम् । क्षीरस्वामी ।
३. ताम्यति स्म सुरते न कथञ्चित्प्रेमकार्मणवशेव कृशाङ्गी ।
ध० श० १५।५६ ।
शृङ्गारभूवल्लभराजधानी जगन्मनःकार्मणमेकमेव ।
ध० श० १७।१२ ।
लावण्यमाणिक्यरुचिच्छटेयमियं मनःकार्मणचूर्णमुष्टिः—
विक्र० ६।६९ ।
करहाटपतेः पुत्री त्रिजगन्नेत्रकार्मणम्—विक्र० ८।२ ।
४. ध० श० १।२३ ।
५. विक्र० १।२९ ।

पिण्डं मृदः स्वयमुदस्य मुदा नरेन्द्र-
मुद्राङ्कितं किमु न मूर्धनि धारयन्ति[1] ॥

विक्रमाङ्कदेवचरिते च—

गिरां प्रवृत्तिर्मम नीरसापि मान्या भवित्री नृपतेश्चरित्रैः ।
के वा न शुष्कां मृदमभ्रसिन्धुसम्बन्धिनीं मूर्धनि धारयन्ति[2] ॥

किराताजुनीयप्रभावः—

यद्यपि संस्कृतसाहित्ये किरातार्जुनीयमपि समादृतं महाकाव्यं वर्तते, तथापि नास्ति किरातार्जुनीयस्य प्रभावविशेषः विक्रमाङ्कदेवचरिते । यतो हि विक्रमाङ्कदेवचरितस्य रचना कालिदासशैलीमाधारीकृत्य समभूत् । यद्यपि उभयोः शैलीदृष्ट्या पर्याप्तभेदो वरीवर्ति, तथापि केषुचित्स्थलेषु तयोर्भावसाम्यं दृश्यते । तद्भावसाम्यमपि आपाततः सञ्जातमिव प्रतीयते ।

इत्युदीर्य विरते विशारदे तत्र शारदमृगाङ्कनिर्मलः ।
नाम्यधत्त सहसा किमप्यसौ न त्वरां दधति धीरचेतसः[3] ॥

अस्मिन्पद्ये गूढचरनिवेदितानुजषड्यन्त्रमाकर्ण्य विक्रमः कामपि त्वरां न व्यधत्तेति पद्यस्य भावे वक्ष्यमाणकिरातार्जुनीयपद्यस्यच्छायाऽवलोक्यते—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः[4] ॥

महीयसाऽन्यसमुन्नतेरसहनरूपात्मके भावेऽपि साम्यमवलोक्य विक्रमाङ्कदेवचरिते किरातार्जुनीयप्रभावः कथयितुं शक्यते । तद्यथा किरातार्जुनीये—

किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया[5] ॥

विक्रमाङ्कदेवचरितेऽपि—

तेजस्विनामुन्नतिमुन्नतात्मा सेहे न बालोऽपि नरेन्द्रसूनुः ।
देवोऽपि भास्वाञ्छरणेच्छयेव समाश्रितो विष्णुपदं रराज[6] ॥

---

१. ध० श० ग्रन्थकर्तुः प्रशस्तिः, पद्यम् ७ ।
२. विक्र० १।२८ ।
३. विक्र० १४।१४ ।
४. किरातार्जुनीयम् २।३० ।
५. किरातार्जुनीयम् २।२१ ।
६. विक्र० ३।२३ ।

गुप्तचरेण गूढरहस्यनिवेदने[1] अर्धनारीश्वरशिवकथासङ्केते[2] एवञ्च अर्जुन-शिवमल्लयुद्धसङ्केते[3] अंशतः साम्यं भवितुमर्हति । परं न तद्विशेषमहत्त्वास्पदम् ।

शिशुपालवधप्रभावः—

किरातार्जुनीयस्येव शिशुपालवधस्यापि विक्रमाङ्कदेवचरिते प्रभावाभाव आस्ते । महाकविना माघेन भारवेः किरातार्जुनीयस्य प्रतिस्पर्धाहेतोः शिशुपाल-वधस्य रचना कृतास्ति । अत एव इमे काव्ये कालिदासकाव्यानीव अधिकं सरले सरसे च नाभूताम्, इदमेव कारणं यद् बिल्हणे माघस्य प्रभावाभाव एव दृश्यते । यद्यपि बिल्हणेन माघाद्दायाद्यग्रहणस्य आयासविशेषो नास्ति कृतः, तथापि केषुचिदंशेषु माघभावानां साम्यमवलोकयितुं शक्यते । तद्यथा—

अभितापसम्पदमथोष्णरुचिर्निजतेजसामसहमान इव ।
पयसि प्रपित्सुरपराम्बुनिधेरधिरोढुमस्तगिरिमभ्यपतत्[4] ॥

इति शिशुपालवधपद्यस्थे पश्चिमपयोधौ प्रपित्सोः सूर्यस्य अस्ताचलारोहणा-त्मकभावे बिल्हणस्य वक्ष्यमाणपद्यस्थभावे साम्यं प्रतिपादयितुं शक्यते—

कण्टकैरिव विदारितपादः पद्मिनीपरिचितैरपराद्रेः ।
आरुरोह सरसीरुहबन्धुस्कन्धमम्बुधितटीगमनाय[5] ॥

अभिसारिकाणामभिसरणं रात्रितमसि सञ्जायते इत्यादि वर्णनेषु किञ्चित्साम्य-मवलोक्यते परं तत्र साम्यं प्रभाववशादेवास्तीति प्रमाणमन्तरा प्रतिपादनं न युक्तियुक्तम् । शिशुपालवधे तद्यथा—

स्थगिताम्बरक्षितितले परितस्तिमिरे जनस्य दृशमन्धयति ।
दधिरे रसाञ्जनमपूर्वमतः प्रियवेश्मवर्त्म सुदृशो ददृशुः ॥
अवधार्य कार्यगुरुतामभवन्न भयाय सान्द्रतमसन्तमसम् ।
सुतनोस्स्तनौ च दयितोपगमे तनुरोमराजिपथवेपथवे[6] ॥

---

१. किराता० १।१; विक्र० १४।१ ।
२. किराता० ५।४०; विक्र० १।४ ।
३. किराता० १८।१; विक्र० ६।१०२ ।
४. शिशु० ६।१ ।
५. विक्र० ११।२ ।
६. शिशु० ६।२१-२२ ।

विक्रमाङ्कदेवचरिते च—

कस्य न प्रतिहतं बत चक्षुर्ध्वान्तिसन्ततिभिरुड्डमराभिः ।
केवलं मनसिजप्रहितानां नावधूतमभिसारवधूनाम्[1] ॥
पांसुतल्पसुरतप्रवणानां विश्वलोचनपुटप्रतिबन्धे ।
कुत्र कुत्र न तिरस्करिणीत्वं ध्वान्तमण्डलमगाच्चपलानाम्[2] ॥

उक्तपद्येषु सकललोकदृशि तमसान्धीभूते केवलमभिसारवधूनां दृष्टिर्वैफल्यं न भजतीति भावस्योभयत्र विद्यमानत्वात्साम्यम् । शिशुपालवधे विक्रमाङ्कदेवचरिते च चन्द्रमसः करैः नलिनीस्पर्श[3] मानिनीमानविमाननञ्चावलोक्य[4] तत्र साम्यं यद्यपि कथयितुं शक्यते तथापि तत्र आपातत एव साम्यं प्रतिभाति नत्वादानभावतः ।

१. विक्र० ११।२० ।
२. विक्र० ११।२१ ।
३. दिवसं भृशोष्णरुचिपादहतां रुदतीमिवानवरतालिरुतैः ।
मुहुरामृशन् मृगधरोऽग्रकरैरुदशिश्वसत् कुमुदिनीवनिताम् ॥
शिशु० ६।३४ ।
वल्लभेन जगतां निजधाम्ना जातगर्भ इव रात्रिभुजङ्गः ।
पादविन्यसननर्मविधायी निर्ममे कुमुदिनीं गतनिद्राम् ॥
विक्र० ११।३६ ।
४. अमृतद्रवैर्विदधदब्जदृशामपमार्गमोषधिपतिः स्म करैः ।
परितो विसर्पि परितापि भृशं वपुषोऽवतारयति मानविषम् ॥
शिशु० ६।३६ ।
क्षाल्यमान इव मानवतीनां दृग्भिरश्रुजलनिर्झरणीभिः ।
त्यक्तवानुदयरागमशेषं पूर्वदिक्तिलकबिन्दुरिवेन्दुः ॥
विक्र० ११।३५ ।

७

प्रकृतिवर्णनम् (वस्तुवर्णनम्)

नगरवर्णनम्—

महाकविर्बिल्हणो भारतवर्षस्य बहुषु नगरेषु बभ्रामेति प्राक् प्रतिपादितं कविपरिचयात्मकेऽध्याये। तत्र भ्रमता कविनानेन नगराणां बहुविधं वैभवं साक्षात्कृतम्। अतः बिल्हणकविना काव्येऽस्मिन् प्रवरपुरकल्याणपुरादीनां नगराणां यादृक् सरसं मनोहरञ्च वर्णनं कृतम्, तत्तु समस्तेऽपि साहित्यवाङ्मयेऽद्वितीयमिति चेदुच्येत, तर्हि न तत्र काप्यत्युक्तिर्भविष्यति। बिल्हणवर्णितनगराणां लङ्कालकामरावतीभ्योऽपि सौन्दर्यातिशायित्वे यदि सहृदयानां चेतांसि न विचिकित्सन्ते, तर्हि कवेः वर्णनकौशलमेव तत्र कारणम्। स्वकाव्यस्य वस्तुवर्णनोपक्रमं नगरवर्णनेन कुर्वन् महाकविर्बिल्हणः कल्याणनगरमित्थं वर्णयामास—

चकार कल्याणमिति क्रमादसौ पुरं पराध्यं पृथिवीपुरन्दरः।
यदुच्चहर्म्यावलिदीपसम्पदां विभाव्यते कज्जलसन्निभं नभः[1]॥

कल्याणनगरहर्म्याणां दीपसम्पत्तेः कज्जलमिव गगनं विभाव्यते, इति वर्णनं कल्याणनगरस्य हर्म्योच्चतां द्योतयति। किमपि नगरं तत्रत्यभव्यभवनानि विना न विभाव्यते, भवनानामुच्चतैव नगराणां शोभातिशायित्वे कारणतां याति। बिल्हणवर्ण्यं कल्याणपुरन्तु नासीत्साधारणं नगरम्। तस्य तु तदानीन्तननगरेषु सर्वश्रेष्ठता सर्वैः स्वीक्रियते स्म। तत्र चाभ्रंलिहसौधसम्पत्तिरासीदिति अभिप्रायाभिव्यक्तये हर्म्यदीपसम्पत्तेः कज्जलमिव गगनमित्युत्प्रेक्षमाणः कविः सहृदयहृदयरञ्जने नितरां सफलीबभूव। अन्ये कवयो नगराणां शोभाविवृद्धये विविधहट्टकूपोद्यानादीनां वर्णने परिश्रमं कृत्वापि न तथा सहृदयहृदयाह्लादने सफलीभवन्ति, यथायं महाकविर्बिल्हणस्तत्तद्वस्तूनां वर्णने प्रयासविशेषमकुर्वन्नेव नगरवर्णने प्रवृत्तः सन् काव्यमर्मज्ञान् साहित्यसुधारसं पाययितुं पूर्णतया साफल्यमधिजगाम। निदर्शनं यथा—

---

१. विक्र० २।१।

निर्वर्तिताश्चन्दनलेपपाण्डुभिर्नतभ्रुवां यत्र समुन्नतैः स्तनैः ।
मुखानिला एव कदर्थनक्षमा भवन्ति माने मलयाद्रिवायवः[1] ।।

यत्र हि कल्याणनगरे नतभ्रुवां चन्दनलेपपाण्डुभिः स्तनैः निर्वर्तिता मुखानिला एव माने कदर्थनक्षमा मलयाद्रिवायवो भवन्ति, तत्कल्याणनगरं सर्वोत्कर्षेण वर्तते । पद्यमिदं कल्याणनगरस्य यादृशं रसक्षालितं नगरचित्रं रसिकानां पुरतः स्थापयति न तादृशं चित्रं हट्टरथ्यादिवर्णनैः अन्यकविभिः उपस्थापयितुं शक्यते । एतेनेदं प्रमाणीभवति यत्कविः स्वकीयेन वर्णनकौशलेन वस्तुवर्णनविधौ महतीं क्रान्तिमकार्षीत् । कल्याणपुरे पतिव्रतास्त्रीणां कपोलकान्तिसम्पदा कातरांशुः सुधांशुः विकीर्णसम्मार्जनभस्मरेणुना मुकुरेण साम्यं बिभर्तीति[2] शृङ्गाररससिक्तं नगरवर्णनं कस्यानन्दवर्धनाय नालम् ?

कल्याणनगरवर्णनव्याजेन तत्रत्यसुन्दरीसौन्दर्यमपि वर्णयन् कल्याणनगरेण च तदन्वयं कुर्वन् नगरवर्णने स्वकीयं विशिष्टं वैचित्र्यं प्रकटीचकार महाकविबिल्हणः । तद्यथा—

विलासदोलायितदन्तपत्रयोः क्षपासु यत्रेन्दुरलक्ष्यमण्डलः ।
प्रविश्य सङ्क्रान्तिमिषेण योषितां कपोलयोः कान्तिजलं विमुञ्चति[3] ।।

अत्र हि पद्ये निशासु स्वैरक्रीडायां दोलायितदन्तपत्रयोः नारीणां कपोलयोः प्रतिबिम्बव्याजेन प्रविश्यादृश्यमण्डलश्चन्द्रः लावण्यामृतमाचामतीति नारीणामनुपमरूपराशेः यत्रेति शब्देन कल्याणनगरेणान्वयः नगरस्यापि वैशिष्ट्यं बोधयति । अनुपमकल्पनाशक्तेरपि समावेशेन कविकृतस्य नगरवर्णनस्याद्भुता नगरवर्णनशैल्यपि नितान्तं श्लाघ्या । यथा—

गतोऽपि यत्र प्रतिबिम्बवर्त्मना समीपतां वञ्चयितुं प्रगल्भते ।
मुखानि जाग्रन्मदनानि सुभ्रुवां स यामिकानीव न यामिनीपतिः[4] ।।

सुन्दरजलाशयानामपि वर्णनेन नगरलक्ष्मीरुत्कर्षमुपैतीति दृष्ट्या प्रायः

---

१. विक्र० २।२ ।

२. क्षपाकरः कातररश्मिमण्डलः पुरन्ध्रिगण्डस्थलकान्तिसम्पदा ।
विकीर्णसम्मार्जनभस्मरेणुना बिभर्ति यस्मिन्मुकुरेण तुल्यताम् ।।
—विक्र० २।३ ।

३. विक्र० २।४ ।

४. विक्र० २।५ ।

सर्वैरपि कविभिः स्वकाव्येषु नगरशोभोत्कर्षाय जलाशयानां वर्णनमप्यकारि। जलाशयवर्णनेन वृद्धिमुपगतायाः कल्याणलक्ष्म्याः साक्षात्कारं कुर्वन्तु भवन्तः—

जलाशया यत्र हसन्ति सन्ततं नवेन्द्रनीलद्रवनिर्मलोदराः।
शरत्समुत्सारितमेघकर्दमं कलिन्द-कन्या-ह्रदमेचकं नभः[1] ॥

तथा च—

तटद्रुमाणां प्रतिबिम्बमालया सपारिजातामिव दर्शयञ्छ्रियम्।
स यत्तडागः कुरुते विडम्बनां गृहीतसारस्य सुरैः पयोनिधेः[2] ।

कल्याणनगरस्य प्राकाराणामुन्नतकपिशीर्षमालां वर्णयन् कविः उत्प्रेक्षते यद् बृहत्स्फटिकशिलानिर्मितवप्रश्रेणिरत्युन्नतया कपिशीर्षमालया गगनरूपिणे केलि-दर्पणे विलासधौतां रदमण्डलीं पश्यतीव।[3]

कल्याणनगरस्य स्फटिकशिलानिर्मितदुग्धसमुद्रसमत्विषां लीलास्थलीभुवां वर्णनप्रसङ्गे उपमानतामुपगतं नभःस्थलं विडम्बनास्पदं विदधानो महाकविरयं बिल्हणः वस्तुवर्णनात्मके काव्यक्षेत्रे आत्मनः अप्रतिहतगतिं द्योतयति।[4]

प्रायः कवय उपमानतः उपमेयस्य वैशिष्ट्यं प्रदर्शयन्तो व्यतिरेकमाध्यमेन वर्ण्यविषयं चमत्कृत्याधायकं विदधति। विक्रमाङ्कदेवचरिते कल्याणपुरवर्णन-प्रसङ्गे उक्तरीत्या नगरवर्णननैपुण्यमवलोकनीयम्—

प्रतिक्षणं क्षालितमन्युना रणे प्रयुक्तरक्षस्य नृपेण मानिना।
न यस्य कक्षां शतमन्युरक्षिता पुरी पुरप्राग्रहरस्य गाहते[5] ॥

यस्य नगरस्य सुन्दरीषु सौन्दर्याभावः न तन्नगरं सुन्दरेषु नगरेषु गण्यते। यतो हि सुन्दरीणां सौन्दर्यमपि नगरोत्कर्षे कारणं भवतीति दृष्ट्या कल्याण-नगरस्य स्त्रीणां सौन्दर्यवर्णनेन अनेन महाकविना कल्याणनगरसौन्दर्यं चरम-सीम्नि प्रापितम्। इदमत्रोदाहरणम्—

---

१. विक्र० २।६।

२. विक्र० २।१०।

३. प्रकर्षवत्या कपिशीर्षमालया यदुद्भटस्फाटिकवप्रसंहतिः।
विलोकयत्यम्बरकेलिदर्पणे विलासधौतामिव दन्तमण्डलीम् ॥
—विक्र० २।७।

४. यदीयलीलास्फटिकस्थलीभुवाममुग्धदुग्धाब्धिसमत्विषां पुरः।
दावाग्निनिर्दग्धवनस्थलोपमं विलोक्यते कज्जलकश्मलं नभः ॥
—विक्र० २।९।

५. विक्र० २।११।

करोति गण्डस्थलचन्द्रमण्डले विलासवेल्लन्मणिकुण्डलातिथौ ।
न यत्र वित्रस्तकुरङ्गचक्षुषां निघर्षभीत्येव पदं कुरङ्गकः[१] ॥

अत्र हि चन्द्रमण्डलमप्यतिरिच्यमानं रमणीमुखमण्डलं निष्कलङ्कत्वेन कल्याणपुरश्रियं पुष्णाति ।

देवमन्दिराणामत्युन्नतैः स्वर्णकलशैः कल्याणपुरं सुशोभते, साधारणामपीमां वार्ता स्वासाधारणया काव्यभाषातूलिकया कविः कथं चित्रचित्रितां विधत्ते इत्यवलोकनीयम्—

समुच्छलन्मौक्तिककान्तिवारिभिः सुवर्णकुम्भैः सुरसद्ममूर्धगैः ।
प्रपा पिपासापरितापशान्तये नभश्चरीणामिव येन निर्मिता[२] ॥

लोकत्रयस्य कार्मणकर्मणि क्षमाणां कल्याणपुरपुरन्ध्रीणां लीलायितानि वीक्ष्य पुनरपि त्र्यम्बकविजयाय परिबोध्यमानं कामधनुः नगरस्यास्य सौन्दर्यातिशायित्वं ध्वनयति[३] ।

तत्रत्या ललनाश्चातकाश्च स्वमधुरकण्ठरवेण सकलमपि नगरमिदं गीतगुञ्जितं विदधति इति प्रतिपादयितुं कीदृशी विचित्रा कल्पना समाश्रिता—

स्मरप्रशस्तिप्रतिवस्तुतां गताः सलीलदात्यूहसमूहनिस्वनाः ।
भवन्ति यत्र क्षणमात्रविश्रमप्रदायिनः कण्ठरवेषु योषिताम् ॥[४]

अनया कान्तया कल्पनया कवेरद्भुतवर्णनशक्तिः परिचीयते—

निराकृते यत्र रुषां समुद्गमे भुजङ्गसौभाग्यगुणेन सुभ्रुवाम् ।
वनान्तपुंस्कोकिलपञ्चमोर्मयो भवन्ति मानज्वरशेषभेषजम्[५] ॥

पुंस्कोकिलानां पञ्चमोर्मिभिर्नगरमानिनीनां मानं भिद्यते एव, परं कवेरियं विलक्षणा रसमयी वर्णनशैल्यपि वस्तुवर्णनेऽभिमानवतां कवीनां मानमर्दने सक्षमास्तीति निश्चितम् ।

चन्द्रधवलासु रात्रिषु नगराणां विशिष्टकान्तिसम्पादने हेतुत्वेन चन्द्रमस उपकारः नगरेषु भवति, परमत्र हि कल्याणनगरे नगरस्य चन्द्रमसि उपकार इति वैलक्षण्यमवलोक्यताम्—

१. विक्र० २।१२ ।
२. विक्र० २।१३ ।
३. विक्र० २।१४ ।
४. विक्र० २।१५ ।
५. विक्र० २।१६ ।

प्रविश्य यद्वेश्मसु रोहिणीपतिर्गुणं महान्तं लभते न संशयः ।
यदेष राहोरुपयात्यलक्ष्यतां पुरन्ध्रिवक्त्रेन्दुसहस्रमध्यगः[1] ॥

ध्वजान्दोलनैर्नगराणां शोभा द्विगुण्यं भजते, परं कल्याणपुरं शोभयन्तीनां पताकानां वर्णनेन कल्याणनगरशोभा परिमाणातीततामगात् । इदमत्रोदाहरणम्—

यदीयसौधध्वजपट्टपट्टिकाः समुच्चलन्मौक्तिककान्तिनिर्झरैः ।
नभस्तलान्दोलनविभ्रमाहतं विनिक्षिपन्तीव सुरापगापयः[2] ॥

यत्र कामाः त्र्यम्बकनेत्रवह्निमविस्मरन् यत्रत्यकुवलयलोचनानां विलासपीयूषनिधानकुम्भयोः सामीप्यं न जहाति[3], तद्बिल्हणवर्णितकल्याणनगरं किमप्यवर्णनीयमाह्लादं जनयति सहृदयहृत्सु । विक्रमाङ्कदेवचरिते नगरवर्णनादिषु स्थलेषु अपि यादृशी सरला सरसा च काव्यचातुरी दृष्टिगोचरीभवति, तादृशी अन्यत्र प्रायः दुर्लभैव । तन्निदर्शनम्—

स्मरस्य यत्राद्भुतमस्त्रकौशलं तथा ह्यसौ चारुदृशां विलोचनैः ।
उपागतैरुत्पलपत्रमित्रतां शिलाकठोराणि मनांसि विध्यति[4] ॥

मेघमण्डल्यां समुद्रवेलायां नभस्थल्याञ्च रतिसहितस्य स्मरतल्पस्य कल्पनया कीदृशं मनोहरं विलक्षणञ्च चित्रं कल्याणपुरस्य चित्रितमित्यवलोक्यताम्-

समुद्रवेला रतिरत्नसम्पदा वधूतडित्ताण्डवमेघमण्डली ।
नभःस्थलीविभ्रमतारकस्रजा विभाति यत्र स्मरतल्पकल्पना [5] ॥

वर्षासु हंसा मानसं गच्छन्ति इति प्रसिद्धिः । कल्याणसरसीनां गुणानुरागेण हर्षगद्गदास्तत्रत्या हंसा न यान्तीति सरसीनां गुणमिममस्वीकुर्वद्भिः दुर्जनैः 'हंसा वप्रौन्नत्यं लङ्घयितुं न पारयन्ति', इति स्वीकुर्वद्भिः वप्रस्य यशो गीयते[6] । अत उन्नतवप्रैः सरसीगुणैः राजहंसैश्च कल्याणपुरं परमां शोभामुपैति, तथा च दुर्जनैरपि कल्याणनगरसौन्दर्यस्यापलापो न कर्तुं शक्यते इति स्पष्टम् ।

---

१. विक्र० २।१७ ।
२. विक्र० २।१८ ।
३. विक्र० २।१९ ।
४. विक्र० २।२० ।
५. विक्र० २।२१ ।
६. त्यजन्ति हंसाः सरसीगुणैः स्थितिं न यत्र वर्षास्वपि हर्षगद्गदाः ।
अलङ्घनीयस्य निकाममुन्नतेर्दिशन्ति वप्रस्य यशस्तु दुर्जनाः ॥
—विक्र० २।२२ ।

नगरवर्णनस्थलेषु अपि महदद्भुतकाव्यप्रतिभाया यदि कुत्रचित् पदे पदे वैलक्षण्यमक्षिलक्षीभवति, तत्तु विक्रमाङ्कदेवचरितमेव। निदर्शनं यथा—

निशासु यत्रोन्नतसौधसङ्गति विगाहमानस्य विधोः कुरङ्गकः।
वतंसदूर्वाङ्कुरमेणचक्षुषां ग्रहीतुमाकाङ्क्षति वक्रकन्धरा॥[1]

पूर्वं कल्याणनगरस्य सङ्गीतात्मकत्वं वर्णयित्वा इदानीं तत्र गृहे गृहे नृत्यात्मकत्वं कया विचित्रया काव्यप्रतिभया कविना वर्णितमित्यस्त्यवलोकनीयम्—

अवागुरं नेत्रकुरङ्गबन्धनं निरक्षरं पञ्चशरस्य शासनम्।
गृहे गृहे यत्र विचित्रमन्वहं वितन्वते नृत्तमधीरलोचनाः[2] **॥**

नगरवर्णने महाकविर्बिल्हण आत्मनो विलक्षणामेव प्रतिभां धारयतीति नात्रापलापः कर्तुं शक्यते—

अमुष्य लोकत्रितयाद्भुतैर्गुणैरतीत्य मार्गं मनसोऽपि तिष्ठतः।
असौ तदा मानसगोचरस्थिता कथं तुलायामलका प्रगल्भते[3] **॥**

अलकापुरी सौन्दर्यतुलनायां कल्याणपुरस्य पुरतः तुलाधिरोहे नासीदलमित्यत्र विलक्षणहेतुप्रतिपादनेन महद्वैलक्षण्यं वैशारद्यञ्च नगरवर्णनक्षेत्रे कवेरस्तीति प्रत्यक्षम्।

यादृशं सरसं सुललितमद्भुतञ्च कल्याणपुरस्य वर्णनं दृश्यते, तादृशमेव प्रवरपुरस्यापि वर्णनं काव्येऽस्मिन् वर्तते। प्रवरपुरवर्णनस्य यद्यपि बहुलोंऽशः कविपरिचयात्मकेऽध्याये उपनिबद्धोऽस्ति, तर्ह्यपि वर्णनवैलक्षण्यं प्रदर्शयितुं नगरवर्णनप्रसङ्गेनात्र दिङ्मात्रमुदाह्रियते—

काश्मीरेषु प्रवरपुरमित्यस्ति मुख्यं पुराणां
यातं गौरीपरिणयविधौ साक्षितामिन्दुमौलेः।
यस्यायान्ति प्रकृतिकुटिलास्ते वितस्तातरङ्गाः
स्वेच्छाधावत्कलियुगगजाधोरणत्वेऽङ्कुशत्वम्[4] **॥**

गौरीपरिणयविधौ इन्दुमौलेः साक्षित्वं कलियुगगजाधोरणत्वेऽङ्कुशत्वञ्चेति वर्णयतो नगरादिवर्णनेषु कवेः शुद्धानां सात्त्विकानाञ्च भावानां दर्शनमुपलभ्यते।

---

१. विक्र० २।२३।
२. विक्र० २।२४।
३. विक्र० २।२५।
४. विक्र० १८।१।

उद्यानेभ्यः सकलभुवनाश्चर्यमाधुर्यधुर्यं
पीत्वा द्राक्षारसमिव करैर्जातसन्तापशान्तिः ।
ज्येष्ठाषाढेष्वपि कमलिनीकामुको यत्र धत्ते
रत्नश्रेणिकिरणकलिकाकोमलामंशुमालाम्[1] ॥

अन्येषु काव्येषु नगरवर्णनस्थलेषु माधुर्यधुर्यं नगरवर्णनं दुर्लभमेवास्ति ।

प्रवरपुरस्य सौन्दर्यं निष्कलङ्कमजेयञ्चेति कीदृशैर्मधुरैः शब्दै रम्यैश्च भावैः कविना प्रतिपादितम्—

यक्षग्रस्ता धनपतिपुरी निष्कलङ्का न लङ्का
सातङ्केव त्रिदशनगरी मेरुपृष्ठेऽधिरूढा ।
इत्यप्राप्यप्रतिभटतया नूनमुच्चैः सगर्वं
यत्प्रद्युम्नक्षितिधरनिभादुत्तमाङ्गं बिभर्ति[2] ॥

एतेन पद्येन बिल्हणवर्णितं प्रवरपुरं सकलानां नगराणां सौन्दर्यापहरणे क्षममासीदित्यपि बोध्यते ।

प्रवरपुरप्रासादतुङ्गिमावर्णने बिल्हणस्य वर्णनवैचित्र्यमप्यवलोकनीयमस्ति—

यस्मिन्नुर्वीपतिगृहपतेस्तुङ्गिमा वर्ण्यते किं
तस्याश्चञ्चच्चतुरवनिताभूषितानेकभूमेः ।
जाने यस्यां कुसुमधनुषः स्वर्गरामामनांसि
क्रीडावातायनकृतपदस्यैव लक्षीभवन्ति[3] ॥

विचित्रैर्भावैः सह शब्दसारल्येनापि नगरवर्णनमिदं नितान्तं प्रकर्षास्पदं प्राप्यते ।

प्रभातवर्णनम्—

बिल्हणस्य प्रभातवर्णनं कियद्भाषाविशेषपरिपोषितं कियत्पीयूषपेशलमिति बिल्हणगीरेवात्र प्रमाणं विद्यतेऽतो नात्र प्रमाणान्तरापेक्षा । इदमत्रोदाहरणम्—

अत्रान्तरे सरसजृम्भितभिन्नषड्ज-
भाषाविशेषपरिपोषितचित्रभङ्गि ।

---

१. विक्र० १८।२ ।
२. विक्र० १८।१५ ।
३. विक्र० १८।३० ।

पीयूषपेशलसुभाषितभाषिणीभिः
प्रत्यूषमङ्गलमगीयत मागधीभिः[1] ॥

अस्मिन् पद्ये प्रयुक्तं 'पीयूषपेशल' इति भाषाविशेषणं बिल्हणभाषोपयुक्तमेव नात्र कस्यापि विचिकित्सा । अयं हि महाकविः सरलभाषातूलिकया भावानां विभिन्नैर्वर्णैः प्रभातदीपकचित्रचित्रणे सफलचित्रकारितामाससाद । इदमत्रोदाहरणम्—

ये वाल्लभ्यमनङ्गलेखलिखने याताः कुरङ्गीदृशाम्
ये वह्निप्रतिमल्लभल्लपदवीं पञ्चेषुणा लङ्घिताः ।
जाताः कान्तिविपर्ययादनवधेर्दीपाङ्कुरास्तेऽधुना
धूलीधूसरताम्रचूडतरुणीचूडावदापाण्डुराः[2] ॥

अत्र हि रात्रौ कुरङ्गीदृशामनङ्गलेखलिखने पञ्चेषुणा वह्निप्रतिमल्लभल्लतां लङ्घितानां दीपाङ्कुराणां धूलीधूसरताम्रचूडतरुणीचूडावदापाण्डुरत्वं यत् कविना चित्रितं तद्वस्तुतोऽनुपममेव ।

प्रभाते श्यामावधूवदनचन्दनबिन्दुरूपमनुपममिन्दुचित्रं यथा—

खण्डः क्षपासु कियतीष्वपि यः कृशाङ्गि
भङ्गीमनङ्गपरशोः सदृशीं बिभर्ति ।
सोऽयं निमज्जति जगन्नयनाभिरामः
श्यामावधूवदनचन्दनबिन्दुरिन्दुः[3] ॥

अत्र हि अनङ्गपरशोः भङ्गिमामयम् अर्धचन्द्रचित्रं यच्चित्रितं बिल्हणेन तदपि प्रभातवर्णने कौशलं प्रदर्शयति ।

यः सैन्ये स्मरपार्थिवस्य विरहिप्रत्यर्थिनामग्रणी-
र्ज्योत्स्नानिर्भरमुज्झति स्म जगतां यस्तापनिर्वापणम् ।
सोऽयं तारकनायकः किमपरं शृङ्गारसञ्जीवनं
जातः पृष्ठपरागपाण्डुरजरत्कूष्माण्डपिण्डाकृतिः[4] ॥

उक्तपद्ये प्रभातचन्द्रवर्णनमाध्यमेन वर्णितं प्रभातं साक्षाद्रसप्रस्रवणमेवावभाति । निशाकाले यौवनस्थचन्द्रस्य सौन्दर्यं प्रभावं सामर्थ्यञ्च वर्णयित्वा निशावसाने अस्तङ्गच्छतस्तस्य दयनीयस्थितिवर्णनेन कविः स्वप्रभातवर्णनस्य यानि चित्राणि चित्रयाञ्चकार तानि वस्तुतः प्रशंसापात्राणि सन्ति । इदमत्रोदाहरणम्—

---

१. विक्र० ११।७३ ।
२. विक्र० ११।७६ ।
३. विक्र० ११।७८ ।
४. विक्र० ११।७७ ।

ये मानद्विरदाङ्कुशाः कुशलिनः कण्ठेषु ये रागिणां
सोत्प्रासेन विलासपाशपदवीं पञ्चेषुणा लम्भिताः ।
पादास्ते घटमानकोकमिथुनक्रीडारहःसाक्षिणः
क्षोणिकान्त मृणालतन्तुतलिनास्ताम्यन्ति तारापतेः[1] ॥

उक्तपद्ये मानद्विरदाङ्कुशानां विलासपाशानां कोकमिथुनक्रीडासाक्षिणां चन्द्रपादानां प्रभाते मलिनमृणालतन्तुतुल्यञ्चित्रं कस्य सहृदयस्य हृदयं नापहरति ? अस्मिन्नेव सन्दर्भे कविर्वर्णितं निद्रायमाणचन्द्रिकाचित्रमपि द्रष्टव्यमस्ति । तद्यथा—

रेजे व्योमनि लङ्घितोभयतटा व्योमस्रवन्तीव या
या शैलेन्द्रशिलातलेष्वलभत श्रीखण्डपङ्कोपमाम् ।
देवस्यान्ध्रपुरन्ध्रिनेत्रवसतेर्लोकत्रयीकामुक-
क्रीडाकार्मणयोगचूर्णसदृशी निद्राति सा चन्द्रिका[2] ॥

अत्र हि लोकत्रयीकामुकक्रीडाकार्मणयोगचूर्णसदृश्याश्चन्द्रिकाया वर्णनेन कविताकामुकानामपि कार्मणत्वं वितनोति बिल्हणः ।

महाकविर्बिल्हणो महान् शृङ्गारिकः कविरासीदत एवानेन प्रभातवर्णनप्रसङ्गेऽपि रसिकजनान् शृङ्गाररसं पाययितुं सफलः प्रशस्यश्च प्रयत्नोऽकारि । उक्तवाक्यस्य पुष्टये महाकवेः शृङ्गारपूर्णप्रभातस्य एकं चित्रमुदाहरणार्थं प्रस्तूयते—

ये कुण्ठीकृतवल्लभप्रणतयः शस्त्रैरनङ्गस्य ये
न प्राप्ताश्च निशीथिनीपतिकरैश्शैथिल्यवीथीमपि ।
ते निःशङ्कविटङ्कतालतुमुलप्रोतप्लुतप्लावितै-
श्छिन्नाः कुक्कुटकूजितैर्मृगदृशां मानग्रहग्रन्थयः[3] ॥

शृङ्गाररागरञ्जितेन प्रभातचित्रेण प्रभातवर्णनमिदं महन्मार्मिकमद्भुतप्रभावोत्पादकञ्च समभवत् । कवेर्दृष्टिः सूक्ष्मनिरीक्षणेषु कियती क्षमा तथा च कवेर्हृदयं कियद्भावुकमिति तस्य प्रभातवर्णनप्रसङ्गान्तर्गतपद्यद्वयेन स्पष्टीभवति—

---

१. विक्र० ११।८० ।
२. विक्र० ११।८६ ।
३. विक्र० ११।८३ ।

सम्यङ्मन्मथशासने स्थितवतामुत्साहदानोद्यताः
सान्द्रं मानवतीजनस्य मनसि व्यापारयन्तो भयम्।
कन्दर्पेण कृताकृतेक्षणविधौ यूनां नियुक्ता इव
भ्राम्यन्ति स्फुटिताब्जसौरभमुषः प्रत्यूषवेलानिलाः[1] ॥

निक्षिप्य गण्डफलकेष्विव खण्डिताना-
मात्मद्युतिं दधति पाण्डुरतां प्रदीपाः।
शुष्यन्ति चन्द्रमणयश्च मनस्विनीना-
मार्द्रत्वमीक्षणपुटेष्विव सन्निवेश्य[2] ॥

अत्र हि प्रथमे पद्ये प्रत्यूषवेलानिलव्याजेन यूनां कृताकृतेक्षणे कविदृष्टेः सामर्थ्यं तस्याः सूक्ष्मनिरीक्षणत्वञ्च अस्माकं दृक्पथमवतरति। द्वितीये च पत्युरनागमनजन्यक्रुधा खण्डितानां कपोलफलकेषु रक्तिमासन्निवेशेन मनस्विनीनामीक्षणपुटेषु च सुरताभावदुःखजन्यार्द्रत्वस्य सन्निवेशेन च कवेर्भावुकहृदयस्य परिचयो लभ्यते।

ब्राह्ममयी प्रभातवेलैव शारदाराधनाय समुचितोऽवसरो भवति, अत एव प्रभातेऽकवीनां धिषणायामपि निरुपमोऽर्थः स्फुरति, महाकविना निबद्धोऽयं भावः मागधीमुखेभ्यः ललितललितैः पदैरित्थं निःसरति—

स्फुरति निरुपमोऽर्थस्तन्वते पाकमुद्रा-
परिचयमकवीनामप्यकाण्डे वचांसि।
सुकवितिलक वेला कापि सारस्वतीयं
क्षणमवहितचित्तः काव्यचिन्तां विधेहि[3] ॥

अत्र हि पीयूषमयस्य प्रभातसमयस्य मधुरमधुरैः पदैर्व्यक्तं मधुरं स्वरूपं स्वीयसौन्दर्यश्रियमुत्कर्षस्य चरमसीमानं प्रापयति। प्रभातवर्णनप्रसङ्गे ष्वश्वगजादीनां निद्रात्यागादिवर्णनस्य[4] यादृशी शैली कालिदासकाव्येषु दृक्पथमवतरति, प्रायः

---

१. विक्र० ११।८५।
२. विक्र० ११।८७।
३. विक्र० ११।८१।
४. रघुवंशे गजनिद्रावसानवर्णनम्—

शय्यां जहत्युभयपक्षविनीतनिद्राः
स्तम्बेरमा मुखरश्रृङ्खलकर्षिणस्ते।
येषां विभान्ति तरुणारुणरागयोगा-
द्भिन्नाद्रिगैरिकतटा इव दन्तकोशाः॥ रघु० ५।७२

तादृश्येव बिल्हणेनापि स्वीयविक्रमाङ्कदेवचरिते समाश्रिता। प्रस्तुतप्रसङ्गे विक्रमाङ्कदेवस्य गजानां निद्रात्यागस्य वीररसचित्रितं चित्रं कीदृङ् मनोहरमित्यवलोकनीयमस्ति—

केलिप्राङ्गणकुट्टिमेषु न पुनः क्रीडन्ति पृथिवीभृतां
यद्गण्डस्थलदानदुर्दिनपयःपङ्केषु मग्नाः श्रियः।
उन्मीलत्क्रमशृङ्खलाकलकलप्रेङ्खोलखेलैः पदै-
रुत्तिष्ठन्ति परागपुञ्जशयनात्त्वत्कुञ्जराग्रेसराः[1]॥

उक्तपद्ये तु शृङ्खलानां कलकलध्वनिना प्रभातस्य सङ्गीतात्मकत्वमिङ्गितम्, परं वक्ष्यमाणपद्ये हरीणां प्रत्यूषहेषारूपमङ्गलदुन्दुभिनिनादः कस्य कर्णयोरमृतसञ्चारं न कुरुते?

नित्यं व्योम्नि गतागतैर्दिनपतेर्लोकस्य येषु ध्रुवं
भानुस्यन्दनविप्रकीर्णतुरगभ्रान्तिः परिम्लायति।
निद्राच्छेदमुदाहरन्ति हरयस्ते मन्दुरामन्दिरा-
लक्ष्मीमङ्गलदुन्दुभिप्रतिभटैः प्रत्यूषहेषारवैः[2]॥

संस्कृतकाव्यवाङ्मये प्रभातवर्णनप्रसङ्गान्तर्गतसूर्यचन्द्रमसोः क्रमशः विकासह्लासयोरेकत्र वर्णनस्य या शैली[3] माघादेः समवलोक्यते, सैव स्वकीयपरिष्कृत-

---

तत्रैवाश्वनिद्रावसानवर्णनम्—
दीर्घेष्वमी नियमिताः पटमण्डपेषु
निद्रां विहाय वनजाक्ष वनायुदेश्याः।
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः॥ रघुवंशे ५।७३

१. विक्र० ११।८२।
२. विक्र० ११।६१।
३. माघस्य सूर्यचन्द्रमसोः युगपद्विकासह्लासयोर्वर्णनम्—
अदयमिव कराग्रैरेष निष्पीड्य सद्यः
शशधरमहरादौ रागवानुष्णरश्मिः।
अवकिरति नितान्तं कान्तिनिर्याससम्बद्-
स्रुतनवजलपाण्डुं पुण्डरीकोदरेषु॥
कुमुदवनमपश्रि श्रीमदम्भोजषण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।

रूपेण विक्रमाङ्कदेवचरितमपि अलङ्करोति । इदमत्रोदाहरणम्—

क्षिपति तिमिरभारं भैरवः कैरवाणा-
मुदयशिखरलीलाशेखरोऽयं खरांशुः ।
अपि चकितचकोरीपीतशेषेण धाम्ना
भवति विधुरकाण्डे तण्डुलक्षोदपाण्डुः[1] ॥

अत्र हि उदयशिखरलीलाशेखरस्य खरांशोरुत्कर्षस्तथा च तण्डुलक्षोदपाण्डोः विधोरपकर्षश्च यया रीत्या कविना सुष्ठु वर्णितस्तया तदीयं प्रभातवर्णनकौशलं महत्प्रशंसास्पदं समभूत् । प्रभातवर्णनेऽस्तङ्गच्छतश्चन्द्रस्य क्षीणा छविरेवाधिक्येन कवेर्दयालु हृदयमाचकर्ष । इदमत्रोदाहरणम्—

यः श्रीकण्ठललाटलोचनशिखिप्लुष्टस्य चेतोभुवः
श्रीखण्डद्रवपाण्डुरेण महसा धारागृहत्वं गतः ।
अस्तक्ष्माधरमस्तके स भगवानालक्ष्यते चन्द्रमाः
क्षौद्रासङ्गपिशङ्गमाहिषदधिच्छत्रावदातच्छविः[2] ॥

प्रभातवर्णनान्तर्गतसूर्योदयवर्णनस्य कविचित्रितचित्राणि न केवलं मनोरमाण्यपितु सहेतुकानि सारगर्भितान्यपि सन्ति । आधोरणाद्भीतिपरायणेन सुनासीरवारणेन कथमपि परित्यक्ताः, सूर्यसारथिना वन्यगजसंक्षोभादाकाशप्रान्ते एकत्रीकृताः, गर्जद्भिर्वन्यैर्मत्तमहिषैः समुत्पादितश्रोत्रज्वराः सूर्याश्वा महता कष्टेनोदयाचलं जहतीत्यादि सहेतुककल्पनावारिणाभिषिक्तललितभावाङ्कुराणां सूर्योदये यत्प्रस्फुटनमवलोक्यते,[3] तेन कवेः प्रतिभाप्रकर्षः प्रकाश्यते । महा-

---

उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिलसितानां ही विचित्रो विपाकः ॥
—शिशुपालवधम्, ११।६२, ६४ ।

१. विक्र० ११।८४ ।

२. विक्र० ११।६४ ।

३. त्यक्ताः शक्रमतङ्गजेन कथमप्याधोरणाद्बिभ्यता
संक्षोभादरुणेन वन्यकरिणां व्योमाङ्गणे पुञ्जिताः ।
किञ्चिद्गर्जदरण्यमत्तमहिषव्याकीर्णकर्णज्वराः
पूर्वक्ष्माधरमुत्सृजन्ति तुरगाः कृच्छ्रेण तिग्मद्युतेः ॥
विक्र० ११।८८ ।

कविना प्रस्तुतेषु सूर्योदयचित्रेषु भावसौन्दर्यस्य प्रचुरमात्रया प्रसाधितं प्रभातं सहृदयहृदयहरणक्षममिति प्रातिपादयतीव पद्यमिदम्—

क्षिप्त्वा गुहासु तिमिरं विहितव्यलीकाः
पादान्वहन्ति गिरयस्तरणेः शिरोभिः ।
तन्मस्तकेषु च किमप्यभयप्रदान-
हेतोरिवार्पितकरः प्रतिभाति भानुः[1] ॥

महाकविना चित्रितेषूदीयमानरविचित्रेषु सद्यः जातडिम्भस्यापि लोचनसुखग्राह्यञ्चित्रमस्ति द्रष्टव्यम्—

रक्षःसंक्षयहेतुगोत्रजननाद्बन्धं विधाता च यः
पाथोधेः श्वशुरत्वमेति यमुना ताप्योः प्रसूत्या च यः ।
जातः सोऽयमशेषविश्ववलभीरत्नप्रदीपाकृतिः
सद्यःसम्भवडिम्भलोचनसुखग्राह्येण धाम्ना रविः[2] ॥

क्रोधवशतः झटिति शयनमपहाय गन्तुं प्रवृत्तानां नारीणां कृकवाकुनादमाकर्ण्य क्षुतादिव्याजेन प्राणेशकेलिशयनेषु पुनः पतनादिवर्णनेन[3] बिल्हणवर्णितं शृङ्गाररसस्नपितमिव प्रभातं नूनं सर्वोत्कर्षेण वर्तते ।

तडागवर्णनम्—

महाकविबिल्हणेन वस्तुवर्णनप्रसङ्गे विक्रमदेवेन निर्मापितस्यैकस्य तडागस्यातीव ललितं सरसञ्च वर्णनं प्रस्तुतम्—

अकारयत्कारणमानुषः पुर-
स्तडागमेतस्य स रुद्धदिङ्मुखम् ।
उपैति येनानुपमश्रिया तुला-
मसौ गतश्रीः कथमम्भसां निधिः[4] ॥

---

१. विक्र० ११।८९ ।

२. विक्र० ११।९२ ।

३. उत्थाय मन्युवशतश्चलितुं प्रवृत्ताः
कर्णं गते झटिति कुक्कुटनादकण्ठे ।
किञ्चित्क्षुतादिनिभमात्रमुदीर्य नार्यः
प्राणेशकेलिशयनेषु पुनः पतन्ति ॥ विक्र० ११९३ ।

४. विक्र० १७।२२ ।

उक्तपद्ये वर्णितस्य तडागस्य समुद्रादपि शोभातिशायितां प्रतिपादयितुं गतश्रीरिति अर्थश्लिष्टसमुद्रविशेषणप्रयोगेण स्वीयासाधारणवर्णनपटुतां प्रस्तोतुं कविः सुतरां सफलीबभूव । वर्णितजलाशये विद्यमानस्वच्छजलचित्रणस्य स्वच्छं चित्रं प्रस्तूयते—

नभः स्रवन्त्या इव शेषवारिभिः
परिच्युतैरच्युतपादपद्मतः ।
प्रविश्य देवालयगर्भमागतै-
र्विपाण्डुभिर्यः सलिलैर्विशोभते[1] ॥

त्रिवारमाचम्य पीतसागरस्यागस्त्यस्य दर्पदलनाय विटङ्कवीचिरवव्याजेन गर्जतस्तस्य तडागस्य कियत्सजीवं चित्रञ्चित्रितं कविनेति वक्ष्यमाणपद्येऽस्ति द्रष्टव्यम्—

प्रदानलोभादिह भर्तुरस्य चे-
त्कदाचिदागच्छति कुम्भसम्भवः ।
छिनद्मि तद्दर्पमितीव यस्तट-
त्रुटद्विटङ्कोर्मिरवेण गर्जति[2] ॥

वर्ण्यजलाशयस्य पयोनिधेरपि शोभातिशायित्वं वर्णयन् कविः कीदृशीं युक्तियुक्तां कल्पनां कल्पयाञ्चकारेति निदर्श्यते—

किमाधृतक्षारपयोधिसङ्गमा-
द्बिभर्षि भागीरथि! दुर्भगाव्रतम् ।
इतीव यः कर्षति हर्षगद्गद-
स्तरङ्गहस्तैर्नभसः सुरापगाम्[3] ॥

उक्ताशयमेव समर्थयितुं कवेरियं कम्रा कल्पनास्ति द्रष्टव्या—

अवाप्तबन्धेन लघुत्वमब्धिना
वितर्क्य पित्रा सुरराजकुञ्जरः ।

---

१. विक्र० १७।२३ ।
२. विक्र० १७।२४ ।
३. विक्र १७।२५ ।

प्रसूतमात्मानमनिन्दितात्मनो
ब्रवीति यस्माद्ध्रुवमभ्रमोः पुरः[1] ।।

महाकविना कालिदासेन कृता नदीसमुद्रसमागमे तयोः (नदीसमुद्रयोः) अधरपानादिकल्पना रघुवंशे समुपलभ्यते[2] । तस्या एव किञ्चित्परिवर्तितं रूपं तडागवर्णनप्रसङ्गे विक्रमाङ्कदेवचरिते विद्यमानमस्ति । तद्यथा—

अपास्य पाथोधिमसंख्यनिम्नगा
मुखार्पणोच्छिष्टमरोचकादिव ।
तपात्यये जह्नुरुपान्तशैलजाः
कुमारतां यस्य सगर्वमापगाः[3] ।।

कालिदासेन स्वकीयवर्णनप्रसङ्गेषु येषां भावानां सङ्केताः कृताः, बिल्हणेन तेषु केचन सङ्केताः किञ्चित्परिवर्त्य परिष्कृत्य च निजवर्णनेषु प्रयुक्ताः । अतो बिल्हणस्य वर्णनानि अपि तथाऽऽकर्षकाणि सञ्जातानि यथा कालिदासस्य ।

निपीय यत्पाथसि नूनमम्बुदै-
रवापिते शुक्तिषु मौक्तिकश्रियम् ।
पुराणमुक्तामणिभिर्न लप्स्यते
कुचस्थलारोहणमेणचक्षुषाम्[4] ।।

तडागवर्णनप्रसङ्गे पुराणमुक्तामणीनामेणचक्षुषां कुचस्थलारोहणाभावरूपभावस्तडागं नूतनमौक्तिकश्रिया, तद्वर्णनञ्च शृङ्गारिकत्वेन योजयति ।

सन्ध्यावर्णनम्—

बिल्हणस्यान्यवर्णनानीव सन्ध्यावर्णनमपि महद्वैशिष्ट्यं धारयति । बिल्हणेन विक्रमाङ्कदेवचरिते स्वकीयकल्पनाशक्त्यास्ति समर्पितं महत्सौन्दर्यं सन्ध्यासुन्दर्यै । सन्ध्यासमये सूर्यरश्मीणां पाटलता जगन्नेत्रकार्मणीभूतं दृश्यं समुपस्था-

---

१. विक्र० १७।२६ ।

२. मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरङ्गाधरदानदक्षः ।
अप्यन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिन्धुः ।।
—रघु० १३।९ ।

३. विक्र० १७।२८ ।

४. विक्र० १७।२७ ।

पयति । दृश्यस्यास्य विभिन्नकविभिः स्वकीयकाव्येषु विभिन्नप्रकारैः वर्णनं कृतमस्ति । तदेव पाटलतादृश्यं वर्णयतः कुतः मरीचिमालिनो मरीचिमालासु पाटलत्वमायातीति विषये बिल्हणस्यानन्या कल्पना वर्णनप्रसङ्गेषु तस्याऽद्वितीयतां प्रकाशयन्तीवाऽऽभाति—

स्नानशेषघुसृणारुणभासां स्पर्शनादिव नरेन्द्रवधूनाम् ।
प्राप रश्मिपटली दिनभर्तुः पाटलत्वमथ सङ्कुटमाना[1] ॥

स्निग्धमम्बरतलं गाढं परिरभ्य तस्माद्वियुज्यमानस्य सूर्यस्य यत्स्वाभाविकं चित्रं चित्रितं बिल्हणेन तद्धि वियुज्यमानप्रेमिणोरन्तर्दशां कथयितुं पूर्णरूपेण सक्षमम् । तद्यथा—

मज्जतः पयसि पश्चिमसिन्धोः स्निग्धमम्बरतलं परिरभ्य ।
भास्वतस्तुषवियुक्तमसूरक्षोदपाटलमलक्ष्यत धाम[2] ॥

सान्ध्यवेलायां सूर्यस्य तेजस्विताऽभावे हेतुतां प्रतिपादयतः कवेरियं कल्पना यद्रत्नरुचां प्रार्थनार्थं भानुरब्धिमयासीदत एवासौ गतकान्तिरभूत् । उक्तकल्पनाया अर्थान्तरन्यासद्वारा समर्थनेन विच्छायरविवर्णनमनुपमां शोभां धारयति । इदमत्रोदाहरणम्—

प्रार्थनार्थमिव रत्नरुचीनां भानुरब्धिमगमद्गतकान्तिः ।
सत्त्वमुन्नतपदात्पतितानां विद्यते न महतामपि नूनम्[3] ॥

सूर्यास्तवर्णनप्रसङ्गे विभिन्नानां कल्पनानां प्रसूत्या कविः सन्ध्यासौन्दर्यप्रसाधने सुतरां सफलीबभूव । उच्चैःश्रवःसम्बन्धिनीं पौराणिकीं कथां संस्मार्य नूतनतुरगावाप्तये सूर्यस्य प्रकल्पितः पयोधिप्रवेशः सन्ध्यावर्णनकौशले हेतुतामयासीत्—

वासवस्तुरगरत्नममुष्मात् प्राप दास्यति ममापि कदाचित् ।
आशयेति जलराशिमयासीद् भानुरश्वपरिवर्तधियेव[4] ॥

---

१. विक्र० ११।१ ।
२. विक्र० ११।३ ।
३. विक्र० ११।४ ।
४. विक्र० ११।८ ।

बिल्हणस्य सरसवर्णनान्यास्वादयन्तः सहृदया आनन्दातिरेकेण गद्गदाः पुलकोद्गममनुभवन्तीति नात्र लेशमात्रमप्यसत्यम्। उक्तधारणां समर्थयितुं सहृदयहृदयान्दोलनसमर्थं सन्ध्यायाः सरसदृश्यमेकमुदाहरणार्थं प्रस्तूयते—

भानुमानपरदिग्वनितायाश्चुम्बति स्म मुखमुद्गतरागः।
पद्मिनी किमु करोतु वराकी मीलिताम्बुरुहनेत्रपुटाऽभूत्[1] ॥

पद्यमिदमादाय चेदुच्येत यद्वर्णनप्रसङ्गेषु सरसतातिशयितासमावेशनेऽद्वितीयं साफल्यमधिजगामायं कविरिति, नात्र कस्यचिदपि काप्यनुपपत्तिर्भविष्यतीति मम विश्वासः।

वाजिनामविशतां जलराशौ वारिवारणभयाद्दिनभर्ता।
दातुमीक्षणपुटेष्विव मुद्रां द्राङ्निजातपपटं विचकर्ष[2] ॥

पद्येऽस्मिन् रविर्निजाश्वान्वारिधौ प्रवेशयितुमिच्छति। ते च वारिवारणभयाद्बिभ्यति। तद्भीतिनिवारणाय तेषां नेत्रनिरोधपटकर्मणि प्रयोगार्थं सूर्यातपपटविकर्षणरूपा कल्पना वस्तुतः सन्ध्यावर्णनक्षेत्रे बिल्हणस्य विजयदुन्दुभिरिव चकास्ति। सूर्यस्य पश्चिमपयोधिमज्जनमुपलक्ष्य यासां मधुराणां मनोरमाणां कल्पनानां दर्शनं विक्रमाङ्कदेवचरिते भवति, तासामधिकाधिकसरसतास्तवे यावती श्लाघा क्रियेत तावत्येव अपरिमितेति मन्ये। तास्वेकोदाह्रियते—

वाजिनां गगनलङ्घनखेदच्छेदनाय मदिरामिव दातुम्।
कामुकः कमलिनीवनितानां वारुणिप्रभवमब्धिमयासीत्[3] ॥

अत्र हि कमलिनीकामुकस्य वारुणिप्रभवाब्धिगमने हेतुतायां वियल्लङ्घनश्रमच्छिदे मदिरादिदानस्य कल्पना नितरां रम्या सुतरां प्रशस्यातितरामाकर्षिका चास्ते—

सेवते स्म जलधौ प्रतिबिम्बं बिम्बपाटलमशीतमरीचेः।
शेषकेलिशयनस्थितलक्ष्मीवल्लभाभरणकौस्तुभलीलाम्[4] ॥

अस्तङ्गच्छतः सूर्यबिम्बस्य पश्चिमपयोधौ प्रतिबिम्बतः यदलौकिकञ्चित्रं कविना चित्रितमुक्तपद्येऽवलोक्यते, तत्समं चित्रमन्यस्य कस्यचिदपि कवेः सूर्यास्तवर्णनेषु दुर्लभमेव। महाकवेर्बिल्हणस्य वर्णनप्रसङ्गेषु स्थाने स्थाने तदीयविलक्षण-

---

१. विक्र० ११।६।
२. विक्र० ११।१२।
३. विक्र० ११।१०।
४. विक्र० ११।११।

प्रतिभाया अद्भुतकाव्यकौशलस्य च दर्शनं भवति। वक्ष्यमाणपद्ये सूर्यास्तवर्णन-प्रसङ्गे तदीयमतिमानवमिव काव्यसौष्ठवमस्ति प्रेक्षणीयम्—

रत्नराजिनिकरप्रकरेण प्राप्यमाण इव दीपकशङ्काम्।
अम्बरादथ पपात पतङ्गस्तैलपात्रसदृशे जलराशौ[1] ॥

एतत्पद्यस्थं सूर्यास्तवर्णनं समीक्ष्य को नाम समीक्षकः वर्णनप्रसङ्गेषु बिल्हणस्य वर्णनानि सर्वोत्कर्षेण वर्तन्त इति न स्वीकुर्यात्?

सूर्यास्तसम्बद्धा चक्रवाकमिथुनविरहवर्णनपरम्परा प्रायः सर्वत्र काव्यवाङ्-मये व्यापकरूपेण दृष्टिगोचरीभवति। विक्रमाङ्कदेवचरितेऽपि सूर्यास्तमनवेलायां वियुज्यमानस्य रथाङ्गयुगलस्य विरहवेदनायाः कारुणिकं मार्मिकञ्च वर्णन-मित्थमुपन्यस्तं बिल्हणेन—

चञ्चुसम्पुटगृहीतमृणालग्रन्थिसूत्रनिवहेन रथाङ्गः।
विप्रयोगभयतो दयितायाः कण्ठपाशमिव कर्तुमियेष ॥

क्रन्दति स्म न विवेद मृणालीं चञ्चुसम्पुटगतां लुठति स्म।
वल्लभाविरहहालहलेन व्याकुलः किमकरोन्न रथाङ्गः[2] ॥

उक्तपद्यद्वये वियोगियुगलस्य व्यथायाश्चित्रमतीव मार्मिकम्।

रात्रिवर्णनम्—

महाकाव्येऽस्मिन् रात्रिवर्णनेऽपि पदे पदे बिल्हणीयवर्णनकौशलस्य वैल-क्षण्यं दृष्टिगोचरीभवति। बिल्हणप्रतिभया जगन्न्यक्कृतस्य तमसोऽपि स्वरूपं सम्यक् प्रसाध्य हृदयग्राहित्वं प्रापितम्। कविचित्रितं जृम्भमाणान्धकारचित्रमस्ति वर्णनप्रसङ्गेषु चमत्कृतियोजनात्मककाव्यकौशलस्योदाहरणम्—

भास्वति त्रिभुवनाङ्गणदीपे वेधसा प्रशमिते मरुतेव।
धूमराजिरिव तत्प्रशमोत्था ध्वान्तसन्ततिरलक्ष्यत नीला[3] ॥

सूर्येऽस्तङ्गते कमलानि निजनेत्रपुटानि निमीलन्ति। तान्युत्सृज्य भ्रमरा-श्चेतस्ततो भ्रमन्ति। भ्रमतो भ्रमरान्निव नीलं सर्वत्र प्रसरणशीलं तमिस्रं व्योमसीमनि नयनगतिन्निरस्तवदिति काव्यबन्धनिबद्धाशयः रात्रिरमणीशृङ्गार-त्वं गत इव आभाति। तद्यथा—

---

१. विक्र० ११।१४।
२. विक्र० ११।५, ६।
३. विक्र० ११।१३।

पद्मकोटर-कुटीर-कबन्ध-त्रास-विद्रुत-मधुव्रतनीलम् ।
ध्वान्तमङ्कुशविहीनमभाङ्क्षीद् व्योमसीमनि गतिं नयनानाम्[1] ॥

बिल्हणस्य वर्णनप्रसङ्गानां सर्वेक्षणेनैवं प्रतीयते, यदसौ वर्ण्यवस्तूनि वर्णयन् तन्मयो भवति । यतो हि वर्णनप्रसङ्गानां सूक्ष्माध्ययनेन तेषु रममाणस्य कवेरात्मनः साक्षात्कार इवानुभूयते । कियती विलक्षणासीत्कवेश्चक्षुषोः शक्तिर्यया तमिस्त्ररूपस्यापि दर्शनं कृतम्—

चूर्णकुन्तलसटापरिपाट्या विप्रकीर्णमिव भालतलेषु ।
केशबन्धविभवैर्ललटभानां पिण्डतामिव जगाम तमिस्रम्[2] ॥

उक्तपद्यरचनानन्तरं तस्मिन् रममाणेन कवेरात्मना कियान् प्रसादोऽन्वभूयतेति कल्पना नास्ति बुद्धिगम्या । बहुभिः कविभिः स्वीयकाव्येषु भुवनश्रियः रात्रिरूपं वर्णितमस्ति । परं बिल्हणवर्णिता रात्रिरञ्जिता भुवनश्रीरद्वितीयैव ।

नीलरत्नघटितेव समन्तात् पीडितेव निबिडाञ्जनपुञ्जैः ।
प्लावितेव जलराशितरङ्गैर्ध्वान्तराजिभिरभूद्भुवनश्रीः[3] ॥

सर्वत्र गहनतमसि प्रसृते जगतां लोचनानि विफलतां भजन्तीति वर्णनं यथा शूद्रकपद्ये स्वीयां सौष्ठवानुस्यूततां द्योतयति—

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता[4] ॥

तथैवान्धतमसावृतासु रात्रिषु दृष्टिवैफल्यवर्णनं सौष्ठवतातिशयितामावहति बिल्हणपद्येऽपि—

सर्वनिह्नवविधौ कृतबुद्धेर्लोचनानि विफलानि विधाय ।
स्पर्शनेन्द्रियममुद्रितशक्तिः प्रातिकूल्यमकरोत्तिमिरस्य[5] ॥

कालिदासबिल्हणयोर्वर्णनानां तुलनात्मकसमीक्षणेन प्रतीयते यद्बिल्हणस्य वर्णनप्रसङ्गाः कालिदासवर्णप्रसङ्गा इव नितान्तं रोचकाः प्रभावोत्पादकाः च सन्ति । बिल्हणवर्णनेषु न किमपि स्थलं यत्र रममाणाः सहृदया आत्मानमपि न विस्मरन्ति । सत्यन्त्विदमस्ति यत्संस्कृतकाव्यवाङ्मये कालिदासमतिरिच्यान्यः कोऽपि कविर्नास्ति यस्य वर्णनानि रोचकतायां बिल्हणतुला-

---

१. विक्र० ११।१६ ।
२. विक्र० ११।१८ ।
३. विक्र० ११।१७ ।
४. मृच्छकटिकम् १।३४ ।
५. विक्र० ११।१९ ।

कोट्यधिरोहणे क्षमाणि स्युः। महाकवेर्बिल्हणस्य वर्णनप्रसङ्गेषु सर्वतोऽधिकं वैशिष्ट्यमिदमस्ति यत्तेषु न कुत्रापि रसभङ्गविषयताप्रवेशः। किं बहुनान्धकारादिवर्णनस्थलेष्वपि विक्रमाङ्कदेवचरिते नास्ति सरसताऽभावो मनागपि। वक्ष्यमाणपद्येऽन्धकारवर्णने को नाम सहृदयः सरसतानुभूतिं न स्वीकुर्यात?

कस्य न प्रतिहतं वत चक्षुर्ध्वान्तसन्ततिभिरुड्डमराभिः।
केवलं मनसिजप्रहितानां नावधूतमभिसारवधूनाम्[1] ॥

अन्धकारवर्णने स्यन्दतः शृङ्गारस्य साक्षाद्दर्शनं कर्तुं शक्यते—

पांसुतल्पसुरतप्रवणानां विश्वलोचनपुटप्रतिबन्धे।
कुत्र कुत्र न तिरस्करिणीत्वं ध्वान्तमण्डलमगाच्चपलानाम्[2] ॥

ध्वान्तस्य पूर्णयौवनं वर्णयित्वा द्वीपप्रभापराहतस्य चित्रं साध्वस्ति कविना चित्रितम्—

पश्चिमाचलविटङ्कनिपाते विद्रुता इव रुचस्तपनस्य।
दीप्रदीपकिरणाः सृणिभङ्गीमारभन्त तिमिरद्विरदस्य[3] ॥

रात्रिवर्णनप्रसङ्गेभिसारिकाभिसरणचित्राणि यानि कविना प्रस्तुतानि तानि सर्वाणि सरसानि मनोहराणि काव्योत्कर्षवर्धकानि च सन्ति। तासु द्वित्राण्युदाहरणानि प्रस्तूयन्ते—

सूत्रिताभिसरणाः प्रणयिन्यः कान्तसङ्गममविघ्नमवापुः।
फूत्कृतैः पथि निवारितदीपाश्चापलं जयति पञ्चशरस्य ॥
रासभेन सहिता रजकस्त्री रूपधारि विरचय्य शरीरम्।
कापि वञ्चितवती जनबाधां कं विडम्बयति नो कुसुमेषुः ॥
कापि मुख्यपदवीमधिरोप्य स्वां सखीं स्वकरधारितदीपा।
प्राणनाथरतिगेहमयासीदद्भुतो रतिपतेरुपदेशः[4] ॥

वर्णनप्रसङ्गेष्वेवंविधानां सरसपद्यानां पदे पदे विद्यमानत्वान्न कोऽपि बिल्हणवर्णनेषु रसभङ्गादिदोषमुद्भावयितुं समर्थः। यदि कोऽपि हठाद् दुर्धिया वा बिल्हणवर्णनानि न रोचकानि न च सङ्गतानीति कथयितुं साहसं कुरुते, तर्ह्यसौ

१. विक्र० ११।२०।
२. विक्र० ११।२१।
३. विक्र० ११।२२।
४. विक्र० ११।२३-२५।

केवलं निजकाव्यमर्मज्ञतानभिज्ञतायास्तथा च हृदयहीनताया एव परिचयं ददाति ।

चन्द्रोदयवर्णनम्—

महाकवेर्बिल्हणस्य चन्द्रोदयवर्णनं कस्माच्चिदपि महाकवेः चन्द्रोदयवर्णनान्नास्ति न्यूनतरम् । विक्रमाङ्कदेवचरितस्य चन्द्रोदयवर्णनं कालिदासस्य कुमारसम्भवरघुवंशीयचन्द्रोदयवर्णनयोः साम्यं कर्तुमर्हतीति नास्त्यत्र शङ्कावकाशः[1] । बिल्हणकृतचन्द्रोदयवर्णनकौशलस्य मूर्तिमत्स्वरूपदर्शनमपेक्षितञ्चेत्स्यात्तर्हि तद्वक्ष्यमाणपद्ये द्रष्टव्यम्—

दिग्वधूरथ पुरन्दरसेव्या पाकपाण्डुशरकाण्डविडम्बि ।
बिभ्रती मुखमवोचत गर्भे रोहिणीप्रणयिनः परिणामम्[2] ॥

उक्तपद्ये शशिशिशोर्गर्भे परिणतिं सूचयन्त्याः पुरन्दरदिग्वध्वः पाकपाण्डुशरकाण्डविडम्बि मुखमेवास्ति कवेर्वर्णनकौशलकोशस्याक्षुण्णताया अपरिमेयतायाश्च प्राणवत्प्रमाणम् । उक्तपद्ये पूर्वककुभागर्भेस्थितस्य चन्द्रमसो वर्णनं यावन् मनोहरं तावदेवोदयाद्रेः किञ्चिद्बहिर्विनिर्गतस्य तस्य । तद्यथा—

पूर्वदिङ्मुखमशोभत किञ्चिन्निर्गतेन शिखरादुदयाद्रेः ।
चारुचन्दनविलेपनपाण्डु-भ्रूपताकमिव शीतकरेण[3] ॥

उदीयमानश्चन्द्रः किञ्चित्पाटलतां धारयति । पाटलस्य चन्द्रबालस्योत्प्रेक्षामाध्यमेन यद्युक्तियुक्तं वर्णनं कविनाऽकारि, तन्नूनमात्मनोऽनुपमेयतां धारयति । तद्यथा—

पाटलेन महसां पटलेन प्राच्यशैलभुवि बालमृगाङ्कः ।
धातुभृङ्गपृथुलस्थलधूली-केलिधूसरशरीर इवासीत्[4] ॥

यथा कालिदासेन पाटलचन्द्रस्य प्रशस्तं वर्णनं कृतमस्ति वक्ष्यमाणपद्ये तथैव बिल्हणेनापि कृतं पाटलचन्द्रस्य वर्णनम् । तद्यथा कालिदासपद्यम्—

पश्य पक्वफलिनीफलत्विषा बिम्बलाञ्छितवियत्सरोम्भसा ।
विप्रकृष्टविवरं हिमांशुना चक्रवाकमिथुनं विडम्ब्यते[5] ॥

---

१. कुमार० ८।५८ ।
२. विक्र० ११।२६ ।
३. विक्र० ११।२८ ।
४. विक्र० ११।२९ ।
५. कुमार० ८।६१ ।

बिल्हणपद्यं यथा—

पाटलांशुरगमत्सवितेति श्वेतभानुरपि तादृगुपागात्
वञ्चनार्थमिव पङ्करुहिण्यस्तां पुनश्छलयितुं न शशाक[1] ॥

बिल्हणस्य चन्द्रोदयादिवर्णनानि वैदुष्यप्रदर्शनमात्रप्रयोजनकान्येव न सन्ति। बिल्हणस्य वैदुष्यप्रचारकत्वं प्रकाशकत्वञ्च तद्वर्णनानां सरसतातिशयित्वेनैव सम्पाद्यते। बिल्हणेन चित्रितानि चन्द्रमसश्चित्राणि सरसताऽधिक्यादतिरमणीयानि सन्ति, तेषु रममाणः सहृदयः तन्मय एव भवति। वक्ष्यमाणं पद्यं सरसतोदाहरणत्वेनोपन्यस्यते—

वल्लभेन जगतां निजधाम्ना जातगर्व इव रात्रिभुजङ्गः।
पादविन्यसननर्मविधायी निर्ममे कुमुदिनीं गतनिद्राम्[2] ॥

उक्तपद्ये प्रेयसीप्रेयसोः प्रेमव्यवहारस्य प्रेमाञ्चितञ्चित्रं चित्रयित्वा सहृदयहृदयेषु शृङ्गाररसस्य दिव्यानुभूतिमनुभाव्य काव्यकौशलेष्वात्मनः सर्वतन्त्रस्वतन्त्रं साम्राज्यं व्यवस्थापितं कविनेति मे मतिः। रक्तभावमपहाय परिशुद्धतां प्राप्नुवतो विधोर्वर्णनं कुमारसम्भवादिष्वपि कालिदासादिभिः कविभिर्यत्कृतं तदपि यद्यपि काव्यसौष्ठवानुस्यूतं, परं बिल्हणवर्णितमपि तद्वर्णनं नास्ति कस्माच्चिदपि न्यूनतरम्। तद्यथा कालिदासपद्यम्—

रक्तभावमपहाय चन्द्रमा जात एष परिशुद्धमण्डलः।
विक्रिया न खलु कालदोषजा निर्मलप्रकृतिषु स्थिरोदया[3] ॥

अस्मिन्नेव सन्दर्भे बिल्हणपद्यम्—

क्षाल्यमान इव मानवतीनां दृग्भिरश्रुजलनिर्झरिणीभिः।
त्यक्तवानुदयरागमशेषं पूर्वदिक्तिलकबिन्दुरिवेन्दुः[4] ॥

कुमारसम्भवे भावोऽयं कालिदासेन पद्येनैकेन वर्णितः, बिल्हणेन च पद्यद्वयेन। अस्मिन्सन्दर्भे बिल्हणस्य द्वितीयं पद्यम्—

पारणोद्यतचकोरपुरन्ध्रि-क्षिप्तलोचनरुचामिव पुञ्जैः।
पाटलं पटलमिन्दुरुचीनां रक्तकम्बलविडम्बि बभूव[5] ॥

---

१. विक्र० ११।३० ।
२. विक्र० ११।३६ ।
३. कुमार० ८।६५ ।
४. विक्र० ११।३५ ।
५. विक्र० ११।३४ ।

मानिनीजनमानविमाननस्य मानचित्रं विचित्ररूपेणास्ति चित्रितं कविना चन्द्रोदयवर्णनप्रसङ्गे, यद्वीक्ष्य कवेर्वर्णनकौशले वैचित्र्यं स्वीकर्तव्यमेव। तद्यथा–

द्रावितस्फटिकशैलविटङ्क-स्फारनिर्झरपरम्परयेव ।
पूरिता शशिरुचा भुवनश्रीर्मानपङ्कमनुदत्प्रमदानाम्[1] ॥

कविचित्रितानि विविधानि विचित्राणि चन्द्रचित्राणि समीक्ष्य कवेर्विलक्षण-प्रतिभाप्रभावस्य गाम्भीर्यमपरिमेयमप्रतर्क्यमिव प्रतिभाति । चन्द्रमसः दर्पणरूप-चित्रमस्ति अतीव दर्शनीयम्—

रूप्यदर्पणतलप्रतिमल्ले लाञ्छनं तुहिनदीधितिबिम्बे ।
शोभते स्म गगनप्रतिबिम्बच्छायमद्रिशिखरस्थितिभाजि[2] ॥

अवाप्तक्षीरनिधिविलासस्य शीतरश्मिकिरणामृतपूरस्य सुधावर्षणक्षमं चित्रं अतीवाकर्षणक्षममस्तीति नास्यापलापः कर्तुं शक्यते । तद्यथा—

दत्तदिक्तटविपाटनशङ्कः शीतरश्मिकिरणामृतपूरः ।
मन्थशैलविशरारुशरीरक्षीरनीरधिविलासमवाप[3] ॥

कमलिनीकान्तस्य कौमुदी चन्दनलेपवद्बहिः कान्तिवर्धिका मनसि च कान्ति-वर्धिकास्तीत्याशयः कविभाषया काव्यरसपिपासूनां पिपासाशान्तये पूर्णतो नाल-मिति न—

केतकद्युतिनिभं भुवनान्तस्तन्महः प्रकृतिशीतलमिन्दोः ।
कस्य नो वपुषि चन्दनलेपः कान्तितश्च गुणतश्च बभूव[4] ॥

उक्तप्रसङ्गेषु चन्द्रिकारसभरस्य हर्षोल्लासाधायकत्वं वर्णयन् कविः समाजस्य तद्वर्गमपि न विस्मृतवान् यच्चन्द्रकिरणाक्रान्तः सन् जीवनधारणमप्यसम्भवमिति मन्यते । कविना तद्वर्गदुःखस्य मार्मिकं विश्लेषणं कृत्वा तदतिदुःखितहृदयचित्रणे पूर्णं साफल्यमवाप्तम् । तद्यथा—

क्षिप्यतां क्वचन चन्दनपाण्डुश्चन्द्रिकारसभरः कलशीभिः ।
ऊचुरित्थमबलाः प्रियहीनाः पादयोरपि निपत्य सखीनाम्[5] ॥

---

१. विक्र० ११।३८ ।
२. विक्र० ११।३७ ।
३. विक्र० ११।४० ।
४. विक्र० ११।४१ ।
५. विक्र० ११।४२ ।

ऋतुवर्णनम्

वसन्तवर्णनम्—

विक्रमाङ्कदेवचरितस्य सप्तमे सर्गे वसन्तर्तुवर्णनमालोक्य कालिदास-वसन्तवर्णनस्य स्मरणं सञ्जायते। बिल्हणस्य वसन्तवर्णनमपि कालिदासस्य वसन्तवर्णनमिव सहृदयहृदयस्यान्तस्तत्त्वं स्पृशति। यैर्विशिष्टविशेषणैः मधोर्विशेषतां प्रतिपादयता कविना वसन्तागमनं सूचितम्, तैः विशेषणैः वसन्त-वर्णनोपक्रमः शोभातिशायी सञ्जातः—

अत्रान्तरे मन्मथबालमित्रं लतावधूविभ्रमसूत्रकारः।
स्थानोपदेशी पिकपञ्चमस्य शृङ्गारबन्धुर्मधुराविरासीत्[1] ॥

पद्येऽस्मिन् मधोर्विशेषणानां सारल्ये सारस्ये च न प्रमाणान्तरमपेक्षते। वसन्तर्तौ भास्करस्य उत्तरायणगमनवर्णने उत्प्रेक्षामाध्यमेन विचित्रहेतुतां प्रतिपाद्य वसन्तवर्णनसौष्ठवमुत्कर्षाधायकत्वं प्रापितम्। तद्यथा—

रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम्।
उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम्[2] ॥

वसन्तर्तुवर्णनप्रसङ्गेषु दक्षिणानिलस्य विशिष्टं महत्त्वमस्ति। संस्कृतकविभिर्विभिन्नप्रकारैस्तस्य वर्णनेन वसन्तर्तोः सौन्दर्यं संवर्धितम्। उक्तरीत्या वसन्तवर्णने बिल्हणस्य वर्णनकौशलं वस्तुतोऽस्ति प्रशस्यम्। दक्षिणानिलस्य मनोहरैर्वर्णनैः बिल्हणवर्णितो वसन्तः स्वकीयरम्यदृश्यैः सहृदयमनांस्यपहर्तुं पूर्णरूपेण सफलीभूतोऽस्ति। वसन्ते दक्षिणानिले वहति वियोगिनीनां मानसिकक्लेशस्य कविना यानि चित्राणि चित्रितानि तानि वस्तुतोऽवर्णनीयानि।

देया शिलापट्टकपाटमुद्रा श्रीखण्डशैलस्य दरीगृहेषु।
वियोगिनीकण्टक एष वायुः कारागृहस्यास्तु चिरादभिज्ञः[3] ॥

उक्तपद्ये वसन्तर्तौ वियोगिनीभिरनुभूतस्य दुःखस्य सफलं चित्रणं वर्तते।

बाणेन हत्वा मृगमस्य यात्रा निवार्यतां दक्षिणमारुतस्य।
इत्यर्थनीयः शबराधिराजः श्रीखण्डपृथ्वीधरकन्दरस्थः ॥

१. विक्र० ७।३।
२. विक्र० ७।६।
३. विक्र० ७।९।

यद्वा मृषा तिष्ठतु दैन्यमेतन्नेच्छन्ति वैरं मरुता किराताः ।
केलिप्रसङ्गे शबराङ्गनानां स हि स्मरग्लानिमपाकरोति[1] ॥

उक्तपद्यद्वयं दक्षिणमरुतो यात्राया निवारणाय तन्मृगहतये शबराधिराजराजस्य प्रार्थनायाः कल्पनात् पुनश्च केलिप्रसङ्गे शबरस्त्रीणां सुरतश्रमापहरणकारणात्किराता मरुता वैरं नेच्छन्तीति कारणात्तन्निषेधकल्पनाद् दक्षिणानिलवर्णनं तदन्तरङ्गत्वाद्वसन्तवर्णनं चाप्यवर्णनीयमिति प्रमाणयति ।

वसन्ततौ दोलाविलासस्य यादृशानि मनोहराणि दृश्यानि काव्येऽस्मिन् दृश्यन्ते तादृशान्यन्यत्र प्रायः दुर्लभान्येव सन्ति । महाकविना बिल्हणेन वर्णितो दोलाविलासो न केवलं दोलाविलासः प्रत्युत रसराजस्य प्रासादमाला कन्दर्पदेवस्य विमानसृष्टिश्चापि वर्तते ।

कन्दर्पदेवस्य विमानसृष्टिः प्रासादमाला रसपार्थिवस्य ।
चैत्रस्य सर्वर्तुविशेषचिह्नं दोलाविलासः सुदृशां रराज[2] ॥

दोलाविलासव्याजेन महाकविर्वसन्तवर्णनस्योत्कर्षाधानरूपे प्रयासे पूर्णरूपेण साफल्यमाप ।

सौन्दर्यमिन्दीवरलोचनानां दोलासु लोलासु यदुल्ललास ।
यदि प्रसादाल्लभते कवित्वं जानाति तद्वर्णयितुं मनोभूः[3] ॥

कवित्वलाभश्चेत्स्यात्तर्हि मनोभूरेव दोलाविलाससौन्दर्यं वर्णयितुं प्रभवेदितिकल्पनया कविः दोलाविलाससौन्दर्यस्य अथवा वसन्तवर्णनस्यानौपम्यमवर्णनीयत्वञ्च समसाधयत् ।

कुचस्थलैर्निर्दलितो वधूनां संजीवितः श्वाससमीरणेन ।
क्लेशातिरेकान्मलयानिलोऽभूद् भृत्येषु मान्यः कुसुमायुधस्य[4] ॥

उक्तपद्ये दोलारूढकामिनीकुचकलशनिर्दलितः पुनश्च तासामेव श्वाससमीरणैः सञ्जीवितो मलयानिलः क्लेशातिरेकात्कामभृत्येषु मान्यतामासाद्य वसन्तशोभावृद्धिकारणेष्वपि मुख्यतामासादयति । वसन्तवर्णनान्तर्गतं दोलान्दोलनरतानां वनितानां दक्षिणपवनेन सह स्पर्शस्य यद्वर्णनं काव्येऽस्मिन् वर्तते, तदधीयानः को नामालोचकः बिल्हणस्य वर्णनकौशलं मुक्तकण्ठेन न प्रशंसेत् ? तद्यथा—

---

१. विक्र० ७।१०, ११ ।
२. विक्र० ७।१५ ।
३. विक्र० ७।२० ।
४. विक्र० ७।२४ ।

चुचुम्ब वक्त्राणि चकर्ष वस्त्रं चिरं विशश्राम नितम्बबिम्बे ।
दोलाविलासे गुरुरङ्गनानामनङ्कुशः केरलमारुतोऽभूत्[१] ॥

वसन्ततौं लताविकासस्य वर्णनं प्रायः सर्वेष्वेव महाकाव्येषु भवति, बिल्हणीयं लताविकासवर्णनं तानि सर्वाण्यतिशेते, इति वक्ष्यमाणपद्ये लताविकासवर्णनस्य वैचित्र्यं सङ्केतयति—

त्वरोपयातप्रियबाहुपाशरुद्धेषु कण्ठेषु वियोगिनीनाम् ।
वृथासमाहूतकृतान्तपाशः स्मितं लतानां मधुराततान[२] ॥

शीतकाले तुषारपातकारणात्पङ्कजानि न विकसन्ति । शीतावसानावसरे पङ्कज-विकासोपक्रमः सम्भवति । बिल्हणस्य पङ्कजविकासवर्णनमपि पूर्वोक्तलता-विकासवर्णनवदस्ति महत्काव्यसौष्ठवाधायकम् । तद्यथा—

श्रुत्वेव वृत्तावसरं तुषारं बहिःस्थितानामलिनां निनादैः ।
द्विवर्षकन्यामुखकोमलाभं पङ्कोदरात्पङ्कजमाविरासीत्[३] ॥

अत्र हि बहिस्स्थितानामलिनां निनादैः तुषारसमयसमाप्तिमाकर्ण्य पङ्कजमुखा-विर्भावः तस्य (पङ्कजमुखस्य) द्विवर्षकन्यामुखकोमलाभमित्युपमानञ्च महत्सौष्ठ-वमावहति, तदस्ति नितरां प्रशस्यम् । वनश्रिया मधुमुखचुम्बनस्य दृश्यमप्यति सरसतयास्त्यतीव रमणीयं दर्शनीयञ्च—

सुगन्धनिश्वासमिवानुवेलमुद्वेल्लता दक्षिणमारुतेन ।
मुखं प्रसूनस्मितदन्तुरं तच्चुचुम्ब मुग्धस्य मधोर्वनश्रीः[४] ॥

यथा कश्चिद्बालको बाल्यभावेन क्रीडन् वृक्षारोहणं धूलिविलुठनम्, अंशुकाकर्ष-णञ्च करोति तथा वसन्तबालोऽपि कृतवानिति वर्णनेन बिल्हणस्य वर्णनकौशलं निःसंशयमप्रतिमं प्रतिभाति । तद्यथा—

समारुरोहोपरि पादपानां लुलोठ पुष्पोत्कररेणुपुञ्जे ।
लताप्रसूनांशुकमाचकर्ष क्रीडन्वनैः किं न चकार चैत्रः[५] ॥

उक्तपद्ये बालवसन्तस्य बाललीलावर्णनं कृत्वा यौवनाधिरूढस्य तस्य यौवन-

१. विक्र० ७।२६
२. विक्र० ७।३० ।
३. विक्र० ७।३३ ।
४. विक्र० ७।३५ ।
५. विक्र० ७।३७ ।

सुलभविलासानां वर्णनं यत्कविनाकारि, तदपि वसन्तवर्णने तदीयं वैलक्षण्यं द्योतयति। युवानो यौवनमवाप्य स्वप्रियाभ्यः ओष्ठसमर्पणादिकां केलिक्रियां यथा विदधति, तथैव वसन्तोऽपि मुकुलस्तनीभ्यो लताप्रियाभ्यः प्रवालौष्ठसमर्पणे चातुरीमापेति भावस्य कविगिरा यद्वर्णनं समभूत्, तत्सौन्दर्यमस्ति द्रष्टव्यम्—

दक्षः प्रवालौष्ठसमर्पणाय लतावधूनां मुकुलस्तनीनाम्।
मत्तालिवैतालिकगीतकीर्तिर्भ्रमन्मधुर्यौवनमारुरोह[1] ॥

वसन्ते समायाते चूतमञ्जरीषु कलिकाग्रभागे चेतस्ततो भ्रमन् भ्रमरो न क्षणमपि विरमतीति वर्णनं कविशब्दैः वाचमासाद्य मुखरितमिव दरीदृश्यते—

चचार चूतद्रुममञ्जरीषु चुचुम्ब नानाकलिकामुखानि।
स्त्रीराज्यमध्यस्थ इव द्विरेफः स्थातुं न लेभे क्षणमेवमेव[2] ॥

नात्र संशयो यद्वसन्तर्तुः सौन्दर्येऽन्यर्तून् किमपि न गणयति, परं बिल्हणेन येनाद्भुतकौशलेन भावोऽयं व्यक्तस्तेन वसन्तसौन्दर्ये चतुर्गुणा वृद्धिः सञ्जातेति प्रतिपादने नास्ति मनागप्यसत्यता। इदं पद्यमुक्ततथ्यमनुमोदयते—

विलासिनामादिगुरुस्त्रिलोक्यामन्योऽन्यलीलाभुजबन्धनेषु।
उत्तम्भिताशोकपलाशपाणिर्न चैत्रमल्लः प्रतिमल्लमाप[3] ॥

लोके मित्रे समायाते मधुरभाषणैस्तस्य स्वागतम्, तेन सह आलिङ्गनादिकं क्रियते। कामोऽपि वसन्तस्यास्त्यनन्यमित्रम्, तस्मिन् समायाते वसन्तेन क्रियमाणं तत्स्वागतालिङ्गनादिवर्णनं नूनं कवेर्वर्णननैपुण्यं शंसति। तद्यथा—

चूतद्रुमालीभुजपञ्जरेण रणद्द्विरेफावलिकङ्कणेन।
मित्रं मधुः कोकिलमञ्जुनाद-पूर्वाभिभाषी स्मरमालिलिङ्ग[4] ॥

वसन्ते वनोपवनेषु चतुर्दिक्षु पुष्पाणि विकसन्ति। प्रायः सर्वैः कविभिः स्वीयकाव्येषु पुष्पविकासवर्णनं कृतमस्ति। परं बिल्हणस्य पुष्पविकासवर्णनशैली किमपि अनुपमं सौन्दर्यमादधाति। उदाहरणार्थं पद्यद्वयं प्रस्तूयते—

प्रसूननाराचपरम्पराभिः वर्षत्सु योधेष्विव पादपेषु।
वसन्तमत्तद्विरदाधिरूढः प्रौढत्वमेति स्मरभूमिपालः ॥

---

१. विक्र० ७।३८।
२. विक्र० ७।४६।
३. विक्र० ७।४७।
४. विक्र० ७।४६।

समर्प्यमाणाद्भुतकौसुमास्त्रश्चैत्रेण चित्रीकृतकाननेन ।
अधिज्यधन्वापि पराङ्मुखोऽभून्निषङ्गभारे भगवाननङ्गः[1] ॥

अत्र हि एकत्र पादपयोद्धृणां प्रसूननाराचपरम्परावर्षया वसन्तमत्तद्विरदाधिरूढस्य स्मरभूमिपालस्य प्रौढत्ववर्णनम्, अन्यत्र चित्रीकृतकाननेन समर्प्यमाणाद्भुतास्त्रस्य सज्जीकृतचापस्यापि भगवतोऽनङ्गस्य निषङ्गभारे पराङ्मुखत्ववर्णनञ्च वसन्ते पुष्पातिशयितां प्रतिपाद्य वसन्ततौ पुष्पविकासवर्णने बिल्हणस्याद्भुतवर्णनकौशलं प्रतिपादयतः ।

वसन्तवर्णनप्रसङ्गे वसन्तं सम्बोध्य विरहिणीनां प्रलापमाला नवीनकल्पनाभिरत्यधिकसौष्ठवानुस्यूतत्वादतितरां प्रशस्या हृदयग्राह्या च[2] ।

ग्रीष्मर्तुवर्णनम्—

विक्रमाङ्कदेवचरितस्य द्वादशे सर्गे ग्रीष्मवर्णनमप्यतीव सुन्दरं वर्तते । ग्रीष्मवर्णनान्तर्गतं स्वेदबिन्दुवर्णनं कियदाकर्षकमिति द्रष्टव्यम्—

मुक्तावदातश्रमवारिलेश-विशोभिलावण्यरसप्रवाहः ।
सावर्ण्यमर्णोनिधिना बभार स ताम्रपर्णीप्रणयीकृतेन[3] ॥

उक्तपद्ये मुक्ताधवलैः स्वेदबिन्दुभिर्लावण्यरसप्रवाहस्य विक्रमस्य अर्णोनिधिना सह उपमामाध्यमेन सावर्ण्यवर्णनं यत्प्रसादगुणव्यञ्जकैर्वर्णैर्वर्णितं तदस्ति अतिशयाकर्षणकेन्द्रम् ।

स्तनादिषु चन्दनचर्चनैः ग्रीष्मतापे च युगपद् विजयप्राप्तिवर्णनमपि नूनमुत्कृष्टकोटिकम्—

श्रीखण्डपाण्डुस्तनमण्डलाभिरालिङ्गितोऽसौ मुहुरङ्गनाभिः ।
न केवलं ग्रीष्ममहोष्मसङ्गमनङ्गतीव्रातपमत्यजैषीत्[4] ॥

अस्मिन् पद्ये ग्रीष्ममहोष्मस्य अनङ्गतीव्रतापस्य च जये चन्दनपाण्डुस्तनाभिरङ्गनाभिः सहालिङ्गनरूपहेतुप्रतिपादनेन काव्यलिङ्गालङ्कारमाध्यमेन ग्रीष्मवर्णनं महत्सौष्ठवाधायकं समजायत । अनेनैव प्रकारेण अन्यपद्येष्वपि अर्थान्तरन्यासादिभिरलङ्कारैः ग्रीष्मवर्णनमलङ्कृतमस्ति ।[5] ।

---

१. विक्र० ७।५३-५४ ।
२. विक्र० ७।५६-६० ।
३. विक्र० १२।३७ ।
४. विक्र० १२।३८ ।
५. विधाय तैक्ष्ण्यं गणितान्यहानि स प्रतापहानेः प्रणयित्वमाययौ ।
परोपतापैकपरायणाश्चिरं क्व वा भवन्त्यभ्युदयस्य भूमयः ॥
विक्र० १३।२ ।

प्रासाददीर्घिकासु राज्ञां जलकेल्यादिवर्णनैः कवयः स्वकाव्येषु सौष्ठवमाधातुं प्रयतन्ते। अस्मिन् सन्दर्भे विक्रमाङ्कदेवचरितेऽपि प्रागुक्तवर्णनस्य मनोरमं स्वरूपमालोक्यते। उदाहरणार्थं पद्यद्वयमत्रोपन्यस्यते—

श्रोणितटोल्लासितरङ्गदोला-विलासवाचालितसारसासु।
स तासु रेमे सहकामिनीभिर्दीर्घासु लीलावनदीर्घिकासु[1]॥

चकार कान्ताकुचपत्रभङ्ग-कस्तूरिकापङ्ककलङ्कितानि।
वर्षाजलभ्रान्तिविलोलहंसहासानि लीलासरसीपयांसि[2]॥

'विलासवाचालितसारसासु' 'दीर्घासु लीलावनदीर्घिकासु' 'लीलासरसीपयांसि' इत्यादिपदैः प्रसादगुणगुम्फिता वर्णनशैली ग्रीष्मवर्णने सौन्दर्याधानहेतुः।

दवानलप्लुष्टवनान्तभस्मभिः क्षमाधराः पाण्डुरुचश्चकासिरे।
गता इवाङ्कस्थितबालवृक्षक-क्षयोत्थवैराग्यवशात्तपस्विताम्[3]॥

दावानलेन भस्मीभूतपादपपुत्राणां पर्वतानां पुत्रशोकाद्वीतरागत्वरूपनवीनकल्पनया अत्र सौन्दर्यमाधाय अवसानमधिगच्छतो निदाघस्य वर्णने कविरात्मनोऽप्रतिहतप्रतिभायाः प्रमाणमुपन्यस्तवान्।

वर्षर्तुवर्णनम्—

विक्रमाङ्कदेवचरितस्य सम्पूर्णस्त्रयोदशः सर्गः वर्षर्तोर्मधुरमनोरमवर्णनैरलङ्कृतोऽस्ति। अस्मिन्सर्गे वर्षर्तोः विभिन्नरूपाणां विभिन्नानि चित्राणि चित्रितानि समुपलभ्यन्ते।

अपश्यदस्मिन्समये महीपतिः पयोदखण्डं मिलितार्कमण्डलम्।
सकुण्डलं वारिमुचामनेहसः कुतोऽपि मूर्धानमिवार्धनिर्गतम्[4]॥

अस्मिन् पद्ये कविर्बालवारिदस्य यदर्धनिर्गतं सकुण्डलं मूर्धानमपश्यत्, तस्य सफलं चित्रणं वर्षावर्णनोपक्रम एव सौष्ठवातिशयं प्रकाशयति।

वक्ष्यमाणपद्ये नूतनपयोदमालायाः कदाचित्पर्वतमूर्धावलिरूपेण, कदाचिद्विद्युद्दीपाञ्जनरूपेण, कदाचिच्च गगनवनतमालमालारूपेण कविकृतं वर्णनं वर्षावर्णनप्रसङ्गेषु समस्तेऽपि काव्यवाङ्मये नूनं सर्वोत्कर्षेण वर्तत इति प्रतीयते—

---

१. विक्र० १२।६१
२. विक्र० १२।६६।
३. विक्र० १३।३।
४. विक्र० १३।१५।

नभस्तलारण्यतमालमालिका महीभृतां मूर्धसु मूर्धजावलिः ।
तडित्प्रदीपाञ्जनपुञ्जसन्निभा विभाव्यतां सुभ्रु नवाभ्रमण्डली[1] ।।
अनेन नूनं जलधेः समुद्धृतं विचित्ररत्नाङ्कुरदन्तुरं पयः ।
अनेकवर्णाञ्चितमन्यथा कथं पयोमुचा निर्मितमिन्द्रकार्मुकम्[2] ।।

जलधेः विचित्ररत्नाङ्कुरदन्तुरपयःग्रहणरूपकल्पनया कृतमिन्द्रधनुषो वर्णनमेव वर्षावर्णननिपुणान्यकविकीर्तिकान्तां क्लान्तां विधातुं क्षममिति नात्र सन्देहः । विद्युच्चमत्कृतिवर्णनमप्यस्ति वर्षावर्णनस्याङ्गम् । स्वीयाद्भुतकल्पनाशक्त्या महाकविना बिल्हणेन कृतं तडिच्चमत्कृतिवर्णनमपि नूनमस्ति अतितरामनुपमम् । तद्यथा—

अदभ्रमभ्रोपलपट्टकेषु ये शितीक्रियन्ते मदनेन पत्रिणः ।
तडिल्लता तन्निकषोत्थपावक-स्फुलिङ्गभङ्गीं ललिताङ्गि सेवते[3] ।।

अत्र हि अभ्रनिकषे शितीक्रियमाणकामबाणान्निष्क्रम्यमाणस्फुलिङ्गभङ्गीं तडिल्लता तनुते इति कल्पनया तडिल्लताऽऽभावर्णने कवेरद्भुतवर्णनकौशलं प्रमाणीक्रियते ।

निदाघमाघ्रातजगत्त्रयं क्रुधा विधाय लीलाकवलं बलाहकः ।
इतो बलाकाभिरवस्थितां मुखे तदस्थिमालामिव दर्शयत्ययम्[4] ।।

प्रस्तुतपद्ये सन्तप्तत्रिभुवनं निदाघं लीलया कवलीकृतेन मेघेन तदस्थिमालैव बकपङ्क्तिरूपेण मुखे धृतेति नवीनया कल्पनया वर्षावर्णनं नूनं सौष्ठवस्य चरमसीमानं प्राप्तवत् ।

द्रवन्ति हंसाः सुरचापचुम्बिनः पयोदवृन्दान्निपतत्सु बिन्दुषु ।
प्रवर्तमानां गुलिकाधनुर्मुखाद् विशङ्कमाना इव गोलकावलिम्[5] ।।

अत्र हि वर्षर्तौ हंसा मानसं गच्छन्तीति कविप्रसिद्धेः कविकृतं वर्णनं स्वकीयरम्यतातिशयेन पर्याप्तरूपेण सहृदयहृदयहरणशक्तमस्ति । पर्वतगुहासु प्रच्छन्नमपि निदाघं तडिद्दीपेनान्विष्य नाशयितुमुत्सहते वारिदागम इति नवीनया कल्पनया बिल्हणस्य वर्षर्तुः कियतीं शोभां धत्ते इति वक्ष्यमाणपद्येऽस्त्यवलोकनीयम्—

---

१. विक्र० १३।१८ ।
२. विक्र० १३।२१ ।
३. विक्र० १३।२५ ।
४. विक्र० १३।३१ ।
५. विक्र० १३।३३ ।

तृणानि भूभृत्कटकेषु निक्षिपन् न कैः स्फुरद्धीरमृदङ्गनिस्वनः ।
तडित्प्रदीपैश्चलदङ्कलीलया निदाघमन्विष्यति वारिदागमः[1] ॥

कृष्णवर्णमेघाङ्गारेषु प्रज्वलितविद्युच्छिखिनि स्मरशरतैक्ष्ण्यं विदधतोऽम्बुदागमस्य कविकल्पितमयस्करत्वं समीक्ष्य तस्य वर्षावर्णनकौशलं भूयो भूयोऽपि प्रशस्यते—

अनङ्गशस्त्राणि नताङ्गि तीक्ष्णतां नयत्ययस्कार इवाम्बुदागमः ।
मलीमसाङ्गाररुचां पयोमुचां तथा हि मध्ये ज्वलितस्तडिच्छिखी[2]॥

वक्ष्यमाणपद्ये कमलिनीकामुकेन समस्तमपि जलं विसूत्रितमिति क्रोधेन जलधारामयेन लगुडेन तडितिशब्देन पद्मिनीं ताडयतो जलधरस्य कविचित्रितं चित्रमप्यस्ति भूरि भूरि प्रशस्यम्—

निदाघमित्रेण विसूत्रितं जलं तव प्रियेणाखिलमुष्णरश्मिना ।
क्रुधेति धारालगुडैर्बलाहकस्तडित्ययं ताडयतीव पद्मिनीम्[3] ॥

वर्षाकाले क्षुद्रनदीनां समुद्रसमागमवर्णने बृहन्नदीनां नदान्तरसमागमवर्णनमप्यस्ति महत्सौष्ठवाधायकम्—

कृतक्षणं क्षुद्रनदीसमागमे तरङ्गिणीनाथमवेक्ष्य सम्प्रति ।
विलङ्घ्य मार्गं सहसा महापगाः पतन्ति नीचेषु नदान्तरेष्वपि[4] ॥

प्रस्तुतपद्ये पत्यौ परस्त्रीगामिनि सति स्त्रियोऽपि परपुरुषगामिन्यो भवितुमर्हन्तीति व्यञ्जनयापि वर्णनसौन्दर्यं महतीं वृद्धिमुपेयिवत् । नम्रीभूय पर्वतशिखरे मेघमाला भृशं शोभते इति भावस्य सहेतुकं ससौष्ठवञ्च वर्णनमतीव उत्कृष्टम् —

इयं नमन्ती नभसः पयोभरादवैमि नीलोत्पलभङ्गिनिर्मला ।
करोति सर्वत्र विलोक्य कर्दमं पयोदमाला पदमद्रिसानुषु[5] ॥

वर्षर्तौ मेघगर्जनेषु नदीनामतित्वरया समुद्रं प्रति गमनस्य यदद्भुतं वर्णनं वक्ष्यमाणपद्ये समीक्ष्यते, तद्धि कवेः कल्पनाकोशागारस्य आनन्त्यं प्रतिपादयति—

---

१. विक्र० १३।३६ ।
२. विक्र० १३।३९ ।
३. विक्र० १३।४० ।
४. विक्र० १३।४१ ।
५. विक्र० १३।४२ ।

ध्रुवं कयाचित्कथया पयोनिधेः स्तनद्भिरभ्रैः सरितः प्रकोपिताः ।
प्रयान्ति सद्यः कलुषाः सरित्पतिं तथा हि कोलाहलमांसलोर्मयः[१] ॥

तीव्रधाराया वर्षाया वर्णनमपि महत्सौष्ठवमावहति वक्ष्यमाणपद्ये—

जलेन भिन्ना कियति वसुन्धरा मर्दापतेनेति परीक्षितुं घनाः ।
महाम्बुधाराभिरधीरलोचने क्षितौ शलाका इव निक्षिपन्त्यमी[२] ॥

अत्र हि वर्षाजलेन वसुन्धरा कियत्यार्द्रा जातेति निरीक्षणार्थं जलधाराणां मानशलाकारूपेण वर्णनमेव सौष्ठवाधायकम् । मेघजलं निदाघे सहस्रांशुकरैराकृष्टं समुद्रजलमेव भवति, इति वैज्ञानिकं तथ्यं कविना स्वीयकल्पनाकौशलबलेन महनीयरम्यतास्पदत्वं प्रापितम् । तद्यथा—

समर्पयामास पयांसि निश्चितं कयापि वृद्धया जलधिः पयोमुचाम् ।
महागिरिप्रस्थसहस्रशोधितं यदम्बु गृह्णन्ति समुद्रयोषितः[3] ॥

पयोदमुद्दिश्य विरहिणीनां प्रलापैः विक्रमाङ्कदेवचरितस्य वर्षावर्णनप्रसङ्गोऽप्यतितरां रम्यतामावहति । दिङ्मात्रमुदाह्रियते—

क्षणप्रभां नूनमपश्यतः प्रियां तवायमाक्रन्दरवः पदे पदे ।
पयोद यन्नोदयते दयापि ते वियोगिवर्गे तदहो महाद्भुतम्[४] ॥

कामोद्दीपनविभावेषु मेघस्यैव सर्वविजेतृत्वं प्रतिपादयितुं जीमूतस्य अन्यविभावैः सह तुलनात्मकं वर्णनमप्यस्ति महद्विचित्रम् । उदाहरणार्थं पद्यद्वयं प्रस्तूयते—

विभाववर्गे जलद त्वमग्रणीर्न चन्द्रिकापि द्युतिमेति तावकीम् ।
करोषि किं शुभ्रतया तदीयया न सुन्दरं चन्दनमेणनाभितः[५] ॥
करोति चैत्रः सह चन्दनानिलैः किमिन्दुना कोकिलपञ्चमेन च ।
न विद्यते जेतुरनङ्गभूपतेः किमन्यदेकाङ्गभटस्त्वया समः[६] ॥

अत्र हि प्रथमे पद्ये चन्द्रिकाजीमूतयोस्तुलनायां जीमूतस्य श्रेष्ठतरत्वम्, द्वितीयपद्ये च पराजितचैत्रचन्दनानिलेन्दुकोकिलपञ्चमस्य तस्य अनङ्गभूपतिभटेषु

---

१. विक्र० १३।४३ ।
२. विक्र० १३।४५ ।
३. विक्र० १३।५० ।
४. विक्र० १३।५६ ।
५. विक्र० १३।७२ ।
६. विक्र० १३।७३ ।

श्रेष्ठतमत्वञ्च यदस्ति कविना प्रतिपादितं तदप्यस्ति वर्णनप्रसङ्गेषु तदीयवैभवशालिताप्रमाणम्।

अभिसारिकाजनानां नदीं प्रत्युपालम्भवर्णनमपि वर्षावर्णनसौन्दर्यवर्धनेऽन्यतमो हेतुः। अस्मिन्सन्दर्भेऽभिसरणबाधास्वरूपां क्षुद्रनदीं प्रत्यभिसारिकाया वक्ष्यमाणोक्तिरप्यस्ति चमत्कृतिविशेषाधायिका—

परिस्खलद्वीचिदुकूलपल्लवा बलात्समुद्राभिमुखी प्रधावसि।
करोषि चान्यासु निषेधमित्यहो स्वयं विमूढासि परासु पण्डिता[1]॥

अभिसारिकामभिसरणाद्वारयन्तीं नदीं प्रति अभिसारिकाया इति उक्त्या वर्षर्तुवर्णने यत्सौन्दर्यं सम्पादितं तदप्यस्ति किमपि विचित्रमेव। एकस्मिन्नेव पद्ये वर्षर्तोर्विविधरूपाणां चित्रणमस्ति विशेषतो द्रष्टव्यं वक्ष्यमाणपद्ये—

विद्युत्पङ्कजखण्डपङ्कपटली व्योमस्थलीशाद्वलं
केदारःकलमाङ्कुरप्रतिभुवां धारालतानामयम्।
शेवालावलिरद्रिमूर्धसरितां सूरेन्दुकारागृहं
कन्दर्पोत्सववैजयन्ति भवतु प्रीत्यै तवाम्भोधरः[2]॥

प्रस्तुतपद्ये विद्युत्पङ्कजपङ्कत्वं गगनस्थलीशाद्वलत्वं जलधारालतालवालत्वं भानुविधुकारागृहत्वञ्च मेघस्य कविनास्ति यच्चित्रितं, तद्धि कवेरलङ्कृतवर्णनशैल्या मनोहरतमं स्वरूपं वर्तते।

शरद्वर्णनम्—

वर्षर्तौ वारिदावृतं गगनं शरदि स्वच्छतां समुपयाति। चन्द्रचन्द्रिकापि शरदि विशिष्टां श्रियं समवाप्नोति इति भावस्य वर्णनं प्रायः सर्वेषु काव्येषु शरद्वर्णनप्रसङ्गेषु समवलोक्यत एव, परं बिल्हणभारतीसमलङ्कृतं शरदो रूपं विलक्षणसौन्दर्यास्पदं वरीवर्ति—

प्रापदत्र समये सुधाकरश्रीप्रसादनविशारदा शरत्।
नीलनीरदकलङ्कितं क्रमाद् दुग्धधौतमिव कुर्वती जगत्[3]॥

शरत्समयोपक्रमे यद्यपि केचन मेघा यत्र कुत्रचिद्दर्शनं ददति, परं ते शरत्कृपया स्वीयकृष्णवर्णनमपहाय शुक्लतां धारयन्तः शोभन्त इति भावः कविवाचा इत्थमस्ति मुखरितः—

---

१. विक्र० १३।८२।
२. विक्र० १३।८८।
३. विक्र० १४।२३।

शान्तवैद्युतकृशानुजन्मनां भस्मनामिव रजोभिराचिताः ।
पाण्डुराः कतिपये नभस्तले क्वापि सख्यमभजन्त वारिदाः[1]॥

वर्षर्तुकारणादनिर्मलं नदीजलं शरत्समये निर्मलतामासादयतीति भावस्य कवि-भारतीसमलङ्कृतवर्णनं शरत्सौन्दर्यस्य महत्प्रसाधकमस्ति । तद्यथा—

खेदकारणमवान्तरापगा-सङ्गमं गतमवेत्य वारिधेः ।
संमदादिव महातरङ्गिणी-चक्रवालमगमत्प्रसन्नताम्[2] ॥

शरत्समये रात्रौ निर्मलनीलगगनस्य तस्मिंश्च तारागणस्यच्छटा विशेषतया विकसिता भवतीति अतीव सरसशब्दैर्वर्णितोऽयमाशयो वक्ष्यमाणपद्येऽनुपमया श्रिया चकास्ति—

निर्गतैरिव तडित्प्रदीपतः सान्द्रकज्जलरजोभिराचितम् ।
वृत्तकर्परनिभं नभस्तलं नीलिमानमतिमात्रमाययौ[3] ॥
सार्धमम्बुभिरिवैत्य वारिधेर्मौक्तिकानि लगितानि तोयदात् ।
व्योममण्डलमुडूनि भेजिरे कैरवाधिकरुचीनि रात्रिषु[4] ॥

अत्र प्रथमे पद्ये निर्मलनभसो द्वितीये च तारागणस्य विषये नवीनकल्पनामाध्यमेन अद्भुतरूपचित्रणेन शरद्वर्णनं विशिष्टां द्युतिमाससाद । शरत्कालीनस्य चन्द्रमसो वर्णनं बहुभिः कविभिर्बहुधा कृतमस्ति, परं विक्रमाङ्कदेवचरिते बिल्हणकृतमेत-द्विषयकं वर्णनं यावत्सौन्दर्यमाधत्ते तावन्न शब्दैः परिमातुं शक्यते । उक्ताशयं समर्थयितुं पद्यमेकं प्रस्तूयते—

नीलनीरदनिचोलकोज्झिते व्योमदर्पणतले शरद्वधूः ।
चन्द्रमाननमिवावलोकयत् तत्क्षणोन्मिषितकैरवेक्षणा[5] ॥

अस्मिन् पद्ये तत्क्षणोन्मिषितकैरवेक्षणां नीलनीरदनिचोलकोज्झिते गगनादर्शतले आननमिव चन्द्रमालोकयन्तीं शरद्वधूमालोक्य प्रमुदितहृदयाः सहृदया नूनं मदीयामुक्तिं समर्थयिष्यन्ति ।

हेमन्तर्तुवर्णनम्—

हेमन्ते कुङ्कुमाभावः, क्रौञ्चीकामोद्दीपनम्, उत्तरानिलप्रवहणम्, गगनस्थले मेघशकलैश्शरच्छ्रीविनाशः, शरदातपक्लान्तकामिनीनां केलिकलाकलापेषु सुख-

---

१. विक्र० १४।२५ ।
२. विक्र० १४।२७ ।
३. विक्र० १४।३० ।
४. विक्र० १४।३१ ।
५. विक्र० ३४।३२ ।

विशेषानुभूतिश्च सम्भवतीत्यादिभावानां मधुरमधुराभिरक्षरमालाभिः हेमन्तोपक्रमोस्तीत्थं वर्णितः कविना—

कुङ्कुमस्मितसङ्कोची क्रौञ्चीमदनदेशकः ।
मित्रमुत्तरवायूनां वियल्लावण्यतस्करः ॥
शरत्कालातपक्लान्तकान्तावक्त्रेन्दुवल्लभः ।
अथाजगाम हेमन्तः सामन्तः स्मरभूपतेः[1] ॥

हेमन्तचन्द्रसौन्दर्यविनाशस्य समलङ्कृतं वर्णनं कवेर्वर्णननैपुण्यस्य साक्षिमत्स्वरूपमस्ति । तद्यथा—

शरद्वितीर्णसौभाग्यभङ्गदक्षः प्रजापतेः ।
कान्तामुखानां हेमन्तः सेवकत्वमशिक्षत[2] ॥

हेमन्तेऽभिवृद्धिं गतानां रात्रीणां सर्वाण्येव चित्राणीह काव्येऽतिरमणीयानि सन्ति । उदाहरणार्थं चित्रमेकं प्रस्तूयते—

रतिकोपे प्रसादे च दधानाः परिपूर्णताम् ।
आयामवत्यो यामिन्यः कामिनीनां मुदेऽभवन्[3] ॥

इह हि अवाप्ताभिवृद्धेः प्रियाया वर्णनं बिल्हणस्य सरलसरसातिमनोहरवर्णनकौशलस्य सजीवं प्रमाणमस्तीत्यत्र नास्ति सन्देहः ।

अलभन्त नभःक्षेत्रे तारास्तरलकान्तयः ।
त्विषं तुषारबीजानां नूतनाङ्कुरशालिनाम् ॥[4]

उक्तपद्ये तरलरुचस्तारागणस्य विचित्रचित्रणेन वर्णनक्षेत्रे स्वीयं सार्वभौमसाम्राज्यमस्ति कविना प्रमाणितम् । हेमन्ततौ समस्तमपि जगच्छीताक्रान्तं भवति, कृशाङ्गीनां कुचस्थली शीतपराक्रमविषयतां नोपपद्यते इति सरलोऽपि भावः कविशब्दैः स्वरूपमाप्य अतीव वैचित्र्यमाततान—

अभूवन्नद्भुतोष्माणः शीतव्याप्ते जगत्त्रये ।
कुचोत्सङ्गाः कृशाङ्गीणां स्थानं मन्मथतेजसः[5] ॥

---

१. विक्र० १६।१, २ ।
२. विक्र० १६।३ ।
३. विक्र० १६।६ ।
४. विक्र० १६।८ ।
५. विक्र० १७।१० ।

हेमन्तर्तौ तुषारपातेन पद्मिन्यो दह्यन्ते इति प्राकृतिको नियमः कविना काव्य-कलाकौशलेन महनीयतां प्रापितः—

मद्वैरिणः कठोरांशोरियं प्रणयभूरिति ।
रोषादिव तुषारेण निरदह्यत पद्मिनी[1] ॥

वक्ष्यमाणपद्ये कविना हेमन्तस्याप्रतिहतप्रभावं प्रतिपादयितुं तस्मै सामान्यस्त्री-स्पर्शेणापि कन्दर्पसन्तानशक्ति समर्प्यात्मनोऽपि वर्णनकौशलेषु अप्रतिहतप्रभुत्वं प्रतिपादितम् । तद्यथा—

अङ्गेषु स्पर्शसौभाग्यमपि सामान्ययोषिताम् ।
परिपोषितकन्दर्पस्ततान तुहिनागमः[2] ॥

शिशिरवर्णनम्—

अन्यर्तुवर्णनतुलनायां शिशिरर्तुवर्णनमति सङ्क्षिप्तं काव्येऽस्मिन्वर्तते । यतो हि शिशिरर्तौ शीताधिक्येन परिपीड्यमानं जगत् न विशेषसौन्दर्यमाधत्ते, अतः सर्वेष्वपि काव्येषु शीतवर्णनं सङ्क्षिप्तमेव दृश्यते । अत्र हि सङ्क्षिप्तेऽपि शिशिरवर्णने नास्ति सौन्दर्याभावः । वक्ष्यमाणपद्ये सौन्दर्यसमलङ्कृतस्य शिशिरस्य रूपमतिशयेन काव्यसौष्ठवं वर्धयन्नक्षिलक्षीभवति । तद्यथा—

शुभ्रेषु राङ्कवपटेषु हसन्तिकासु
लीलाहसन्मलयजेन्धनपावकासु ।
कृष्णागुरुज्वलनधूमशिखासु चासीत्
त्रैलोक्यकामुकजयी मदनप्रतापः[3] ॥

अत्र हि मलयजेन्धनपावकशिखानां लीलाहासरूपेण वर्णनमत्यधिककाव्यसौष्ठवाधायकत्वाद्वर्णनप्रसङ्गेष्वतिशयेन ललामभूतमस्ति ।

अङ्गारहासिषु विलासगृहोदरेषु
तल्पेषु तूलपटकल्पितवेष्टनेषु ।
उष्णेषु च प्रणयिनीकुचमण्डलेषु
शान्तिं जगाम शिशिरस्य तुषारगर्वः[4] ॥

---

१. विक्र० १६।१४ ।
२. विक्र० १६।१६ ।
३. विक्र० १६।४८ ।
४. विक्र० १६।४९ ।

अस्मिन् पद्ये शिशिरर्तौ शीतस्यापनयनाय समाश्रियमाणैः साधनैर्विधीयमानस्य शीतोपशमस्य दृश्यमपि अतीव दर्शनीयं वरीवर्ति—

गौरीविभ्रमधूपधूमपटलश्यामायमानोदराः
कण्ठक्षोदभयान्न ये कवलिताः श्रीकण्ठहारोरगैः ।
स्फारोन्मीलितशारदागृहबृहद्द्वाराग्रघण्टारवा-
स्ते श्लाघामभजन्त कुन्तलपतेः कैलासशैलानिलाः[1] ॥

उक्तपद्ये शीतर्तौ प्रवहणशीलानां कैलाससमीराणां श्लाघावर्णनमपि नितान्तं श्लाघास्पदम् ।

वक्ष्यमाणपद्ये वर्णिता वितस्तातीरस्थतुषारकणान्स्पृशन्तः पयोष्णीं पीडयन्तः चन्द्रभागोर्मिषु आन्दोलनमनुभवन्तो यमुनातरङ्गमित्रतां गता देवापगाद्रुमालीमान्दोलयन्तः कैलासवायवः कस्य न प्रीतिहेतवः ?

स्पृष्टाः स्तोकं वितस्तातटतुहिनकणैः पीडयन्तः पयोष्णीं
चञ्चन्तश्चन्द्रभागालहरिषु यमुनावीचिमैत्रीपवित्राः ।
धुन्वानाः सिद्धसिन्धोरुभयतटगतां देवदारुद्रुमालीं
तस्य प्रीत्यै बभूवुस्तुहिनगिरितटीकेलिकाराः समीराः[2] ॥

मानवसौन्दर्यवर्णनम्—

मानवसौन्दर्यं द्विविधं स्त्रीगतं पुरुषगतञ्च । यथाऽन्यकाव्येष्वाधिक्येन स्त्रीसौन्दर्यवर्णने एव कवीनां विशिष्टा रुचिरुपलक्ष्यते तथैवास्मिन्काव्येऽपि । अस्मिन् काव्ये मानवसौन्दर्यवर्णने नायिकारूपवर्णनस्यैव यद्यपि प्राधान्यं तद्व्यपि पुरुषरूपवर्णनस्य बहूनि सुन्दराणि उदाहरणानि विद्यन्ते[3] । स्त्रीणामुभयविधमान्तरिकं बाह्यञ्च सौन्दर्यं काव्येऽस्मिन्वर्णितमुपलभ्यते । आन्तरिकं सौन्दर्यं शीलसमाविष्टं बाह्यञ्च शरीरसमाविष्टं भवति । विक्रमाङ्कदेवचरिते स्त्रीणामान्तरिकं सौन्दर्यं न तथा अतिवैशिष्ट्येन वर्णितं यथा बाह्यं (शारीरिकं) सौन्दर्यम् । स्त्रीणामान्तरिकसौन्दर्यस्योदाहरणेषु नागादेव्याः[4] सुभटाया[5] विक्रमाङ्कदेवस्य मातुश्चान्तरिकं[6] सौन्दर्यं काव्यस्य सूक्ष्मेण समी-

१. विक्र० १६।५१ ।
२. विक्र०. १६।५२।
३. विक्र० १।४७-५५, १८।८१ ।
४. विक्र० १८।८० ।
५. विक्र०१८।४०-४६ ।
६. विक्र० २।४६-४७ ।

क्षणेन वीक्षितुं शक्यते। शारीरिकसौन्दर्यवर्णने महाकविर्बिल्हणो निःसंशयं कालिदासतुलामधिरोहतीति विक्रमाङ्कदेवचरितस्य नायिकायाश्चन्द्रलेखाया रूपवर्णनस्य अध्ययनेन प्रमाणीभवति। उत्प्रेक्षामाध्यमेन कविवर्णितं नायिकारूपं संस्कृतकाव्यवाङ्मये सौन्दर्यवर्णनप्रसङ्गेष्वनन्यतममस्तीति नात्र काप्यत्युक्तिः।

महाकविर्बिल्हणोऽतीव लालित्यपूर्णपदैः नायिकालावण्यवर्णनान्तर्गतं नायिकानखवर्णनमित्थं वर्णयाम्बभूव—

तस्याः पादनखश्रेणिश्शोभते लटभभ्रुवः।
रत्नावलीव लावण्यरत्नाकरसमुद्गता[1]॥

जाग्रतः कमलाल्लक्ष्मीं यज्जग्राह तदद्भुतम्।
पादद्वन्द्वस्य मत्तेभगतिस्तेये तु का कथा[2]॥

निद्रारहितात् (विकसितात्) कमलाल्लक्ष्मीं गृहीतवतः पादयुग्मस्य मत्तगजस्य गतिविलासापहरणे नास्ति किमपि वैचित्र्यमिति श्लेषानुप्राणितार्थापत्तिमाध्यमेन पादद्वन्द्ववर्णने कियती लक्ष्मीरस्तीति प्रतिपादनं नास्ति सुकरम्। यावल्लावण्यमुक्तपद्ये वरीवर्ति तावतोऽप्यधिकं लावण्यं नायिकाया जङ्घालतावर्णनप्रसङ्गेऽवलोक्यते—

हेममञ्जीरमालाभ्यां भाति जङ्घालताद्वयम्।
कृतालवालं वाल्लभ्यात् कुङ्कुमेनेव सुभ्रुवः[3]॥

नायिकायाः श्रोणिबिम्बवर्णनमुत्प्रेक्षामाध्यमेन कियल्लावण्यमयं सङ्गीतमयञ्चेत्यस्ति द्रष्टव्यम्—

विस्तारिणा मुहुस्तस्याः श्रोणिबिम्बेन पीडिता।
त्रुटिता त्रुटितास्मीति फूत्करोतीति मेखला[4]॥

अनङ्गरङ्गपीठत्वं शृङ्गाररसस्य स्वर्णासनत्वञ्चावाप्ताया जघनस्थल्या वर्णनं कियत्सौन्दर्यसारसमूहमञ्चतीति वक्ष्यमाणपद्येऽस्ति द्रष्टव्यम्—

---

१. विक्र० ८।६।
२. विक्र० ८।१०।
३. विक्र० ८।१४।
४. विक्र० ८।१८।

अनङ्गरङ्गपीठोऽस्याः श्रृङ्गारस्वर्णविष्टरः ।
लावण्यसारसङ्घातः सा घना जघनस्थली[1] ॥

उक्तपद्येष्विवान्येषु पद्येषु अपि कोमलकोमलैः पदैर्महता सौष्ठवेनोपनिबद्धैः नितम्ब[2]-जघनादिवर्णनेन[3] रूपवर्णनेषु महाकवेर्बिल्हणस्य यशांसि गीयमानानीवावलोक्यन्ते ।

नाभिप्रविष्टरोमावल्याः कुमारसम्भवे प्रथमे सर्गे यद् वर्णनमुपलभ्यते तदस्ति महत्सङ्क्षिप्तम्, परं महाकविना बिल्हणेन रोमावलिविलासस्य नवपद्येषु कृतं वर्णनमप्यात्मनोऽद्वितीयत्वं न जहातीति स्वीकरणे नास्ति किमपि सङ्कोचकारणम् । दिङ्मात्रमुदाह्रियते—

नाभिरन्ध्रं प्रविष्टास्याः श्यामला रोमवल्लरी ।
त्रस्ता तिमिरलेखेव मेखलामणिकान्तितः[4] ॥

प्रकृतप्रसङ्गान्तर्गतान्यन्यान्यपि पद्यान्युक्तपद्यानीव अतिशयेन रम्याणि सन्ति । तानि सर्वाणि तत्रैवावलोकनीयानि[5] ।

बिल्हणस्य नायिकासौन्दर्यवर्णनं कालिदासस्य नायिकासौन्दर्यवर्णनवद्रम्यमिति कुमारसम्भवविक्रमाङ्कदेवचरितयोस्तुलनात्मकसमीक्षणेन परिज्ञायते । नायिकोदरत्रिवलीवर्णने 'तदीयत्रिवलीमार्गसोपानारोहणश्रमः' 'कन्दर्परथसञ्चारमार्गालीव वलित्रयी, इति पद्यांशयोस्तावदेव सौन्दर्यं वरीवर्ति यावत् पद्यांशेऽस्मिन्—

'आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम्' इति ।

नायिकासौन्दर्यवर्णनप्रसङ्गे तस्या मध्यभागकार्श्यस्य सहेतुकत्वप्रतिपादने कुमारसम्भवे न किमपि पद्यमवलोक्यते, परं विक्रमाङ्कदेवचरिते एतद्विषयकवर्णने कविः स्वीयानुपमकल्पनामाध्यमेन सौन्दर्यवर्णनप्रसङ्गेषु आत्मनो वर्णननैपुण्यस्य उत्कर्षं प्रकटयति । इदमत्रोदाहरणम्—

---

१. विक्र० ८।२० ।
२. विक्र० ८।१७, १६, २१, २२ ।
३. विक्र० ८।२३ ।
४. विक्र० ८।२४ ।
५. विक्र० ८।२५-३२ ।

युक्तं मध्ये कृशा तन्वी कार्मुकीकरणाय यत् ।
अत्रैव कुसुमास्त्रेण पीडयते श्लिष्टमुष्टिना[1] ॥

अत्र हि श्लिष्टमुष्टिना कुसुमास्त्रेण कार्मुकीकरणाय नायिकाया मध्यभागः पीडयते इति कल्पनया तस्या मध्यभागकार्श्यस्य सहेतुकत्वं सहजसौन्दर्यमावहति।

अतीव सरलैः सरसैश्च पदैः कृतं कुचवर्णनमपि नायिकाङ्गवर्णनेषु कवेरद्वितीयत्वं सङ्केतयति। इदमत्रोदाहरणम्—

कुम्भौ सदम्भौ करिणां कलशौ मन्दकौशलौ ।
चक्रवाकौ वराकौ च तदीयकुचयोः पुरा[2] ॥

पद्येऽस्मिन्नतीव सरलभाषया सरसं कुचवर्णनं वर्णनप्रसङ्गेषु कवेरनौपम्यं द्योतयति। उक्तपद्येन सहैव दशसु पद्येषु कविना नायिकाकुचवर्णनेष्वात्मनः सौन्दर्यवर्णनकौशलं प्रादर्शि[3]।

वक्ष्यमाणपद्ये एकत्रैव करयोः मुखस्य च कान्तिवर्णनमस्ति द्रष्टव्यम्—

नाहं धार्यमधीराक्षि मुखेन्दोः सम्मुखं त्वया ।
इतीव लीलापद्मेन करेऽस्याः कान्तिरर्पिता[4] ॥

त्वयाऽहं मुखेन्दोः समक्षं न संवाह्यमिति कृत्वा लीलापद्मेन करयोः कान्तिसमर्पणकल्पनया उभयोरपि करमुखयोः कान्तिवर्णनकौशलं कवेरस्ति प्रशस्यम् ।

भाति दन्तच्छदेनास्याः स्वच्छा दशनमालिका ।
सरस्वत्यक्षमालेव पूजापद्मदलाञ्चिता[5] ॥
पुराणबाणत्यागाय नूतनास्त्रकुतूहलात् ।
तन्नासा भाति कामेन तूणेवाधोमुखीकृता[6] ॥

उक्तपद्ययोः दशनमालिकाया नासिकायाश्च 'सरस्वत्यक्षमालेव, तूणेवाधो-

१. विक्र० ८।३९।
२. विक्र० ८।४६।
३. विक्र० ११।५०।
४. विक्र० ८।५५।
५. विक्र० ८।६९।
६. विक्र० ८।७१।

मुखीकृता' अतिललितपदैरिति कल्पनं सौन्दर्यवर्णनेषु बिल्हणस्य अनौपम्यं शंसति।

नायिकाया दृष्टेः मृगीभिः सह सम्बन्धं दर्शयितुं कविकल्पितहेतुना महत् सौन्दर्यमस्ति समाविष्टं पद्येऽस्मिन्—

मृगीसम्बन्धिनी दृष्टिरसौ यदि न सुभ्रुवः।
धावति श्रवणोत्तंसलीलादूर्वाङ्कुरे कुतः[1] ॥

अत्र हि नायिकादृशो नूनं मृगीभिः सह सम्बन्धः, तत्र च तस्याः श्रवणोत्तंसलीलादूर्वाङ्कुरे धावनरूपहेतुना सौष्ठवमाधीयते। एकस्मिन्नेव पद्ये अवयवद्वयस्य वर्णनं तत्र च हेतुप्रतिपादनेन मिथः सम्बन्धाभिधानमवयववर्णनेषु कवेरद्वितीयत्वोदाहरणं भवितुमर्हति। तद्यथा—

सौन्दर्यपात्रे वक्त्रेन्दौ कुरङ्गासङ्गभीतया।
सूत्रितौ श्रोत्रपाशाभ्यां पाशाविव मृगीदृशा[2] ॥

अत्र हि श्रोत्रसौन्दर्यवर्णनेन सहैव वक्त्रसौन्दर्यमपि वर्णितम्। सौन्दर्यपात्रे मुखेन्दौ मृगागमनं निवारयितुं श्रोत्रपाशौ पाशाविव सूत्रिताविति कल्पनया मुखेन्दोः निष्कलङ्कत्वं श्रोत्रयोः पाशत्वञ्च अन्योऽन्यसौन्दर्यं वर्धयन्तौ बिल्हणस्याद्वितीयवर्णनशैलीं प्रतिपादयतः।

नासावंशाद् विनिर्गता हरिता पत्रद्वयीव नायिकाया भ्रूलेखा राजते इति नवीना कम्रा च कल्पना कवेरद्भुतवर्णनशैल्याः परिचायिका आस्ते। इदमत्रोदाहरणम्—

भ्रूलेखायुगलं भाति तस्याश्चटुलचक्षुषः।
पत्रद्वयीव हरिता नासावंशस्य निर्गता[3] ॥

नायिकायाः केशपाशवर्णनमपि महत्सौन्दर्यमावहति। तद्यथा—

तस्याः कचभरव्याजात् तनयस्नेहलालितः।
आरूढः पार्वतीबुद्धया गुहबर्हीव मूर्धनि[4] ॥

---

१. विक्र० ८।७३।
२. विक्र० ८।७६।
३. विक्र० ८।७९।
४. विक्र० ८।८१

अत्र हि केशसमूहव्याजेन स्नेहलालितस्कन्दमयूरः पार्वतीबुद्ध्या नायिकाशिरसि आरूढ इवेति उत्प्रेक्षया महनीयं सौन्दर्यं केशवर्णनमिदमाधत्ते ।

अवयवसौन्दर्यवर्णनं तु तावदस्तु दूरे बिल्हणकविकृतं भालस्थचन्दनबिन्दुवर्णनमेव उत्कर्षातिशयाधायकत्वादनन्यतममस्ति । तद्यथा—

नासावंशविनिर्मुक्तमुक्ताफलसनाभिना ।
भाति भालतलस्थेन बाला चन्दनबिन्दुना[1] ।।

अत्र हि 'भाति भालतलस्थेन बाला चन्दनबिन्दुना' इत्यादिभिर्मधुरैः पदैः सहैव मुक्ताफलस्य चन्दनबिन्दुनश्चोपमानोपमेयभावः सौष्ठवाधानहेतुः ।

सम्पूर्णोऽपि अष्टमे सर्गे विस्तरेण कविकृतं सौन्दर्यवर्णनमुत्प्रेक्षालङ्कारेणालङ्कृतत्वादतिशयेनोत्कर्षाधायकत्वाच्च बिल्हणस्य सरला सरसा च वर्णनशैली अद्वितीयास्तीति प्रमाणीभवति ।

१. विक्र० ८।८० ।

८

पात्रचरित्रचित्रणं समाजचित्रणञ्च

पात्रचरित्रचित्रणम्—

संस्कृतकाव्येषु पात्राणां चरित्रं स्वीयं वैशिष्ट्यमादधाति। भरतादिभिः प्राग्वर्तिभिराचार्यैः स्वग्रन्थेषु नायकप्रतिनायकादीनां स्वरूपं निर्धारितमस्ति। संस्कृतकवयः तदनुसारमेव प्रायः स्वप्रबन्धकाव्येषु पात्राणां चरित्राणि चित्रयन्ति। संस्कृतकाव्येषु पात्राणां चरित्रचित्रणेषु तदनुसारिणामादर्शानां पालने कवयः पूर्णतया दत्तावधाना भवन्ति। यथा सर्वेषु रामसम्बन्धिकाव्येषु रामस्य ग्रादर्शे स्वभावे च नास्ति विशेषो भेदः। सर्वत्र रामो गम्भीर उदारस्वभाव एव चित्रितः। महाकविना बिल्हणेन विक्रमाङ्कदेवचरिते काव्यलक्षणग्रन्थानुसारि चित्रणमेव स्वीयानां पात्राणां कृतमस्ति।

विक्रमाङ्कदेवः—

विक्रमाङ्कदेवोऽस्य काव्यस्य नायकोऽस्ति। ग्रसौ किल नास्ति काल्पनिकोऽथवा देवोऽपितु एको युगपुरुषोऽस्ति, ग्रतस्तस्य चरित्रचित्रणमन्यसंस्कृतकाव्यनायकेभ्यः किञ्चित्कठिनतरं भवति। यतो हि मानवेषु ग्रनेकत्रुटीनां सम्भावना भवितुमर्हति। महाकविना विक्रमाङ्कदेवस्य धीरोदात्तत्वचित्रणे ग्रतीव बुद्धिकौशलं प्रादर्शि। ग्रन्यथा इतिहासादिषु यद् विक्रमाङ्कदेवस्य चित्रणं कृतं तेन तु तस्य धीरोदात्तत्वं न सुरक्षितमवलोक्यते।

विनीतत्वम्, मधुरत्वम्, त्यागः, दक्षता, प्रियंवदत्वम्, लोकप्रियत्वम्, शुचित्वम्, वाग्मिता, रूढवंशोद्भवत्वम्, स्थैर्यम्, यौवनम्, बुद्धिमत्ता, उत्साहः, शीलम्, स्मृतिः, कलाज्ञातृत्वम्, मानः, शौर्यम्, दार्ढ्यम्, तेजः, शास्त्रचक्षुष्मत्त्वम्, धर्मपरायणत्वञ्चेमे गुणा धीरोदात्तस्य नायकस्य ग्राचार्यधनञ्जयेन प्रतिपादिताः सन्ति[1]।

---

१. नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रक्तो लोके शुचिर्वाग्मी रूढवंशः स्थिरो युवा॥

विक्रमाङ्कदेवचरिते इमे सर्वेऽपि गुणास्तन्नायकस्य चरित्रं विभूषयन्तो दृश्यन्ते ।

(१) विनीतत्वम्—

ईदृशीं सुजनतामजानता कार्मुकेण मुखरत्वमत्र मे ।
यत्कृतं किमपि तेन लज्जया भारती कथमपि प्रवर्तते[1] ॥

मया चोलेशस्य सुजनतामजानता स्वधनुषा यत्कठोरत्वं विहितं तदर्थमहं लज्जितोऽस्मीत्युक्तपद्ये तस्य विनीतत्वं तच्चरित्रस्य महत्त्वं वर्धयति ।

(२) **मधुरता**—तस्य माधुर्यं प्रतिपादयता कविना 'मृदुहृदय'[2] इति अभिधाय तस्य माधुर्यं चित्रितमस्ति ।

(३) **त्यागः**—अस्य चरित्रे त्यागचित्रणे तु कविना भरतचरित्रमनुकृतमस्ति । यदयं पितुः महान्तमाग्रहं नाङ्गीकुर्वन् स्वाग्रजाय राज्यं दापयितुं हठमकरोत् । अस्मिन्सन्दर्भे कवेरियं वाणी अस्य चरित्रं किमपि अतिमानवीयमिव विदधाति—

पुत्राद्वचः श्रोत्रपवित्रमेव श्रुत्वा चमत्कारमगान्नरेन्द्रः ।
इयं हि लक्ष्मीर्धुरि पांसुलानां केषां न चेतः कलुषीकरोति ।।[3]

(४) **दाक्षिण्यम्**—स्वाग्रजे कुमार्गप्रवृत्ते सति अकीर्तिसंविभागादात्मानं रक्षितुं तेन हि भ्रातुस्त्यागं कृत्वा आत्मनो दाक्षिण्यस्य परिचयः दत्तोऽस्ति—

त्यागमेव प्रशंसन्ति गुरोरुत्पथगामिनः ।
तदितः साधयाम्येष दक्षिणाम्बुधिसम्मुखः[4] ॥

गृहान्निर्गत्य महतः साम्राज्यस्य स्थापनां कृत्वापि तेन आत्मनो दाक्षिण्यं प्रदर्शितम् ।

(५) **प्रियंवदत्वम्**—

वाचालतैषा पुरतः कवीनां कान्त्या मदोऽयं सविधे सुधांशोः ।
त्वत्सन्निधौ पाटवनाटनं यत् तथापि भक्त्या किमपि ब्रवीमि[5] ॥

बुद्धयुत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ॥ द० रू० २।१-२ ।

१. विक्र० ५।५० ।

२. विक्र० ६।८ ।

३. विक्र० ३।४२ ।

४. विक्र० ४।११७ ।

५. विक्र० ३।३४ ।

उद्धृतपद्यांशे पितरं प्रति भाषमाणस्य विक्रमस्य मधुरा वाणी तस्य प्रियंवदत्वस्य प्रमाणमस्ति।

(६) **लोकप्रियत्वम्**—सोमेश्वरे शासत्यपि प्रकृतिजनानामस्मै राज्यदाना-³त्मकाग्रहेणास्य लोकप्रियत्वं स्पष्टीभवति। अन्यत्र गाङ्गकुण्डपुरे प्रविशत्यस्मिन्नगरवासिनामस्य दर्शनाय समागमनस्य वर्णनेनापि लोकप्रियतायाः प्रमाणानि उपलभ्यन्ते।

(७) **शुचित्वम्**—पित्रा भूयशः कृताग्रहोऽपि विक्रमः स्वाग्रजाधिकारविच्छेदास्वीकृत्या स्वमानसिकपावित्र्यस्य प्रकाशनं करोति।

(८) **वाग्मिता**—विक्रमाहवमल्लसंवादे अस्य वाग्मित्वं कविना अतीव सुचारु चित्रितमस्ति। आहवमल्लस्य अभीष्टासिद्धौ तस्य वाग्मितैव हेतुः। इदमत्रोदाहरणम्—

ज्येष्ठं परिम्लानमुखं विधाय भवामि लक्ष्मीप्रणयोन्मुखश्चेत्।
किमन्यदन्यायपरायणेन मयैव गोत्रे लिखितः कलङ्कः[1] ॥

रामस्य पित्रा भरतोऽभिषिक्तः क्रमं समुल्लङ्घ्य यदात्मराज्ये।
तेनोत्थिता स्त्रीजित इत्यकीर्तिरद्यापि तस्यास्ति दिगन्तरेषु ॥
तदेष विश्राम्यतु कुन्तलेन्द्र यशोविरोधी मयि पक्षपातः।
न किं समालोचयति क्षितीन्दुरायासशून्यं मम राज्यसौख्यम् ॥[2]

द्रविडदूतविक्रमाङ्कदेवसंवादेऽपि विक्रमाङ्कस्य वाग्मिता प्रभावशालिना प्रकारेण कविना चित्रिता।

(९) **रूढवंशोद्भवत्वम्**—चालुक्यवंशस्य ऐश्वर्येऽन्यतमत्वं नास्ति शङ्कास्पदम्। अस्य वंशस्य चोलमालववंशानामुपरि विजयैरुक्ततथ्यस्य पुष्टिस्तु विक्रमाङ्कदेवचरिते पदे पदे जायते एव, परमितिहासवचांस्यत्र परमाणि प्रमाणानि भवितुमर्हन्ति। विक्रमाङ्कदेवचरितस्य नायकस्तस्मिन् वंशे जन्म जग्राह यः खलु भारते सर्वेषां राजकुलानां चूडामणिरासीत्। चालुक्यवंशस्य ब्रह्मणश्चुलुकादुत्पत्तिवर्णनं नायकस्योच्चवंशोद्भवत्वं प्रमाणयति।

(१०) **स्थैर्यम्**—विक्रमाङ्कदेवजयसिंहयोर्युद्धे यदा विक्रमस्य बलं क्षुभितं विलक्षञ्चाभवत्तदापि विक्रमः स्वस्थैर्यं न तत्याज। कपोलयोश्च पुलकं प्रकाश-

---

१. विक्र० ४।११३।

२. विक्र० ३।४०-४१।

यन्नुद्दाममदेन दन्तिना समुदतिष्ठत्। एवञ्च रिपुकीर्तिकन्दलीं दलयन् करिमेघ-घटाः पाटयन् तेषां यशोवृक्षमकम्पयदित्यादिसन्दर्भेण[१] विक्रमस्य अपारं स्थैर्यं काव्येऽस्मिन्नस्ति चित्रितं बिल्हणेन।

(११) **यौवनम्**—पञ्चमसर्गे गाङ्गकुण्डपुरे प्रविशत्यस्मिन् नगररमणी-नामेनं विलोक्य मनसि कामजागरण[२]वर्णनेनास्याद्भुतयौवनं ध्वन्यते।

(१२) **बुद्धिमत्ता**—गुप्तचरेण निवेदितदुर्वृत्तस्य विद्रोहिणो जयसिंहस्य दमनार्थं शीघ्रमेव न प्रचचाल, अनन्तरं सम्यग्विचार्य्य सामादिषूपायेषु विफली-भूतेषु युद्धाय सन्नद्धो बभूवेत्यनेन तस्य बुद्धिमत्तैव प्रकाशते।

(१३) **उत्साहः**—वक्ष्यमाणपद्ये विक्रमस्योत्साहः बिल्हणेनेत्थमस्ति प्रका-शितः—

अप्रयाणरहितैः स पार्थिवः प्राप कैरपि दिनैस्तरङ्गिणीम्।
कार्यजातमसमाप्य धीमतां निद्रया परिचयोऽपि कीदृशः[३]॥

एवञ्च दिग्विजयप्रसङ्गे युद्धवर्णनेषु अस्य अपूर्वसाहसस्य चित्रमवलोक्यते।

(१४) **शीलम्**—युद्धे प्रचण्डत्वं दधतोऽप्यस्य शीलमतीवोदारमासीत्। उक्त-तथ्यम् 'उदारविचेष्टितः' इत्यादिभिर्बिल्हणशब्दैः प्रतीयते। स्वपितुः श्वशुरस्य च मृत्युमाकर्णयतः करुणक्रन्दनैरप्यस्य उदारशीलत्वपरिचयो लभ्यते। चौलेशस्येय-मुक्तिरपि तस्य मधुरशीलतां सङ्केतयति—

अङ्गानि चन्दनरसादपि शीतलानि
चन्द्रातपं वमति बाहुरयं यशोभिः।
चालुक्यगोत्रतिलक क्व वसत्यसौ ते
दुर्वृत्तभूपपरितापगुरुः प्रतापः[४]॥

(१६) **स्मृतिः**—यदनेन सर्वास्वेव लिपिषु त्वरितमेव परा प्रतिष्ठा[५]

---

१. विक्र० १५।५६-६०।
२. विक्र० ६।११-१९।
३. विक्र० ५।७३।
४. विक्र० ५।८६।
५. विक्र० ३।१७।

समासादिता, एवञ्च सर्वासु विद्यासु अकुण्ठत्वमधिगतं[1] तेन तस्य स्मृतिशक्तिः परिचीयते ।

(१६) **कलाज्ञातृत्वम्**—अस्मिन्विषये तु विक्रमदेवः साक्षात् 'कलालयः' इति प्रतिपादितमस्ति[2] ।

(१७) **मानः**—सोमेश्वरं परित्यज्य निष्क्रमणेन सूच्यते यत्तत्र वासेन प्राज्यराज्यस्य प्रतिदिनमधोगत्यवलोकनेन तस्य स्वाभिमानहानिर्बभूव। एतदर्थमेवासौ निष्क्रान्तः । अन्यथा येन केनापि प्रकारेण मानहानौ अपि तत्र तस्य निवासः सम्भाव्य आसीत् ।

(१८) **शौर्य्यम्**—विक्रमस्य शौर्य्यन्तु प्रायः सर्वमेव काव्यमभिव्याप्य तिष्ठति इति नास्त्यसत्यम् । भीषणेषु युद्धेषु विजयः अस्य शौर्यस्येव कारणेन समजायत । बिल्हणोऽपि वक्तृप्रौढोक्तिमाध्यमेन 'तस्य शौर्य्यं किं वर्णयामि' इत्युक्त्वा तच्छौर्य्यस्य वर्णनाविषयत्वमङ्गीकृतवान्—

वर्णयामि विमलत्वमम्भसा किं त्वदीयकरवालवर्तिनः ।
एति यत्प्रभवमैन्दवीं द्युतिं विश्वशुक्तिपुटमौक्तिकं यशः[3] ।।

एतादृशैः पद्यैर्बहुत्र[4] लोकोत्तरं शौर्य्यं प्रतिपादयता कविनाऽस्य त्रिलोकवीरत्वं प्रतिपादितं वर्तते[5] ।

(१९) **दार्ढ्यम्**—शैशवे केसरिकिशोराणां पीडनेषु, सोमेश्वरराजिगजयसिंहादिभिः सह युद्धैः विक्रमस्य दार्ढ्यं सुस्पष्टमेव । दिङ्मात्रमुदाह्रियते—

उत्कन्धरानेव रणाङ्गणेषु यस्यातितुङ्गस्य हठात्प्रहर्तुः ।
न नम्रभावादपरो नृपाणामासीत्कृपाणप्रतिषेधमार्गः[6] ।।

अत्र तद्दार्ढ्यं समक्षं पराजयमन्तरा नासीत् शत्रूणां कृते कोऽप्यन्य उपायः ।

(२०) **तेजः**—गर्भे स्थितस्यैव तस्य मातुः तेजःपूर्णेन दोहदेन अप्रतिहतं

---

१. विक्र० ३।२६ ।

२. कलालयस्ते तनयस्तु मध्यमः—विक्र० २।५२ ।

३. विक्र० ५।३२ ।

४. विक्र० ५।३३-३६ ।

५. विक्र० ६।६८ ।

६. विक्र० ३।६९ ।

तेजः कविना सङ्केतितमस्ति । परं शैशवे तस्य तेजसश्चित्रणे कविना अपूर्वं कौशलं प्रादर्शि । तद्यथाऽत्र—

तेजस्विनामुन्नतिमुन्नतात्मा सेहे न बालोऽपि नरेन्द्रसूनुः ।
देवोऽपि भास्वाञ्छरणेच्छयेव समाश्रितो विष्णुपदं रराज ॥
उच्चैः स्थितं तस्य किरीटरत्नं तेजोधनानामुपरि स्थितस्य ।
क्षमामिव प्रार्थयितुं लुलोठ सङ्क्रान्तिभङ्ग्या मणिपादपीठे[1] ॥

अत्र आद्ये पद्ये अन्येषां तेजसामसहनत्वमुक्तम्, द्वितीये च तेजोधनानामुपरि-स्थितस्य' इत्यादि प्रतिपादनेन तस्य लोकोत्तरं तेजः चित्रितमस्ति कविना ।

(२१) **शास्त्रचक्षुष्मत्ता**—अक्रमेण राज्याभिषेकग्रहणे आहवमल्लेन सह मतभेदोऽस्य धर्मशास्त्रनियमपरायणतां द्योतयति । एवञ्च अग्रजेन सह युद्ध्वा तस्य राज्यापहरणे नासीदस्य मतिरित्यपि उक्तं तथ्यं समर्थयति । अस्मिन्सन्दर्भे स्वप्ने शिवस्य युद्धविषयिणीमाज्ञां कल्पयित्वा[2] कविनाऽस्य चरित्रे सम्भाव्यमानं दूषणं परिहृतमस्ति ।

(२२) **धर्मपरायणत्वम्**—अनेन विशालानां मन्दिराणां निर्माणमस्य धर्मपरायणत्वं संसूचयति[3] । कविना महनीयं दानशीलत्वमप्यस्य वर्णयित्वा अतीव धर्मपरायणोऽयमासीदिति प्रतिपादितम् । निर्दिष्टगुणानतिरिच्य बिल्हणेन अन्यदपि वैचित्र्यं चरित्रेऽस्य चित्रितमस्ति । कविरञ्जने[4] भोजमतिशेते स्म, मुञ्जञ्च दाने । शरणागतवत्सलत्वमपि[5] अमुष्य चरित्रस्य चारुत्वे महत्त्वपूर्णो हेतुरस्ति । अयं किल दोषग्रहणं नाभिलषति । राज्येऽलोभः[6] यशसि चाभिरुचिरस्य[7] चरित्रमुन्नयतः । 'गुणनिधिः'[8] 'गुणैकपक्षपाती,[9] 'गुणा-

---

१. विक्र० ३।२३-२४ ।

२. विक्र० ६।६२ ।

३. विक्र० १७।१५, १७ ।

४. न भोजराजः कविरञ्जनाय मुञ्जोऽथवा कुञ्जरदानदक्षः ।
हस्ताम्बुजे तस्य गुणिप्रियस्य सहर्षमाविष्कृतहेमवर्षे ॥
विक्र० ३।७१ ।

५. विक्र० ३।६७, ५।२६ ।

६. विक्र० ६।७ ।

७. विक्र० ६।२ ।

८. विक्र० ६।१ ।

९. विक्र० ६।३ ।

नुरागी'[1] इत्यादिभिरस्य गुणप्रियत्वं चित्रयित्वा चरित्रे विक्रमाङ्कदेवस्य प्रागल्भ्यं प्रतिष्ठापितमस्ति कविना ।

धैर्यस्य धाम निधिरद्भुतचेष्टितानां
दृष्टान्तभूरनवधेः करुणारसस्य ।
त्वं वेधसा विरचिता सकलाधिराज-
निर्माणसारपरमाणुसमुच्चयेन[2] ॥

उक्तपद्येन बिल्हणस्य चरित्रमतितरां विशिष्टं प्रशस्यं प्रमाणितं च सम्पद्यते ।

चन्दलादेवी—

यद्यपि चन्दलादेवी अस्य काव्यस्य नायिका अस्ति तर्ह्यपि तस्याः चरित्रं नास्ति कविना वैशद्येन चित्रितम् । यतो हि विक्रमाङ्कदेवचरिते विक्रमस्यैव चरित्रप्राधान्यं स्यादिति कृत्वा अन्यस्य कस्यचिदपि पात्रस्य चरित्रं न तथा वैशद्येन चित्रितम् । अष्टमसर्गे रूपवर्णनात्तस्याश्चित्रणमस्ति समारब्धम् । उत्तमनायिकाया यादृशी शरीररचना अपेक्षते तादृशी एव कविना तत्र चित्रिता अस्ति । तदनन्तरं दूतमुखेन चन्दलायाश्चरित्रविषयकं चित्रणं काव्येऽत्र समुपलभ्यते । जीवलोकमसौ विक्रममयं पश्यतीति दूतमुखेनैव प्रेयांसं प्रति तस्या दृढानुरागः कविना सूचितोऽस्ति । स्त्रीणां चरित्रे लज्जाया महत्त्वपूर्णं स्थानं भवति । महाकविना बिल्हणेन अपि चन्दलाया लज्जाचित्रणमतीव मनोहारिणा प्रकारेण कृतमस्ति—

मुखेन लज्जाभिनयप्रगल्भा लीलालवन्यञ्चितकन्धरेण ।
प्रत्यादिशन्तीव दिवि स्फुरन्तमनेकदोषोपहतं मृगाङ्कम्[3] ॥

स्वयंवरमण्डले मनोऽभिलषितं प्रेयांसं समीक्ष्य तस्याश्चेष्टासु प्रेमप्रकाशनवैदग्ध्यं दृश्यते—

जघान पादेन सखीं सखेलमाकृष्य हारं मुहुरामुमोच ।
सा दर्शने कुन्तलपार्थिवस्य न कारिता किं मकरध्वजेन[4] ॥

स्वयंवरे समागतेषु राजस्वेकस्य ताम्बूलमुत्सृज्य निकारमार्गेण निराकरणेन, अन्यस्य कुचकुम्भपीठे दृष्टिप्रपातेन तस्य स्थूलत्वप्रकाशनेन तस्या वैदग्ध्यं ध्वन्यते ।

१. विक्र० ६।४ ।
२. विक्र० ५।८७ ।
३. विक्र० ९।५३ ।
४. विक्र० ९।७४ ।

न केवलमसौ लज्जाशीलैव, तस्याश्चरित्रस्य समयानुसारि चित्रणं कुर्वता निभमात्रकेण तल्लज्जानिरासोऽपि चित्रितोऽस्ति कविना—

लज्जानिरासे निभमात्रकेण वाक्येन तेन प्रतिहाररक्ष्याः ।
पतिंवरा संवरणस्रजं तां श्रीविक्रमाङ्कस्य चकार कण्ठे[1] ॥

स्वल्पैरेवाहोभिः पत्युर्मनसि विजयप्राप्तिः नायिकायाः सर्वोत्कृष्टो गुणोऽस्ति । चन्दलादेव्यपि अस्मिन् गुणे वैशिष्ट्येनाग्रगण्या भवितुमर्हति—

सा सन्नताङ्गी शनकैः प्रियस्य तथा गुणैर्मानसमारुरोह ।
तदेकवश्यं स्मरशासनेन यथा तदन्याभिरहार्यमासीत्[2] ॥

विवाहानन्तरं त्वरितमेवासौ विविधोपचारेषु दक्षा बभूवेत्यपि तस्याश्चरित्रे एको विशिष्टो गुणोऽस्तीति प्रतिपादयितुं शक्यते । अस्याः सङ्गीतशास्त्रे नैपुण्यमित्थं चित्रयति कविः—

पुंस्कोकिलस्ते मधुमासलक्ष्म्या गान्धर्वसर्वस्वविशारदायाः ।
प्रकाशितुं शिष्य इवैष पश्य रागं मुहुः पञ्चममातनोति[3] ॥

विक्रमाङ्कदेवचरितस्य कतिपयैः पद्यैस्तस्याः[4] विलासप्रागल्भ्यमपि अभिव्यज्यते । चरित्रचित्रणप्रसङ्गेषु नायिकायाश्चरित्रचित्रणे कविना विशेष आयासस्तु नास्ति कृतः, परं सामान्यरूपेण नायिकागुणा अत्र प्रतिपादिता अवलोक्यन्ते ।

सोमेश्वरः—

सोमेश्वरः विक्रमाङ्कदेवस्याग्रजो वर्तते । अयं हि विक्रमाङ्कदेवचरितस्य प्रतिनायकोऽस्ति । कविना अस्य चरित्रस्य प्रायः अनुज्ज्वल एव पक्षश्चित्रितोऽस्ति । प्रारम्भत एव अस्य चरित्रे कविना गौणत्वमारोपितं दृश्यते । आहवमल्लस्य न तादृशी प्रसन्नताऽस्य जन्मनि दृश्यते यादृशी विक्रमाङ्कदेवजन्मनि । बिल्हणप्रतिपादितेन क्रमं परित्यज्य विक्रमाय राज्यप्रदानरूपाहवमल्लप्रस्तावेन सोमेश्वरस्य अयोग्यता सङ्क्त्यते । विक्रमाङ्कदेवचरिते वर्णितं सोमेश्वरचरित्रं समीक्ष्य प्रतीयते यत्तत्र सर्वविधमपकर्षं प्रदर्शयितुं बिल्हणेन पूर्णः प्रयत्नः कृतोऽस्ति, जीवत्येव तस्मिन् कुन्तलधरा वैधव्यं प्रपेदे एतावच्च प्रतिपादितम्—

---

१. विक्र० ९।१४७ ।
२. विक्र० १०।५ ।
३. विक्र० १०।२९ ।
४. विक्र० १०।३७, ७१ ।

अपास्तकुन्तलोल्लासा वैराग्यं दधती धरा ।
जीवत्येव धवे तस्मिन् विधवेव व्यराजत[1] ॥

लक्ष्म्या मदेन भ्रान्तोऽयशोभाजनतामापन्नो महात्मनां वचांसि न शृण्वन्नसौ राजयक्ष्मेव राज्यश्रियं विनाशयतीति कवेर्दोषदृष्टिस्तस्मिन्नस्तीति बोध्यते—

कुर्वन्नङ्गेषु वैक्लव्यमाविष्कृतमदज्वरः ।
स निनाय श्रियं राजा राजयक्ष्मेव संक्षयम्[2] ॥

असौ नितरामयोग्य इति साधयितुं कविना पूर्णरूपेण स्वकवित्वशक्त्या प्रयासः कृतोऽस्तीति काव्यस्य समीक्षणेन प्रतीयते—

फालैर्दिव्यमिवागृह्णन् मण्डलभ्रमणोद्यताः ।
अयोग्यतां साधयितुं तस्य सेनातुरङ्गमाः[3] ॥

क्षात्रतेजसस्त्यागः,[4] अधिककराऽऽदानादिभिः प्रजापीडनम्,[5] मदः,[6] लोभश्च[7] तस्य चरित्रं कलङ्कयन्तः दोषाः दरीदृश्यन्ते । अधोगमनमेव तस्याभीप्सितमासीदित्यपि कविना तस्य चरित्रदूषणत्ववर्णनाय प्रतिपादितमत्र काव्ये—

उपरि प्रतिबन्धेन ध्यात्वेव नमतोऽखिलान् ।
अधोगमनमेवासौ विह्वलो बह्वमन्यत[8] ॥

तस्य कलङ्कितचरित्रेण चालुक्यकुलमपि कलङ्कितं समभूदिति तत्कलङ्कितचरित्रस्य फलमपि काव्येऽस्मिञ्चित्रितमस्ति—

बहुना किं प्रलापेन तथा राज्यं चकार सः ।
यथेन्दुमित्रे चालुक्य-गोत्रे प्राप कलङ्कताम् ॥[9]

---

१. विक्र० ४।१०१ ।
२. विक्र० ४।१०० ।
३. विक्र० ४।१०३ ।
४. विक्र० ४।१०४ ।
५. विक्र० ४।१०५ ।
६. विक्र० ४।१०६ ।
७. विक्र० ४।११० ।
८. विक्र० ४।१०८ ।
९. विक्र० ४।११४ ।

सोमेश्वरस्य चरित्रे यत् तेन राजिगेन सह सम्मिल्य विक्रमाङ्कदेवे आक्रमणं कृतं तदपि तस्य चरित्रं कलङ्कयति। एतस्मिन्नेव प्रसङ्गे विक्रमस्य सन्धिप्रस्ताव-मस्वीकुर्वतस्तस्य चरित्रं धिक्कारमर्हतीति कविना प्रतिपादितम्—

स तु शपथशतैः प्रपद्य सर्वं वितथवचाः कुलपांसनत्वमाप्तः ।
क्षणमनुगुणमैक्षत प्रहर्तुं मलिनधियां धिगनार्जवं चरित्रम्[1] ॥

महाकविना बिल्हणेन अस्य प्रतिनायकानुरूपचरित्रचित्रणे कृतः प्रयासः काव्ये उत्कर्षाधानस्य हेतुरस्ति सम्पन्नः ।

जयसिंहः—

जयसिंहो विक्रमदेवस्य अनुजोऽस्ति। अस्य चरित्रं यद्यपि विशेषरूपेण नास्ति चित्रितम्, तर्ह्यपि काव्येऽत्र कतिपयैरुदन्तैरस्य चरित्रं महत्त्वपूर्णं सञ्जायते। आद्येषु त्रयोदशसर्गेषु अस्य नाममात्रमेवावलोक्यते। एकवारमस्य जन्मसमये कविनाऽस्य जन्ममात्रमेव[2] संसूचितम्। राजधानीं परित्यज्य गच्छता विक्रमेण जयसिंहोऽपि सहैव नीतः[3] इति द्वितीयवारं तस्य नाम काव्ये सङ्कीर्तितम्। परं चतुर्दशे पञ्चदशे च सर्गे अस्य चरित्रं किञ्चिद् वैशिष्ट्यं धत्ते। वनवासमण्डले शासकत्वेन नियुक्तोऽयं शनैः शनैः बलसङ्ग्रहं कुर्वन्नासीत्, पश्चाच्च अग्रजेन सह विद्रुह्य स्वतन्त्रराज्यस्य स्थापनामाचकाङ्क्ष।

सर्वमाटविकचक्रमक्रमव्यापृतस्तलगतं चकार सः ।
शार्वरेष्विव तमःसु राक्षसाः पापकारिषु मिलन्ति पापिनः[4] ॥

यद्यप्युक्तपद्येन कविना तस्य पापकारित्वं प्रतिपादितं तर्ह्यपि राज्ञां स्वपक्ष-करणे तस्य क्षमता प्रतीयते। बिल्हणस्य दृशि अयमपि कुलकण्टकः, अनयवायु-लङ्घितश्च वर्तते—

प्राहिणोत्कति न सान्त्वनाक्रमांस्तत्समीपमनिशं विशांपतिः ।
एकमप्यनयवायुलङ्घितो नाग्रहीष्ट कुलकण्टकस्तु सः[5] ॥

कविनाऽस्य चरित्रे दूषणसंदर्शनाय अस्य दाहकत्वं आप्तजनपीडकत्वञ्च प्रतिपादितमस्ति—

---

१. विक्र० ६।६१।
२. विक्र० ३।२५।
३. विक्र० ५।१।
४. विक्र० १४।११।
५. विक्र० १४।४६।

क्वापि दाहमपरत्र लुण्ठनं बन्धनं क्वचिददाज्जनस्य सः ।
पातचिह्नमिव तस्य भूयसी दुष्टचेष्टितपरम्पराऽभवत्[1] ॥

सन्धिमभिलषतोऽपि भ्रातुः सविधे दुर्वचनप्रेषणेन तु अस्य चरित्रे महालाञ्छनं यदापतितं तदपि चित्रितमस्ति कविना—

दुर्वचांसि सविधे धरापतेः स व्यसर्जयदनङ्कुशोऽनिशम् ।
अश्रिया जडधियः कटाक्षिताः किं तदस्ति न समाचरन्ति यत्[2] ॥

तदनन्तरं युद्धे पराजितस्य पलायनम्, पलायितस्यापि निग्रहणं तस्य असाफल्यमेव बोधयतः ।

बिल्हण एनमपि राक्षसोपमानस्योपमेयं व्यधत्त ।

आहवमल्लः—

अयं किल नायकस्य जनको वर्तते । विक्रमचरित्रादनन्तरमस्यैव चरित्रं साधुतरं प्रतीयते । अयं महावीर ऐश्वर्यशाली पराक्रमी च आसीत् । अनेकेषु युद्धेषु अनेन शत्रवः पराजिताः[3] । महाकविना अस्य चारित्र्यस्य पावित्र्यं प्रतिपादयितुं भगवतो रामस्य पवित्रचरित्रं संस्मारितमस्ति—

आख्यायिकासीम्नि कथाद्भुतेषु यः सर्गबन्धे दशरूपके च ।
पवित्रचारित्रतया कवीन्द्रैरारोपितो राम इव द्वितीयः[4] ॥

कोटिसंख्याका यज्ञा अनेन सम्पादिता इति उक्त्या कविनाऽस्य धर्मपरायणत्वं प्रकाशितमस्ति—

यः कोटिहोमानलधूमजालैर्मलीमसीकृत्य दिशां मुखानि ।
तत्कीर्तिभिः क्षालयति स्म शश्वदखण्डतारापतिपाण्डुराभिः[5] ॥

'अस्य गुणैर्मुग्धा प्रजा अस्य पूर्वजानपि विस्मृतवती' इत्यादिभिः चित्रणैः कवेः चरित्रचित्रणे कौशलं प्रत्यक्षमेवास्माकं वर्तते—

अन्यायमेकं कृतवान् कृती यश्चालुक्यगोत्रोद्भववत्सलोऽपि ।
यत्पूर्वभूपालगुणान्प्रजानां विस्मारयामास निजैश्चरित्रैः[6] ॥

---

१. विक्र० १४।५४ ।
२. विक्र० १४।५६ ।
३. विक्र० १।८९ ।
४. विक्र० १।८८ ।
५. विक्र० १।९५ ।
६. विक्र० १।१०१ ।

प्रियाया अङ्कपालीं पुत्ररत्नरिक्तामवलोक्य अस्य दुःखितहृदयस्य चित्रणमपि कविनाऽतीव कौशलेन कृतमस्ति[1]। पुत्रप्राप्त्यै कठोरतपस्तपनमस्य चरित्रं वैशिष्ट्येन पवित्रयति । तपोमाध्यमेन सन्ततिप्राप्तिरस्य[2] दृढसङ्कल्पस्य परिचायिका अस्ति । चरित्रमुन्नेतुं कविना वेदेषु इतिहासादिष्वपि अस्य प्रावीण्यं प्रतिपादितमस्ति । तद्यथा—

अधीतवेदोऽस्मि कृतः श्रुतागमः श्रमोऽस्ति भूयानितिहासवर्त्मसु ।
गुरुष्ववज्ञाविमुखं सदा मनस्तदभ्युपायोऽत्र मया न दुर्लभः[3] ॥

परन्तु अस्य चरित्रे महादोषोऽयं वर्तते यदनेन क्रमं विहाय सोमेश्वरस्य स्थाने विक्रमं यौवराज्येऽभिषेक्तुं प्रस्तावः कृतः[4] । अन्ते च तुङ्गभद्रायां शरीरत्यागावसरे तस्य ब्रह्मज्ञानवचांसि[5] अपि तस्य चरित्रमतिमानवीयमिव सम्पादयन्ति ।

समाजचित्रणम्—

कस्मिंश्चिदपि कवौ तत्कालीनसमाजस्य प्रभावोऽवश्यं भवति । असौ यत्किञ्चिदपि कवयति तस्मिंस्तत्कालीनः समाजः स्वयमेव प्रतिबिम्बितो भवति । अतः विक्रमाङ्कदेवचरितेऽपि तत्कालीनसमाजस्य प्रभावो दृक्पथमवतरति ।

(१) **वर्णाश्रमधर्मे आस्था**—तत्कालीनसमाजस्य वर्णाश्रमधर्मे आस्थायाः काव्यस्य कतिपयैः पद्यैः पुष्टिः सञ्जायते[6]। ब्राह्मणानां यज्ञयागादिषु अध्ययनाध्यापनादिषु च रुचिरासीत् । क्षत्रियाः पराक्रमबलेन यशोऽर्जने लालायिता आसन् । वैश्यशूद्रवर्णयोर्विशेषवर्णनमत्र काव्ये नोपलभ्यते ।

(२) **राजकुलेषु राज्यलोभः**—विक्रमो निजाग्रजादबलेन सत्तामग्रहीष्ट तस्माच्चापहर्तुं जयसिंहोऽचेष्टत । इत्यनेन सङ्केत्यते यत्तदानीन्तनराजकुलेषु अहमहमिकया सत्ताग्रहणस्य लोभ आसीत् ।

(३) **युद्धबिभीषिका**—राजानो युद्धभयात् प्रजारक्षणार्थं धनकन्यादिदानैः

---

१. विक्र० २।२६-३५ ।
२. विक्र० २।४१-५३ ।
३. विक्र० २।३६ ।
४. विक्र० ३।२८ ।
५. विक्र० ४।५८ ।
६. विक्र० २।६ ।

युद्धसम्भावनां निवारयन्ति स्म[1] ।

(४) **विलासः**—काव्येऽस्मिन् राजभवनेषु विलासानां विस्तृतं विवरणमस्ति । राज्ञः अनेकाभिः स्त्रीभिः सह उपवनविहारैः जलकेल्यादिभिश्च कामविलासैस्तात्कालिकशासकानां जीवनमतीवविलासप्रियमासीदित्यपि विक्रमाङ्कदेवचरितात् सम्यक् स्पष्टं भवति[2] । किं बहुना युद्धमृगयाप्रयाणेषु अपि अन्तःपुरं राजभिः सहैव गच्छति स्म[3] ।

अस्मिन्नेव प्रसङ्गे वेश्यावृत्तिरपि समाजस्य अङ्गमासीद्[4] इत्यपि प्रतीयते। समाजस्यैकमङ्गं तु अतीव पतितमासीत्—

मया कुमार्यापि न सुप्तमेकया न जारमुत्सृज्य पुमान्विलोकितः ।
अनेन गोत्रस्थितिपालनेन मे प्रसन्नतामेत्य भवोपकारिणी[5] ॥

अनेन पद्येन प्रतीयते यत्समाजस्य एकस्मिन् वर्गे विलासः अन्यस्मिंश्च भ्रष्टाचारोऽपि विद्यमान आसीत् । अस्मिन्प्रसङ्गे कविना बहुत्र काव्येऽस्मिन् समाजस्य भ्रष्टाचारश्चित्रितोऽस्ति[6] ।

(५) **स्वयंवरप्रथा**—राजादिषु उच्चवर्गेषु स्वयंवरप्रथा प्रधानासीत् । राजकुमार्यः स्वयंवरे समागतेषु राजकुमारेषु स्वेच्छया एकतमं वृणते स्म । स्वयंवरस्य चित्रणमतीव मनोहारिणा रूपेण अत्र चित्रितं कविना ।

---

१. एनमेत्य जयकेशि पार्थिवः प्रार्थितादधिकमर्पयन्धनम् ।
निश्चलामकृत हासचन्द्रिकां कोङ्कणप्रणयिनीमुखेन्दुषु ॥
विक्र० ५।२५

कन्यकां कुलविभूषणं गुणैरद्भुतैस्त्रिभुवनातिशायिनीम् ।
त्वत्करप्रणयिनीं विधाय सः प्राप्तुमिच्छति समस्तवन्द्यताम् ॥
विक्र० ५।४६

२. अविरततरुणीसहस्रमध्य-स्थितिविगलत्पुरुषव्रता इवैते ।
प्रतिपदमतिकातराः क्षितीशाः परिकलयन्ति भयं समन्ततोऽपि ॥
विक्र० ६।३४

३. विक्र० १६।२१ ।

४. विक्र० २२।३१ ।

५. विक्र० १३।८४ ।

६. विक्र० १२।२५ ।

(६) **धर्मे आस्था**—धार्मिककृत्येषु जनानां विशिष्टा रुचिरत्र काव्ये चित्रिताऽवलोक्यते[1] ।

(७) **समृद्धिः**—सामान्यतस्तत्कालीनसमाजः समृद्ध आसीत् । जनानां दानप्रदानेषु रुचिरासीत् । उत्सवानामायोजनानि समाजस्य समृद्धि सङ्केतयन्ति—

दिशः कृतः सन्ततत्तूर्यनिस्वनै-
रलक्ष्यदिक्कुञ्जरकण्ठगर्जिताः ।
पुरे पुरे सन्ततमुत्सवादभूद्
ध्वजांशुकप्रावृतभास्करं नभः ।।[2]

चौराणामभावेनापि समाजस्य समृद्धिः संसूच्यते—

जनैरवज्ञातकपाटमुद्रणैः
क्षपासु रक्षाविमुखैरसुप्यत ।
करा विशन्ति स्म गवाक्षवर्त्मसु
क्षमापतेश्छिद्रपथैर्न तस्कराः[3] ।।

अनावृष्टिभिर्नासीत्तदानीन्तनः समाजः पीडित इत्यादिना चित्रणेन तत्कालीनसमाजस्य स्वच्छं चित्रं कविना चित्रितमस्ति[4] । दुर्भिक्षेण अकालमृत्युना च न कोऽपि पीडचते स्म—

अकालमृत्युर्न चचार कुत्रचि-
त्क्वचिन्न दुर्भिक्षमलक्ष्यत क्षितौ ।
किमन्यदन्यायनिबर्हणो नृपः
स राज्यमिक्ष्वाकुपतेरदर्शयत्[5] ।।

---

१. विक्र० १।१००, ४।३६, ६७, ८८ ।

२. विक्र० १७।७ ।

३. विक्र० १७।६ ।

४. पयोभिरस्मान्परिपूरयन्ति ये
पयोधयस्ते दधतेऽस्य वश्यताम् ।
इतीव तत्सेवनवाञ्छया जलं
यथोपयोगं मुमुचुः पयोमुचः ।। विक्र० १७।३

५. विक्र० १७।४ ।

वात्यादीनां श्रमनिरासक्षममात्रप्रवहनस्य, भानोः अत्यर्थतापनराहित्यस्य च वर्णनेनापि समाजस्य समृद्धिरेव कविना चित्रितास्ति—

न भानुमत्यर्थमतापयज्जनं
वबुः समीराः श्रममात्रहारिणः ।
फलानि भङ्क्त्वातिभरेण पादपान्
भियेव पक्वान्यभजन्त पाण्डुताम्[1] ॥

स्वर्णप्राचुर्यवर्णनेन समाजस्य समृद्धिवर्णनमेव कवेरभीष्टम् । तद्यथा—

अहं सदा प्रमाणसमं महीभुजा-
मयं तु मां वेत्ति नृपस्तृणोपमम् ।
इतीव कर्णेषु सुवर्णमर्थिनां
सखेदमाख्यातुमभूत्कृतास्पदम्[2] ॥

इहागतः खण्डनमेव लप्स्यते
पलायनार्थं कनकाद्रिरुच्यताम् ।
इतीव देशान्तरगामिनामभू-
न्नरेन्द्रहेमश्रुतिलग्नमर्थिनाम्[3] ॥

इत्यादिषु बहुषु अन्येष्वपि[4] पद्येषु कविना सुवर्णस्य वर्णनं कृतमस्ति । अनेन तत्काले सुवर्णप्राचुर्य्यस्य सङ्केतो लभ्यते ।

अभिनयकलाकौशलं नाटकादीनि चापि तत्कालीन-समाजस्य समृद्धिं द्योतयन्ति—

दृष्ट्वा यस्मिन्नभिनयकलाकौशलं नाटकेषु
स्मेराक्षीणां मसृणकरणासङ्गदत्ताङ्गहारम् ।
रम्भा स्तम्भं भजति लभते चित्रलेखा न रेखां
नूनं नाट्ये भवति च चिरं नोर्वशी गर्वशीला[5] ॥

यद्यपि 'अर्थी' आदिशब्दानामवलोकनेन समाजे निर्धनवर्गस्यापि अस्तित्वमासीदिति प्रतीयते, एवञ्च समाजे कुटिललिपिकानां विटानाञ्चापि अस्तित्वं[6] काव्यस्यास्य अनुशीलनेन प्रमाणितं भवति तर्ह्यपि आधिक्येन समाजे सुखस्य समृद्धेश्च विद्यमानता नास्त्यसंदिग्धा ।

---

१. विक्र० १७५ ।
२. विक्र० १७।११ ।
३. विक्र० १७।१४ ।
४. विक्र० १७।३७-३८, ४०-४१ ।
५. विक्र० १८।२६ ।
६. विक्र० १८।४२ ।

६

रसभावयोरभिव्यक्तिः

सर्वेषु काव्याङ्गेषु रसस्य महत्त्वं सर्वाधिकं वर्तते । यद्यपि अलङ्कारवादिनः काव्ये चमत्कृतिमात्रमेव महत्त्वास्पदं मन्यन्ते तर्ह्यपि रसस्य प्रतिष्ठा सर्वोपरि वर्तते, इति सिद्धान्तस्य सर्वजनसमादरः न सन्देहलेशायापि कल्पते । रसवादिनामाचार्याणां प्रागपि नाट्यशास्त्रे[1] अग्निपुराणे[2] च रसस्य महत्त्वं प्रतिष्ठापितं दृश्यते । काव्यशास्त्राचार्यैः रसस्य विभावानुभावस्थायिसञ्चार्यादिनामभिश्चत्वारोऽवयवाः स्वीकृताः । इमे आश्रयालम्बनपक्षाभ्यां विभागमर्हन्ति । आश्रयपक्षे स्थायिसञ्चार्यनुभावानामन्तर्भावोऽस्ति, आलम्बनपक्षे च आलम्बनोद्दीपनभावावन्तर्भूतौ । रसे आलम्बनं सर्वप्रधानं भवति । आलम्बनस्य चेच्चित्रणं सफलम्, तर्हि रसोद्बोधो निश्चितो भवति[3] । रसोद्बोधे आनन्दानुभूतिरपि निश्चिता । यतो हि आनन्द एव रसः, आनन्दानुभूतिरेव रसानुभूतिः भावानुभूतिश्च रसानुभूतेः प्रथमं सोपानम् ।

कस्मिंश्चिदपि काव्ये एको रसो अङ्गी, अन्ये चाङ्गरूपेण भवन्ति[4]। विक्रमाङ्कदेवचरिते वीररसोऽङ्गी । अत्र मङ्गलाचरणपद्ये भगवतः कृष्णस्य साक्षाद्वर्णनमकृत्वा तत्कृपाणवर्णनमात्रेणैव वीररसस्याङ्गित्वं संसूचितम्[5] ।

वीररसः—

वीररसस्य चत्वारो भेदा भवन्ति । तेषु युद्धवीरस्य साङ्गोपाङ्गं वर्णनं काव्येऽस्मिन्वरीवर्तते । अन्येषां दानधर्मदयावीराणामप्यांशिकं वर्णनं विक्रमाङ्कदेवचरिते दृश्यते । बिल्हणस्य दानवीरतावर्णनानि दानवीररसस्य निष्पत्तये पूर्णरूपेण समर्थानि सन्ति । इदमत्रोदाहरणम्—

---

१. नहि रसादृते कश्चिदर्थः प्रवर्तते । नाटचशास्त्रम्, अध्या० ६ ।

२. वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् । अग्निपुराणम्, ३३७।३३

३. नैषधपरिशीलन, पृ० १६४ ।

४. अङ्गानि सर्वेऽपि रसाः । सा० द० ६।३१७ ।

५. विक्र० १।१ ।

दद्दौ स दानानि महान्ति षोडश
प्रतापशाली प्रतिपर्व पार्थिवः ।
तद्दन्तिकाद्दानजलैः सकर्दमा-
न्निपातभीत्येव कलिः पलायितः[1] ॥

उक्तपद्ये दानवीरस्य विक्रमस्य दानप्रदानरूपपराक्रमेण कलिरूपशत्रोः पलायनं दानवीररसस्य सफलां निष्पत्तिं विदधाति । दानवीररसस्य सफला निष्पत्तिर्वक्ष्यमाणपद्येऽपि—

प्रयच्छतः स्वच्छमतीव काञ्चनं
विशङ्क्य यस्मात्कनकक्षमाधरः ।
अदर्शयत्कालिकयेव सङ्गतिं
स्वहेम्नि सङ्क्रान्तिनिभान्नभःश्रियः[2] ॥

मदीयं सुवर्णं कदाचिद्धृत्वा राजा विक्रमाङ्कदेवः याचकेभ्यो न दद्यादिति सुवर्णदानप्रदानरताद्विक्रमदेवात्सुवर्णाद्रिराशशङ्के इति वर्णनेन दानवीररसनिष्पत्तौ बिल्हणस्य कौशलं वर्णितम् ।

धर्मवीरः—

राज्ञ आहवमल्लस्य तपश्चरणमाध्यमेन बिल्हणो धर्मवीररसस्य निष्पत्त्यै पर्याप्तमवसरमलभत । इदमत्रोदाहरणम्—

तपः स्वहस्ताहृतपुष्पपूजित-त्रिलोचनः स्थण्डिलवासधूसरः ।
तथा स राजर्षिरसाधयद्यथा महर्षयोऽस्मादपकर्षमाययुः[3] ॥

अन्यच्च

स सौकुमार्यैकधनोऽपि सोढवांस्तपोधनैर्दुष्प्रसहं परिश्रमम् ।
रराज तीव्रे तपसि स्थितो नृपः शशीव चण्डद्युति-मण्डलातिथिः[4]॥

उक्तयोः पद्ययोः धर्मवीरस्य सुस्पष्टाऽभिव्यक्तिर्जायते ।

---

१. विक्र० १७।३६ ।
२. विक्र० १७।४० ।
३. विक्र० २।४४ ।
४. विक्र० २।४५ ।

दयावीरः—

वक्ष्यमाणपद्ये दयावीररसस्य निष्पत्तिरुदाहर्तुं शक्यते—

सम्प्राप्तं कुलकण्टकं तमटवीमध्यादवन्ध्यैर्भटैः
कारुण्योद्गतवाष्पगद्गदपदः सम्भाष्य सन्तोष्य च ।
चालुक्यान्वयशेखरोऽथ शिखरप्रेङ्खोलमुक्ताफल-
प्रालम्बद्युतिपुञ्जदर्शितयशोगुच्छामगच्छत्पुरीम्[१] ॥

शत्रुणा सह सम्मिल्य कृताक्रमणं विद्रोहिणं जयसिंहं पराजित्य तेन सह सम्भाषणं तस्य सन्तोषणञ्च कृतवतो विक्रमाङ्कस्य दयावीरत्वं सुस्पष्टयति उक्तपद्यम् ।

युद्धवीरः—

काव्येऽस्मिन् दानधर्मदयावीरात्मकवीररसस्य भेदानां न तथा वैशद्येन चित्रणं यथा युद्धवीरस्य । युद्धवीररसस्य वर्णनं साङ्गोपाङ्गरूपेण विस्तरशोऽत्र काव्ये वरीवर्ति । युद्धवीररसस्य यादृक् मनोहारि ओजःपूर्णञ्च स्वरूपमत्र लभ्यते तत्किमपि असामान्यमेव । युद्धवर्णनप्रसङ्गेष्वपि बिल्हणस्य अतिरञ्जिता शैली स्वीयवैलक्षण्यं न जहाति अपितु अतिसारल्येन सारस्येन च सहृदयजनमनांस्यावर्जयति । इदमत्रोदाहरणम्—

मदकरटिनमुत्कटप्रतापः प्रकटितवीरमृदङ्गधीरनादः ।
मथनगिरिमिवाधिरुह्य वेगात्प्रबलवारिधिलोडनं चकार[२] ॥

अत्र हि शत्र्वादिभिरालम्बनकारणैः तच्चेष्टाभिरुद्दीपनकारणैर्विक्रमस्य उत्साहरूपः स्थायिभावो जनितः, धीरनादादिभिः कार्यैः प्रतीतियोग्यः कृतः, अमर्षादिभिः सहकारिभिरुपचितः मुख्यया वृत्त्या अनुकार्ये विक्रमे प्रतीयमानो वीररसत्वेन सहृदयैरास्वाद्यते[३] । वक्ष्यमाणपद्येऽपि उभयोः सेनयोर्युद्धं वीररसनिष्पत्तिं विदधाति—

अहमहमिकया प्रधाविताभ्यां मिलितममुष्य बलं तयोर्बलाभ्याम् ।
सलिलमभिमुखं सहाम्बुराशेस्तदनुमहानदयोरिवोदकाभ्याम्[४] ।।

१. विक्र० १८५।७ ।
२. विक्र० ६।६८ ।
३. अत्र हि कृता रसनिष्पत्तिर्भट्टलोल्लटमनुसरति । का० प्र०, पृ० ६ ।
४. विक्र० ६।६९ ।

अत्रापि उभयोः सेनयोरुत्साहरूपः स्थायिभावः विभावानुभावसञ्चारिभावैर्व्यक्तः रसपदवीमेति ।

वीररसस्याद्भुतनिष्पत्तिजनकं वक्ष्यमाणपद्यं वीररसस्योदाहरणानां चूडामणित्वं प्राप्नुवदिव चकास्ति—

महति समरसङ्कटे भटोऽन्यः प्रतिभटनिर्दलनात्समाप्तशस्त्रः ।
अगणितमरणः प्रविश्य वेगादरिकरतः करवालमाचकर्ष[1] ॥

अत्र हि भटः स्थायिभावस्य आश्रयः प्रतिभटस्तस्यालम्बनं तस्योद्दीपनं शत्रुचेष्टाः करवालाद्याकर्षणमनुभावश्च वर्तते । एभिः सर्वैरास्वाद्यत्वमानीयमानः उत्साहः स्थायिभाव एव वीरो रसोऽत्यन्तहृदयावर्जकः ।

कश्चित्परित्यक्तकवचं विपक्षवीरं मल्लयुद्धाय सन्नद्धं वीक्ष्य विघटितकवचः भटः वीररसस्याश्रयत्वमुपैति पद्येऽस्मिन्—

विघटितकवचश्चचार कश्चित्प्रतिभटमुज्झितकङ्कटं विलोक्य ।
विमलविजयलालसाः खलानामवसरमल्पमपि प्रतिक्षिपन्ति[2] ॥

समरे प्राणानगणयन् प्रतिभटमूर्धनि दत्तपादो वीरो वीररसाश्रयत्वमेति वक्ष्यमाणपद्ये—

असुभिरपि यियासुभिः प्रविश्य प्रतिभटमूर्धनि कोऽपि दत्तपादः ।
फलममनुत जन्मनोऽपि लब्धं यशसि रतिर्महतां न देहपिण्डे[3] ॥

वक्ष्यमाणपद्ये विक्रमाङ्कदेवस्योत्साहस्थायिभावो वीररसतामापन्नः कस्य न तृप्तिहेतुः ?

कुलिशनिशितकङ्कपत्रभिन्नस्त्रिभुवनभीमभुजस्य राजसूनोः ।
प्रतिभटकरटिस्थिताः प्रवीराः प्रणतिपरा इव सम्मुखा निपेतुः[4] ॥

सोमदेवे राजिगे चैकाकिनो विक्रमस्य विजयः तस्य हि वीरतातिशयं द्योतयति—

किमपरमुपरि प्रतापभाजां विहतपदः स बभञ्ज राजयुग्मम् ।
द्रविडपतिरगात्क्वचित्पलाय्य न्यविशद्बन्धनधाम्नि सोमदेवः[5] ॥

---

१. विक्र० ६।७६ ।
२. विक्र० ६।७८ ।
३. विक्र० ६।७७ ।
४. विक्र० ६।८७ ।
५. विक्र० ६।९० ।

विक्रमाङ्कदेवचरितस्य पञ्चदशे सर्गे पदे पदे वहन्ती वीररसस्य स्रोतस्विनी वीररसं सहृदयान् पाययितुं पूर्णरूपेण समर्थाऽस्ति। सर्गस्य उपक्रमे एव विक्रमस्य विजयविलासोद्योगदुन्दुभिः भटानां रक्ते वीरतां सञ्चारयन्तीव श्रूयते—

भुजविक्रमदन्तिडिण्डिमः समरोत्साहशिखण्डिवारिदः।
अथ कुन्तलभर्तुरध्वनद् विजयोद्योगविलासदुन्दुभिः[1] ॥

युद्धभूमौ युद्धार्थं निस्सरन्तीनां वाहिनीनां दृश्यमपि दर्शकानां वीररससञ्चारे अलं भवति। वक्ष्यमाणपद्ये कविचित्रितं दृश्यं वीररसाभिषिक्तमिव समीक्ष्य कश्चिन्म्रियमाणोऽपि योद्धुमुत्तिष्ठेदित्यत्र नास्ति संशयः—

रणदुन्दुभिमेघनिस्वनैः सुभटश्रेणिविदूरभूमयः।
अभवन्निसृतासिवल्लरीनवरत्नाङ्कुरकोटिदन्तुराः[2] ॥

सिंहदेवस्य पदातिवर्णनेऽपि कविना स्वकीयरसयोजनायां चातुर्य्यस्य परिचयः प्रकाशितः—

हृदयस्थितरत्नभूषण-प्रतिबिम्बच्छलतः शिरांसि यैः।
विधृतानि निजानि लीलया मरणे निर्गहनैरिवोरसि[3] ॥

पद्येऽस्मिन् युद्धे शिरश्छेदं क्रीडामिवाकलयतां वीराणां वर्णनं वीररसस्य ह्रद इव अस्ति।

समरे उद्धतं शत्रुमवलोक्य भयस्थाने या हर्षानुभूतिर्बिल्हणेन विक्रमस्य वर्णिता तया बिल्हणस्य वीररसे उद्भटत्वं प्रकाशते—

परिभाव्य नितान्तभैरवं तदतिक्रान्तदिगन्तरं बलम्।
कतरो न जगाम सम्भ्रमं मुमुदे कुन्तलपार्थिवः परम्[4] ॥

वक्ष्यमाणपद्ये उभयोः सैन्ययोर्मध्ये भीषणयुद्धस्य साफल्यपूर्णेन वर्णनेन बिल्हणो वीररसस्य सफलः कविरिति सिध्यति—

---

१. विक्र० १५।१।
२. विक्र० १५।३।
३. विक्र० १५।३७।
४. विक्र० १५।४२।

अधिरुह्य बलद्वये बलाद्भुजदण्डैः परिदोलनोद्यते ।
समरद्रुमतः फलावलिर्निपपातेव शिरःकदम्बकैः[1] ॥

युद्धभूमावुत्साहरूपस्य स्थायिभावस्य विभावानुभावव्यभिचारिभावानां सहयोगेन निष्पद्यमानो वीरो रसः हृदयसम्वेद्य एव न वाग्विषयः—

सुभटस्य निहत्य वल्गतः सममेव प्रतिपक्षवीरतः ।
अविशद्दृशि शोणितच्छटा हृदये खड्गलता च सम्मुखी[2] ॥

वक्ष्यमाणपद्ये एकेन सुभटेन प्रतिभटस्य शिरः खड्गेन खण्डितम् उच्चलितं च तच्छरेण कीलितम्। शरःकीलनेन भवित्री हर्षानुभूतिरेव मन्ये रसप्रसवित्री—

असिना विनिपत्य लोलतां गमिते मूर्धनि भङ्गशक्तितः ।
मुदमाप जयामृताशया सुभटस्तत्र पृषत्ककीलिते[3] ॥

भुजोष्मशालिनो वीराः खड्गेष्वेव विरोधं दधति, एवञ्च प्रतिभटवीराणामपि शौर्य्यं प्रशंसन्ति । बिल्हणेन भावोऽयमतिसरसपद्धत्या वर्णितोऽस्ति—

गुणवादपरायणा गिरः स्मितसन्दिग्धविरोधमीक्षितम् ।
परुषत्वमुवास केवलं करवालेषु भुजोष्मशालिनाम्[4] ॥

वक्ष्यमाणपद्ये बिल्हणीयेन विलक्षणकौशलेन चित्रित उत्साहः स्थायी वीररसस्रोत इव अनुभूयते—

शिरसा सुभटस्य दर्शितं शरलूनेन महत्कुतूहलम् ।
च्युतमप्यवनौ न विद्विषि प्रहितं लोचनमाचकर्ष यत्[5] ॥

प्रतिवीरस्य उरःस्थलभेदने चतुरस्य अवनम्य सङ्गरस्थां विजयश्रियमधिरोपयतो गजराजस्य वर्णनमप्यतिशयेन वीररसोपकारकम् । तद्यथा—

विरराज नमन्महाकरी भटवक्षःस्थलभेदलम्पटः ।
अवनम्य रणाङ्गणस्थितां जयलक्ष्मीमधिरोपयन्निव[6] ॥

---

१. विक्र० १५।४४ ।
२. विक्र० १५।४५ ।
३. विक्र० १५।४६ ।
४. विक्र० १५।४९ ।
५. विक्र० १५।५१ ।
६. विक्र० १५।५५ ।

बिल्हणेन न केवलं नायकपक्षस्य शौर्योत्कर्षो वर्णितोऽपितु प्रतिपक्षशौर्य-वर्णनमपि सोत्साहं कृतमस्ति। वक्ष्यमाणपद्यद्वयेन शत्रुपक्षस्य प्रभावशालिना पराक्रमेण धैर्यहानिं प्राप्तस्य विक्रमबलस्य वर्णनं कृत्वा काव्यशास्त्रानुसारं रसविनिवेशनियमस्य निर्वाहो विहितोऽस्ति काव्येऽस्मिन्—

अभवद्बलमेतदन्तरे सकलं कुन्तलचक्रवर्तिनः।
प्रतिपक्षगजप्रधावन-क्षुभितं दिक्षु विलक्षमास्तृतम्॥
न स कोऽपि महोद्धुरः करी न तुरङ्गो न पटुर्महाभटः।
विचचार न यः पराङ्मुखः प्रतिपक्षप्रलयानिलाहतः[1]।

उक्तरीत्या नायकरिपुबलस्य उत्कर्षं वर्णयित्वा पुनः नायके उत्साहसञ्चारस्य वर्णनं वीररसस्य पृष्ठभूमौ अतीव महत्त्वास्पदम्। तद्यथा—

पुलकप्रणयं कपोलयोरथ चालुक्यनृपः प्रकाशयन्।
उदतिष्ठदपारपौरुषः स्वयमुद्दाममदेन दन्तिना[2]॥

विपक्षवीराणां यशोवृक्षं कम्पयतः वीरविक्रमस्योत्साहरूपस्थायिभावस्य वीररसे परिणतिर्वक्ष्यमाणपद्ये अनुभूयमाना काव्ये रसयोजनायामभूतपूर्वं कौशलं शंसति—

क्षतकुञ्जरकुम्भमौक्तिकैर्निपतद्भिर्मुकुलानुकारिभिः।
रिपुवीरयशःक्षमारुहं स भुजाभ्यां निजगाद कम्पितम्[3]॥

युद्धवर्णनप्रसङ्गे एव वीरशृङ्गारयोरनुभूतीनां मणिकाञ्चनसंयोग इव सम्मिश्रणं विक्रमाङ्कदेवचरितस्य श्रेष्ठतायां प्रभावशालिकारणं भवितुमर्हति। तद्यथा—

रिपुवारणकुम्भमण्डलीं प्रहरन्निर्गहनः क्षमापतिः।
प्रमदाघनपीवरस्तन-स्मरणस्मेरमुखो बभूव सः[4]॥

विक्रमाङ्कदेवस्यापारोत्साहो वक्ष्यमाणपद्ये वीररसत्वमापद्यमानो विक्रमाङ्क-देवचरितं वीररसस्य प्रधानतमं लक्ष्यमिति प्रमाणयितुं सम्यक्तया अलमिति नात्र सन्देहः।

निपतन्तमसौ निवारयन्नरिनाराचमिभस्य मूर्धनि।
चरणेन निहत्य पृष्ठतः सुरपुष्पप्रकरैरपूर्यत[5]॥

---

१. विक्र० १५।५६-५७।
२. विक्र० १५।५८।
३. विक्र० १५।६०।
४. विक्र० १५।६१।
५. विक्र० १५।६२।

वक्ष्यमाणपद्ये बिल्हणस्य काव्यकौशलेन विक्रमाङ्कदेवस्य उत्साहसागरः स्थायितामापद्य रससागरो नास्ति सम्पन्न इति न ।

असिना विशिखैः सतोमरैः सहसा कुञ्जरधावनेन च ।
स सहस्रमिवोद्वहन् करान् प्रतिपक्षक्षयदीक्षितोऽभवत्[1] ॥

बिल्हणेन वर्णितः वीररसः काव्यवाङ्मये स्वीयं वैशिष्ट्यं दधानः सर्वोत्कर्षेण वर्तते । अस्य वीररसं तन्मयत्वेनास्वादयन् सहृदयः अवश्यं रोमाञ्चितो भवति, एवञ्च तस्य हृदयस्थोऽपि उत्साहो रसमयो भवति ।

यद्यपि युद्धवर्णनप्रसङ्गे सर्वाण्यपि पद्यानि उक्तकर्मणि समर्थानि तर्ह्यपि पद्यद्वयमुदाहरणार्थं प्रस्तूयते—

प्रतिवीरविमुक्तमार्गण-प्रचयाघट्टितकङ्कटोत्थितैः ।
शिखिभिः स बहूनकल्पयत् समराम्भोनिधिवाडवानिव ॥

रणसीमनि तेन वैरिणो विजयश्रीविरहाद्विषादिनः ।
गजमौक्तिकरेणुपाण्डुराः समनीयन्त तपस्वितामिव[2] ॥

समराग्रे एकेन एव विक्रमाङ्कदेवेन कृतोऽनेकसेनाभटविनाशः सर्वैरेव प्रशंसितः परं बिल्हणवर्णित उक्तभावोऽपि स्वीयेन अद्भुतेन वैशिष्ट्येन कस्य न वर्णनास्पदम् ?

यदनेकपताकिनीभटक्षयमेकः समनीकमूर्धनि ।
स चकार चुलुक्यपार्थिवस्तदभूत् कस्य न वर्णनास्पदम्[3] ॥

वक्ष्यमाणपद्ये रणाङ्गणे चरतः विक्रमस्याश्रयतामापन्नस्य उत्साहस्य वीररसे जायमाना परिणतिस्तु अनुभूतिगम्यैव न वर्णनविषया इति स्वीकरणे न प्रमाणान्तरापेक्षा यतो हि सहृदयहृदयमेवात्र प्रमाणम्—

करिपादविपाटितोद्भटप्रतिभूपालकपालकर्परः ।
भुवनत्रयभाण्डपूरण-क्षमकीर्तिः समरे चचार सः[4] ॥

कबन्धताण्डवरङ्गभूमिषु विक्रमभुजपराक्रमोत्साहं समालोक्य तमाश्रयन्ती जयश्रीरपि यत्र चकिता बभूव तत्र सहृदया अपि आनन्दातिरेकेण गद्गदमानसा भवेयुरिति नास्ति आश्चर्यस्य विषयः । यथा—

---

१. विक्र० १५।६४ ।
२. विक्र० १५।६८-६९ ।
३. विक्र० १५।७३ ।
४. विक्र० १५।७० ।

चकितेव कबन्धताण्डवैः समरप्राङ्गणरङ्गभूमिषु ।
परिदृष्टपराक्रमं भुजं विजयश्रीः क्षितिभर्तुराश्रिता[1] ॥

विक्रमाश्रयीभूतोत्साहस्य परां काष्ठां यां बिल्हणोऽवर्णयद्वक्ष्यमाणपद्ये असौ किल प्रत्येकं सहृदयहृदयस्यान्तस्तलं स्पृशति—

कवचे परितः कृतस्थितीन् भुजयोर्व्याप्तिविबन्धकारिणः ।
कमलप्रतिमेन पाणिना विशिखान् सस्मितमुच्चखान सः[2] ॥

महाकविना बिल्हणेन काव्येऽस्मिन् वीररसप्राधान्यार्थं वारत्रयं भीषणं युद्धमवर्णि। एतद्युद्धत्रयं व्युत्सृज्य अनेकस्थलेषु उत्साहप्रधानानि पद्यानि विरचय्य काव्यमिदं वीररसाभिषिक्तमिव सम्पादितम् । आदित एव वीररसं बहुवारमभिनिवेष्टुं मुहुर्मुहुर्युद्धानां वर्णनं कृतमस्ति । सप्तदशे सर्गे विक्रमकृतस्य चोलराज्याक्रमणस्य वर्णनप्रसङ्गेन पुनरन्तेऽपि प्रचण्डयुद्धवर्णनेन वीररसनिष्पत्तये उचितावसरो लब्धोऽस्ति । सप्तदशे सर्गे बिल्हणवर्णितयुद्धानां दृश्यावलोकनेन दर्शकानां हृदिस्थोऽपि उत्साहो नायकगतेन उत्साहेन (स्थायिना) सहैव वीररसे परिणमति इति न संशयास्पदम् । इदमत्रोदाहरणं प्रस्तूयते—

सकङ्कटः कश्चिदुरस्तटत्रुट-
त्पृषत्कनिष्ठ्यूतहुताशनो भटः ।
विवेद नो धूमलताभिशङ्कया
मुखे कृपाणं रिपुणा निवेशितम्[3] ॥

अत्र हि वारबाणसङ्घट्टितपृषत्कैरुत्पन्नज्वालः धूमशङ्कयाऽज्ञातमुखप्रविष्टासिः वीरोऽनुपमेन उत्साहेन (स्थायिना) रसाश्रयत्वमापन्नः कस्य चित्तं वीररसानुभावितं न कुर्यात् ? एवंविधमन्यदेकमुदाहरणं प्रस्तूयते यत्खलु कवेः वीररसनिर्वाहकेषु कविषु अनन्यतां प्रतिपादयति—

अतिष्ठदंसे सुभटस्य चञ्चलं
शिरः क्षुरप्रेण यदर्धखण्डितम् ।

---

१. विक्र० १५।७४ ।
२. विक्र० १५।७५ ।
३. विक्र० १७।४६ ।

तदेष वामेन विधृत्य पाणिना
प्रधावितः कं न चकार वन्दिनम्[1] ॥

उक्तं बिल्हणकृतं युद्धवर्णनमवलोक्य आस्वादितवीररसाः के ते ये तस्य वन्दिनः न भवेयुरिति वक्ष्यमाणपद्ये वर्णित उत्साहाश्रयो वीरः वीररसाङ्गिकाव्येषु विक्रमाङ्कदेवचरितस्य सार्वभौमं साम्राज्यं संस्थापयतीव—

विपक्षशस्त्रक्षपणैः पुनः पुनः
क्षताखिलग्रन्थि निजास्थिपञ्जरम् ।
चकार चण्डद्युतिमण्डलोदरे
सुखप्रवेशार्थमिवापरो भटः ॥[2]

वक्ष्यमाणपद्ये वर्णितं वीराणामुत्साहस्याकर्षकं रूपमालोक्य सहृदयोऽवश्यमेव क्षणमात्रमात्मानमपि विस्मरिष्यति इति मम अनुभूतिप्रभवो विश्वासः।

अमी विमानेष्वधिरोपितास्त्वया
मुधैव मूर्च्छामुकुलीकृतेक्षणाः ।
अवाप्य संज्ञां कृतफालमुत्सुकाः
पतन्ति पश्य प्रधनाङ्गणे पुनः[3] ॥

उद्धृतैरुदाहरणैर्विक्रमाङ्कदेवचरिते वीररसस्य हृदयग्राहिणी काऽपि अनिर्वचनीया अभिव्यक्तिर्भूतास्तीति प्रमाणीभूतम् । यद्यपि वीररसस्य सर्वेषामेवोदाहरणानामत्रोद्धरणमसम्भवं तथापि उद्धृतैरुदाहरणैः वीररसे बिल्हणस्य रुचिः कौशलञ्चापि सम्यक् स्पष्टीभवति ।

अस्मिन् काव्ये उदाहृतपद्यान्यतिरिच्य रणसज्जारणप्रयाणादिस्थलानि अपि सन्ति येषु वीररसभूमिकायां केवलमुत्साहस्य (स्थायिनः) एव अभिव्यक्तिर्जायते इति तथ्यं स्पष्टयितुं कतिपयानि उदाहरणानि प्रस्तूयन्ते ।

महति क्षितिभर्तुराहवे निकटस्थे कुविकल्पदोलिताम् ।
अकरोज्जयकुञ्जरः स्थितिं स करास्फालनतः स्थिरामिव[4] ॥

---

१. विक्र० १७।४८ ।
२. विक्र० १७।५१ ।
३. विक्र० १७।५६ ।
४. विक्र० १५।१८ ।

मदपानबहुप्रलापिनां भ्रमराणां करविभ्रमैरभूत् ।
रिपुवारणडिण्डिमध्वनि-श्रवणायेव निवारणोन्मुखः[१] ॥

उक्तपद्ययोः रणसज्जावर्णनान्तर्गतहस्तिवर्णनत उदाहृतयोः उत्साहस्थायिभावस्य सुष्ठु चित्रणमस्ति। महाकविना बिल्हणेन उत्साहस्थायिभावस्य सम्यगभिव्यक्तये न केवलं विक्रमस्यैव गजाश्वादीनां वर्णनं कृतम्, अपितु शत्रुपक्षस्यापि गजतुरगादीनां वर्णनेन सोत्साहमुत्साहस्य स्वरूपं समुपस्थापितम् तद्यथा—

दधुरद्रिविघट्टनेषु ये पतितैर्मूर्धनि निर्झरैरिव ।
कलयन्तमतिप्रभूततां कृतधाराजलदुर्दिनं मदम्[२]॥

पद्येऽस्मिन् पर्वतप्रहारेषु शिरसि निपतितैः निर्झरैः धाराजलदुर्दिनमिव दर्शयतां प्रभूतमदानां गजानां वर्णनेऽतुलितोत्साहस्याभिव्यक्तिः सहृदयचेतांसि रञ्जयति । गजोत्साहस्य अतिरम्याणि चित्राणि कविनात्र चित्रितानि बहूनि[३] येषामवलोकनेन उत्साहस्थायिभावाभिनिवेशैर्बिल्हणस्यातिशयप्रावीण्यं प्रागल्भ्यञ्चावगम्यते । उदाहरणार्थमन्यदपि चित्रमेकमुद्ध्रियते—

ननु कस्य निवेश्यतामिदं शिरसि प्राज्यभुजस्य भूभुजः ।
पदमेकमधारयन्निति ध्रुवमुच्चैस्त्रिपदीनिभेन ये[४] ॥

उक्तगजवर्णनेष्विवाश्ववर्णनेषु[५] अपि उत्साहस्य (स्थायिनः) अतीव हृदयग्राहिण्यभिव्यक्तिरत्र काव्ये वरीवर्ति । अश्वानामुत्साहवर्णने कवेरनुपमां शैलीं शंसदिव इदं पद्यं कियदनुपममिति तु अनुभूतिगम्यमेव—

जलराशिनिवेशसङ्कटा जवरोधाय बभूव भूरियम् ।
कविकां दशनैरखण्डयन्निति कोपादिव ये मुहुर्मुहुः[६] ॥

खुरघट्टितवैरिकुट्टिम-स्फुटितैर्वह्निकणैः कदर्थिताः ।
न निघर्षमकार्षुरङ्घ्रिभिश्चटुलैर्ये क्वचिदेव वर्त्मनि[७] ॥

---

१. विक्र० १५।२० ।
२. विक्र० १५।२७ ।
३. विक्र० १५।२६ ।
४. विक्र० १५।२६ ।
५. विक्र० १५।२४-२६, २८, ३० ।
६. विक्र० १५।३१ ।
७. विक्र० १५।३५ ।

उक्तपद्यद्वयं तु दिङ्मात्रमुदाहरणार्थं प्रस्तुतम्, काव्येऽस्मिन्नन्यत्रापि[१] अश्वादिवर्णनप्रसङ्गेषु उत्साहस्थायिभावस्य सफलानुभूतिर्नास्त्यदृश्या।

तृतीये सर्गे विक्रमस्य शैशववर्णनप्रसङ्गेऽपि उत्साहस्थायिभावस्यातिसफलं चित्रणं दृश्यते—

स पीडयन्नायसपञ्जरस्थान् क्रीडापरः केसरिणां किशोरान्।
समाददे भाविरिपुद्विपेन्द्रयुद्धोपयोगीव तदीयशौर्यम्[२] ॥

अत्र हि शिशुना केसरिकिशोरपीडनेनोत्साहस्य सफलानुभूतिर्भवति। शैशववर्णन-प्रसङ्ग एव अभ्यासहेतोः सकलासु दिक्षु पृषत्कान् क्षिपतो नरेन्द्रसूनोश्चित्रमपि उत्साहरागेणैव चित्रितमस्ति—

अभ्यासहेतोः क्षिपतः पृषत्कान्नरेन्द्रसूनोः सकलासु दिक्षु।
प्रहारभीतेव परिभ्रमन्ती पार्थस्य कीर्तिर्विरलीबभूव[३] ॥

तृतीयसर्गे त्रयोविंशतिपद्येषु कुत्रचिदुत्साहः[४] कुत्रचिच्च तज्जन्यवीररसस्य[५] सफलोऽभिनिवेशो दृश्यते।

प्रथमे सर्गे चालुक्यनृपाणामादिपुरुषवर्णनेष्वपि उत्साहस्य विशिष्टं चित्रणं नितरां हृदयग्राहि वर्तते। चालुक्यकुलमूलपुरुषस्य कुलकेन बिल्हणवर्णिते उत्पत्तिवर्णने सर्वत्रोत्साहस्य नितरां समीचीना अभिव्यक्तिः सम्पन्नास्ति। उदाहरणार्थं पद्यद्वयं प्रस्तूयते—

अखर्वगर्वस्मितदन्तुरेण विराजमानोऽधरपल्लवेन।
समुत्थितः क्षीरविपाण्डुराणि पीत्वेव सद्यो द्विषतां यशांसि[६] ॥

कषोपले पौरुषकाञ्चनस्य पङ्क्ते यशःपाण्डुसरोरुहाणाम्।
व्यापारयन्दृष्टिमतिप्रहृष्टामवाप्तपाणिप्रणये कृपाणे[७] ॥

---

१. विक्र० १५।३३-३४, ३६।
२. विक्र० ३।१५।
३. विक्र० ३।१८।
४. विक्र० ३।६०-७४
५. विक्र० ३।७५, ७७।
६. विक्र० १।५०।
७. विक्र० १।५४।

अत्र हि आद्ये पद्ये अखर्वगर्वस्मितदन्तुरेणाधरपल्लवेन द्विषतां यशःपानवर्णनेन, द्वितीये च पाणिप्रणये कृपाणे दृग्व्यापारवर्णनेन उत्साहस्य परिनिष्ठिताभिव्यक्तिर्दृश्यते ।

चालुक्यनृपाणां प्रतापवर्णनात्मकेषु वक्ष्यमाणपद्येषु उत्साहस्य सविग्रहमिव स्वरूपं परिलक्ष्यते—

मीलद्विलासालकपल्लवानि विशीर्णपत्रावलिमण्डनानि ।
मुखानि वैरिप्रमदाजनस्य यद्भूपतीनां जगदुः प्रतापम् ॥

उत्खातविश्वोत्कटकण्टकानां यत्रोदितानां पृथिवीपतीनाम् ।
क्रीडागृहप्राङ्गणलीलयैव बभ्राम कीर्तिर्भुवनत्रयेऽपि ॥

यत्पार्थिवैः शत्रुकठोरकण्ठ-पीठास्थिनिर्लोठनकुण्ठधारः ।
निन्ये कृपाणः पटुतां तदीयकपालशाणोपलपट्टिकासु[1] ॥

रावणस्य प्रतापवर्णनमाध्यमेन कविना काव्यमेतदुत्साहमयं सम्पादितम्[2] । अन्येषामपि तैलप-[3]सत्याश्रय[4]-जयसिंहादीनां[5] वर्णनेषु उत्साहस्य हृदयाह्लादकारकं स्वरूपमनेकत्रात्र काव्ये चकास्ति ।

---

१. विक्र० १।५६-६१ ।

२. निरादरश्चन्द्रशिखामणौ यः प्रीतेऽपि लोकत्रितयैकवीरः ।
क्षिपन्कृपाणं दशमेऽपि मूर्ध्नि स्वयं धृतः क्ष्माधरराजपुत्र्या ॥
विक्र १।६२ ।

३. श्रीतैलपो नाम नृपः प्रतापी क्रमेण तद्वंशविशेषकोऽभूत् ।
क्षणेन यः शोणितपङ्कशेषं संख्ये द्विषां वीररसञ्चकार ॥
विक्र० १।६८ ।

४. चालुक्यवंशामलमौक्तिकश्रीः सत्याश्रयोऽभूदथ भूमिपालः ।
खड्गेन यस्य भ्रुकुटिक्रुधेव द्विषां कपालान्यपि चूर्णितानि ॥
विक्र० १।७४ ।

५. प्राप्तस्ततः श्रीजयसिंहदेवश्चालुक्यसिंहासनमण्डनत्वम् ।
यस्य व्यराजन्त गजाहवेषु मुक्ताफलानीव करे यशांसि ॥
विक्र० १।७६ ।

३-५क्रमाङ्कसन्दर्भे विक्रमाङ्कदेवचरितस्य १।६६-७१, १।७५-७७, १।८० आदीनि पद्यान्यपि अवलोकनीयानि ।

काव्येऽस्मिन् विविधस्थलेषु राज्ञां पराक्रमवर्णनैः उत्साहस्य सफलचित्रणं सञ्जातमस्ति । आहवमल्लस्य पराक्रमवर्णनं द्वात्रिंशद्भिः[1] पद्यैर्वर्णितमवलोक्यते । सर्वाणीमानि पद्यानि तत्साहसस्याश्रयस्थलानीव विराजन्ते तेषु कानिचन उदाहरणार्थं प्रस्तूयन्ते—

ध्रुवं रणे यस्य जयामृतेन क्षीबः क्षमाभर्तुरभूत्कृपाणः ।
एका गृहीता यदनेन धारा धारासहस्रं यशसोऽवकीर्णम् ॥
निःशेषनिर्वासितराजहंसः खड्गेन बालाम्बुदमेचकेन ।
भोजक्षमाभृद्भुजपञ्जरेऽपि यः कीर्तिहंसीं विरसीचकार[2] ॥

उक्तपद्ययोः भोजक्ष्माभृद्भुजपञ्जरस्थायाः कीर्तिहंस्या विरसीकरणवर्णनेन काव्यस्य सरसत्वं सङ्गच्छते । अन्यच्च—

दहत्यशेषं प्रतियोगिवर्गमनर्गले यद्भुजशौर्यवह्नौ ।
प्रत्यर्थिपृथ्वीपतिचिन्त्यमानो न कोऽपि मन्त्रः प्रतिबन्धकोऽभूत् ॥
रत्नोत्करग्राहिषु यद्भटेषु तटत्रुटन्मौक्तिकशुक्तिभङ्ग्या ।
अस्फोटयत्तीरशिलातलेषु रोषेण मूर्धानमिवाम्बुराशिः[3] ॥

अत्र हि आद्ये अनर्गलशौर्यवह्नौ प्रतियोगि-वर्गस्य दहनवर्णनेन, द्वितीये च समुद्रस्य रत्नग्रहणादिभिर्भटानामुद्भटत्ववर्णनेन स्थायिन उत्साहस्य प्रभावशालिप्रयोगेण बिल्हणस्य वैलक्षण्यं द्योत्यते ।

चतुर्थे सर्गे च विक्रमदिग्विजयवर्णनेन काव्यं वीररसान्वितं विधातुं बिल्हणप्रयासः सुतरां सफलोऽस्ति । अत्र हि तस्य गजैः भिन्नानां मलयद्रुमाणां[4] वर्णनेन, वार्धितीरे शयानानामुरगाणां तद्विपैक्षोदवर्णनेन,[5] केरलभूपालकीलालेन पयोनिधेः कलुषीकरणस्य वर्णनेन,[6] सिंहलभूपशरणागमनवर्णनेन,[7] द्रविडीगण्डफलके विक्रमकृतपाण्डिमाया वर्णनेन,[8] लोललाङ्गूलदण्डानां सिंहानां चोलान्तः-

१. विक्र० १।८७-११८ ।
२. विक्र० १।९६, ९३ ।
३. विक्र० १।११७, १०८ ।
४. विक्र० ४।२-४, ६ ।
५. विक्र० ४।१२ ।
६. विक्र० ४।१८ ।
७. विक्र० ४।२० ।
८. विक्र० ४।२२ ।

पुरद्वाररक्षासमर्पणवर्णनेन,[1] पलायितस्य द्रविडेशस्य सङ्कटाद्रिदरीद्वारप्रवेशे चिन्तया देहदौर्बल्यस्य बहुमानवर्णनेन,[2] वेङ्गिभूपाङ्गनानामनङ्गप्रतापानास्पदत्ववर्णनेन,[3] आक्रान्तरिपुचक्रेण विक्रमेण त्यक्तानां चक्रकोटनृपतेः चित्रशालासु स्थितानां दन्तिनां वर्णनेन[4] च वीररसस्य पृष्ठभूमौ स्थायिन उत्साहस्य सफलया अभिव्यक्त्या बिल्हणोऽतीव प्रशंसायाः पात्रमिति न सन्दिग्धम् ।

शृङ्गाररसः—

वीररसानन्तरं विक्रमाङ्कदेवचरिते शृङ्गाररसस्य द्वितीयं स्थानमस्ति । वीररसस्येव मनःसंवेदनशीला अभिव्यक्तिः शृङ्गारस्यापि अत्र वर्तते इति नास्ति सन्दिग्धम् । शृङ्गारलक्षणं साहित्यदर्पणे यथा—

शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।
उत्तमप्रकृतिः प्रायो रसः शृङ्गार उच्यते ॥

नायिकानायकयोरुद्दीपकाः प्रेमालापाः, मण्डनम्, ऋतुवर्णनम्, वनोपवनानि, जलविहाराः, चन्द्रादयश्च शृङ्गाररसस्यालम्बनविभावाः, भ्रुकुटिभङ्गादयोऽनुभावाः, रतिश्च स्थायिभावोऽस्ति, उग्रता-जुगुप्सा-मरणालस्यादीन् परित्यज्य अन्ये असूयाधृत्यादयः भावा अस्य सञ्चारिणः सन्ति । एवञ्च नायिकानायकयोः प्रेम एव घनीभूय रतिमापद्यते । रतेर्लक्षणम्—

'रतिर्मनोऽनुकूलेऽर्थे मनसः प्रवणायितम्'

उक्तविभावानुभावसञ्चारिणां संयोगे रतिस्थायिभावः शृङ्गाररसे परिणमति । शृङ्गाररसनिष्पत्तौ बिल्हणोऽतीव साफल्यमधिजगाम इति सर्वैः स्वीक्रियते ।

---

१. चोलान्तःपुरगेहेषु सिंहानां तस्य बाहुना ।
लोललाङ्गूलदण्डानां द्वाररक्षा समर्पिता ॥ विक्र० ४।२५

२. चिन्तया दुर्बलं देहं द्रविडो यत्पलायितः ।
सङ्कटाद्रिदरीद्वारप्रवेशे बह्वमन्यत ॥
विक्र० ४।२६ ।

३. तेनानास्पदमात्मीयप्रतापोत्कर्षरागिणा ।
चक्रेऽनङ्गप्रतापस्य वेङ्गिभूपाङ्गनाजनः ।
विक्र० ४।२९ ।

४. आक्रान्तरिपुचक्रेण चक्रकोटपतेः परम् ।
लिखिताश्चित्रशालासु तेनामुच्यन्त दन्तिनः ॥
विक्र० ४।३० ।

विक्रमाङ्कदेवचरिते शृङ्गाररससमीक्षणेन तु उक्ततथ्यं सम्यक् पुष्टं भवति। अस्मिन्काव्ये स्थले स्थले शृङ्गाररसस्य विचित्रानुभूतिर्भवति सहृदयानाम्। बिल्हणस्य शृङ्गारे कालिदासस्य प्रभावे सत्यपि तस्य मौलिकत्वं सुरक्षितमेव वर्तते, यतो हि बिल्हणः सर्वमपि पूर्ववर्तिनां दायमात्मसात्कर्तुं क्षमोऽस्ति।

प्रेम एव रतिभावे परिणमति, अतः प्रेमविषये अस्ति किञ्चिद् विचारणीयम्। एकविधं प्रेम रामायणे सीतारामयोर्वर्णितं वर्तते, तद्धि सात्त्विकं सर्वोत्कृष्टञ्च वर्तते। इदं किल सुखदुःखयोरद्वैतं भवति। द्वितीयविधं किल अभिज्ञानशाकुन्तले वर्णितं शकुन्तलादुष्यन्तयोर्वर्तते, इति तु गान्धर्वविवाहादिषु अवलोक्यते। तृतीयविधं प्रेम राज्ञां विलासेषु अवलोक्यते। चतुर्थविधञ्च गुणश्रवणचित्रदर्शनस्वप्नदर्शनादिभिर्जायते[1]। विक्रमाङ्कदेवचरिते तृतीयचतुर्थविधञ्च प्रेम दृश्यते। प्रथमविधस्य च नितरामभावोऽस्ति।

अस्मिन् काव्ये शृङ्गारस्य विप्रलम्भसम्भोगयोर्द्वयोर्भेदयोश्चित्रणमस्ति।

विप्रलम्भशृङ्गारः—

विप्रलम्भशृङ्गारोऽभिलाषविरहेर्ष्या-प्रवास-शापहेतुभिः पञ्चविधो भवति[2]। विक्रमाङ्कदेवचरिते विप्रलम्भोऽभिलाषहेतुको वर्तते। अत्र हि परस्परं गुणरूपश्रवणादिजन्यः पूर्वानुरागः चन्दलाविक्रमाङ्कदेवयोः अन्योन्याप्राप्तेर्दशायां विप्रलम्भत्वं प्राप्तोऽस्ति। एतादृशस्य विप्रलम्भस्य बहूनि उदाहरणानि अत्र विद्यन्ते। अष्टमसर्गे चन्दलारूपवर्णनोपसंहारे एव कविना सा नृपतेः मानसमाविवेश इति प्रत्यपादि[3]। तदनन्तरं कविना उत्तरोत्तरं राज्ञः विरहदशाया वर्णनप्रसङ्गेषु विप्रलम्भशृङ्गारस्यातीव मार्मिकं चित्रणं कृतमस्ति। वक्ष्यमाणपद्ये चन्दलाविरहदशायां शनैः शनैः पाण्डिमानमासादयतो नायकस्य वर्णनं विप्रलम्भशृङ्गारान्तर्गतमस्ति। तद्यथा—

निजप्रभानिह्नुतचन्द्रभासा प्रभातलक्ष्म्येव परिस्फुरन्त्या।
तया समानीयत पाण्डिमानं चालुक्यभूपालकुलप्रदीपः[4]॥

---

१. नैषधपरिशीलन, पृ० १६५-१६६।

२. अपरस्तु अभिलाष-विरहेर्ष्या-प्रवास-शापहेतुक इति पञ्चविधः। काव्यप्रकाशः ३।४ :

३. विक्र० ९।१।

४. विक्र० ९।६।

चन्द्रलेखाया विरहेण पीडितस्य विक्रमस्य प्रतिदिनं विरहपीडया अद्भुतैव स्थितिर्बभूव। दिने कामोद्दीपकानि वस्तूनि अवलोकयन् रात्रिम्, रात्रौ च चन्द्रादीन् कामोद्दीपकानवलोक्य दिनं प्रशंसति स्म—

गृह्णन् गुणानह्नि विभावरीणां दिनप्रशंसां विदधन्निशासु।
क्रमादसौ तां क्षितिमाचकाङ्क्ष यत्र द्वयं नास्ति दिनं निशा च[1]।

वक्ष्यमाणपद्ये पराङ्मुखत्वमापन्नो रतिस्थायिभावो विप्रलम्भरूपे परिणम्य सहृदयास्वाद्यतामापन्नोऽस्ति—

जाते धरित्रीतिलके चिरेण प्रकोपपात्रे मकरध्वजस्य।
प्रकाशयन्तीव पतिव्रतात्वं पराङ्मुखी तत्र रतिर्बभूव[2]॥

चन्दलासक्तमनसो विक्रमस्य अन्याङ्गनासु रुचिः संक्षयमाप[3]। तस्य हृदि वसन्त्याश्चन्दलाया नितम्बबिम्बस्य प्रकामविस्तरवशादन्या उत्तमनायिकापि तत्रावकाशमाप्तुं न शशाक[4]। यथा यथा विरहपीडया राजा कृशो बभूव तथा तथैव तन्मनसि मदनस्य पराक्रमः प्रभावशाली बभूव—

यथा यथा निःश्वसति स्म राजा निरङ्कुशं कार्श्यमदर्शयच्च।
तथा तथा जागरयन्धनुर्ज्यां भेजे जयास्थां भगवाननङ्गः[5]॥

उक्तपद्ये विप्रलम्भशृङ्गारस्य सुष्ठु परिणतिः परिलक्ष्यते।

वियोगविह्वलस्य विक्रमस्य स्थितिवर्णनेषु विप्रलम्भशृङ्गारस्य हृदयग्राहि रूपं वरीवर्तते। वक्ष्यमाणपद्ये वियोगाक्रान्तस्य तस्य स्थितिवर्णने विप्रलम्भः—

ताडीदले कर्णपरिच्युतेऽपि कन्दर्पलेखभ्रममाससाद।
उत्तंसमागच्छति षट्पदेऽपि प्रत्याशया कर्णमदत्त देवः[6]॥

वक्ष्यमाणपद्येऽपि विप्रलम्भशृङ्गारः हृदयसंवेद्योऽस्ति—

आकाशगर्भां गिरमाचकाङ्क्ष विलोकयामास विलासभित्तीः।
तदीयवार्ताश्रवणाभिलाषात् कुत्रार्थितां प्राप न पार्थिवेन्द्रः[7]॥

---

१. विक्र० ९।४।
२. विक्र० ९।१०।
३. विक्र० ९।११।
४. विक्र० ९।१३।
५. विक्र० ९।९।
६. विक्र० ९।१४।
७. विक्र० ९।१५।

अदृष्टायां चन्दलायां विक्रमस्यानुरक्तिकारणं प्रतिपादयता कविना शृङ्गार-रसस्य अतिरम्यं स्वरूपं प्रादुर्भावितम् । तद्यथा—

सा कीदृशीति क्षितिवल्लभस्य कुतूहलेनोत्तरलीकृतस्य ।
आलिख्य चेतःफलके मनोभूरदर्शयत्सायकतूलिकाभिः ॥
प्रारम्भि रम्भाललितोरुकान्तेरुपायनीकृत्य मुखं प्रियायाः ।
सेवा सहेवाकविलोचनस्य पृथ्वीभुजङ्गस्य दिगङ्गनाभिः[1] ॥

प्रतिपादितयोः पद्ययोः प्रियायाः काल्पनिकमुखावलोकनेषु विप्रलम्भत्वम् । विप्रलम्भे कियत् कौशलं कविर्धत्ते इति वक्ष्यमाणपद्ये स्पष्टयतः—

मौनग्रहे तस्य परिग्रहेण चित्रार्पितेनेव भियाऽवतस्थे ।
लीलाशुकानामपि शङ्कितानां न निर्ययुः कण्ठतटाद्वचांसि ॥
निरीक्षमाणः सरसोक्तिदक्षां दूतीमसौ वारपुरन्ध्रिमध्ये ।
मौखर्यचर्यामपि मेखलासु महान्तमुद्भावयति स्म दोषम्[2] ॥

अत्र हि आद्ये पद्ये राज्ञो मौनग्रहे परिग्रहाणां भिया चित्रार्पणवर्णनेन शङ्कितानां लीलाशुकानामपि कण्ठतटे वचसामवरोधवर्णनेन, द्वितीये च मेखलानां मौखर्य-चर्यास्वपि दोषोद्भावस्य वर्णनेन कविना विप्रलम्भ उत्कर्षं प्रापितः ।

वक्ष्यमाणपद्ययोः विप्रलम्भस्य अतीव हृदयसंवेद्यं चित्रणमस्ति कविना कृतम्—

अचिन्तनीयं तुहिनद्रवाणां श्रीखण्डवापीपयसामसाध्यम् ।
असूत्रयत्पत्रिषु पारसीकतैलाग्निमेतस्य कृते मनोभूः ॥
श्रान्ते च निद्रालसलोचने च शून्ये च पञ्चेषुरिषून्विमुञ्चन् ।
न तत्र चित्रं गणयाम्बभूव क्षत्रव्रतस्य क्षतिमेकवीरः[3] ॥

अत्र हि आद्ये तुहिनद्रवाणामचिन्तनीयं श्रीखण्डवापीपयसामसाध्यं पारसीकतैला-ग्निं पत्रिषु सूत्रयित्वा मनोभुवा राजनि प्रहारः, द्वितीये च श्रान्ते शून्ये निद्रा-लसलोचने च तस्मिन् पराक्रमः चरमोत्कर्षकः विप्रलम्भस्य वर्तते ।

चन्द्रलेखाविरहे विरहिणश्चित्रणेषु सर्वत्र विप्रलम्भशृङ्गारस्य काप्यवर्ण-नीयाभिव्यक्तिः सञ्जायते सहृदयानामिति समर्थयितुमुदाहरणद्वयं प्रस्तूयते—

---

१. विक्र० ६।१६-१७ ।
२. विक्र० ६।१८-१९ ।
३. विक्र० ६।२०-२१ ।

लग्नामिवाङ्गे लिखितामिवाग्रे चक्रभ्रमेणेव परिभ्रमन्तीम् ।
क्षपासु लब्धक्षणमात्रनिद्रस्तामेव राजीवमुखीं ददर्श ॥
चन्द्रातपाच्चन्दनपङ्कवापीं ततस्तमस्मादपि तां जगाम ।
तस्येति बह्वचः स्मरतापितस्य गतागतैरेव गतास्त्रियामाः[१] ॥

अत्र हि आद्ये प्रियायाश्चक्रभ्रमणेव परिभ्रमणवर्णनम्, द्वितीये गतागतैरेव यामायापनवर्णनञ्च प्रतिपाद्य विप्रलम्भे किमपि वैलक्षण्यमातनुतः । नायिकाश्रितो विप्रलम्भोऽपि महनीयमाह्लादकत्वं संदधात्यत्र काव्ये । इमान्यत्रोदाहरणानि—

अपारमापूरयता पृषत्कैस्तनिम्नि मग्नं वपुरुत्पलाक्ष्याः ।
लक्ष्येषु लब्धः कुसुमायुधेन बालाग्रसूक्ष्मेषु परः प्रकर्षः ॥
तथा गता चम्पकदामगौरी शरीरयष्टिः कृशतां कृशाङ्ग्याः ।
यथा गलच्चापमनोरथोऽस्यां मौर्वी लतास्थां मदनः करोति ॥
दूरं गता कार्मुककर्मवार्ता तस्यास्तनुं तन्तुकृशां वहन्त्याः ।
नितान्तमप्राणतया मृगाक्षी शिञ्जाऽपि जाता न मनोभवस्य[२] ॥

इमानि त्रीणि अपि पद्यानि विप्रलम्भस्य आदर्शोदाहरणानि भवितुमर्हन्ति । नायकेन विना नायिका आत्मन्यपि अवज्ञां प्रकटयति इति भावे बिल्हणवर्णनशक्त्या विप्रलम्भस्य स्वस्थं स्वरूपं समुपस्थापितम् सहृदयानामग्रतः । तद्यथा—

नूनं स्मरः सौगतदर्शनोत्थं रहस्यमस्याः कथयाम्बभूव ।
त्वया विना व्यर्थमनोरथा यदात्मन्यवज्ञां प्रकटीकरोति[३] ॥

वक्ष्यमाणपद्ये शरीरदौर्बल्यं विप्रलम्भशृङ्गारः हृदयसंवेद्य इति प्रमाणयति—

प्राप्ता तथा तानवमङ्गयष्टिस्त्वद्विप्रयोगेन कुरङ्गदृष्टेः ।
धत्ते गृहस्तम्भनिर्वर्तितेन कम्पं यथा श्वाससमीरणेन ॥[४]

इदानीं स्वीयकल्पनाशक्त्या विप्रलम्भे हृदयग्राह्यत्वमाधातुं कविः कियत्साफल्यमापेत्युदाहरणेन प्रतिपाद्यते—

शीतांशुबिम्बप्रतिबिम्बभङ्ग्या कुरङ्गदृष्टेः कुचकुम्भपीठे ।
स्मरानलद्रावितहारदाम मुक्ताफलानामिव पिण्डमासीत् ॥[५]

---

१. विक्र० ६।२३-२४ ।
२. विक्र० २६।२६-३०, ३२ ।
३. विक्र० ६।३१ ।
४. विक्र० ६।३३ ।
५. विक्र० ६।३४ ।

अत्र हि शीतांशुबिम्बप्रतिबिम्बव्याजेन स्मरानलद्रावितहारदाममुक्ताफलानां पिण्डमासीदिति कल्पनया विप्रलम्भोऽत्र अतीव हृदयग्राही वर्तते। वक्ष्यमाण-पद्येऽपि विप्रलम्भस्य हृदयग्राह्यत्वं नितरां प्रशस्यमस्ति। तद्यथा—

वातायनाद् गच्छति चित्रवेश्म तस्माद्वनान्तं वलभीं ततोऽपि।
एकत्र न क्वापि पदं करोति सा मन्मथास्कन्दविशङ्कितेव[1]॥

इति पूर्वरागहेतुकः विप्रलम्भः प्रतिपादितः। काव्येऽत्र वसन्तवर्षादिवर्णनप्रसङ्गे विरहिणीनामुक्तिषु प्रवासादिविप्रलम्भोऽप्यत्र काव्ये पूर्णरूपेण सहृदयाह्लादन-क्षमोऽस्ति। वसन्तवर्णनान्तर्गतविरहिणीविलापेषु विप्रलम्भो यथा—

त्वं चैत्र मित्रं यदि मन्मथस्य तस्मिन्ननङ्गे कथमक्षताङ्गः।
ज्ञातं तवान्तर्गतमागतोऽसि मिषेण नाशाय वियोगिनीनाम्॥
नूनं महापातकिनं वितर्क्य वियोगिवर्गक्षयदीक्षितं त्वाम्।
पस्पर्श न त्र्यम्बकनेत्रवह्निः पापैरखण्डैः प्रियखण्डितानाम्[2]॥
इत्थं वियोगज्वरजर्जराणामुद्वेजितानां मधुमासलक्ष्म्या।
आसन्मुहुः पक्ष्मललोचनानां चैत्रे विचित्रोक्तिविचेष्टितानि[3]॥

वक्ष्यमाणपद्ययोरपि वियोगिवर्गस्य विरहावस्थावर्णनेषु विप्रलम्भस्य मनो-हारिता महती हृदयसंवेद्याऽस्ति। तद्यथा—

सर्वं दिनं भूमिगृहेषु तिष्ठद् बाधिर्ययोगं मुहुराचकाङ्क्ष।
पिकाङ्गनापञ्चमपीड्यमानश्चकार किं किं न वियोगिवर्गः॥
अहो मतिभ्रंशमनङ्गबन्धुश्चकार चैत्रः प्रियखण्डितानाम्।
चक्रुर्यदाक्रन्दपरम्पराभिः संवर्धनं कोकिलकूजितानाम्[4]॥

चन्द्रवर्णने विप्रलम्भो यथा—

क्षिप्यतां क्वचन चन्दनपाण्डुश्चन्द्रिकारसभरः कलशीभिः।
उचुरित्थमबलाप्रियहीनाः पादयोरपि निपत्य सखीनाम्[5]॥

वक्ष्यमाणपद्ये चक्रवाकविरहसम्बन्धिविप्रलम्भवर्णने अहो बिल्हणकौशलम्—

---

१. विक्र० ९।३५।
२. विक्र० ७।५६-५७।
३. विक्र० ७।६१।
४. विक्र० १०।१५-१६।
५. विक्र० ११।४२।

क्रन्दति स्म न विवेद मृणालीं चञ्चुसम्पुटगतां लुठति स्म ।
वल्लभाविरहहालहलेन व्याकुलः किमकरोन्न रथाङ्गः[1] ॥

वर्षावर्णनव्याजेन अपि बिल्हणेन विप्रलम्भः सचेतसामास्वाद्यतां बहुत्रानीतः[2] । दिङ्मात्रमुदाह्रियते—

पयोद यासां भवतोऽपि दर्शनान्न वल्लभः संघटते मृगीदृशाम् ।
न ताः क्रियन्ते गणनासु दुर्भगाः करोति कश्चित्रमजातभित्तिषु[3] ॥

अत्र हि विप्रलम्भस्यान्तिमावस्थाया वर्णनेन विप्रलम्भस्य चरमोत्कृष्टं रूपं लक्ष्यते।

सम्भोगश्रृङ्गारः—

विक्रमाङ्कदेवचरिते सम्भोगश्रृङ्गारस्य उपक्रमः चन्दलायाः स्वयंवरमण्डपे चन्दलाविक्रमयोः परस्परविलोकनेनैव जायते—

इयं मयि न्यस्यति नेत्रमालां मुहुः सखीनां किमपि ब्रुवाणा ।
सत्यैव साभूदनुरागवार्ता चिरात्प्रसन्नो भगवाननङ्गः ॥
जघान पादेन सखीं सखेलमाकृष्य हारं मुहुरामुमोच ।
सा दर्शने कुन्तलपार्थिवस्य न कारिता किं मकरध्वजेन[4] ॥

अत्र हि आद्ये विक्रमस्य रतिस्थायिभावः श्रृङ्गारतामापन्नः, द्वितीये च चन्दलादेव्याः । चन्दलादेव्या राजमानसारोहणे नवोढाव्रतोत्सर्गेऽपि सम्भोगश्रृङ्गारस्य हृदयहारिणी अभिव्यक्तिर्भवति इति पद्ये प्रमाणयतः—

सा सन्नताङ्गी शनकैः प्रियस्य तथा गुणैर्मानसमारुरोह ।
तदेकवश्यं स्मरशासनेन यथा तदन्याभिरहार्यमासीत् ॥
सा तत्र शीघ्रं विविधोपचार-प्रौढे नवोढाव्रतमुत्ससर्ज ।
अकौशलं पत्युरिदं चिरेण विश्वासमायाति नवा वधूर्यत्[5] ॥

---

१. विक्र० ११।६ ।
२. विक्र० १३।५६-७३ ।
३. विक्र० १३।७४ ।
४. विक्र० ६।७३-७४ ।
५. विक्र० १०।५-६

उपवनविहारप्रसङ्गे सर्वत्र शृङ्गाररसप्रवाह इव वहन् दरीदृश्यते । दिङ्मात्रमुदाह्रियते—

आनम्यमाना लतिका रजोभिः पौष्पैर्दृशो पूरयति स्म देव्याः ।
अन्या नृपालिङ्गनमाससाद भाग्येषु नास्ति प्रतिषेधमार्गः [1]॥
नृपेण काचिद् विहितावतंसा तृणाय नामन्यत काञ्चिदन्याम् ।
स्त्रीणां हि सौभाग्यमदप्रसूतिः प्रियप्रसादो मदिरासहस्रम् [2] ॥

अत्र हि एकत्र आलिङ्गनेन अन्यत्र अवतंसविधानेन नायिकानायकयोः रतिः शृङ्गारतामुपैति ।

वक्ष्यमाणपद्ये नायिकानामंशुकपरिवर्तनमालोकयतो राज्ञः रतिः शृङ्गारतामापद्य सहृदयहृदयानि आनन्दमयानीव विधत्ते—

अथांशुकानां परिवर्तनेन तासां वपुर्मण्डनकर्मणा च ।
निश्चित्य पञ्चेषुरकुण्ठभावं देवे पुनः कार्मुकमाचकर्ष [3] ॥

क्रीडाच्छलेन सपत्न्याः नयने पुष्पपरागपूर्णे विधाय प्रियचुम्बनपात्रमापन्नाया नायिकाया वर्णनेन शृङ्गाररसे बिल्हणस्य कौशलमतीव प्रशस्यम् । तद्यथा—

विधाय काचिन्नयने सपत्न्याः क्रीडाच्छलात्पुष्पपरागपूर्णे ।
पात्रत्वमाप प्रियचुम्बनस्य किमस्ति वैदग्ध्यवतामसाध्यम् [4] ॥

वक्ष्यमाणपद्ये लतानिकुञ्जात्कपिना कृष्टांशुकायाः कस्याश्चित्प्रियेणालिङ्गनं रतिं शृङ्गारतां प्रापयति—

कृष्टांशुका कापि नरेन्द्रवामा लतानिकुञ्जात् कपिना सकोपम् ।
धूर्ता पलाय्य प्रियमालिलिङ्ग कोपं न चाप प्रतिसुन्दरीभ्यः [5] ॥
बबन्ध धम्मिल्लमधीरदृष्टेः क्ष्मानायकश्चम्पकमालिकाभिः ।
चित्तेषु मन्युः स्थिरतामवाप विपक्षसारङ्गविलोचनानाम् [6] ॥

---

१. विक्र० १०।४१ ।
२. विक्र० १०।५२ ।
३. विक्र० १०।६० ।
४. विक्र० १०।४६ ।
५. विक्र० १०।५४ ।
६. विक्र० १०।५६ ।

अत्र हि नायकेन नायिकाया धमिल्लबन्धनवर्णनेषु नायिकानायकगतः शृङ्गारो रस एव आनन्दमय आस्ते। एतादृशेषु बहुषु पद्येषु[1] शृङ्गाररसस्य सम्यगनुभूतिर्जायते सहृदयानामिति न शङ्कास्पदम्।

पानकेलिमनुभाव्य नायिकानां मदजनितां विभूतिं प्रेक्ष्य चन्दलदेव्या सह तल्पसद्मनि विक्रमस्य गमनेनैवात्र न शृङ्गारस्य पूर्णपरिपाकप्रारम्भो भवति—

पानकेलिमनुभाव्य विभूतिं प्रेक्ष्य पक्ष्मलदृशां मदनोत्थाम्।
तल्पसद्मनि जगाम स सार्धं कुन्तलेन्दुरथ चन्दलदेव्या[2] ॥

तल्पसद्मनि कामकेलिवर्णनेषु तयोः रतिस्थायी शृङ्गाररसस्य चरमसीमानं प्राप्तोऽस्ति। यथा—

आयुषे भवति यत्कुसुमेषोर्येन यौवनतरुः फलदायी।
किञ्च रागजलधेरमृतं यत् तत्र तन्नृपतिराचमति स्म[3] ॥

वक्ष्यमाणपद्ये चन्दलाविक्रमयोः प्रीतिस्तुलायां तुलिताऽपि समानाऽभवदिति वर्णनेन शृङ्गाररसोऽत्र अनिर्वचनीय इति द्योत्यते—

केलिधामनि न तयोः परिमातुं शक्यते स्म मुखविभ्रमलक्ष्मीः।
प्रीतिराविरभवत्तु समाना कामकार्मुकतुलातुलितेव[4] ॥

कामकेलिवर्णनेषु बिल्हणेन शृङ्गारस्य स्थूलरूपं समुपस्थापितमस्ति। वक्ष्यमाणपद्ययोरपि बिल्हणस्य स्थूलशृङ्गारपरिचयो लभ्यते—

तौ परस्परविलोकनलीला-सान्द्रकौतुकरसौ परिचिन्त्य।
मुद्रितेक्षणपुटौ न मुहूर्तं निद्रयापि सकुतूहलयेव ॥
ज्ञातुमद्भुतविलासनिधाने प्रेम्णि साम्यमिव जातगरिम्णि।
केलिधामनि तयोः शतवारं क्षिप्तवान्मनसि मानमनङ्गः[5] ॥

अत्र हि प्रेम्णः गरिम्णोपेतं सान्द्रञ्च रूपं परिलक्ष्यते।

द्वादशे सर्गे प्रियाकवरीसंस्करणेषु[6] वराङ्गनाकुचस्थलेषु च निदाघनिरा-

---

१. विक्र० १०।२१-२२, २६-४१, ५५-६२, ७०, ७८, ८१-८९।
२. विक्र० ११।६८।
३. विक्र० ११।६९।
४. विक्र० ११।७०।
५. विक्र० ११।७१-७२।
६. विक्र० १२।४६।

करणपाण्डित्ये[1] कामिनीभिः सह दीर्घिकासु रमणे[2] जलयन्त्रादिभिः[3] क्रीडासु च शृङ्गाररसस्यानुभूतिः सुस्पष्टैवास्ति ।

वर्षावर्णनेऽपि शृङ्गाररसः सम्यगाविर्भूतोऽवलोक्यते काव्येऽस्मिन् । दिङ्मात्रमुदाह्रियते—

परस्परश्वाससमीरघट्टनत्रुटत्कपोलस्थलघर्मबिन्दुभिः ।
अपि प्रदोषावसरे विलासिभिः करम्बितान्योऽन्यभुजैरसुप्यत[4] ॥

शृङ्गाररससञ्चारिणामपि अतीव सफलं चित्रणमत्र दृष्टिपथमवतरति । यथा वक्ष्यमाणपद्ये रोमाञ्चस्य—

गतायुषि ग्रीष्ममहोष्मडम्बरे दिनेऽपि चञ्चत्पुलकैर्विलासिभिः ।
कुचस्थलीचन्दनलेपपङ्किल-प्रियाङ्कपालीसुखमन्वभूयत[5] ॥

चिन्तायाः—

असौ भवित्री सुभगा नतभ्रूः करिष्यते पञ्चशरः प्रसादम् ।
आन्दोलितोऽभूदिति चिन्तयासौ त्रैलोक्यचिन्ताहरणक्षमोऽपि ॥

लज्जायाः—

मुखेन लज्जाभिनयप्रगल्भा लीलालवन्यञ्चितकन्धरेण ।
प्रत्यादिशन्तीव दिवि स्फुरन्तमनेकदोषोपहतं मृगाङ्कम् ॥
एकां भ्रुवं विभ्रमराजधानीं सलीलमर्धोन्नमितां दधानः ।
प्रतारकस्याखिलपार्थिवानां संतर्जनायेव मनोभवस्य[6] ॥

शृङ्गाररसाभासः—

चन्दलादेवीविक्रमयोः परस्परं रतिस्तु शृङ्गारो रसः, परं स्वयंवरागतानां राज्ञां विविधाः शृङ्गारचेष्टाः[7] रसाभास एव । अनुभयनिष्ठत्वात्प्रतिनायकनिष्ठत्वाच्च । एवञ्च पौराङ्गनानां राजानं प्रति रतिभावोऽपि रसाभास-

---

१. विक्र० १२।५६ ।
२. विक्र० १२।६१ ।
३. विक्र० १२।६२-६६ ।
४. विक्र० १३।१३ ।
५. विक्र० १३।१२ ।
६. विक्र० ९।५३-५४ ।
७. विक्र० ९।७५ ।
८. विक्र० ६।११ ।

मात्रम् । दोलाविलासेषु केरलमारुतेन अङ्गनानां वक्त्रचुम्बनम्, नितम्बबिम्बे विश्रमः[1] रसाभासमात्रम्। चैत्रस्यापि लताप्रसूनांशुकाकर्षणं[2] रसाभासमात्रम् ।

वत्सलरसः—

वत्सलरसस्य चित्रणमपि अस्मिन् काव्ये महद्रम्यं वर्तते। शिशोः विक्रमस्य बाल्यक्रीडासु पितुः आहवमल्लस्य वात्सल्यमत्र वत्सलरसत्वमापन्नमस्ति । यथा—

धात्रेयिकायाः स्मितपूर्वकं यददत्त हुङ्कारमसौ कुमारः ।
अपूरयत्तेन नृपस्य कर्णौ पीयूषगण्डूषपरम्पराभिः ॥

एवञ्च

यदुत्थितः सोऽङ्गुलिसङ्ग्रहेण यत्किञ्चिदव्यक्तमवोचतापि ।
अभीक्ष्णमक्ष्णोः श्रवसोश्च तेन क्षमापतेः संवननं बभूव[3] ॥

धूलिपरिधूसराङ्गः सूनुः नरेश्वरस्याङ्कमारुह्य निजाङ्गतः सङ्गलितैः परागैर्मनः-कार्मणचूर्णयोगं चक्रे इति भावस्य वर्णने वत्सलरसस्य सम्यगभिव्यञ्जनं वर्तते । तद्यथा—

उत्सङ्गमारुह्य नरेश्वरस्य स पांसुलीलापरिधूसराङ्गः ।
निजाङ्गतः सङ्गलितैः परागैश्चक्रे मनः कार्मणचूर्णयोगम्[4] ॥

प्रतिक्षणं पुत्रमुखचुम्बनेन आहवमल्लस्य चेतो रागपूर्णमभवदिति वर्णनेषु[5] वत्सलरसस्य सम्यगभिव्यक्तिर्दृष्टिपथमवतरति । यथा—

प्रतिक्षणं कुन्तलपार्थिवस्य वितन्वतस्तन्मुखचुम्बनानि ।
तदीयदन्तच्छदजन्मनेव रागेण चेतः परिपूर्णमासीत्[6] ॥

चतुर्थे सर्गे दाहज्वरपीडितस्य राज्ञः पुत्राङ्कपालीपीयूषाकाङ्क्षया वत्सलरसस्य सम्यगनुभूतिर्भवति । इदमत्रोदाहरणम्—

अपरिश्रान्तसन्तापचन्दनालेपनेन सः ।
त्वदङ्कपालीपीयूषमाचकाङ्क्ष पुनः पुनः[7] ॥

---

१. विक्र० ७।२६ ।
२. विक्र० ७।३७ ।
३. विक्र० ३।७-८ ।
४. विक्र० ३।१० ।
५. विक्र० ३।११ ।
६. विक्र० ३।१२ ।
७. विक्र० ४।४७ ।

करुणरसः—

चतुर्थे सर्गे दूतमुखादाहवमल्लस्य मृत्युमाकर्ण्य विक्रमविलापेषु करुणरसस्य हृदयद्रावकं दृश्यं समुपस्थापितं कविना । तद्यथा—

इत्युक्त्वा विरते तत्र कृतनेत्राम्बुदुर्दिनः ।
हृतासिधेनुपार्श्वस्थैः साक्रन्दगलकन्दलः ॥
स्वभावादार्द्रभावेन पितृस्नेहाच्च तादृशः ।
तथा रुरोद वपुषा भूपृष्ठलुठितेन सः[1] ॥

विधाता तादृशं सर्गरत्नं कथं विधास्यति, तादृशाः परमाणवः कथं सङ्कुटिष्यन्ते,[2] हे पद्मे पुनः पद्माकरानेव सद्मत्वमानय, त्वयाऽयं पतिभ्रंशसन्तापोऽन्यत्र दुःसहः,[3] हे पौरुष तद्बाहुविश्लेषे किं करिष्यसि,[4] कोऽपि अपूर्वः दुर्मेधाः वेधाः समुत्थितः, पुराणः वेधाः क्लेशनिष्पन्नां स्वकृतिं कथं नाशयेत्[5] ? इत्यादिवर्णनेषु करुणरसस्य हृदयद्राविणी अनुभूतिरनुभूयते । विक्रमस्य करुणविलापेन तिग्मांशुरपि द्रवीभूय बिल्हणस्य कारुण्यं सर्वोत्कृष्टमिति प्रतिपादयति—

एवंविधदुराचारगृहीतनियमं यमम् ।
मन्यते स्म यथा वंशे तिग्मांशुरपि कण्टकम्[6] ॥

विक्रमदुःखदुःखिता दिवसा अपि बिल्हणस्य करुणेन रसेन द्रवीभूता इव दृश्यन्ते—

एतद्दुःखानभिज्ञेभ्यो दिनेभ्यः स्पृहयन्मुहुः ।
दिवसोऽपि यथात्मानं मन्दभाग्यममन्यत[7] ॥

अस्मिन् सन्दर्भेऽत्रानुद्धृतपद्यान्यपि करुणरसक्लिन्नानि सन्ति[8] ।

---

१. विक्र० ४।६९-७० ।
२. विक्र० ४।८४ ।
३. विक्र० ४।७९ ।
४. विक्र० ४।७८ ।
५. अपूर्वः कोऽपि दुर्मेधाः शङ्के वेधाः समुत्थितः ।
पुराणः क्लेशनिष्पन्नां स्वकृतिं नाशयेत्कथम् ॥
विक्र० ४।८१ ।
६. विक्र० ४।७१ ।
७. विक्र० ४।७२ ।
८. विक्र० ४।७३-७६ ।

रौद्ररसः—

पथि अन्तिकीभवति निम्नगातटे परिपन्थिनो भटाः युद्धकरणेन कुन्तलक्ष्मापतेः क्रुधमदीपयन्निति वर्णनेऽपि क्रोधस्य रौद्रस्थायिनोऽभिव्यक्तिर्भवत्येव। रौद्ररसस्य यद्यपि अभाव एवात्र दृश्यते तद्यपि कतिपयेषु स्थलेषु तस्य स्थितिर्दृष्टिपथमवतरति। यथाऽत्र—

वारणः प्रतिगजं विलोकयंस्तद्विमर्दरसमांसलस्पृहः।
आददे न विशदं नदीजलं शीलमीदृशममर्षशालिनाम्[1] ॥

भयानकरसः—

'हे साहसाङ्क! गलितत्रपा नृपास्त्वद्भिया गिरिगुहाश्रये स्थिता वर्तन्ते, तानपि त्वद्धनुः समरसीमनि ज्यारवप्रतिरवेण बाधते, इत्यादिषु वर्णनेषु भयानकस्य स्थितिः द्रष्टुं शक्यते। चालुक्यरामे हरिवाहिनीभिः समुद्रतटमागते पयोधिः प्रादुर्भवन्मौक्तिकशुक्तिभङ्ग्या दन्तान् निश्चकर्ष इव इति वर्णने भयानकरसस्य पर्याप्ता निष्पत्तिः दृश्यते[2]। वक्ष्यमाणपद्येषु भयानकस्य स्थितिरवलोकनीयैव—

दिग्गजश्रवणभङ्गकारिभिर्दुन्दुभिध्वनिभिरस्य भैरवैः।
अभ्रमभ्रमुभुजङ्गडिण्डिम-ध्वाननिर्भरमिव व्यराजत ॥
सर्वतः श्रवणभैरवस्फुरद्दुन्दुभिप्रतिरवापदेशतः।
सस्वनं द्विरदवृन्दघट्टनादस्फुटन्निव दिगन्तभित्तयः ॥
कर्णतालपवनोर्मिशीतलैः सिञ्चति स्म करशीकराम्बुभिः।
दिग्गजान्निव भयेन मूर्छितांस्तस्य वारणपरम्परा पुरः[3] ॥

अत्र हि भैरवशब्दैः मूर्छितगजैश्च भयानकस्य स्थायिनः भयस्य सम्यक् प्रतीतिर्नास्त्यस्पष्टा।

बीभत्सरसः—

लङ्कासमीपाम्बुधिनिर्गतेयं रक्तासवैस्तृप्यति राक्षसीव।
लक्ष्मीरसौ त्वद्भुजदण्डबद्धा पात्रं भवित्री विनयव्रतस्य[4] ॥

---

१. विक्र० ५।१२।
२. विक्र० ३।६२।
३. विक्र० ५।६३-६५।
४. विक्र० ३।४७।

अत्र हि राक्षस्या रक्तासवपानप्रतिपादनेन बीभत्सत्वम् ।

ज्ञातास्वादः स्वयं लक्ष्म्याः पिशाच्या इव चुम्बनात् ।
रुधिरं कण्ठरन्ध्रेभ्यः सर्वेषामाचकाङ्क्ष सः[1] ॥

अत्र हि पिशाच्या इव चुम्बनात् सर्वेषां कण्ठरन्ध्रेभ्यो रक्तपानवर्णने बीभत्सत्वम् । रणान्तेषु वीरगतिमवाप्तवतां वीराणां करङ्कादिवर्णनेषु अत्र महाकाव्ये बीभत्सरसस्यापि स्थितिर्वर्तते । इदमत्रोदाहरणम्—

धृतसुभटकरङ्कमङ्कवर्ति द्विरदघटाविकटास्थिचक्रवालम् ।
रणमनणु कृतान्तभुक्तशेषप्रणयि बभूव शिवासहस्रभोग्यम्[2] ॥

कपालशुक्तौ पतितः कृपाणलूनः करिकर्णपुटः कृतान्तपानलीलाचषकपिधानविलासमवाप्य बीभत्सरसाश्रयत्वमुपैति—

उपरि निपतितः कपालशुक्तेः श्रवणपुटः करिणः कृपाणलूनः ।
समरभुवि कृतान्तपानलीलाचषकपिधानविलासमाससाद[3] ॥

वक्ष्यमाणपद्ये शोणितपङ्कमध्यवर्तिनो रविप्रतिबिम्बस्य क्षपाचरस्त्रीचषकत्वरूपेण वर्णनं बीभत्सास्पदम्—

पदे पदे शोणितपङ्कपातिनी
दिनेश्वरस्य प्रतिबिम्बमालिका ।
अवापदापानकुतूहलागत-
क्षपाचरस्त्रीचषकोपमेयताम् ॥[4]

एभिः पद्यैः बिल्हणस्य बीभत्सरसे वैशिष्ट्यं प्रत्यक्षं दृश्यते ।

अद्भुतरसः—

सोमेश्वरं विहाय विक्रमाय राज्यं दातुं कृताग्रहो राजा आहवमल्लो 'हे कुन्तलेन्द्र ! यशोविरोधी पक्षपातः विश्राम्यतु' इत्यादीनि श्रोत्रपवित्रवचांस्याकर्ण्य हर्षेण चमत्कारमगात्, इत्यत्र हर्षेण तस्यानुभूतिः अद्भुतरस एव । इदमत्रोदाहरणम्—

पुत्राद्वचः श्रोत्रपवित्रमेव श्रुत्वा चमत्कारमगान्नरेन्द्रः ।
इयं हि लक्ष्मीर्धुरि पांसुलानां केषां न चेतः कलुषीकरोति[5] ॥

---

१. विक्र० ४।१०५ ।
२. विक्र० ६।८९ ।
३. विक्र० ६।८३ ।
४. विक्र० १७।५२ ।
५. विक्र० ३।४२ ।

अस्मिन्नेव सन्दर्भेऽन्यत्र विस्मयेनाद्भुतरसानुभूतिरपि सञ्जायते । यथाऽत्र—

एतानि निर्यान्ति वचांसि वक्त्रात् कस्यापरस्य श्रवणामृतानि ।
मधूनि लेह्यानि सुरद्विरेफैर्न पारिजातादपरः प्रसूते ॥

यस्याः कृते भूमिभृतां कुमाराः केषां न पात्रं नयविप्लवानाम् ।
उन्मत्तमातङ्गसहस्रगुर्वी सा राज्यलक्ष्मीस्तृणवल्लघुस्ते[1] ॥

इत्यादिषु पद्येष्विवान्यत्रापि कतिपयेषु[2] अद्भुतस्य रसस्यात्र काव्येऽनुभूतिः सहृदयानां नास्त्यविदिता ।

हास्यरसः—

हास्यरसस्य यद्यपि अभाव एवात्र, तर्ह्यपि द्वित्रिषु स्थानेषु हास्यानुभूतिर्जायते एव । स्वयंवरागतानां राज्ञां चेष्टावर्णनेषु हास्याभिव्यक्तिर्यथा—

चूडामणेः कोऽपि परिश्लथस्य स्थाने निवेशाय कृताभिलाषः ।
लीलासरोजं मुकुटे बबन्ध पुराङ्गनाभिः परिहास्यमानः[3] ॥

षोडशे सर्गे कनकशृङ्खलया सह निर्गतस्य विटपिकण्टककीलकेषु रुद्धस्य शुनश्चेष्टासु अपि हास्यानुभूतिरुदाहर्तुं शक्यते । इदमत्रोदाहरणम्—

श्वा निर्गतः कनकशृङ्खलया सहैव
कोपान्निरीक्ष्य विशतो गहने वराहान् ।
रुद्धस्तया विटपिकण्टककीलकेषु
साक्रन्दकण्ठकुहरो मुहुरुत्पफाल[4] ॥

महाकविर्बिल्हणः रसविन्यासेषु अतिप्रसङ्गं सर्वथा परिहरति । अतस्तेन सर्वेषां रसानां विन्यास उचितमात्रयैव कृतः । वसन्तवर्णने शृङ्गारात्मकवर्णनमपि अतिप्रसङ्गभिया उपसंहृतम् । तद्यथा—

इत्युत्सवं भूतिलकोऽनुभूय लीलावगाहगृहमुत्ससर्ज ।
निसर्गरम्येऽपि विचेष्टिते यदतिप्रसङ्गो रसभङ्गहेतुः[5] ॥

---

१. विक्र० ३।४५-४६ ।
२. विक्र० ३।५४-५५, ६।४१ ।
३. विक्र० ६।७८ ।
४. विक्र० १६।३९ ।
५. विक्र० १०।८७ ।

ध्वनेर्गुणदोषयोश्च समीक्षा

ध्वनिः—

बिल्हणस्य काले ध्वनिसिद्धान्तः सम्यक्तया प्रतिष्ठित आसीत्। अतो बिल्हणस्य अस्मिन् सिद्धान्ते महती आस्था अवलोक्यते। तेन हि विक्रमाङ्कदेवचरितस्य आदावेव ध्वनिविषये आत्मनो रुचिरेभिश्शब्दैरस्ति प्रकटिता—

रसध्वनेरध्वनि ये चरन्ति सङ्क्रान्तवक्रोक्तिरहस्यमुद्राः।
तेऽस्मत्प्रबन्धानवधारयन्तु कुर्वन्तु शेषाः शुकवाक्यपाठम्[1]॥

ध्वनिविषये बिल्हणस्य रुचिः समुचितैव, यतो हि ध्वनिरेव काव्यस्यात्मा इत्यसौ मनुते। ध्वनिं विना किमपि काव्यं हृद्यं रम्यञ्च न भवितुमर्हति। भगवता मम्मटाचार्येणापि ध्वनेरुत्तमकाव्यत्वं समर्थितम्।

यत्र वाच्यार्थाद् व्यङ्ग्यार्थोऽतिशयेन शोभाशाली भवेत्तद् ध्वनिकाव्यं भवति। तद् यथाह भगवान्मम्मटः—

'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः[2]।'

ध्वनिकार आनन्दवर्धनाचार्यः ध्वनिमित्थं प्रस्तौति—

यत्रार्थः शब्दो वा उपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषं स ध्वनिः सूरिभिः कथितः[3]॥

यद्यपि व्यक्तिविवेककारेण महिमभट्टेन वक्रोक्तिजीवितकारेण कुन्तकेन ध्वनिसिद्धान्तस्य खण्डनं कृत्वा स्वीयमतप्रतिष्ठापने महान् प्रयासः कृतस्तथापि ध्वनिसिद्धान्तस्य समादरे न काऽपि क्षतिरभूत्। ध्वनिकारेण आनन्द-

---

१. विक्र० १।२२।
२. काव्यप्रकाशः १।१२।
३. ध्वन्यालोकः १।

वर्धनाचार्येण ध्वनेः, रसस्य अलङ्काराणाञ्च पृथक् पृथक् क्षेत्रविभाजने पूर्णं साफल्यमधिगतम् । आनन्दवर्धनाचार्यो ध्वनेर्विषयं स्पष्टयन्नाह—

वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम् ।
रसादिपरता यत्र स ध्वनेर्विषयो मतः ॥

यत्र वाच्यं वाचकञ्च तच्चारुत्वहेतवश्चैतेषां नानारूपाणां शब्दार्थतदुभयालङ्कारादीनां रसादिपरता—प्रधानीभूतरसादिव्यङ्ग्योपस्कारकत्वं—भवति स ध्वनेर्विषयो मतः ।

ध्वनेः सर्वेषु भेदेषु रसध्वनिरेवोत्तमः । अतः प्रथमं रसध्वनिरेवोदाह्रियते—

हृदयस्थितरत्नभूषणप्रतिबिम्बच्छलतः शिरांसि यैः ।
विधृतानि निजानि लीलया मरणे निर्गहनैरिवोरसि[1] ॥

अत्र पदातीनां रणे विजयार्थं स्वशिरश्छेदने आयासाभावेनोत्साहप्रतीत्या वीररसध्वनिः ।

लघु प्रहर्तुं प्रतिपक्षमक्षमः
प्रविष्टनाराचचयातिभारतः ।
भटेन केनापि सरोषमीक्षितः
प्रभूतवैलक्ष्यवता निजो भुजः[2] ॥

अत्र हि नितान्तं लज्जितेन केनचिद् भटेन भुजे प्रोतानां बाणविशेषाणां समूहस्यातिभारतः शत्रुं प्रहर्तुमक्षमः स्वबाहुः रोषेण दृष्टस्तेनैव तस्य युद्धोत्साहो ध्वन्यते ।

वस्तुध्वनिः—

भुजप्रभादण्ड इवोर्ध्वगामी स पातु वः कंसरिपोः कृपाणः ।
यः पाञ्चजन्यप्रतिबिम्बभङ्ग्या धाराम्भसः फेनमिव व्यनक्ति[3] ॥

अत्र भगवतः कृष्णस्य साक्षाद्वर्णनं विहाय भगवत्सम्बन्धिकृपाणस्य वर्णनात्तस्यापि लोकोत्तरत्वमभिव्यज्यते । एतस्माद्वस्तुध्वनिरत्र वर्तते ।

दत्वा शोकं शकपरिवृढप्रौढसीमन्तिनीनां
येन क्रीडाविदलितदरद्दीर्घदर्पः कृपाणः ।

---

१. विक्र० १५।३७ ।
२. विक्र० १७।५३ ।
३. विक्र० १।१ ।

अस्पृश्यानामिव परिचयाद् बिभ्रता दोषशङ्कां
धौतः क्षोणीवलयजयिना जह्नुकन्याजलेषु[1] ॥

अत्र स्पर्शायोग्यतासम्बन्धादिव दोषशङ्कां धारयता भूवलयजेत्रा अनन्तनाम्ना राज्ञा शकराजस्याऽङ्गनाभ्यः शोकं दत्वा क्रीडाविदलितदरद्दीर्घदर्पः खड्गः गङ्गा-जलेषु धौत इत्युत्प्रेक्षया जाह्नवीं यावत्साम्राज्यविस्तररूपं वस्तु व्यज्यते, अतोऽत्र अलङ्कारेण वस्तुध्वनिः ।

यत्र तिष्ठति विरोधमुद्वहन् दाहतः प्रभृति तेजसा सह ।
मेचकक्रमुककाननावलीमीलितोष्णकिरणार्चिषि स्मरः[2] ॥

कृष्णवर्णारण्यावल्या मीलितोष्णकिरणार्चिषि यत्र कामः दाहतः प्रभृति तेजसा सह विद्वेषमुद्वहन् तिष्ठति इत्युक्त्या स्मरे तेजसां विरोधरूपस्य धर्मस्योत्प्रेक्षा-लङ्कारो गम्यते तेन च काननानां क्रीडायोग्यत्वं ध्वन्यते इति अलङ्कारेण वस्तु-ध्वनिरत्र वर्तते ।

वचांसि वाचस्पतिमत्सरेण साराणि लब्धुं ग्रहमण्डलीव ।
मुक्ताक्षसूत्रत्वमुपैति यस्याः सा सप्रसादास्तु सरस्वती वः[3] ॥

अत्र वः सरस्वती सप्रसादाऽस्तु इति श्लेषेण प्रसादगुणेयुक्ताऽस्तु इति वस्तु व्य-ज्यते, अतोऽयं अलङ्कारेण वस्तुध्वनिः ।

मुखेन्दुसञ्चारकृताभिलाषकुरङ्गभीत्यर्थमिवार्पितेन ।
कण्ठावसक्तेन स राजसूनुरराजत व्याघ्रनखाङ्कुरेण[4] ॥

अत्र फलोत्प्रेक्षया मुखस्य निष्कलङ्कचन्द्रत्वं वस्तु ध्वन्यते ।

लावण्यलुब्धाभिरलब्धसेव भूपालकन्यामधुपाङ्गनाभिः ।
कवित्ववक्तृत्वफला चुचुम्ब सरस्वती तस्य मुखारविन्दम्[5] ॥

अत्र भूपालकन्यासु भ्रमराङ्गनात्वाभेदरोपान्मुखे चारविन्दत्वाभेदारोपाद्रूपका-लङ्कारः । तेन च अस्य विलक्षणं कवित्वं वाग्मित्वञ्च ध्वन्यते । अत्र अलङ्कारेण वस्तुध्वनिः ।

---

१. विक्र० १८।३४ ।

२. विक्र० ५।२० ।

३. विक्र० १।७ ।

४. विक्र० ३।१३ ।

५. विक्र० ३।१६ ।

तं बालचन्द्रं परिपूर्यमाणमालोक्य लावण्यकलाकलापैः ।
कुमुद्वतीनामिव कामिनीनां निशासु निद्रा विमुखी बभूव[1] ॥

अत्र कुमुद्वतीकामिन्योर्द्वयोरेकक्रियान्वयात्तुल्ययोगितालङ्कारस्तेन यथा निशासु नवोदितं चन्द्रं विलोक्य कुमुदिनी निजकुड्मलत्वरूपनिद्रां जहाति तथैव कामिन्योऽपि तस्याद्भुतकौमार्यं विलोक्य कामज्वरपीडिताः सत्यः रात्रौ निद्रां न लब्धवत्य इति ध्वनिः ।

तस्य विक्रमकुमारस्य अद्भुतसौन्दर्यश्रियमवलोक्य सर्वा अपि कामिन्यो रात्रौ निद्रां न लब्धवत्य इति ध्वनिर्वक्ष्यमाणपद्येऽपि—

लावण्यलक्ष्मीकुलधाम्नि तत्र विवर्द्धमाने शनकैः कुमारे ।
कासामजायन्त न कामिनीनां निद्रादरिद्राणि विलोचनानि[2] ॥

काञ्ची पदातिभिरमुष्य विलुण्ठिताऽभूद्
देवालयध्वजपटावलिमात्रशेषा ।
लुण्टाकलुप्तनिखिलाम्बरडम्बराणां
कौपीनकार्पणपरेव पुराङ्गनानाम्[3] ॥

अत्र हि काञ्चीनगरस्त्रीणां कौपीनकार्पणतत्परत्वेन सर्वतोभावेन काञ्ची विलुण्ठिता इति ध्वन्यते ।

आसीत्तस्य समुत्सुकः सुरपतिः सङ्ग्रामसंदर्शने
सेहे किन्तु न गाढपीडितधनुष्टङ्कारमुच्चैःश्रवाः ।
आरूढः सुरवारणं रणरसक्रुद्धेभगन्धग्रहात्
तेनाप्येष पलायनप्रणयिना दूरं समुत्सारितः[4] ॥

अत्र विक्रमाङ्कदेवस्य गन्धगजा आसन्, तेषां गन्धमाघ्राय सुरवारणः पलायित इति अतिशयोक्त्यलङ्कारेण विक्रमस्य लोकोत्तरशौर्यं ध्वन्यते ।

मुक्ताफलस्त्रग्भिरवाप शोभां पतिंवराविभ्रमवेदिका सा ।
चन्द्रो बहुस्त्रीक इति प्रवक्तुं भियेव ताराभिरुपास्यमाना[5] ॥

---

१. विक्र० ३।२० ।
२. विक्र० ३।२२ ।
३. विक्र० ३।७६ ।
४. विक्र० ३।७५ ।
५. विक्र० ९।५० ।

अत्र हि इय कन्या चन्द्रलेखाभिधा । चन्द्रः किल बहुस्त्रीक इति सत्यपि तन्नामनि राजनि चन्द्रं मा वृण्विति स्वपत्युश्चन्द्रस्य विरोधकृद्वचनाद् भियैव प्रवक्तुं चन्द्रस्त्रीभिरुपास्यमानेति भावेन बहुस्त्रीकं नृपं मा वृण्विति ध्वनिः ।

उत्कृष्यमाणं निजहारदाम समस्तभूपालविभूषणेभ्यः ।
वक्षःस्थलेनोन्नमितेन दूरं कश्चिन्नरेन्द्रः प्रकटीचकार[1] ॥

अत्र समस्तनृपविभूषणेभ्य उत्कृष्यमाणस्य हारदाम्नः उन्नमितवक्षःस्थलप्रकटीकरणेन त्वामपि हारमिव हृदयेन धारयिष्यामीति ध्वन्यते ।

शैत्यार्थमस्योद्वहतः कराब्जे चक्राभमम्भोरुहिणीपलाशम् ।
करान्तरे विभ्रमपुण्डरीकं रराज शौरेरिव पाञ्चजन्यः[2] ॥

अत्र शैत्यहेतवे करकमले चक्रसदृशमम्भोरुहिणीपत्रं धारयतः, करान्तरे विभ्रमपुण्डरीकं शौरेः पाञ्चजन्य इव रराज इत्यनेन राज्ञो विष्णुरूपत्वं ध्वन्यते ।

मया निपीड्यमानास्ते निबिडं द्रविडादयः ।
आर्यं विपर्यस्तमपि प्रभवन्ति न बाधितुम्[3] ॥

अत्र विपर्यस्तं सोमेश्वरं प्रतिपक्षभूपाः पीडयिष्यन्ति इति मत्वा तेषां निपीडनवर्णनेन दुराचारग्रहग्रस्तेऽपि अग्रजे विक्रमस्य सहजस्नेहः, दुराचारिणां राज्ञां पराजयश्च ध्वन्यते ।

एकस्तनस्तुङ्गतरः परस्य वार्तामिव प्रष्टुमगान्मुखाग्रम् ।
यस्याः प्रियार्धस्थितिमुद्वहन्त्याः सा पातु वः पर्वतराजपुत्री[4] ॥

अत्र हि वृत्तान्तप्रश्नस्य परस्तनकर्तृकपार्वतीमुखाग्रकर्मकगमनानुकूलफलत्वप्रतिपादनात्फलोत्प्रेक्षालङ्कारेण अर्धनारीश्वरस्वरूपं व्यज्यते । एवञ्चार्धनारीश्वररूपवर्णनेन कवेः शैवत्वं ध्वन्यते ।

प्रौढिप्रकर्षेण पुराणरीतिव्यतिक्रमः श्लाघ्यतमः पदानाम् ।
अत्युन्नतस्फोटितकञ्चुकानि वन्द्यानि कान्ताकुचमण्डलानि ॥[5]

---

१. विक्र० ९।७६ ।
२. विक्र० १२।४८ ।
३. विक्र० ४।११८ ।
४. विक्र० १।४ ।
५. विक्र० १।१५ ।

अत्र हि कविप्रतिभामूलकध्वन्यालङ्कारादीनां प्रशस्यः सन्निवेशोऽत्र काव्ये वर्तते इति ध्वन्यते ।

उदञ्चितभ्रूमुखराणि संततं विलोकयामास विभूषणान्यपि ।
अजायत स्तब्धशिरःसु तेजसा गृहप्रदीपेष्वपि बद्धमत्सरा[1] ॥

अत्र मयि विद्यमानायां कस्तेजसाऽविनीतः सन् ज्वलतीति गृहप्रदीपेषु मात्सर्यप्रतिपादनेन अन्येषां तेजोऽसहनशीलस्यातिशयपराक्रमजुषः भाविपुत्रस्य गर्भे स्थितिर्ध्वन्यते ।

अलङ्कारध्वनिः—

यत्र काव्ये वाच्यभूतालङ्काराद्भिन्नो व्यङ्ग्यालङ्कारोऽपि अर्थनिष्ठव्यञ्जनासामर्थ्यात्प्रकाशते तत्र संलक्ष्यक्रमव्यङ्ग्यात्मकार्थशक्त्युद्भवोऽलङ्कारध्वनिर्भवति ।

अर्थशक्तेरलङ्कारो यत्राप्यन्यः प्रतीयते ।
अनुस्वानोपमो व्यङ्ग्यः स प्रकारोऽपरो ध्वनेः[2] ॥

उपमाध्वनिः—

मलयेन तदीयस्त्री-सुरभिश्वसितानिलैः ।
गुहाश्चन्दनवायूनां बीजार्थमिव पूरिताः[3] ॥

अत्र श्वासपवनैः गुहानां परिपूरणे चन्दनवायुरूपबीजसंरक्षणस्य फलत्वेनोत्प्रेक्षणात्फलोत्प्रेक्षा, तया च तदीयाङ्गनानां श्वसितानिलैः सह मलयपवनानामुपमा ध्वन्यते । अतोऽत्र अलङ्कारेणालङ्कारध्वनिः ।

स्मरप्रशस्तिप्रतिवस्तुतां गतः सलीलदात्यूहसमूहनिस्वनाः ।
भवन्ति यत्र क्षणमात्रविश्रमप्रदायिनः कण्ठरवेषु योषिताम्[4] ॥

अत्र दात्यूहसमूहनिस्वनानां योषितां कण्ठरवेषु विश्रमप्रदानाभिधानेन तत्रत्यानां स्त्रीणां कण्ठध्वनिः कालकण्ठककण्ठध्वनिरिव मधुरेत्युपमा ध्वन्यते । अतोऽत्र उपमाध्वनिः ।

---

१. विक्र० २।७६ ।
२. ध्वन्यालोकः २।४८ ।
३. विक्र० ४।८ ।
४. विक्र० २।१५ ।

दृशं प्रपापालिकया प्रकाशिते न्यवेशयत्कुम्भधिया कुचद्वये ।
विवेद पान्थः कलशात्परिच्युतां न वारिधारां मुखसङ्गिनीमपि[1] ॥

अत्र पथिकः प्रपापालिकया प्रकटिते कुचद्वये कलशधिषणाया दृष्टिमपातयत्, कुम्भाच्च्युतामाननासक्तां जलधारां न ज्ञातवानिति वर्णने कुचयोः कलशसादृश्य-व्यञ्जनादुपमालङ्कारध्वनिः ।

विल्हणस्यालङ्कारध्वनेः प्रतीयते यत्तत्र सर्वेऽप्यलङ्काराः स्वतः प्रतीयमाना एव वर्तन्ते न तु यत्नेन निवेशिताः यतो हि ध्वन्यालोके ध्वनिकाव्ये प्रयत्नाहितोऽलङ्कारनिवेशो निषिद्धोऽस्ति ।[2]

वक्ष्यमाणध्वन्यात्मके पद्ये काव्यलिङ्गमुत्प्रेक्षा च न प्रयासबन्धं प्रकटयतः । तद्यथा—

अविस्मृतस्त्र्यम्बकनेत्रपावकः स्मरः स्मितेन्दीवरदीर्घचक्षुषाम् ।
विलासपीयूषनिधानकुम्भयोः स यत्र पार्श्वं कुचयोर्विमुञ्चति[3] ॥

अत्र विलासपीयूषनिधानयोः कुचकुम्भयोःसामीप्यं कामो न जहातीत्यत्र त्र्यम्बक-नेत्रपावकस्मरणरूपहेतुप्रतिपादनात्काव्यलिङ्गेनोत्प्रेक्षा ध्वन्यते । अतोऽत्र उत्प्रेक्षा-ध्वनौ अलङ्कारद्वयेऽपि कवेः पृथग् यत्नो नावलोक्यते ।

व्यतिरेकध्वनिः—

भूभृत्सहस्रार्पितदेहरन्ध्रैः क्रौञ्चाचलच्छिद्रविशारदानाम् ।
सेहे न गर्वः पृथुसाहसस्य यस्येषुभिर्भार्गवमार्गणानाम्[4] ॥

अत्र विशालसाहसस्य पर्वतसहस्रार्पितदेहरन्ध्रैरथवा श्लेषेण भूपालसहस्रार्पित-देहरन्ध्रैरिषुभिः क्रौञ्चपर्वते छिद्रदक्षाणां भार्गवबाणानां गर्वः न सेहे इत्युक्त्या भार्गवेण केवलमेकस्मिन्नेव क्रौञ्चभूभृति छिद्राणि कृतानि परमनेन बहुषु भूभृत्स्वपि भार्गवादस्य नृपस्य वैशिष्ट्यं ध्वन्यते । अतोऽत्र व्यतिरेकध्वनिः ।

विलासदोलायितदन्तपत्त्रयोः क्षपासु यत्रेन्दुरलक्ष्यमण्डलः ।
प्रविश्य सङ्क्रान्तिमिषेण योषितां कपोलयोः कान्तिजलं विमुञ्चति[5] ॥

---

१. विक्र० १३।९ ।

२. रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।
अपृथग् यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः ॥ ध्वन्यालोकः २।१६

३. विक्र० २।१६ ।

४. विक्र० १।७७ ।

५. विक्र० २।४ ।

यत्र पुरे रात्रिषु विलासे दोलावदाचरितताटङ्कयोर्नारीणां कपोलयोरलक्ष्यमण्डलश्चन्द्रः कान्तिजलं पिबतीति प्रतिपादनेन इन्दुतोऽधिककान्तिमत्वात्कपोलयोः पतितस्य चन्द्रबिम्बस्य व्याजेनेन्दुः कामिनीनां स्वकान्तिवृद्ध्यर्थं लावण्यामृतमाचामतीति सापह्नवा गम्योत्प्रेक्षा, तया चन्द्रतोऽप्यधिककान्तिमन्मुख्यस्तत्रत्याः स्त्रिय इति गुणाधिक्यप्रतीत्या व्यतिरेकध्वनिश्च ।

यदीयलीलास्फटिकस्थलीभुवाममुग्धदुग्धाब्धिसमत्विषां पुरः ।
दवाग्निनिर्दग्धवनस्थलोपमं विलोक्यते कज्जलकश्मलं नभः[1] ॥

अत्रामुग्धदुग्धाब्धिसमत्विषां यदीयलीलास्फटिकस्थलीभुवां समक्षं कज्जलमलिनं गगनं दवाग्निना दग्धेन वनस्थलेन सममवलोक्यते इति वर्णने स्फटिकस्थल्याकाशयोर्नैर्मल्यसामान्यत्वेऽपि स्फटिकस्थल्याश्शुभ्रवर्णत्वादधिकसौन्दर्येण व्यतिरेको ध्वन्यते ।

पपुः प्रपापालिकया समर्पितं चिरेण पान्थाः कथमप्यनादरात् ।
तदीयबिम्बाधरपानलम्पटाः सपाटलामोदमपि प्रपाजलम्[2] ॥

अत्र प्रपापालिकाया बिम्बाधरपाने साभिलाषाः पथिकाः तया दत्तं पाटलामोदमपि जलं चिरेण अन्यमनस्कतया पीतवन्त इति वर्णने सुरभिजलापेक्षया प्रपापालिकाया अधररसस्योत्कर्षाभिव्यञ्जनया व्यतिरेकालङ्कारध्वनिः ।

रसाभासध्वनिः—

तस्यारिलक्ष्मीपरिरम्भकेलिसमुत्सुकप्राज्यभुजद्वयस्य ।
केयूररत्नाङ्कुरकण्टकानां तैक्ष्ण्यं कृपाणाहतिभिर्निरस्तम्[3] ॥

अत्र शत्रुश्रीपरिरम्भक्रीडासमुत्कण्ठितविशालदोर्दण्डद्वयस्य केयूररत्नाङ्कुरकण्टकानां तीव्रत्वमसिप्रहारैः परिहृतमिति वर्णने कृपाणप्रहारैः केयूररत्नाङ्कुरकण्टकानां तीव्रत्वपरिहारादालिङ्गनं निर्विघ्नमभवदिति भावेन लक्ष्म्यास्तस्य राजपुत्रस्य सर्वतोभावेनाङ्गीकरणध्वननादत्र रसाभासध्वनिः ।

गुणाः

गुणाः किल रसानां धर्मा भवन्ति । यथा शौर्यादय आत्मनो धर्मास्तथैव शृङ्गारादेर्माधुर्यादयः । ओजःप्रसादश्लेषादिनामभिर्वामनमते दश गुणाः सन्ति ।[4]

---

१. विक्र० २।६ ।

२. विक्र० १३।१० ।

३. विक्र० ३।७२ ।

४. ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थव्यक्तिकान्तयो बन्धगुणाः । काव्यालङ्कारसूत्रवृत्तिः ३।२-४ ।

परमाचार्यमम्मटेनानन्दवर्धनाचार्यमनुसृत्य समेषामेषां माधुर्य्यौजःप्रसादेषु त्रिषु अन्तर्भावः कृतः । तच्च उत्तरवर्तिभिराचार्यैः समादृतः ।

माधुर्यगुणः—

'आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्'[1] इति लक्षणाद् द्रुतिकारणस्य माधुर्यस्य स्थितिः शृङ्गारे विप्रलम्भे शान्ते चाधिक्येन प्रकर्षेण च भवति[2] । ट-ठ-ड-ढ-वर्जिताः लान्ताः शिरसि निवर्गान्त्ययुक्तास्तथा रेफलकारौ ह्रस्वान्तरिताविति वर्णाः, समासाभावो मध्यमसमासाश्च माधुर्यव्यञ्जका भवन्ति[3] ।

विक्रमाङ्कदेवचरितेऽपि सम्भोगविप्रलम्भयोः माधुर्यगुणस्य स्थितिर्वर्तते ।

उर्वीपतेः पार्वणचन्द्रवक्त्रा समुद्वहन्ती हृदये निवासम् ।
विकासदीक्षामपराङ्गनानां सरोजिनीनामिव संजहार[4] ॥

अत्र 'उर्वी' 'पार्वण' अपराङ्गनानामित्यादिषु माधुर्यव्यञ्जकानां वर्णानां विद्यमानतया माधुर्यगुणो विलसति । माधुर्यगुणेन अत्रत्यविप्रलम्भोऽतिशयेन द्रुतिकारणत्वमुपगतोऽस्ति । यथाऽत्र—

ताडीदले कर्णपरिच्युतेऽपि कन्दर्पलेखभ्रममाससाद ।
उत्तंसमागच्छति षट्पदेऽपि प्रत्याशया कर्णमदत्त देवः[5] ॥

अत्रापि ट-ठ-ड-ढ-वर्णानामविद्यमानतया एवञ्च 'कर्ण' 'कन्दर्प' एवमादिभिर्माधुर्य्यव्यञ्जकैः वर्णैः माधुर्य्यगुणो रसे द्रुतिहेतुः । वक्ष्यमाणपद्येऽपि माधुर्यस्य मधुरं रूपं रमणीयमेवास्ते—

कमक्रमं कर्तुमभूदपेक्षा वैलक्ष्यभाजां न महीपतीनाम् ।
श्रीविक्रमाङ्कस्य न कङ्कपत्रास्ते किन्तु सह्याः समराङ्गणेषु[6] ॥

'क्रमम्', 'कर्तुम्' 'विक्रमाङ्क' 'समराङ्गणेषु' इत्यादीनां माधुर्यव्यञ्जकशब्दानां स्थित्या माधुर्यगुणोऽत्र उत्कर्षहेतुः ।

---

१. काव्यप्रकाशकारिका ९० ।
२. ध्वन्यालोकः २।३१ ।
३. काव्यप्रकाशकारिका ९९ ।
४. विक्र० ९।११ ।
५. विक्र० ९।१४ ।
६. विक्र० १०।३ ।

उच्चित्रणे चित्रकरस्तरूणां मानद्रुमोन्मूलनमत्तदन्ती ।
तस्य प्रभावादथ तत्र भर्तुश्चैत्रः पुनर्नूतनतां प्रपेदे[1] ॥

अत्र हि रकारबाहुल्येन माधुर्यगुण उत्कर्षाधायकः ।

सर्वं दिनं भूमिगृहेष्वतिष्ठद् बाधिर्ययोगं मुहुराचकाङ्क्ष ।
पिकाङ्गनापञ्चमपीडचमानश्चकार किं किं न वियोगिवर्गः[2] ॥

अत्र 'सर्वम्' 'बाधिर्ययोगम्' 'आचकाङ्क्ष' 'पिकाङ्गना' 'पञ्चम' 'वर्गः' एवमादिभिः माधुर्यव्यञ्जकैर्वर्णैर्विप्रलम्भो द्रुतिकारणतां गमितः । सम्भोगशृङ्गारे द्रुतिकारणं माधुर्यं वक्ष्यमाणपद्येषु दर्शनीयम्—

दोलाविलोलालकमुद्विलासभ्रूवल्लिविभ्रान्तविलोचनाब्जम् ।
उत्कीर्य कामः शरटङ्किकाभिस्तद्वक्त्रमेतस्य हृदि न्यधत्त[3] ॥

अस्मिन् पद्ये लकाराधिक्येन माधुर्यं सम्भोगशृङ्गारस्य उत्कर्षकारणम् ।

गीतं स्फुरत्पञ्चममञ्चितभ्रु विलोकितं नूपुरनिस्वनञ्च ।
नृपाङ्गनायास्त्रयमेतदासीत् त्रैलोक्यराज्ये मदनस्य शस्त्रम्[4] ॥

अत्र 'पञ्चम' 'मञ्चित' 'नृपाङ्गना' इत्येवमादयः वर्णा माधुर्यव्यञ्जकाः सन्ति । ये खलु शृङ्गाररसस्य उत्कर्षका वरीवर्तन्ते ।

आन्दोलयामास विलासदोलां स वल्लभायाः पृथिवीभुजङ्गः ।
भङ्गं समग्रस्य वधूजनस्य जग्राह सौभाग्यगुणप्रपञ्चः[5] ॥

अत्र 'भुजङ्ग' 'अङ्गम्' 'प्रपञ्च' इत्यादिभिर्वर्णैः माधुर्यं शृङ्गारे द्रुतिमातनोति ।

असंख्यपुष्पोऽपि मनोभवस्य पञ्चैव बाणार्थमयं ददाति ।
एवं कदर्यत्वमिवावधार्य सर्वस्वमग्राहि मधोर्वधूभिः[6] ॥

'र्थ' 'र्य' 'धार्य' 'व्' इत्येवमादयो माधुर्यव्यञ्जका वर्णाः शृङ्गारोत्कर्षकत्वेन काव्यसौष्ठवाधायकाः ।

वक्ष्यमाणपद्यानि माधुर्यस्य मधुराणि उदाहरणानि भवितुमर्हन्ति—

नृपेन्दुना चन्दनचारुलेखा ललाटपट्टे लिखिता दधार ।
वक्त्रारविन्दस्थितसूक्तिदेवी देवार्चनस्फाटिकलिङ्गभङ्गीम्[7] ॥

---

१. विक्र० १०।१६ ।
२. विक्र० १०।१५ ।
३. विक्र० १०।३२ ।
४. विक्र० १०।३३ ।
५. विक्र० १०।३५ ।
६. विक्र० १०।३६ ।
७. विक्र० १०।४४ ।

श्रृङ्गारपाथोधितरङ्गभङ्गिरनङ्गविद्याधरखड्गलेखा ।
विलासिना संस्क्रियते स्म तेन स्नानावसाने कबरी प्रियायाः[1] ॥
लीलावगाहच्युतकुङ्कुमेषु लक्ष्यस्तदङ्गेषु नखाङ्कमार्गः ।
श्रृङ्गाररत्नाकरतीरभाजां मुद्रां दधे विद्रुमपल्लवानाम्[2] ॥

एवमादीनि चित्तद्रुतिकारणानि बहूनि अन्यानि उदाहरणानि माधुर्यस्य काव्येऽत्र विद्यन्ते । येषामत्रोपादानं नास्ति सम्भवम् ।

ओजोगुणः—

चित्तस्य ज्वलनरूपमिव दीप्तेर्जनकमोजः । दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितः[3] । इति लक्षणादेष गुणः रौद्रवीरादिदीप्तिमत्सु रसेषु तिष्ठति—

रौद्रादयो रसा दीप्त्या लक्ष्यन्ते काव्यवर्तिनः ।
तद्व्यक्तिहेतू शब्दार्थावाश्रित्यौजो व्यवस्थितम्[4] ॥

वर्गाणां प्रथमतृतीयाभ्यामन्त्ययोः द्वितीयचतुर्थयोः रेफेण अथ उपरि उभयत्र वा यस्य कस्यचित् तुल्ययोस्तेन तस्यैव सम्बन्धः, टवर्गोऽर्थात् णकारवर्जः शकारषकारौ दीर्घसमासः विकटा सङ्घटना चौजसि भवन्ति[5] । वीरबीभत्सरौद्रेषु क्रमेण ओजस आधिक्यं भवति[6] । विक्रमाङ्कदेवचरिते ओजसः स्थितिस्तु वर्तते परमोजसोऽतिप्रचण्डं रूपमत्र नास्ति । ओजसः प्रचण्डरूपेण काव्यस्य कठिनीकरणं नास्ति बिल्हणस्य अभीष्टम् ।

सोमदेवस्य अश्ववर्णनप्रसङ्गे ओजोगुणस्य ओजस्विरूपमुद्धरणैः प्रतिपाद्यते—

कुलिशकठिनलोहबन्धयोगान्निजगृहकुट्टिमवद्विलङ्घ्यते स्म ।
विशिखशकलकण्टकावतीर्णा रणखुरलीखुरमण्डलैर्यदीयैः[7] ॥

उक्तपद्यं दीर्घसमासकारणात् ओजोव्यञ्जकशब्दानाञ्चोपादानात् ओजोगुणस्य

---

१. विक्र० १२।४६ ।
२. विक्र० १२।७५ ।
३. काव्यप्रकाश सूत्रम् ९२ ।
४. ध्वन्यालोकः २।३२ ।
५. काव्यप्रकाशः पृ० ३०१ ।
६. तत्रैव कारिका ९३ ।
७. विक्र० ६।४६ ।

उदाहरणमस्ति। वक्ष्यमाणपद्यमपि बिल्हणस्य ओजोगुणोपादाने नातिप्रचण्डत्वस्योदाहरणं भवितुमर्हति—

क्व नु न विलसति स्म कुन्तमाला कलितशिखण्डिशिखण्डमण्डनश्रीः।
क्षणमविरहिता विपक्षसेना भटशिरसामिव मण्डलैस्तदीया[1] ॥

अत्र हि द्वयोरपि चरणयोर्द्वितीययोर्भागयोरेव ओजोव्यञ्जकवर्णानां स्थित्यापि नातिप्रचण्डत्वमोजसि वर्तते।

धृतसुभटकरङ्कमङ्कवर्ति-द्विरदघटाविकटास्थिचक्रवालम्।
रणमनणु कृतान्तभुवतशेषप्रणयि बभूव शिवासहस्रभोग्यम्[2] ॥

उक्तबीभत्सरसोदाहरणे यद्यपि द्विरदघटाविकटादिवर्णेषु ओजोव्यञ्जकत्वं वर्तते तर्ह्यपि बीभत्सरसे ओजसोऽतिप्रचण्डरूपस्य यावती अपेक्षा भवति न तावत्यत्रास्ति।

बिल्हणस्य ओजोगुणोऽतिप्रचण्डत्वेनार्थक्लिष्टत्वं न धत्ते इत्यत्र वक्ष्यमाणपद्यमपि प्रमाणम्।

पुलकाङ्कुरकण्टकोत्करानतिरागादविजानतीमिव।
वपुषा सुभटश्रियं दधन् निबिडालिङ्गनगाढकौतुकाम्॥[3]

सिंहदेवगजवर्णनप्रसङ्गेऽपि ओजोगुणो वर्तते। इदमत्रोदाहरणम्—

मदवारिसमुत्थशैवलद्युतिरोलम्बकलापजन्मनाम्।
अदधुर्दशनांशुचन्द्रिकां तिमिराणामिव वारणाय ये॥[4]

अस्मिन्पद्ये दीर्घसमासेन ओजः। वक्ष्यमाणपद्यमपि ओजोगुणस्य सुन्दरमुदाहरणम्—

दधुरद्रिविघट्टनेषु ये पतितैर्मूर्धनि निर्झरैरिव।
कलयन्तमतिप्रभूततां कृतधाराजलदुर्दिनं मदम्॥[5]

अत्र 'दधुरद्रिविघट्टनेषु' इत्यत्रौजः।

अवलम्बविडम्बिनामिमां तरणेर्हन्त हया हसन्ति नः।
वसुधामिति मत्सरादिव क्षपयन्ति स्म परिक्रमेषु ये॥[6]

---

१. विक्र० ६।५२।
२. विक्र० ६।८६।
३. विक्र० १५।११।
४. विक्र० १५।२४।
५. विक्र० १५।२७।
६. विक्र० १५।३२।

पद्येऽस्मिन् अवलम्बविडम्बिनामिमामित्यादौ ओजसः सुन्दरं रूपं वर्तते। वक्ष्यमाण-पद्येऽपि ओजस ओजोपूर्णं रूपं लक्ष्यते—

खुरघट्टितवैरिकुट्टिमस्फुटितैर्वह्निकणैः कदर्थिताः ।
न निघर्षमकार्षुरङ्घ्रिभिश्चटुलैर्ये क्वचिदेव वर्त्मनि[1] ॥

काव्येऽत्र बहुत्र ओजोव्यञ्जकवर्णैः ओजोगुणस्य पर्याप्तचित्रणमस्ति । यथा—'पृथुडिण्डीरकलापपाण्डुनः'[2] 'प्रचयाघट्टितकङ्कटोत्थितैः'[3] 'करिणां कुम्भतटीविटङ्कतः'[4] इत्यादिषु । सप्तमे सर्गेऽपि ओजोगुणस्य बहूनि उदाहरणानि वर्तन्ते । कानिचनात्रोद्ध्रियन्ते—

रदद्वयेन स्फुटितेन पाटनात्
परिस्फुरद्दन्तचतुष्टयद्युतिः ।
अमर्त्यभावं भटपेटकेऽभज-
त्यमर्त्यदन्तित्वमवाप कुञ्जरः ॥
विषाणिनां तीक्ष्णक्षुरप्रखण्डिताः
सुदूरमुड्डीय रदाङ्कुराश्च्युताः ।
सुरप्रसूनावलिशङ्किभिर्भटै-
र्न वञ्चितास्तान् मुकुटेष्वताडयन् ॥[5]
भटेन नीतः श्रुतिहस्तखण्डना-
न्महाकरी निग्रहणोचितं विधिम् ।
ममज्ज लज्जामिव धारयन्भृशं
कृशानुवर्णे रुधिरापगाभरे[6] ॥

उक्तैरुदाहरणैः प्रमाणीभवति यद्बिल्हण ओजो-व्यञ्जकवर्णानां प्रयोगं कृत्वा-ऽपि काव्येऽर्थक्लेशाय स्थानं नादत्त । काव्यवाङ्मये इयं शैली कालिदासादनन्तरं बिल्हणभाषायामेव सुष्ठु वरीवर्ति ।

प्रसादगुणः—

यत्र श्रवणमात्रेणैवार्थबोधो भवेत्तत्र प्रसादगुणो भवति[7] । विक्रमाङ्कदेव-

१. विक्र० १५।३५ ।
२. विक्र० १५।३६ ।
३. विक्र० १५।६८ ।
४. विक्र० १५।७८ ।
५. विक्र० १७।५५, ५६ ।
६. विक्र० १७।५५ ।
७. श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत् ।
साधारणः समग्राणां स प्रसादगुणो मतः ।। का० प्र० ८।७६

चरिते प्रसादगुणस्य नास्ति न्यूनता। काव्यमिदं यद्यपि वीररसप्रधानं तर्ह्यपि बिल्हणेन प्रसादगुणस्य अतीव समादरः कृतोऽस्ति। यतो हि बिल्हणाय प्रसादगुणोऽतिशयेन रोचते। विक्रमाङ्कदेवचरिते प्रसादगुणे बिल्हणेन स्वीयां रुचिं प्रदर्शयितुं 'सा सप्रसादास्तु सरस्वती वः' इत्यादिरूपेण आदावेव सङ्केतितमस्ति। कालिदासस्य शैलीमनुसरतः बिल्हणस्य प्रसादं प्रति विशिष्टोऽनुरागः स्वाभाविक एव। बिल्हणभारत्याः सर्वप्रियतायाः सर्वप्रधानं कारणं प्रसादगुणगुम्फनमेव। काव्येऽस्मिन् सप्रसादा शब्दावली स्वरमणीयेन स्वरूपेण काव्यमिदं श्रेष्ठकोटिं प्राप्तवत्। अत्र हि यत्र प्रसादः समवायसम्बन्धेन बिल्हणभारतीमुपकरोति न तत्र सहृदयानां प्रसादस्य सीमा मातुं शक्यते। सप्रसादानि सर्वाणि उदाहरणानि यद्यपि अत्र नोद्धर्तुं शक्यन्ते तर्ह्यपि बिल्हणस्य प्रसादगुणोपादाने वैशिष्ट्यमुदाहर्तुं कतिपयानि पद्यानि उद्ध्रियन्ते—

वचांसि वाचस्पतिमत्सरेण साराणि लब्धुं ग्रहमण्डलीव।
मुक्ताक्षसूत्रत्वमुपैति यस्याः सा सप्रसादास्तु सरस्वती वः[1] ॥

अत्र सर्वाणि वर्णानि श्रवणसुखकराणि सद्योऽर्थबोधकानि च सन्ति। अत इदं पद्यं प्रसादगुणस्य सर्वश्रेष्ठेषूदाहरणेष्वेकतममिति नात्र संशयः। प्रसादगुणगुम्फिता बिल्हणस्य भारती श्रवणमात्रेणैव अर्थं बोधयितुं क्षमेत्युदाहर्तुं पद्यमेकं प्रस्तूयते—

पृथ्वीपतेः सन्ति न यस्य पार्श्वे
कवीश्वरास्तस्य कुतो यशांसि।
भूपाः कियन्तः न बभूवुरुर्व्यां
जानाति नामापि न कोऽपि तेषाम्[2] ॥

अत्र श्रवणमात्रेणैव नार्थबोधो भवति इति न कोऽपि वक्तुं श्रोतुं च क्षमः।

विधास्यति कथं धाता सर्गरत्नं तथाविधम्।
कथं वा सङ्घटिष्यन्ते तादृशाः परमाणवः[3] ॥

---

१. विक्र० १।७।
२. विक्र० १।२६।
३. विक्र० ४।८४।

उक्तपद्येऽपि प्रसादः प्रसाधयति बिल्हणभारतीम् । वक्ष्यमाणपद्येऽपि प्रसादः रञ्जयति सहृदयमनांसि—

निजासु राजधानीषु स्थितिं दधतु पार्थिवाः ।
तादृशः पुनरुत्साहो वीरसिंहासने कुतः[1] ॥
शुभाशुभानि वस्तूनि सम्मुखानि शरीरिणाम् ।
प्रतिबिम्बमिवायान्ति पूर्वमेवान्तरात्मनि[2] ॥

अस्मिन्पद्ये प्रसादगुणा भारती कस्य चित्तं स्वगुणेन नापहरति ?

निवेशनीयौ न शिरीषकोमलौ
भुजौ त्वया संवरणस्रजः पदे ।
महार्घपुष्पे समयेऽत्र मेनके
द्युमालिकास्ते कलयन्ति लुब्धताम्[3] ॥

अत्र प्रसादो गुणो बिल्हणभारतीं शिरीषकोमलामिव कलयन्नक्षिलक्षीभवति। वक्ष्यमाणपद्येऽपि महनीयेन पदलालित्येन बिल्हणस्य प्रसादः सम्यक् प्रसाधितोऽस्ति—

कयाऽत्र माला प्रथमं समर्पिता
न वेद्मि वादे युवयोस्तदन्तरम् ।
तदेष सौभाग्यनिधिर्भटाग्रणीः
करोतु वाचा स्वयमेव निश्चयम्[4] ॥

वक्ष्यमाणे पद्ये प्रसादगुणगुम्फनेन बिल्हणः कियल्लालित्यं कविताकान्तायै समर्पयतीति स्पष्टीभवति—

न नारदादस्ति परो विशारदः
परोपकारप्रवणासु वृत्तिषु ।
क्षणात्समुत्पाद्य महारणानि यः
करोति नः कामुकदुर्गतिच्छिदम् ॥[5]

---

१. विक्र० ४।७७ ।
२. विक्र० ४।३४ ।
३. विक्र० १७।५७ ।
४. विक्र० १७।६१ ।
५. विक्र० १७।६३ ।

पिता हरिः श्रीर्जननी तयोरिदं
पुरं ममैवेति विचिन्तनादिव ।
अजस्रमन्यायसहस्रकारिणः
स्मरस्य यत्रास्ति न कश्चिदङ्कुशः[1] ॥

उक्तपद्ये अर्थावगतौ कश्चिदन्तरायः केन प्रतिपादयितुं शक्यते ?

बिल्हणस्य प्रसादगुणगुम्फनकौशलं समीक्षमाणैर्वक्ष्यमाणपद्येऽपि प्रसादस्य लालित्यं न विस्मर्तुं शक्यते—

ब्रूमः सारस्वतकुलभुवः किन्निधेः कौतुकानां
तस्यानेकाद्भुतगुणकथा कीर्णकर्णामृतस्य ।
यत्र स्त्रीणामपि किमपरं जन्म भाषावदेव
प्रत्यावासं विलसति वचः संस्कृतं प्राकृतञ्च[2] ॥

वक्ष्यमाणपद्ये यन्न भवति अर्थावगमने कश्चिदपि अन्तरायः प्रसादस्यैव प्रसादस्तत्र कारणमित्यत्र नास्ति शङ्कावकाशः—

साङ्गो वेदः फणिपतिदिशा शब्दशास्त्रे विचारः
प्राणा यस्य श्रवणसुभगा सा च साहित्यविद्या ।
को वा शक्तः परिगणयितुं श्रूयतां तत्त्वमेतत्
प्रज्ञादर्शे किमिव विमले नास्य सङ्क्रान्तमासीत्[3] ॥

उदाहृतपद्यैर्बिल्हणस्य प्रसादगुणः रसोपकारकत्वेनातीव हृदयग्राही इति प्रतीयते । बिल्हणकाव्यं सर्वजनसमादृतं बभूव इत्यत्र प्रसादगुणस्य महान् योग इति न विचिकित्सास्पदम् । वक्ष्यमाणपद्येनोक्ततथ्यं समर्थ्यते—

ग्रामो नासौ न स जनपदः सास्ति नो राजधानी
तन्नारण्यं न तदुपवनं सा न सारस्वती भूः ।
विद्वान्मूर्खः परिणतवयः बालकः स्त्री पुमान्वा
यत्रोन्मीलत्पुलकमखिला नास्य काव्यं पठन्ति[4] ॥

---

१. विक्र० १७।३५ ।
२. विक्र० १८।६ ।
३. विक्र० १८।८२ ।
४. विक्र १८।८९ ।

उक्तपद्ये बिल्हणस्य सप्रसादां शैलीमालोक्य कोऽस्ति योऽस्य काव्यं भूयो भूयो न पठेत् न प्रशंसेच्च ।

दोषाः

काव्यरचनायां स्वतन्त्रैरपि कविभिः कतिपयानां नियमानां पालनमवश्यमेव कर्तव्यमिति तु निश्चितमेव । यत्र यत्रापि कविभिस्तेषां नियमानामुल्लङ्घनं कृतं तत्र तत्रैव ते आलोचकानामालोचनविषयतां प्रपेदिरे । नियमेषु प्रमादं कुर्वन्तः कालिदासभारविप्रभृतयोऽपि आलोचनविषयतामापन्ना दृश्यन्ते । आचार्यमम्मटेन स्वीयकाव्यलक्षणे 'अदोषौ' इत्युक्त्वा काव्ये यथासम्भवं दोषनिषेधस्य निर्देशः कृतोऽस्ति, परं कवयः स्वकृतिषु कतिचिद् दोषान् जानन्तोऽपि न तत्र परिवर्तनं विदधति । किंबहुना महाकविः कालिदासोऽपि 'एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्वाङ्कः' इति प्रतिपादयन् स्वकाव्ये स्वल्पदोषस्थितिं स्वीकुर्वन्नपि तत्र गुणाधिकतया स्वल्पं दूषणमपि भूषणमेव मनुते । केचन आलोचका महाकवीनां दोषपूर्णस्थलेषु परिवर्तनेन[1] तत्र अदोषतामानेतुं प्रयतन्ते । परमिदं नोचितं यतो हि न हि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः । उक्तञ्च—

कीटानुवेधरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मतो यत्र रसाद्यनुगमः स्फुटः[2] ॥

कालिदास इव बिल्हणोऽपि स्वीये काव्ये दोषाणां विद्यमानतां स्वीकरोत्येव । परं तस्याऽयं दृढो विश्वासो यत् सहृदयास्तत्काव्यस्य रसध्वन्यादिषु अनुरज्यन्तः दोषदृष्टिं न विधास्यन्ति इति ।

कर्णामृतं सूक्तिरसं विमुच्य दोषे प्रयत्नः सुमहान्खलानाम् ।
निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव[3] ॥

उक्तपद्येन प्रमाणीभवति यद् बिल्हणः स्वकाव्यदोषाणां नास्ति अनभिज्ञः, परमसौ कस्मैचिदपि दोषनिरीक्षणस्य आज्ञां न ददाति । महाकवेरियमुक्तिः तथ्यपूर्णा एव प्रतिभाति, यतो हि अस्य काव्यस्याध्ययनेन अनुभूयते यत् काव्ये रसादिषु रममाणाः सहृदया न तत्र दोषानन्वेष्टुं प्रयतन्ते । वस्तुतोऽत्र दोषाणां नितरामभाव एव वर्तते । ये केचन (वक्ष्यमाणाः) दोषा दृष्टिपथमवतरन्त्यपि ते स्वीयया

१. नैषधपरिशीलन, पृ० २४२-२४२ टिप्पणी ।
२. साहित्यदर्पणः, परिच्छेदः १ ।
३. विक्र० १।२९ ।

स्वल्पया संख्यया चन्द्रमसि मृगाङ्कवदेव विद्यन्ते ।

काव्ये मुख्यार्थस्य विघातोऽपकर्षो वा दोषः—

मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयवाच्यः ।
उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः[१] ॥

विक्रमाङ्कदेवचरितं निर्दुष्टं विधातुं यद्यपि बिल्हणस्य प्रयत्नः सफल एव तर्ह्यपि कतिपयेषु स्थलेषु दोषास्तित्वमन्वेष्टुं शक्यते ।

समासगतो विरुद्धमतिकृत्पददोषः—

यत्र प्रकृतार्थप्रतिबन्धकस्य अप्रकृतार्थस्य प्रत्यायनं भवेत्तत्र विरुद्धमतिकृद्दोषो भवति । अस्य दोषस्य स्थितिर्विक्रमाङ्कदेवचरिते वक्ष्यमाणे पद्येऽवलोक्यते—

भाग्यैः प्रभूतैर्भगवानसौ मे सत्यं भवानीदयितः प्रसन्नः ।
चालुक्यगोत्रस्य विभूषणं यत् पुत्रं प्रसादीकृतवान् भवन्तम्[२] ॥

अत्र 'भवानीदयित' इत्यत्र भवस्य स्त्री भवानी तस्याः दयितः भवानीदयितः । अतोऽत्र भवान्याः पत्यन्तरस्य प्रत्यायनं भवति । तदेवात्र समासगतो विरुद्धमतिकृद्दोषोऽस्ति ।

ग्राम्यत्वदोषः—

लीलावलत्कण्ठमकुण्ठभावा निरीक्षिता कापि नरेश्वरेण ।
मुमोद पुष्पायुधभिल्लभल्ल-भिन्ना कुरङ्गीव कुरगङ्काक्षी[३] ॥

अत्र भिल्लभल्लादयः शब्दाः ग्राम्याः ।

अवाचकत्वदोषः—

यत्र शब्देऽर्थबोधस्य सामर्थ्यं न भवेत्तत्र अवाचकत्वं नाम दोषो भवति । विक्रमाङ्कदेवचरितेऽवाचकत्वम्—

मृदुहृदयतया गुणानुरागादतिमहतः प्रणयाच्च राजपुत्रः ।
हिमकरकरकाण्डपाण्डुगण्ड-स्थलगलदश्रुजलश्चिरं ललाप[४] ॥

---

१. काव्यप्रकाशः, कारिका ७१ ।
२. विक्र० ३।४४।
३. विक्र० १२। १८ ।
४. विक्र० ६।८ ।

अत्र 'ललाप' इति क्रियापदे अवाचकत्वं नाम दोषः, उपसर्गं विनाऽर्थबोधाऽभावात् ।

अनुचितार्थत्वदोषः—

तयोपदेशः सुकृतः कुमार्या वृथागमन्नीच इवोपकारः ।
प्रेमाणि जन्मान्तरसञ्चितानि प्रादुर्भवन्ति क्वचिदेवमेव[1] ॥

अत्र 'वृथागमन्नीच इवोपकारः' इत्यत्र अनुचितार्थनामोपमादोषो विद्यते ।

श्रुतिकटुः—

प्रबुद्धकाश्यार्ः परितापसङ्कुचत्सपङ्कपङ्केरुहिणीदलाङ्किताः ।
दशामलब्धाब्धिसमागमाश्चिरं वियोगयोग्यामभजन्त निम्नगाः[2] ॥

अत्र 'काश्यार्' इति पदे श्रुतिकटुः दोषः ।

क्षपासु संप्रत्यभिसारिकाजनः स्खलत्पदं कर्दमपिच्छिले पथि ।
करोति कार्तस्वरदण्डशङ्कया तडिल्लतायामवलम्बनादरम्[3] ॥

अत्र 'कार्त' इति पदं श्रुतिकटु ।

काव्येऽस्मिन् केषुचित्स्थलेषु स्वपदवाच्यरसदोषोऽपि दृश्यते । इदमत्रोदाहरणम्—

लीलावगाहच्युतकुङ्कुमेषु लक्ष्यस्तदङ्गेषु नखाङ्कमार्गः ।
शृङ्गाररत्नाकरतीरभाजां मुद्रां दधे विद्रुमपल्लवानाम्[4] ॥

अत्र शृङ्गारपदोपादानेन स्वपदवाच्यता ।

वीररसस्य स्वपदवाच्यता—

महाभटानां करवालयष्टयः
समुच्छलद्वीररसोर्मिनिर्मलाः ।
विनिर्गताः कोशबिलोदरात्ततः
कृतान्तपाशोरगसन्निभा बभौ[5] ।

---

१. विक्र० ६।६२ ।
२. विक्र० १३।८ ।
३. विक्र० १३।४७ ।
४. विक्र० १२।७५ ।
५. विक्र० १५।४५ ।

अत्र 'वीररसोर्मिनिर्मला' इत्यत्र वीररसपदोपादानेन दोषः। एवञ्चात्रापि—

अथ वीररसावतारतस्तरसा पल्लवितेन चेतसा ।
जगदद्भुतभूरिसाहसः प्रहसन्नुच्चलति स्म पार्थिवः[1] ॥

अत्र 'वीररसावतारतः' इति वीररसपदोपादानेन स्वपदवाच्यत्वदोषो भवितुमर्हति । अत्र च—

समदप्रतिपक्षमर्दनाद्बहुशस्त्रव्रणगर्तशालिनि ।
निखिलेऽपि यदङ्गविस्तरे विदधे वीररसः समाश्रयम्[2] ॥

अत्रापि 'वीररससमाश्रयम्' इति पदोपादानेन वीररसस्य स्वपदवाच्यता भवितुमर्हति । एवंविधा अन्येऽपि दोषाः प्रतिपादयितुं शक्यन्तेऽत्र, परं तत्र बहुषु दोषाभासमात्रतैव प्रतिभाति । दोषान्वेषणे प्रयासविशेषः 'दोषे प्रयत्नः सुमहान् खलानाम्' कवेरिमामुक्तिं समादृत्य परिह्रियते ।

१. विक्र० १५।२१ ।
२. विक्र० १५।४० ।

११

अलङ्कारसौन्दर्यम्

विक्रमाङ्कदेवचरिते प्रायः सर्वेषामेवालङ्काराणां सुष्ठु विन्यासोऽस्ति । इह काव्येऽलङ्काराणामुचितस्थानेषु निवेशो बिल्हणस्य कविताकान्तास्वरूपं प्रभातरलं ज्योतिरिव विधत्ते । यद्यपि बिल्हणाय रसप्रधाना काव्यशैली एवाधिकं रोचते तर्ह्यपि विक्रमाङ्कदेवचरिते अलङ्काराणां स्थितिः कस्माच्चिदपि अलङ्कारवादिनः कवेरलङ्कारनिवेशगर्वं शैथिल्यवीथीं प्रापयितुं नालमिति तु न।

शब्दालङ्काराः—

बिल्हणेन अलङ्काराणां प्रयोगः अर्थगौरवलाभायैव विहितः। शब्दालङ्कारेषु अनुप्रास एव बिल्हणस्याधिकं प्रियः । श्लेषस्यापि यत्र कुत्रचित्स्वल्पः प्रयोगो दृश्यते । अलङ्कारप्रयोगेण शब्दसौन्दर्यवर्धनं नास्ति बिल्हणस्य लक्ष्यम् । अत एव यमकसर्वतोभद्रचित्रबन्धादीनां नास्ति इह समादरः ।

अनुप्रासः—

रसाद्यनुगतः प्रकृष्टो न्यासः अनुप्रासः[१] । वर्णसाम्यमनुप्रासः[२] इति लक्षणात् । यत्र अनुप्रासे वकार-बकारयोः, शकार-षकारयोः, नकार-णकारयोः, यकार-जकारयोः मिथः भेदो न भवति असौ श्रुत्यनुप्रास उच्यते । विक्रमाङ्कदेवचरिते यद्यपि बाहुल्यं वृत्त्यनुप्रासस्यैव तर्ह्यपि श्रुत्यनुप्रासस्य उदाहरणानि काव्येऽस्मिन् दृश्यन्ते एव । उदाहरणार्थं कानिचित् स्थलान्यत्र उद्ध्रियन्ते—

१—महात्मनाममार्गेण[३] ॥

२—गिरिजानाथनगरे समारोहणमुत्सवः[४] ॥

---

१. काव्यप्रकाशः, पृ० ३०८ ।

२. काव्यप्रकाशः, कारिका १०४ ।

३. विक्र० ४।६५ ।

४. विक्र० ४।५५ ।

३—**कौपीन**कार्प**ण**परेव पुरा**ङ्ग**नानाम्[१] ॥

४—**मुखान्यभूवन्** द्रविडा**ङ्गनानामुष्णोष्णनिः**श्वासविधूसराणि[२] ॥

५—उत्तर्ज**नीकेन** मुहुःकरेण[३] ।

नात्र सन्देहो यद्बिल्हणेन श्रुत्यनुप्रासापेक्षया छेकानुप्रासायाऽधिकं महत्त्वमदायि। छेकानुप्रासस्य वृत्तिगतस्य चापि मनोहराणि रूपाणि काव्येऽत्र वरीवर्तन्ते ।

'अनेकस्यैकवारं सादृश्यं छेकानुप्रासः'[४] । छेकानुप्रासेन बिल्हणेन स्थाने स्थाने स्वीयकविताकामिनी समलङ्कृतास्ति । इमान्यत्रोदाहरणानि—

१— **कृताकृता**वेक्षणबद्धलक्ष्यः[५] ।

२—विपक्षवीराद्भुतकीर्ति**हारी हारी**त इत्यादि पुमान्स यत्र ।
मानव्यनामा च बभूव मानी **मानव्ययं** यः कृतवानरीणाम्[६] ।

३—**समूलनिर्मूलन**कोविदस्य[७] ।

४—एका ग्रहीता यदनेन **धारा धारा**सहस्रं यशसोऽवकीर्णम्[८] ।

५—यत्तत्र सौवर्ण**तुलाधि**रूढे चक्रे स पाषाण**तुलाधि**रोहम्[९] ।

६—**रराज** धा**राज**लेनैव रणेषु धाम्ना[१०] ।

७—स **यामिक**ानीव न **यामि**नीपतिः[११] ।

८—जगत्त्रयी **कार्मणकर्मणि** क्षमं निरीक्ष्य लीलायितमेणचक्षुषाम्।
स्मरेण यत्र **स्मरता** पराभवं **भवाय** भूयः परिबोध्यते धनुः[१२]॥

---

१. विक्र० ३।७६ ।
२. विक्र० ३।६५ ।
३. विक्र० १।४८ ।
४. काव्यप्रकाशः । कारिका १०६ ।
५. विक्र० १।४८ ।
६. विक्र० १।५८ ।
७. विक्र० १।६८ ।
८. विक्र० १।९६ ।
९. विक्र० १।९८ ।
१०. विक्र० १।१०४ ।
११. विक्र० २।५ ।
१२. विक्र० २।१४ ।

वृत्त्यनुप्रासः—

एकस्यानेकस्यापि व्यञ्जनस्य द्विकृत्वा बहुकृत्वा वा सादृश्यं वृत्त्यनुप्रासः । एकस्याप्यसकृत्परः[1] । वृत्त्यनुप्रासस्य बहूनि उदाहरणानि विक्रमाङ्कदेवचरिते वरीवर्तन्ते । महाकविना बिल्हणेनास्यानुप्रासस्य प्रयोगेऽपि स्वीयं वैदग्ध्यं प्रदर्शितमस्ति । परन्तु प्रौढपाण्डित्यप्रदर्शनभावनया अनुप्रासप्रयोगेण काव्ये क्लिष्टताय मनागपि स्थानं न दत्तम् । वृत्त्यनुप्रासस्य समेषामुदाहरणानामत्रोद्धरणं गौरवाय भवेदिति कृत्वा कानिचन एव प्रस्तूयन्ते—

१—**पद्मे पद्माकरानेव** पुनः सद्मत्वमानय[2] ॥

२—तत्रावतीर्य **धौरेयो धीराणां धरणीपतिः** ।
स्नात्वा **चण्डीशचरणद्वन्द्वचिन्तापरोऽभवत्**[3] ॥

३—तेन **केरलभूपालकीलालकलुषीकृतः**[4] ।

४—**लोललाङ्गूलदण्डानां** द्वाररक्षा समर्पिता[5] ॥

५—गाङ्गकुण्डपुरस्त्रीणां गलत्कुण्डलमण्डलाः[6] ॥

६—न भोजराजः कविरञ्जनाय मुञ्जोऽथवा कुञ्जरदानदक्षः[7] ।

७—महाहवानाहवमल्लसूनुः[8] ॥

८—लावण्यलुब्धाभिरलब्धमेव भूपालकन्यामधुपाङ्गनाभिः[9] ॥

९—तं भालचन्द्रं परिपूर्यमाणमालोक्य लावण्यकलाकलापैः[10] ॥

१०—प्रथमममरवृन्दानन्दिनान्दीनिनादः[11] ।

११—चिराय धाराजलपानलम्पटा कृपाणलेखासु मुमोच लोचने[12] ।

---

१. काव्यप्रकाशः, कारिका १०७ ।
२. विक्र० ४।७६ ।
३. विक्र० ४।६६ ।
४. विक्र० ४।१८ ।
५. विक्र० ४।२५ ।
६. विक्र० ४।२१ ।
७. विक्र० ३।७४ ।
८. विक्र० ३।६८ ।
९. विक्र० ३।१९ ।
१०. विक्र० ३।२० ।
११. विक्र० २।८९ ।
१२. विक्र० २।७४ ।

१२—सशब्दकाञ्चीमणिबिम्बितैर्बभौ[1] ।

१३—स गण्डपालीं बिसदण्डपाण्डुराम्[2] ।

१४—पुराङ्गनावक्त्रसहस्रकान्तिभिस्तिरोहिते रात्रिषु तारकापतौ ।
क्व रौप्यकर्पूरकरण्डपाण्डुरः शशीति यत्र भ्रममेति रोहिणी[3] ॥

१५—मीलद्विलासालकपल्लवानि विशीर्णपत्रावलिमण्डनानि[4] ।

अन्त्यानुप्रासः—

१—निकारमार्गेण निराचकार[5] ॥

२—पूर्वदिक्तिलकबिन्दुरिवेन्दुः[6] ॥

३—प्रत्यूषवेलानिलाः[7] ।

४—मन्मथमुन्ममाथ[8] ।

५—स्मरासिधारामिव वारिधाराम्[9] ।

किंबहुना—बिल्हणेन अनुप्रासस्य समेषामेव भेदानां प्रयोगेण अर्थसौन्दर्येण सममेव शब्दसौन्दर्यं संवर्धितमस्ति ।

श्लेषालङ्कारः—

अस्मिन्काव्येऽर्थालङ्काराणां सहयोगार्थमेव श्लेषस्य प्रयोगो दृश्यते । स्वतन्त्ररूपेण शब्दश्लेषस्य समादरो नावलोक्यते ।

अर्थालङ्काराः—

काव्ये अर्थालङ्काराणां स्थितेर्विशिष्टं महत्त्वमस्ति । अर्थालङ्कारान् विना भाषायाः स्वरूपं समलङ्कृतं न भवितुमर्हति । 'अर्थालङ्काररहीना विधवेव सरस्वती' इत्युक्तौ नास्ति मनागप्यसत्यता । रसोपकारितायामर्थालङ्काराणां महान्

---

१. विक्र० २।७० ।
२. विक्र० २।६० ।
३. विक्र० २।८ ।
४. विक्र० १।५९ ।
५. विक्र० ६।९६ ।
६. विक्र० ६।३५ ।
७. विक्र० ११।८५ ।
८. विक्र० १२।७ ।
९. विक्र० १२।६८ ।

योगोऽस्ति[1]। जयदेवस्तु अलङ्काराः काव्यस्यानिवार्या धर्मा इति मनुते[2]। आचार्यरुद्रटेन अर्थालङ्काराश्चतुर्धा विभक्ताः[3]। परमुत्तरवर्तिभिराचार्यैः अधिकतराणामलङ्काराणां मूले उपमाया एव सत्ता स्वीकृतास्ति। अप्पयदीक्षितस्तु उपमाया महत्त्वं प्रतिपादयन्नित्थमाचष्टे—

उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः॥

उपमा—

यद्यपि बिल्हणेन अर्थालङ्कारेषु उत्प्रेक्षाया एव प्राचुर्येण प्रयोगः कृतस्तर्ह्यपि उपमां प्रति तस्य रुचिर्नास्ति न्यूना। प्रायः समस्ते एव काव्ये उपमायास्तन्मूलकानाञ्चालङ्काराणां सौन्दर्यं विलसत्येव। वक्ष्यमाणं पद्यमुपमाप्रयोगे बिल्हणस्य कौशलं शंसति—

अवीक्षमाणा सदृशं गुणैर्मम क्रमागता श्रीरियमाश्रयं पुनः।
पयोधिमध्यस्थितपोतकूपकस्थिता शकुन्तीव मुहुः प्रकम्पते[4]॥

यथा सूर्यमण्डलगतश्चन्द्रः कान्तिहीनो भवति तथैव तपःपरिश्रमेणासौ राजापि म्लानो बभूव इति सरलो भावः कथमुपमाप्रयोगेण मनोहारित्वं प्रापितः बिल्हणेनेति अस्ति द्रष्टव्यम्—

स सौकुमार्यैकधनोऽपि सोढवांस्तपोधनैर्दुष्प्रसहं परिश्रमम्।
रराज तीव्रे तपसि स्थितो नृपः शशीव चण्डद्युतिमण्डलातिथिः[5]॥

उपमानोपमेयवाचकशब्दानां समेषामेकत्रोपादानेन पूर्णोपमालङ्कारो भवति। वक्ष्यमाणपद्ये पूर्णोपमायाः सौन्दर्यपूर्णं रूपमपि किमपि मनोहरमेव—

---

१. उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥ का० प्र० ८।२।

२. अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मादनुष्णमनलं कृती॥ चन्द्रालोके

३. अर्थस्यालङ्कारा वास्तवौपम्यातिशयश्लेषाः।
एषामेव विशेषा अन्ये तु भवन्ति निःशेषाः॥
—रुद्रटः काव्यालङ्कारे ७।९

४. विक्र० २।३१।

५. विक्र० २।४५।

क्ष्माभृत्कुलानामुपरि प्रतिष्ठामवाप्य रत्नाकरभोगयोग्यः ।
क्रमेण तस्मादुदियाय वंशः शौरेः पदाद् गाङ्ग इव प्रवाहः ॥[1]

अत्र हि क्ष्माभृत्कुलानामुपरि प्रतिष्ठानत्वं रत्नाकरभोगयोग्यत्वञ्च साधारणधर्मः, वंश उपमेयः, प्रवाह उपमानम्, इव इति वाचकशब्दः । पूर्णोपमाया एकमन्यन्मनोहरमुदाहरणं प्रस्तूयते—

यन्मण्डलाग्रं न मुमोच लक्ष्मीर्धारा जलोत्था जलमानुषीव ।[2]

अत्र लक्ष्मीरुपमेया, जलमानुषी उपमानम्, जलोत्थिता साधारणधर्मः, इव वाचकशब्द आस्ते । लुप्तोपमाया उदाहरणम्—

स्वाभाविकादुष्णगभस्तिभासः क्षत्रोष्मणो दृष्टिविघातहेतोः ।
यस्मिन् परित्रस्त इति क्षितीन्द्रे क्षमं न चिक्षेप कलिः कटाक्षम्[3] **॥**

अत्र हि क्षत्रोष्मा उपमेयः, उष्णगभस्तिभासः उपमानम्, दृष्टिविघातश्च साधारणधर्मः, वाचकशब्दस्य चादर्शनादियं वाचकलुप्तोपमास्ति ।
श्लेषानुप्राणिताया उपमाया उदाहरणम्—

प्रधावत्सम्मुखानेकवाहिनीगाहनक्षमः ।
अम्भोधिरिव दुष्प्रापः सत्त्वराशिस्तथाविधः[4] **॥**

अत्र हि वाहिनी=नदी, वाहिनी=सेना इति श्लेषमाध्यमेन उपमाया उपमात्वमुत्कर्षजनकम् । अत्र काव्ये बहुषु स्थलेषु उपमालङ्कारस्य माध्यमेन काव्यशोभासंवर्धनत्वं सम्पन्नमस्ति । प्रमुखाणां तेषां सङ्केताङ्का एव निर्दिश्यन्ते[5] ।

उत्प्रेक्षा—

नूतनाभिः कल्पनाभिः काव्ये चमत्कृतिमाधातुं प्रायः सर्वे एव कवय उत्प्रेक्षां समाश्रयन्ति । उपमेयस्य उपमानेन सम्भावनमुत्प्रेक्षा[6] । भामहादिभिः पूर्वाचार्यैः अस्य अलङ्कारस्य अतिसंक्षिप्तं विवेचनं कृतमस्ति परमुत्तरवर्तिभिराचार्यैः सविस्तरं विवेचनं कुर्वद्भिरस्य अनेके भेदा उपभेदाश्च प्रतिपादिताः । उत्प्रेक्षालङ्कार

---

१. विक्र० १।५७ ।
२. विक्र० १।८७ ।
३. विक्र० १।१०० ।
४. विक्र० ४।८५ ।
५. विक्र० ४।१, १२, २४, १००, १०६, ५।३४-३५, ५७, ७७, ८०; ६।२६, ६१; ८।२७, ८०; ९।१,३८, ४५, ५१, १०७। ११६; १०।१, ८४; ११।४६; १२।३७, ७४; १३।६, १६ ।
६. संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् । काव्यप्रकाशः १०।१३७ ।

एव प्रियतम आसीद्बिल्हणस्येति विक्रमाङ्कदेवचरिते अलङ्कारसमीक्षणेन स्पष्टीभवति। अस्य अलङ्कारस्य प्रयोगे बिल्हणस्य प्रावीण्यं न शब्दैः परिमातुं शक्यते। उत्प्रेक्षाप्रयोगे बिल्हणः सर्वान् कवीनतिशेते इति चेदुच्येत न तर्हि तत्र शङ्कावकाशः। यथा कालिदासोऽनेकानलङ्कारान् प्रयुञ्जन्नपि उपमालङ्कारेण सह वैशिष्ट्येन ममत्वं धत्ते तथैव अनेकविधालङ्कारप्रयोगकुशलोऽप्ययं बिल्हण उत्प्रेक्षालङ्कारेण सह ममतातिशयं धत्ते। यथा कालिदासस्य नाम्ना सह उपमायाः संयोगस्तथैव[1] बिल्हणस्याभिधानेन साकमुत्प्रेक्षायाः संयोगोऽपि त्वरितमेव प्रसिद्धिमेष्यति। अस्मिन्काव्ये एतावानुत्प्रेक्षायाः प्रयोगः यावानन्येषां सम्मिलितानामलङ्काराणाम्। यद्यपि सर्वाणि एव उत्प्रेक्षारूपाणि अतीव मनोहराणि उद्धरणार्हाणि च सन्ति तर्ह्यपि तेषां सर्वेषामत्रोद्धरणस्यासम्भवत्वात् कतिपयान्येव उद्ध्रियन्ते। महाकाव्यस्यादिमे एव पद्ये उत्प्रेक्षाप्रयोगेण कवेरुत्प्रेक्षाप्रियत्वं मुखरितम्—

भुजप्रभादण्ड इवोर्ध्वगामी स पातु वः कंसरिपोः कृपाणः।
यः पाञ्चजन्यप्रतिबिम्बभङ्ग्या धाराम्भसः फेनमिव व्यनक्ति[2]॥

अत्र हि कृष्णसम्बन्धिनः कृपाणस्योर्ध्वप्रसरणशीलत्वरूपसमानधर्मसम्बन्धनिमित्तकं भुजकान्तिदण्डत्वेनाऽऽहार्यसम्भावनमुत्प्रेक्षेवपदवाच्या। कृष्णस्योन्नतकृपाणप्रतिबिम्बितपाञ्चजन्ये शुभ्रत्वात्फेनोत्प्रेक्षा सा च विषयस्य भङ्गिपदेनापह्नुतविषया।

फलोत्प्रेक्षा—

मुखेन्दुसञ्चारकृताभिलाष-कुरङ्गभीत्यर्थमिवार्पितेन।
कण्ठावसक्तेन स राजसूनुरराजत व्याघ्रनखाङ्कुरेण[3]॥

अत्र हि बालमुखेन्दौ लाञ्छनमृगस्य आगमवारणरूपफलस्य सम्भावनम्।

पूर्वमयं चोलभूमेर्भर्ता विक्रमेणाऽऽक्रान्ते चोलदेशे युद्धजन्यपरिश्रमात् पलायनजाच्च परिश्रमात् पात्राभावात् स्तनपानमिव गिरिनिर्झरजलस्य मुखेनैव पशुवत्पानान्मातृत्वमापन्नायाश्चोलभूमेरुपभोगं परिहरति इति कल्पना बिल्हणेन सुललितपदावल्या उत्प्रेक्षिता वक्ष्यमाणपद्ये—

---

१. 'उपमा कालिदासस्य' इत्यादिपद्ये।

२. विक्र० १।१।

३. विक्र० ३।१३।

तस्मिन् विरुद्धे गिरिनिर्झराम्बुश्रमातिरेकात्पशुवन्निपीय ।
मातेति चोलः क्षितिमादिभर्ता कृत्वा स्तनास्वादमिवोत्ससर्ज[1] ॥

यत्सागरे द्रविडनरपतिप्रतापभयेन किमपि परस्ताद् गते सति अकृतोद्वाह-मङ्गलाया लक्ष्म्या बहिर्निर्गतम् आदिधामैव नगरमिति कल्पनया अनन्यलावण्या बिल्हणस्य उत्प्रेक्षा सुशोभते—

द्रविडनरपतिप्रतापभीत्या किमपि गते पयसां निधौ परस्तात् ।
यदविहितविवाहमङ्गलाया बहिरिव निर्गतमादिधाम लक्ष्म्याः[2] ॥

अत्र हि गाङ्गकुण्डचोलपुरस्य लक्ष्म्याः प्रथमगेहत्वेनोत्प्रेक्षणादुत्प्रेक्षा ।

इमे दुष्टा भूपा निरन्तरं नारीसहस्रमध्यवर्तनाद्विगतपौरुषा इव पदे पदे समन्ततोऽपि भयं परिकलयन्ति इत्यादि भावो बिल्हणोत्प्रेक्षया सौष्ठवानुस्यूत इव परिलक्ष्यते—

अविरततरुणीसहस्रमध्यस्थितिविगलत्पुरुषव्रता इवैते ।
प्रतिपदमतिकातराः क्षितीशाः परिकलयन्ति भयं समन्ततोऽपि[3] ॥

अत्र तरुणीसहस्रमध्यस्थितेर्नष्टपुरुषबलस्य हेतुत्वेन सम्भावनाद्धेतूत्प्रेक्षा विलसति ।

वायुभक्षकाणां पन्नगानां निवासदानाद् रुष्टा एव मलयपवना उदीचिं प्रस्थिता इतीमं भावमित्थमुत्प्रेक्षते बिल्हणः—

कृतप्रकोपाः पवनाशनानां निवासदानादिव पन्नगानाम् ।
विनिर्ययुश्चन्दनशैलकुञ्जादाशामुदीचीं प्रति गन्धवाहाः[4] ॥

नायिकायाः पादौ रक्तकमलिनीसदृशौ आस्तामिति सामान्यो भाव उत्प्रेक्षाबलेन अतीव मनोहारी वर्तते—

स्तनभारोऽत्र वक्त्रेन्दुचन्द्रिकावरणं मम ।
इति तत्पादयोर्लग्ना वेद्मि प्राङ्गणपद्मिनी[5] ॥

अरुणत्वसाधर्म्यात्प्राङ्गणपद्मिनी तत्पादयोर्लग्नेत्युत्प्रेक्षणादत्र हेतूत्प्रेक्षेति ।

अष्टमसर्गे बिल्हणस्य उत्प्रेक्षासु यत्सौन्दर्यं दृश्यते तत्साम्यमन्यत्र दुर्लभ-मेवास्ति । नायिकाया आताम्रवर्णचरणवर्णनेऽपि इयमुत्प्रेक्षा नितान्तं मनो-हारिणी—

---

१. विक्र० ३।६६ ।
२. विक्र० ६।२२ ।
३. विक्र० ६।३४ ।
४. विक्र० ७।५ ।
५. विक्र० ८।७ ।

अमूल्यस्य मम स्वर्णतुलाकोटिद्वयं कियत् ।
इति कोपादिवाताम्रं पादयुग्मं मृगीदृशः ॥[1]

अत्र हि स्वर्णतुलाकोटिद्वयमित्यत्र श्लेषसत्त्वादियं श्लेषानुप्राणितोत्प्रेक्षा ।

नायिकायाः शरीरे शनैः शनैः कामचिह्नानि अङ्कुरितान्यासन्निनीमं भावं रञ्जयन्ती बिल्हणस्य उत्प्रेक्षा सर्वोत्कर्षेण वर्तते इति को न स्वीकुर्यात् ? तद्यथा—

जाने रात्रिषु तन्मध्ये ददाति शनकैः पदम् ।
गम्भीरनाभिकुहर-प्रवेशाशङ्कया स्मरः[2] ॥

अत्र रात्रौ गम्भीरनाभिकुहरे पतनमेव शनकैः पददानरूपकारणमिति प्रतिपादितत्वाद्धेतूत्प्रेक्षा ।

सकङ्कणयोर्भुजयोर्वर्णनमुत्प्रेक्षया कियद्रम्यं समजायतेत्यस्ति पद्येऽस्मिन् दर्शनीयम्—

कृशाङ्ग्याः कुचभारेण दूरमुत्सारितौ भुजौ ।
वहतः कलहायेव वाचालां वलयावलिम्[3] ॥

अत्र हि वलयावलिधारणस्य कलहे उपयोगित्वरूपफलेनेयं फलोत्प्रेक्षा । वक्ष्यमाणपद्येऽपि बिल्हणस्य प्रभावशालिन्या उत्प्रेक्षाया गौरवं महते काव्यसौष्ठवाय कल्पते—

उद्यानेभ्यः सकलभुवनाश्चर्यमाधुर्यधुर्यं
पीत्वा द्राक्षारसमिव करैर्जातसन्तापशान्तिः ।
ज्येष्ठाषाढेष्वपि कमलिनीकामुको यत्र धत्ते
रत्नश्रेणिकिरणकलिकां कोमलामंशुमालाम्[4] ॥

यादृशानि मनोहराणि उत्प्रेक्षोदाहरणानि अत्रोद्धृतानि तादृशान्येव बहूनि अत्र काव्ये प्रतिपदं द्रष्टुं शक्यन्ते । तेषामत्रोद्धरणं गौरवाय भवेदिति भिया तेषु केषाञ्चन सङ्केताङ्का एव पादटिप्पण्याम् अङ्किताः[5] ।

---

१. विक्र० ८।८ ।

२. विक्र० ८।३२ ।

३. विक्र० ८।६३ ।

४. विक्र० १८।२ ।

५. विक्र० १।७-८, १०, ३२, ३४-३५, ४७-४८, ५५, ७३, ७५, ७६, ७९, ८८, ९१, ९९, १०४-१०५, १०९, ११६, २।१, ३, ७, १०, १२, १८, २१, ३७, ६९-७३; ३।३-४, ६, १५, २३-२४,

रूपकम्—

विषयिणो रूपेण विषयस्य रञ्जनं रूपकम्[1] ।

विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् ।

रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः[2] ॥

विक्रमाङ्कदेवचरिते रूपकच्छटापि महतीं चमत्कृतिमाधत्ते । महाकविना बिल्हणेन उत्प्रेक्षोपमयोरनन्तरं रूपकमपि पर्याप्तरूपेण समादृतम् । इमान्यत्रोदाहरणानि—

अलौकिकोल्लेखसमर्पणेन विदग्धचेतःकषपट्टिकासु ।

परीक्षितं काव्यसुवर्णमेतल्लोकस्य कण्ठाभरणत्वमेतु[3] ॥

अत्र हि काव्ये सुवर्णाभेदारोपस्य विदग्धचेतःसु कषपट्टिकारोपे च कारणत्वात् परम्परितरूपकम् । विक्रमाङ्कदेवचरितस्यान्यदेकं रूपकसुरूपमुदाहरणार्थं प्रस्तूयते—

एषास्तु चालुक्यनरेन्द्रवंशसमुद्गतानां गुणमौक्तिकानाम् ।

मद्भारतीसूत्रनिवेशितानामेकावली कण्ठविभूषणं वः[4] ॥

अत्र गुणेषु मौक्तिकारोपे वंशे वेणुत्वारोपस्य कारणत्वात्, वाक्यावल्यामेकावल्या आरोपे भारत्यां सूत्रारोपस्य कारणत्वाच्च परम्परितरूपकम् ।

नियतारोपणोपायः स्यादारोपः परस्य यः ।

तत्परम्परितं श्लिष्टे वाचके भेदभाजि वा ॥

६१-६२, ७०, ७३, ७७; ४।३-५, १०-११, १६, २३, ३८-३६, ४१, ५०, ६३-६५, ८१, ६३, ६६; १०२, १०४, १०८; ५।२०, २१, २६। ४६, ६३, ६५, ६७, ६६, ७१-७२; ६।२२-२३, ४१, ४७-४८, ४६, ५१, ८४, ८७, ६४; ७।४, ६, २५, २७, ३३, ४३, ४५, ५५; ८।२, १३, १८, २४, २६, ४४, ५५, ५८-६२, ६७-७०; ६।१२, २३, २६, ३४, ४७, ५४, ५६-५७, ६२, ६५, ६८; १०।२, १४, २२-२३, २६, ४२, ४४-४५, ५७, ५६; ११।१३, २८-३०, ३४, ५१-५२; १२।६, १२, १५, १७, २१, ४० इत्यादयः ।

१. कुवलयानन्दः, पृ० १६ ।
२. तत्रैव, पृ० १५ ।
३. विक्र० १।२४ ।
४. विक्र० १।३० ।

इति लक्षणात् । बिल्हणरूपकस्य रूपं महन्मनोहरमिति समर्थयितुमुदाहरणं प्रस्तूयते--

निर्वतिताश्चन्दनलेपपाण्डुभिर्नतभ्रुवां यत्र समुन्नतैः स्तनैः ।
मुखानिला एव कदर्थनक्षमा भवन्ति माने मलयाद्रिवायवः[1] ॥

अत्र मुखानिलानां मलयाद्रिवायौ आरोपः ।

वर्णयामि विमलत्वमम्भसः किं त्वदीय-करवालवर्तिनः ।
एति यत्प्रभवमैन्दवीं द्युतिं विश्वशुक्तिपुटमौक्तिकं यशः[2] ॥

शुभ्रत्वाद्यशसि मौक्तिकेऽभेदारोपः अस्मिन् विश्वस्मिन् शुक्तिपुटत्वारोपः कारणमतोऽत्रापि परम्परितरूपकमेव विलसति ।

मालारूपकम्—

शस्त्राधिकारी मकरध्वजस्य कण्ठेषु सौभाग्यगुरुः पिकानाम् ।
वैशद्यसञ्जीवनमिन्दुभासां साम्राज्यमन्त्री रसपार्थिवस्य ॥
उच्चित्रणे चित्रकरस्तरूणां मानद्रुमोन्मूलनमत्तदन्ती ।
तस्य प्रभावादथ तत्र भर्तुश्चैत्रः पुनर्नूतनतां प्रपेदे[3] ॥

अत्र हि विविधा अभेदारोपा मालारूपेण गुम्फिताः, अतोऽत्र मालारूपकस्य रूपवती रचना दरीदृश्यते ।

काव्येऽस्मिन् बहुत्र रूपकं विलसति । अत्र दिङ्मात्रमुदाहृत्य रूपकारोपितपद्याङ्कमात्रमुद्ध्रियते[4] ।

अर्थान्तरन्यासः—

सामान्यविशेषयोर्द्वयोरपि उक्तिरर्थान्तरन्यासः । तयोश्चैकं प्रस्तुतम्, अन्यदप्रस्तुतं भवति[5] । तल्लक्षणं यथा—

---

१. विक्र० २।२ ।
२. विक्र० ५।३२ ।
३. विक्र० १०।८-९ ।
४. विक्र० १।१९, ५३-५४, ६१, ६५, ७०, ७२, ७४, ९३, ११७; २।५५; ५।७, १०, ४७, ८९; ६।८८; ९।३, २५, ३९, ६३, ६९-७०, १००, १०९; १०।२७, ३३; ११।९, २२, ३६, ४५; १२।३४, ४६; १४।२४; १५।१, ३, ४३-४४, ६०; १६।२९; १७।४४; १८।३३, ४९, ६३, ६८ ।
५. कुवलयानन्दः, पृ० २०२ ।

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा[1] ॥

अर्थान्तरन्यासस्य प्रयोगेऽपि बिल्हणस्य कौशलं दृग्गोचरीभवति । विक्रमाङ्कदेवचरितेऽर्थान्तरन्यासस्य अतिरम्यं रूपं वरीवर्ति, यस्य दर्शनेन सहृदयचेतांसि नितरां प्रसीदन्ति । 'विक्रमाङ्कमपहाय केचन राजानो जयसिंहचमूमाश्रिताः' इति भावं बिल्हणः कथमर्थान्तरन्यासेन अलङ्कुरुते इत्यस्ति द्रष्टव्यं पद्येऽस्मिन्—

भूपमेनमपहाय तच्चमूमाश्रिताः कति न मण्डलेश्वराः ।
जायते मतिविपर्ययो नृणां प्रायशः परिभवे भविष्यति[2] ॥

अत्र हि मण्डलेश्वराणां विक्रमाङ्कदेवमपहाय सिंहदेवाश्रयणरूपविशेषस्य भविष्यति परिभवे नृणां बुद्धिविपर्ययरूपसामान्येन समर्थनम् ।

कस्यापि वस्तुन उचितोपयोगं विना तदीयं वैयर्थ्यमेव भवति । इमं भावं बिल्हणोऽर्थान्तरन्यासेन इत्थमलङ्करोति ।

विधाय भूमेस्तलमस्तकण्टकं
ववर्ष हेम्ना स सहर्षमर्थिनाम् ।
अकुर्वतां सर्वजनार्तिखण्डनं
वृथा तडित्पल्लवचञ्चलाः श्रियः[3] ॥

अत्र स हेम्ना सहर्षमर्थिनां ववर्षेति विशेषरूपवाक्यार्थस्य सर्वजनार्तिखण्डनमकुर्वतां धनिनां तडित्पल्लवचञ्चलाः श्रियः वृथेति सामान्यरूपवाक्यार्थेन समर्थनम् ।

विधाय तैक्ष्ण्यं गणितान्यहानि स प्रतापहानेः प्रणयित्वमाययौ ।
परोपतापैकपरायणश्चिरं क्व वा भवन्त्यभ्युदयस्य भूमयः[4] ॥

अत्र हि परतापकस्य निदाघस्य प्रतापहानेः प्रणयित्वरूपविशेषार्थस्य परोपतापिनश्चिराय अभ्युदयभूमयो न भवन्तीति सामान्येन समर्थनादर्थान्तरन्यासोऽत्रालङ्कारः । अर्थान्तरन्यासप्रयोगे बिल्हणस्य कौशलं प्रदर्शयितुमेकमन्यदुदाहरणं प्रस्तूयते—

---

१. काव्यप्रकाशः १०।१०६ ।
२. विक्र० १४।५१ ।
३. विक्र० १७।१ ।
४. विक्र० १३।२ ।

उवास तत्रार्थिशतानि पूरयन् फलं हि पात्रप्रतिपादनं श्रियः[1] ।

अत्रापि अर्थिशतानां पूरणमिति विशेषार्थस्य पात्रप्रतिपादनं श्रियः फलमिति सामान्यार्थेन समर्थनादर्थान्तरन्यासोऽलङ्कारः । विक्रमाङ्कदेवचरिते बहुत्रार्थान्तरन्यासो विलसति[2] ।

समासोक्तिः—

यत्र प्रस्तुतवृत्तान्ते वर्ण्यमाने विशेषसाम्यबलादप्रस्तुतवृत्तान्तस्यापि परिस्फूर्तिः तत्र समासोक्तिरलङ्कारः, समासेन प्रस्तुताप्रस्तुतवृत्तान्तयोर्वचनात्[3]।

प्रकृतकाव्ये समासोक्तेर्बहूनि उदाहरणानि समुपलभ्यन्ते । समासोक्तेः संरचनायां बिल्हणस्य प्रागल्भ्यं वक्ष्यमाणपद्येन प्रतिपाद्यते—

कौक्षेयकः क्ष्मातिलकस्य यस्य पीत्वातिमात्रं द्विषतां प्रतापम् ।
आलोडच वाष्पाम्बुभिराचचाम चोलीकपोलस्थलचन्दनानि[4] ॥

अत्र कश्चिदुष्णतानिवारणाय चन्दनमिश्रितं जलं शैत्यमाप्तुं सेवते इत्यप्रकृतव्यवहारस्य कृपाणव्यवहारे समारोपात् समासोक्तिः सुशोभते । समासोक्तेरेकमन्यदुदाहरणं प्रस्तूयते—

अपास्य पाथोधिमसंख्यनिम्नगा
मुखार्पणोच्छिष्टमरोचकादिव ।
तपात्यये जह्नुरुपान्तशैलजाः
कुमारतां यस्य सगर्वमापगाः[5] ॥

अत्र हि कौमार्यापहरणरूपाप्रस्तुतस्य समारोपात्समासोक्तिरलङ्कारः ।

विक्रमबाहुकम्पितकाञ्चीप्राकारशून्यत्ववर्णनमपि समासोक्तिसमलङ्कृतमस्ति अतिशयेन दर्शनीयम्—

---

१. विक्र० २।२६ ।
२. विक्र० ३।१७, २५; ४।४६, ६१, ६७, ८०, ९५, ११०-१११; ५।५-६, ४८, ५२, ७३; ६।२, ६, १३-१४, ६१, ७०, ८१, ९१, इत्यादिषु पद्येषु ।
३. कुवलयानन्दः, पृ० ८४ ।
४. विक्र० १।९० ।
५. विक्र० १७।२८ ।

क्षणाद्विगलितानर्घ्य-पदार्था द्रविडक्षितेः ।
प्राकारसूत्रशेषाभूत् काञ्ची तद्बाहुकम्पिता[1] ॥

अत्र हि काञ्चीप्राकारसूत्रे प्रस्तुते श्लेषमाध्यमेन रशनासूत्रस्याप्रस्तुतस्य स्फूर्त्या समासोक्तिः विलसति । उक्तोदाहरणानीवान्यान्यपि[2] समासोक्तिरूपाणि काव्यशोभोत्कर्षकाणि अत्र सन्तीति नात्र सन्देहः ।

अतिशयोक्तिः—

भामहो निमित्ततः लोकातिक्रान्तगोचरामुक्तिमतिशयोक्तित्वेन स्वीकुरुते[3] । दण्डी अपि लोकसीमाविवर्तिनीमुक्तिं विशेषविवक्षया अतिशयोक्तिं मन्यते[4] । आचार्यमम्मटेनेयं चतुर्धा विभक्तास्ति—

निगीर्णाध्यवसानन्तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥
कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।
विज्ञेयातिशयोक्तिः सा[5] ॥

बिल्हणस्यातिशयोक्तिनाम्नाऽलङ्कारेणालङ्कृतानि पद्यानि वैशिष्ट्येन काव्यसौष्ठवं वर्धयन्ति । इदमत्रोदाहरणम्—

त्यजन्ति हंसाः सरसीगुणैः स्थितिं न यत्र वर्षास्वपि हर्षगद्गदाः ।
अलङ्घनीयस्य निकाममुन्नतेर्दिशन्ति वप्रस्य यशस्तु दुर्जनाः[6] ॥

अत्र हि वप्रौन्नत्यस्य विशेषस्य सरसीगुणरूपविशेषस्य च विवक्षया हंसानां वर्षास्वपि मानसगमनाभावरूपोक्तिर्लोकातिक्रान्तत्वं भजते ।

अकथयदवनीन्दोः नन्दनोत्पत्तिवार्तां
प्रथमममरवृन्दानन्दिनान्दीनिनादः ।

---

१. विक्र० ४।२८ ।

२. विक्र० १।१५; ५।११, २६, ४२; ७।७, १६, २४, ३७, ४६, ७१; १३।४, ६, ८, ४१। ४३-४४, ४६, ५१, ८३; १४।२७; १८।१७, ४३, ७६ ।

३. भामहालङ्कारः २।८ ।

४. काव्यादर्शः २।२१४ ।

५. का० प्र० १०।१५३ ।

६. विक्र० २।२२ ।

तदनु तदनुरूपोत्साहतः सुन्दरीणां
त्वरितगमनलीलागद्गदो वाग्विलासः[1] ॥

अत्र हि सुन्दरीणां वाग्विलासरूपकारणस्य पश्चाद्वर्तित्वान्नन्दनजन्मज्ञानरूपकार्यस्य प्राग्वर्तित्वादक्रमातिशयोक्तिरलङ्कारः[2] । विक्रमाङ्कदेवचरिते यत्र यत्रापि अतिशयोक्तिस्तत्र तत्रैवातिशयेन अलङ्कृतौ चमत्कृतिरवभासते ।

काव्यलिङ्गम्—

यत्र हेतोः प्रतिपादनं वाक्यार्थेन पदार्थेन वा क्रियेत तत्र काव्यलिङ्गं भवति[3] ।

वाक्यार्थस्य हेतुत्वोदाहरणं विक्रमाङ्कदेवचरिते यथा—

अपारमापूरयता पृषत्कैस्तन्निम्नि मग्नं वपुरुत्पलाक्ष्याः ।
लक्ष्येषुलब्धः कुसुमायुधेन बालाग्रसूक्ष्मेषु परः प्रकर्षः[4] ॥

अत्र हि उत्तरार्धवाक्यार्थस्य पूर्वार्धवाक्यार्थेन समर्थनात् काव्यलिङ्गालङ्कारः । वक्ष्यमाणपद्येऽपि बिल्हणकाव्यमलङ्कुर्वत् काव्यलिङ्गमस्ति दर्शनीयम्—

नीरन्ध्रविस्फूर्जदनङ्गगर्जिः पयोधरश्रीरियमेतदीया ।
विलासवैदूर्यनवाङ्कुराणां प्रयाति नित्योद्गमकारणत्वम्[5] ॥

अत्र हि विलासवैदूर्यनवाङ्कुराणामुद्गमस्य पयोधरश्रियो हेतुत्वेन काव्यलिङ्गम् । उदाहरणान्तरेष्वपि[6] काव्यलिङ्गोत्थं काव्यवैभवं प्रशस्यमस्ति बिल्हणस्य ।

अपह्नुतिः—

यत्रोपमेयं निषिध्योपमानं साध्यते तत्रापह्नुत्यालङ्कृतिर्भवति[7] । बिल्हणोऽपह्नुतेः सुन्दरमुदाहरणं प्रस्तौति प्रस्तुतकाव्ये—

मर्मव्यथाविस्मयघूर्णमान-मूर्धोच्छलत्कुण्डलविभ्रमेण ।
शब्दानुसारेण वियोगिनीभिः क्षिप्ताः पिकानामिव कण्ठपाशाः[8] ॥

---

१. विक्र० २।८६ ।
२. विक्र० २।२३,८४; ३।६५; ४।१६; ५।१६, ६८; ८।१६, २१, ४२, ५६; ६।१२७, १३८; १०।६५ ।
३. काव्यलिङ्गं हेतोर्वाक्यपदार्थता—का० प्र० १०।१७३ ।
४. विक्र० ६।२६ ।
५. विक्र० ६।७१ ।
६. विक्र० १०।४८, ६८; ८।५३; ११।७; १२।३८ ।
७. प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः । का० प्र० १०।१४६ ।
८. विक्र० ७।५१ ।

पिकस्वराणां पीडादायकत्वेन पिकानां बन्धनार्थं विरहिणीभिः कर्णभूषणचङ्क्रमणव्याजात्पाशाः क्षिप्ता इव । अत्र हि कुण्डलानां पाशत्वसाधनेनापह्नुतिरलङ्कारः । वक्ष्यमाणपद्यमपि अपह्नुतिमाध्यमेन काव्ये सौष्ठवाधानस्योदाहरणं भवितुमर्हति—

जगज्जयार्थं स्मरपार्थिवेन नीतश्चमूनायकतां वसन्तः ।
वातोच्छलच्चम्पकचक्रभङ्ग्या त्यागीव हेमप्रकरैर्ववर्ष[1] ।।

अत्र हि चम्पकवृष्टिकैतवेन हेमवृष्टेः संसिद्धिरेवापह्नुतिः ।

निदर्शना—

असम्भववस्तुसम्बन्धेन उपमायाः परिकल्पनं निदर्शना[2] । निदर्शनाया एकं सुन्दरमुदाहरणं बिल्हणस्य हेमन्तवर्णनादुद्ध्रियते—

अलभन्त नभःक्षेत्रे तारास्तरलकान्तयः ।
त्विषं तुषारबीजानां नूतनाङ्कुरशालिनाम्[3] ।।

अत्र हि ताराणां तुषारबीजानाञ्चासम्भवसम्बन्धे उपमापरिकल्पनेनालङ्कृतिः । अस्यान्यान्युदाहरणानि[4] गौरवभिया नोद्ध्रियन्ते ।

दृष्टान्तः—

यत्रोपमानोपमेयवाक्ययोर्भिन्नावेव धर्मौ बिम्बप्रतिबिम्बभावेन निर्दिष्टौ तत्र दृष्टान्तः ।

कुन्तलेशद्रविडेशसंवादतः दृष्टान्तस्यातीव सुन्दरमुदाहरणं प्रस्तूयते—

दोषजातमवधीर्य मानसे धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपनीय गृह्णते वारिधेः सलिलमेव वारिदाः ।।[5]

अत्र हि उपमेयोपमानयोः सज्जनवारिदयोः दोषावधीरण-क्षारभावापनयनयोः साधारणधर्मयोः परस्परं बिम्बप्रतिबिम्बभावेनालङ्कृतिः ।

व्यतिरेकः—

उपमानोपमेययोरेकस्य विशेषेण व्यतिरेको भवति[6] । कल्याणपुरवर्णने बिल्हणव्यतिरेकस्य आकर्षकं रूपमलङ्करोति काव्यमिदम् । तद्यथा—

---

१. विक्र० १०।१० ।

२. अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः । काव्यप्रकाशः ।

३. विक्र० १६।८ ।

४. विक्र० ७।१८, ४१; ११।११, ४०; १२।४४; १६।१८, ३८ ।

५. विक्र० ५।५१ ।

६. व्यतिरेको विशेषश्चेदुपमानोपमेययोः—कुवलयायन्दः, पृ० ८० ।

प्रतिक्षणं क्षालितमन्युना रणे प्रयुक्तरक्षस्य नृपेण मानिना ।
न यस्य कक्षां शतमन्युरक्षिता पुरी पुरप्राग्रहरस्य गाहते[1] ॥

अत्र हि पुरप्राग्रहरस्य (उपमेयस्य) शतमन्युरक्षितायाः पुर्याः (उपमानात्) वैशिष्ट्यवर्णनेन व्यतिरेकः । व्यतिरेकस्य कतिपयानि अन्यानि उदाहरणानि अपि अत्र वरीवर्तन्ते ।

विशेषोक्तिः—

सत्यपि कारणे कार्याभावो विशेषोक्तिः[2] । विक्रमाङ्कदेवचरितस्य नवमसर्गतः विशेषोक्तेरेकं विशिष्टमुदाहरणमुद्ध्रियते—

असौ भवित्री सुभगा नतभ्रूः करिष्यते पञ्चशरः प्रसादम् ।
आन्दोलितोऽभूदिति चिन्तयासौ त्रैलोक्यचिन्ताहरणक्षमोऽपि ॥

अत्र हि त्रैलोक्यचिन्तापहरणसामर्थ्यस्य (चिन्तापहरणकारणस्य) विद्यमानत्वे चिन्तानाशरूपकार्यस्याभावेन विशेषोक्तिः ।

विभावना—

हेतुप्रतिपादनेन विनैव कार्योत्पत्तिकथनं विभावना[3] ।

वसन्तवर्णनप्रसङ्गाद्विभावनाया उत्कृष्टतमं रूपमिदमुदाहरणार्थमुद्ध्रियते—

पौष्पे रजस्युच्छलिते समन्तात् समस्तनेत्रप्रतिबन्धहेतौ ।
आश्चर्यमङ्गेषु नृपाङ्गनानाममोघबाणः कुसुमायुधोऽभत्[4] ॥

अत्र हि सत्यपि पौष्परजसि नेत्रप्रतिबन्धहेतौ कुसुमायुधस्यामोघबाणत्वरूपकार्यस्य कथनेन विभावना । विभावनाया उदाहरणान्तराणि अपि विलसन्ति काव्येऽस्मिन् ।

विरोधाभासः—

असत्यपि विरोधे विरोधवत्प्रतीतिर्विरोधाभासः[5] ।

विरोधाभासस्य मनोहरमुदाहरणं प्रथमसर्गादुद्ध्रियते—

---

१. विक्र० २।११ ।

२. कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे ।
कुवलयानन्दः, पृ० १४७ ।

३. क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना । काव्यप्रकाशः ।

४. विक्र० १०।५३ ।

५. विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः । काव्यप्रकाशः १०।६६ ।

भोजक्षमापालविमुक्तधारा-निपातमात्रेण रणेषु यस्य ।
कल्पान्तकालानलचण्डमूर्तिश्चित्रं प्रकोपाग्निरवाप शान्तिम्[1] ॥

अत्र हि यथा प्रलयाग्निर्भोजविसृष्टजलधारानिपातमात्रेण कथमपि शान्तो न भवति तथैव प्रलयाग्निसदृशप्रचण्डकोपाग्निरपि भोजप्रयुक्तखड्गधाराजलेन न शान्तो भवितुमर्हति, परमत्र धाराजलेनाग्निः शान्तो बभूवेति विरोधः, धारा-शब्दस्य नगरीत्यर्थेन तस्य परिहारः ।

व्याजस्तुतिः—

यत्र निन्दामुखेन स्तुतिः स्तुतिमुखेन च निन्दा क्रियेत तत्र व्याजस्तुति-रलङ्कारो भवति[2] । विक्रमाङ्कदेवचरिते व्याजस्तुतिः—

अनन्यसामान्यगुणत्वमेव भवत्यनर्थाय महाकवीनाम् ।
ज्ञातुं यदेषां सुलभाः सभासु न जल्पमल्पप्रतिभाः क्षमन्ते[3] ॥

महाकवीनां कृतयः सकलमन्दजनैरज्ञेया भवन्तीत्येव महाकवीनां दोषः, इति दोषेन तेषां प्रौढपाण्डित्यरूपस्तुत्याऽत्र व्याजस्तुतिः ।

सहोक्तिः—

यत्रैकमेव पदं सहादिपदसंयोगेन अनेकार्थान् बोधयति तत्र सहोक्तिरलङ्कारः[4]। वनविहारवर्णनप्रसङ्गे विद्यमानं सहोक्तेरुदाहरणं प्रस्तूयते—

कस्याश्चिदूर्ध्वं नमनाय शाखामाक्रम्य यामर्पयति स्म देवः ।
सा तन्नितम्बस्य भरेण भग्ना समं मनोभिः प्रतिकामिनीनाम्[5] ॥

अत्र हि समशब्देन शाखायाः प्रतिकामिनीनाञ्च मनसां भग्नत्वं सहोक्तिजनकम्।

विनोक्तिः—

यत्रैकेन विनान्यो न शोभेताथवैकेन विनैवान्यः शोभेत तत्र विनोक्तिरल-ङ्कारो भवति[6] । विक्रमाङ्कविलापसन्दर्भे विनोक्तेः सुन्दरं रूपमुपलभ्यते—

---

१. विक्र० १।६४ ।
२. व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा । काव्यप्रकाशः १०।१६६
३. विक्र० १।२३ ।
४. सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् ।
काव्यप्रकाशः १०।१७० ।
५. विक्र० १०।५१ ।
६. विनोक्तिः सा विनान्येन यत्रान्यः सन्न नेतरः ।
काव्यप्रकाशः १०।१७१ ।

तद्बाहुदण्डविश्लेषे किं पौरुष करिष्यसि ।
प्रतिपालकवैधुर्यात् प्रताप परितप्यसे[1] ॥

आहवमल्लबाहुदण्डाभ्यां विना प्रतापस्य परितापेन विनोक्तिरत्रालङ्कारः ।

उदात्तालङ्कारः—

यत्र कस्यचिद्वस्तुनः सम्पदो वर्णनम्, अथवा यत्र कस्मिंश्चित्प्रसङ्गे कस्यचिदन्यस्य महापुरुषस्य गौणं महत्त्ववर्णनं भवेत्तत्रोदात्तालङ्कारो भवति[2] । मलयानिलवर्णनेऽस्यालङ्कारस्य सौम्यालङ्कृतिः काव्येऽत्र दृश्यते—

मलयगिरिसमीराः सिंहलद्वीपकान्ता-
मुखपरिचयलब्धस्फारकर्पूरवासाः ।
द्रविडयुवतिदोलाकेलिलोलन्नितम्ब-
स्थलशिथिलितवेगाः सेव्यतामाप्नुवन्ति[3] ॥

मलयपवनस्य शीतलमन्दसुगन्धगुणत्रयरूपसम्पद्वर्णनेनात्रोदात्तालङ्कारः ।

समुच्चयः—

अविरोधेन सम्भावितयौगपद्यानां क्रियाणां गुम्फनं समुच्चयः[4] । तदुदाहरणं विक्रमाङ्कदेवचरिते—

असिधेनुविलीनकन्धरैः समदाधोरणमस्तकैरसौ ।
पृथिवीन्दुरपूरयन्महीं युगपद्द्याञ्च यशोभिरुद्भटैः[5] ॥

अस्मिन्पद्ये यौगपद्येन भिन्नमस्तकभटानां शिरोभिर्मह्याः पूरणेन यशोभिश्चाकाशपूरणेन समुच्चयः ।

पर्यायः—

एकस्मिन्नेव वस्तुनि कालादिभेदेन अनेकेषामाधारत्वेन अथवा अनेकेषु आधारेषु एकस्यैव वस्तुन आधेयत्वेन वर्णनात्पर्यायालङ्कारो भवति[6] । इदमत्रोदाहरणम्—

---

१. विक्र० ४।७८ ।

२. उदात्तं वस्तुनः सम्पत् महतां चोपलक्षणम् ।
काव्यप्रकाशः १०।१७६ ।

३. विक्र० ७।७० ।

४. बहूनां युगपद्भावभाजां गुम्फः समुच्चयः । कुवलयानन्दः पृ० १८७ ।

५. विक्र० १५।६६ ।

६. एकं क्रमेणानेकस्मिन् पर्यायोऽन्यस्ततोऽन्यथा ।
काव्यप्रकाशः १०।१८०-८१ ।

अपह्नुताश्चञ्चुपुटैः शिखण्डिनां
प्रकाशिताः कोमलकूजिताङ्कुरैः ।
पतन्ति कृच्छ्राद्भुवि पान्थयोषितां
कवोष्णनिःश्वासकदर्थिताः कणाः[1] ।।

अत्र हि वर्षाबिन्दूनां विविधाधारत्वेन पर्यायोऽलङ्कारः ।

समाधिः—

यत्र कतिपयान्यकारणयोगेन कार्यं सुकरं भवेत्तत्र समाधिरलङ्कारो भवति[2]। तद्यथा विक्रमाङ्कदेवचरिते—

जैत्रवाजिपृतनाखुरक्षतक्षोणीधूलपटलीभिरध्वसु ।
तद्बलस्य सुगमत्वमागमन् पूरितानि विषमस्थलान्यपि[3] ।।

अत्र हि वाजिखुरक्षतधूल्या मार्गस्य सुगमत्वेन समाधिः ।

आक्षेपः—

पूर्वं स्वयमुक्तस्य पश्चाद्विचार्य्य तत्प्रतिषेध आक्षेपः[4] । विक्रमाङ्कदेवचरिते आक्षेपस्य सुन्दरमुदाहरणं वरीवर्ति—

साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः ।
यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति ।।

गृह्णन्तु तावद् यदि वा यथेष्टं नास्ति क्षतिः कापि कवीश्वराणाम् ।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः[5] ।।

अत्र प्रथमपद्ये प्रार्थितस्य काव्यार्थचौरेभ्यो रक्षणस्य स्वोल्लिखितवैचित्र्याणां समुद्रगतरत्नजातवदक्षयत्वं विचिन्त्य प्रतिषेध आक्षेपः ।

प्रत्यनीकम्—

बलवतः शत्रोः पक्षावलम्बिन्यन्यस्मिन् पराक्रमः प्रत्यनीकालङ्कारः[6] ।

---

१. विक्र० १३।३४ ।

२. समाधिः सुकरं कार्यं कारणान्तरयोगतः ।। काव्यप्रकाशः १०।१६२ ।

३. विक्र० ५।७० ।

४. आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ।
कुवलयानन्दः, पृ० १३० ।

५. विक्र० १।११-१२ ।

६. प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः । कुवलयानन्दः, पृ० १६१ ।

पद्मप्रभाहारिहिमैकधाम्नस्तुषारशैलादिदमाजगाम ।
चिक्षेप साक्षेपमितीव तासां पद्माकरः कुङ्कुममङ्गकेभ्यः[1] ॥

अत्र हि बलवतः शत्रोस्तुषारशैलात्समागतस्य कुङ्कुमस्य साक्षेपं प्रक्षेपः प्रत्यनीकम् ।

प्रतीपम्—

उपमेयस्यैवोपमानप्रयोजनधूर्वहत्वेनोपमानवैमर्थ्यमपि प्रतीपं भवति[2] ।

मुखेन लज्जाभिनयप्रगल्भा लीलालवन्यञ्चितकन्धरेण ।
प्रत्यादिशन्तीव दिवि स्फुरन्तमनेकदोषोपहतं मृगाङ्कम्[3] ॥

अत्रोपमेयेन (मुखेन) उपमानस्य (चन्द्रस्य) वैमर्थ्यात्प्रतीपम् ।

भ्रान्तिमान्—

अप्रस्तुतपदार्थतुल्यं कमपि प्रस्तुतपदार्थं वीक्ष्य अप्रस्तुतस्य भ्रान्तिपूर्णं ज्ञानं भ्रान्तिमानलङ्कारः[4] ।

राज्ञस्तैलपस्य समरकौशलवर्णनप्रसङ्गे भ्रान्तिमतः उदाहरणम्—

दृप्तारिदेशे समरोपमर्द-सूत्रावशेषस्थितहारदाम्नि ।
यज्ञोपवीतभ्रमतो बभूव यस्य प्रहर्तुः क्षणमन्तरायः[5] ॥

पद्येऽस्मिन् हारसूत्रे यज्ञोपवीतस्य भ्रान्तिप्रतिपादनाद् भ्रान्तिमानलङ्कारः ।

अर्थापत्तिः—

वसन्तवर्णनादर्थापत्तेर्वक्ष्यमाणं रूपमुदाहर्तुं शक्यते—

सन्नद्धं माधवीनां मधु मधुपवधूकेलिगण्डूषयोग्यं
　　विश्राम्यन्ति श्रमेण क्वचिदपि मरुतो न क्षणं दाक्षिणात्याः ।
क्रीडाशैलीभवन्ति प्रतिकलमलिनां कौसुमाः पांसुकूटा-
　　श्चैत्रे पुष्पास्त्रमित्रे तदिह विरहिणां कीदृशी जीविताशा ॥[6]

अत्र प्रतिपादितैः दक्षिणमरुतादिभिरेकाकिभिरपि विरहिघातः कर्तुं शक्यते किमुत बहुभिः सन्नद्धैः ।

---

१. विक्र० १०।७७ ।

२. कुवलयानन्दः, पृ० १३ ।

३. विक्र० ६।५३ ।

४. भ्रान्तिमानन्यसंवित् तत्तुल्यदर्शने । काव्यप्रकाशः १०।२०४ ।

५. विक्र० १।७८ ।

६. विक्र० ७।६७ ।

परिवृत्तिः—

यत्र न्यूनाधिकयोः पदार्थयोर्मिथः विनिमयो भवेत्तत्र भवति परिवृत्तिरलङ्कारः[1]। विक्रमाङ्कदेवचरिते परिवृत्तिर्यथा—

गजोन्मूलितनिक्षिप्त-चन्दनद्रुमसम्पदः ।
स मूल्यमिव रत्नानि जग्राह महतोम्बुधेः[2] ॥

समालङ्कारः—

द्वयोरप्यनुरूपयोर्यत्र समानरूपेण वर्णनं भवेत्तत्र समालङ्कारो भवति[3]।

निवेश्यतां किन्नरकण्ठि कण्ठे मालास्य दोर्बन्धविलासदूती ।
कीर्तिर्विधेरस्तु समानयोगात्कामस्य कामं फलतु प्रयासः[4] ॥

अत्र हि विधेः कीर्तेः कामस्य प्रयासफलस्य च समानवर्णनेन समः।

विषमः—

अननुरूपयोरेकत्र घटनावर्णनं विषमालङ्कारः[5]। विक्रमाङ्कदेवचरिते विषमः—

सचन्दनलेपनशीतलेन गात्रेण चित्रं नरनाथचन्द्रः ।
प्रविश्य चित्तेषु मृगेक्षणानामनङ्गतापज्वरमाततान[6] ॥

अस्मिन् पद्ये शीतलगात्रेण तापकरणमननुरूपम् ।

सारः—

अनेकेषां पदार्थानामुत्तरोत्तरमुत्कर्षवर्णने सारालङ्कारो भवति[7]।

खड्गे कुण्ठीभवति शिरसां छेदतः खेदमागाद्
यः शाणार्थी हरशिखरिणा प्राग्गृहीतोज्झितेन ।

---

१. परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः। कुवलयानन्दः, पृ० १८४।
२. विक्र० ४।६ ।
३. कुवलयानन्दः, पृ० १६०।
४. विक्र० ६।१४६ ।
५. विषमं वर्ण्यते यत्र घटनाऽननुरूपयोः। कुवलयानन्दः, पृ० १५४ ।
६. विक्र० १२।३६ ।
७. उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते। कुवलयानन्दः, पृ० १७८।

यः पौलस्त्यं तमपि जितवान् सोऽपि यस्योपमायां
शङ्के लोकोत्तरगुणनिधेर्मुद्रितो रामभद्रः[1] ॥

अत्र हि रामरावणकलशदेवानामुत्तरोत्तरमुत्कर्षवर्णनेन सारालङ्कारः ।

असङ्गतिः—

कार्यकारणयोर्भिन्नदेशस्थितिरसङ्गतिरलङ्कारः[2] ।

विक्रमाङ्कदेवचरिते असङ्गतेरुदाहरणम्—

क्षणमात्रविसूत्रिताखिलप्रतिपक्षस्य चुलुक्यभूपतेः ।
वपुषि त्रिदिवौकसां परं सह पुष्पैरपतञ्छिलीमुखाः[3] ॥

पद्येस्मिन् प्रतिपक्ष विसूत्रणं भिन्नदेशे, पुष्पवृष्टिश्च भिन्नदेशे वर्णिताऽतोत्रासङ्गतिरलङ्कारः ।

अलङ्कारसंसृष्टिः—

तिलतण्डुलन्यायेनालङ्कारयोः सम्मिश्रणं संसृष्टिः । तद्यथा—

सर्वमाटविकचक्रमक्रम-व्यापृतस्तलगतं चकार सः ।
शार्वरेष्विव तमःसु राक्षसाः पापकारिषु मिलन्ति पापिनः[4] ॥

पद्येऽस्मिन् उपमार्थान्तरन्यासयोः संसृष्टिः । संसृष्टेरन्यत्रापि काव्येऽत्र उदाहरणानि वर्तन्ते तानि तत्रैवावलोकनीयानि[5] ।

अलङ्कारसङ्करः—

नीरक्षीरन्यायेनालङ्काराणां परस्परं सम्मिश्रणेन अङ्गाङ्गिभावादिरूपेण त्रिविधः सङ्करो भवति । काव्येऽस्मिन् अलङ्काराणां मनोरमाः सङ्कराः बाहुल्येन वर्तन्ते[6] । दिङ्मात्रमुदाह्रियते—

निर्गतैरिव तडित्प्रदीपतः सान्द्रकज्जलरजोभिराचितम् ।
वृत्तकर्परनिभं नभस्तलं नीलिमानमतिमात्रमाययौ[7] ॥

---

१. विक्र० १४।५६ ।
२. विरुद्धं भिन्नदेशत्वं कार्यहेतोरसङ्गतिः । कुवलयानन्दः, पृ० १४६ ।
३. विक्र० १८।६० ।
४. विक्र० १४।११ ।
५. विक्र० १५।७२ ।
६. विक्र० १।२, ४१, ४६, ५२, ८१, २।२३, ५४, ५८, ६०, ८७, ४।६०-६२, १०२, ५।७६, ६।६८ ।
७. विक्र० १४।३० ।

अत्रोपमोत्प्रेक्षयोः सङ्करः। निर्दिष्टालङ्कारानतिरिच्य अन्ये मीलित[1]-सामान्य-[2] परिसंख्या[3]-स्मरण[4]-तद्गुणै[5]कावल्या[6]दयोऽप्येनं काव्यमलङ्कुर्वन्तो विलसन्ति। तेषां सङ्केताङ्काः टिप्पण्यां निर्दिष्टाः सन्ति।

---

१. विक्र० १४।२९।
२. विक्र० १८।६०।
३. विक्र० १५।४६।
४. विक्र० १५।६१।
५. विक्र० १२।७२।
६. विक्र० १८।२०।

उपसंहारः

काव्येऽस्मिन्निन्द्रवज्रारथोद्धतोपजातिवंशस्थमन्दाक्रान्तापुष्पिताग्रावसन्ततिलकानुष्टुप्हरिणीशार्दूलविक्रीडितादीनाञ्छन्दसां सुन्दराणि उदाहरणानि वरीवर्तन्ते । अस्य काव्यस्य उत्तरवर्तिषु काव्येषु नैषधीयचरिते प्रभावः समालोकयितुं शक्यते । यन्नैषधीयचरितमेतस्मादधिकां प्रसिद्धिमगादित्यत्र तदानीन्तनरीतिकालस्य प्रभावो हि कारणम् । चरितकाव्येषु नवसाहसाङ्कचरितादनन्तरमस्यैव स्थानं वर्तते । परं सारल्यसारस्यदृष्ट्या अस्य सर्वोत्तमं स्थानं भवितुमर्हति ।

विक्रमाङ्कदेवचरितस्य सर्वेक्षणेन सम्यक्तया स्पष्टीभवति यदिदमतीव सरलं सरसञ्च काव्यम् । अस्य रचयिता बिल्हणोऽसाधारणप्रतिभावान् विलक्षणपाण्डित्यमण्डितश्चासीत् । वैदर्भ्याः प्रयोगे प्रसादगुणगुम्फने चासौ कालिदासकोटिमधिरोहति । अतो यद्यसौ एकादशशताब्द्याः कालिदासोऽपि उच्येत तर्हि अहं न तत्र अत्युक्तिं मंस्ये । यत्खलु 'इण्डियन-एण्टिक्वेरी' पत्रिकासम्पादकेन 'बिल्हणः श्लेषालङ्कारस्य परमोपासकः, तस्य रचनासु दीर्घसमासानां बाहुल्यम्' इत्यादि समालोचितं तत्तु पूर्णतः भ्रान्तिमदस्ति । अहं तु अस्य सर्वेक्षणानन्तरमिति वक्तुं प्रभवामि यद् बिल्हणेन अस्य काव्यस्य यत् काव्यसुवर्णत्वमुक्तं न तत्र सन्देहलेशोऽपि—

अलौकिकोल्लेखसमर्पणेन विदग्धचेतःकषपट्टिकासु ।
परीक्षितं काव्यसुवर्णमेतल्लोकस्य कण्ठाभरणत्वमेतु[1] **॥**

अस्मिन्काव्यसुवर्णे कृतप्रयत्नेनापि केनचित्कालुष्यमुद्भावयितुं न शक्यते । उक्तञ्चात्र सोमेश्वरेण—

बिल्हणस्य कवेः प्राप्तप्रसादैव सरस्वती ।
नीयते जातु कालुष्यं दुर्जनैर्न घनैरपि[2] **॥**

अतस्त्वरया समासीदति समयः यत्र गृहे गृहे इदं काव्यकाञ्चनं जनानां कण्ठाभरणं भवेत् ।

इति शम्

---

१. विक्र० १।२४ ।

२. की० कौ० १।१६ ।

उद्धरणानुक्रमणिका

सहायकग्रन्थनामानि

१. अग्निपुराणम्—जीवानन्दविद्यासागर, कलकत्ता १८८२।
२. अभिज्ञानशाकुन्तलम्—चौ० सं० सि०, वाराणसी, प्रथमं संस्करणम्।
३. अलङ्कारसर्वस्वम्—निर्णयसागर प्रेस, बम्बई १९३१।
४. अलङ्कारकौस्तुभम्—निर्णयसागर प्रेस, बम्बई १९९८ वि०।
५. अभिनवभारती—अभिनवगुप्तः, आतमाराम एण्ड संस, दिल्ली।
६. अर्ली हिस्ट्री आफ दक्कन—जी० याजदानी, आक्सफोर्ड प्रेस।
७. अर्ली हिस्ट्री आफ दक्कन - आर० जी० भाण्डारकर।
८. अल्बेरूनीज इण्डिया—साचो, एस० चांद एण्ड कं०, दिल्ली १९६४।
९. अनर्घराघवम्—निर्णयसागर प्रेस, बम्बई।
१०. अश्वचिकित्सितम्—जीवानन्द विद्यासागर, कलकत्ता १८९३।
११. अष्टाध्यायी—वैदिक पुस्तकालय, अजमेर।
१२. इतिहासप्रवेश—जयचन्द्रविद्यालङ्कारः।
१३. इन्स्क्रिप्शंस आफ सदर्न इण्डिया।
१४. ऋग्वेदसंहिता—वैदिकसंशोधनमण्डल, पूना।
१५. एन्शेण्ट इण्डिया—आर० सी० मजूमदार।
१६. एन्शेण्ट इण्डिया—एस० कृष्णस्वामी आयङ्गर।
१७. औचित्यविचारचर्चा—क्षेमेन्द्रः, भारतप्रकाशनमन्दिरम्, अलीगढ़ प्र० सं०।
१८. कर्पूरमञ्जरी—राजशेखर।
१९. कालिकापुराणम्—वेङ्कटेश्वर प्रेस, बम्बई। प्रथमं संस्करणम्।
२०. काव्यप्रकाशः—शशिकलाव्याख्या, चौ० वि० भ०, वाराणसी प्र० सं०।
२१. काव्यमीमांसा—चौ० सं० सि, वाराणसी १९३४।
२२. काव्यालङ्कारः—भामहः, चौ० वि० भ०, वाराणसी।
२३. काव्यादर्शः—दण्डी, चौ० वि० भ०, वाराणसी। १९५८।
२४. कादम्बरी—एक सांस्कृतिक अध्ययन—डा० वासुदेवशरणअग्रवालः।

२५. काव्यालङ्कारसूत्रवृत्तिः—चौ० वि० भ०, वाराणसी, प्र० सं।
२६. किरातार्जुनीयम्—चौ० वि० भ०, वाराणसी, प्र० सं०।
२७. कीर्तिकौमुदी—सोमेश्वरस्य।
२८. कुवलयानन्दः—अप्पयदीक्षितः १९६४।
२९. कुमारसम्भवम्—मल्लिनाथटीका, कलकत्ता १९४७।
३०. गरुडपुराणम्—सरस्वती प्रेस, कलकत्ता १८९०।
३१. चन्द्रालोकः—जयदेवः, मास्टर खेलाड़ीलाल एण्ड संस, वाराणसी १९५४।
३२. चित्रमीमांसा—अप्पयदीक्षितः, वाणी बिहार, वाराणसी १९६५।
३३. चौरपञ्चाशिका—ओरियण्टल बुक एजेन्सी, पूना १९४६।
३४. ज्योग्रैफिकल डिक्शनरी, आफ एन्शैन्ट एण्ड मीडिवल इण्डिया, नन्दलाल डे, लन्दन १९२७।
३५. डायनस्टिक हिस्ट्री आफ नार्दर्न इण्डिया—कनिङ्घम, १८७१।
३६. डायनस्टिज आफ कन्नरीज डिस्ट्रिक्ट—जे० एफ० फ्लीट, ट्रवनर एण्ड कम्पनी, लन्दन।
३७. तपोभूमि—पं० रामगोपालमिश्रः, २००७ वि०।
३८. दशरूपकम्—धनञ्जयः, चौ० वि० भ० १९५५।
३९. दशकुमारचरितम्, चौ० वि० भ०, वाराणसी।
४०. दि लाइफ एण्ड दि टाइम आफ चालुक्य विक्रमादित्य सिक्स्थ।
४१. दि एन्शेण्ट ज्योग्रैफी आफ इण्डिया।
४२. दि एन्शेण्ट ज्योग्रैफी आफ काश्मीर—डा० स्टाइन, कलकत्ता १८९९।
४३. दि थ्योरी आफ रस एण्ड ध्वनि—डा० शंकरम्।
४४. दि आक्सफोर्ड हिस्ट्री आफ इण्डिया—वी० ए० स्मिथ, आक्सफोर्ड युनीवर्सिटी, लन्दन १८९९।
४५. ध्वन्यालोकः—चौ० सं० सी०, वाराणसी।
४६. धर्मशर्माभ्युदयम्—हरिश्चन्द्र, निर्णयसागर प्रेस, बम्बई १८९९।
४७. नाट्यशास्त्रम्—भरतमुनिः, एशियाटिक सोसायटी, कलकत्ता १९५६।
४८. नैषधीयचरितम्—निर्णयसागर प्रेस, बम्बई १९४२ ई०।
४९. नैषधपरिशीलन—हिन्दुस्तानी एकेडेमी, इलाहाबाद १९६०।
५०. पद्मपुराणम्—गुरुमण्डलग्रन्थमाला १९५८।
५१. प्राचीन भारत का इतिहास—पुरुषोत्तमलाल भार्गव, लखनऊ १९६०।
५२. प्राचीन भारत में नगर और नगरजीवन—उदयनारायण राय, हिन्दुस्तानी एकेडेमी, इलाहाबाद १९६५।

५३. प्राचीन भारत—डा० परमेश्वरीलाल, मोतीलाल बनारसीदास, दिल्ली, प्र० सं० ।
५४. प्राचीन भारत—गोरखनाथ चौबे, इलाहाबाद, द्वितीय सं० ।
५५. प्राचीन भारत—एन० एन० घोष, इण्डियन प्रेस, प्रयाग १९६२ ।
५६. प्राचीन भारत—डा० बुद्धप्रकाश, राजकमल प्रकाशन १९६२ ।
५७. प्राचीन भारत का राजनैतिक एवं सांस्कृतिक इतिहास—रतिभानु-नाहर, किताब महल, इलाहाबाद १९६१ ।
५८. प्राचीन भारत का इतिहास—डा० रमाशंकर त्रिपाठी, १९६२ ।
५९. बृहत्संहिता—वा० सं० वि० वि०, वाराणसी ।
६०. बृहन्नारदीयपुराणम्—हरिकृष्ण शास्त्री, कलकत्ता १८९१ ।
६१. ब्रह्माण्डपुराणम्—वेङ्कटेश्वर प्रेस, बम्बई ।
६२. भारत भ्रमण ।
६३. भारतीय काव्यशास्त्र की परम्परा ।
६४. भारतीय इतिहास का परिचय—डा० राजबली पाण्डेय, चौ० वि० भ०, वाराणसी ।
६५. महाकवि माघ—डा० मनमोहनलाल, नवयुग प्रकाशन, दिल्ली १९६३ ।
६६. महाभारतम्—गीताप्रेस, गोरखपुर २०१३ वि० ।
६७. मत्स्यपुराणम्—आनन्दाश्रम ग्रन्थावलि ४१, १९०० ई० ।
६८. मार्कण्डेयपुराणम्—मथुरा १९४१ ।
६९. मालविकाग्निमित्रम्—चौ० सं० सी०, वाराणसी, प्र० सं० ।
७०. मेघदूतम्—चौ० सं० सी०, वाराणसी १९६२ ।
७१. याज्ञवल्क्यस्मृति—मिताक्षरा टीका, बम्बई १८०८ ।
७२. रसगङ्गाधरः—पण्डितराजजगन्नाथः ।
७३. रससिद्धान्त—डा० नगेन्द्र, दिल्ली ।
७४. रससिद्धान्त की दार्शनिक और नैतिक व्याख्या ।
७५. रामायण—वाल्मीकिः, श्रीचिन्नस्वामी शास्त्री, मद्रास १९५८ ।
७६. रासमाला ।
७७. राजतरङ्गिणी—पण्डित पुस्तकालय, काशी १९०० ।
७८. राजस्थान—टाड ।
७९. रघुवंश—बम्बई १९१० ।
८०. लिखितस्मृतिः—सस्ता साहित्य मण्डल, शामली ।
८१. लिङ्गपुराणम्—वेंकटेश्वर प्रेस, बम्बई ।

८२. विक्रमाङ्कदेवचरितम्—श्रीविश्वनाथशास्त्री भारद्वाजः, हिन्दू विश्वविद्यालयः, काशी, प्रथमं संस्करणम्।
८३. विक्रमाङ्कदेवचरितम्—डा० व्युल्हर, मुम्बापुरी संस्कृतग्रन्थमाला १८७५।
८४. विक्रमाङ्कदेवचरितम्—श्रीरामावतारशास्त्री, ज्ञानमण्डल प्रेस, वाराणसी।
८५. विक्रमाङ्कदेवचरितम्—श्रीमुरारिलालशर्मा, सरस्वतीभवनप्रकाशनम्, १९४५।
८६. विक्रमाङ्कदेवचरितम्—डा० हरिदत्तशास्त्री, साहित्य भण्डार, मेरठ।
८७. विक्रमाङ्कदेवचरितम्—चौखम्बाप्रकाशनम्।
८८. विक्रमाङ्कदेवचरितम्—अमलकुमारः, सम्बोधिप्रकाशनम्, कलकत्ता।
८९. विक्रमाङ्कदेवचरितचरितचर्चा—डा० महावीरप्रसादद्विवेदी, इण्डियन प्रेस, प्रयाग।
९०. विक्रमोर्वशीयम्—चौ० सं० सी० आफिस, वाराणसी।
९१. विद्धशालभञ्जिका।
९२. विल्हणीयं काव्यम्।
९३. विष्णुपुराणम्—गीता प्रेस, गोरखपुर। २०१८ वै०।
९४. व्यक्तिविवेकः—चौ० वि० भ०, वाराणसी १९६४।
९५. वाचस्पत्यम्—चौ० सं० सी० आफिस, वाराणसी।
९६. वामनपुराणम्—काशीराजन्यास, रामनगर, वाराणसी १९६८।
९७. वायुपुराणम्—वेंकटेश्वर प्रेस, बम्बई।
९८. वाराहपुराणम्—एशियाटिक सोसायटी, कलकत्ता।
९९. शंखस्मृतिः—सस्ता साहित्य मण्डल, शामली।
१००. शब्दकल्पद्रुमः—चौ० सं० आफिस, वाराणसी।
१०१. शक्तिसङ्गमतन्त्रम्—गायकवाड ओरियण्टल सीरिज, बड़ौदा।
१०२. शिशुपालवधम्—चौ० सं० सी० आफिस, वाराणसी।
१०३. श्रीमद्भागवतपुराणम्—गीताप्रस, गोरखपुरम्।
१०४. स्कन्दपुराणम्—गुरुमण्डलग्रन्थमाला, कलकत्ता १९६०।
१०५. स्टडीज इन दि ज्योग्रेफी आफ दि एन्शेण्ट एण्ड मीडिवल इण्डिया, डी० सी० सरकार, मोतीलाल बनारसीदास, दिल्ली, १९६०।
१०६. साहित्यदर्पणः—विमलाटीका, चौखम्बा सं० सी०, वाराणसी १९६०।
१०७. संस्कृतकविचर्चा—बलदेव उपाध्याय, मास्टर खेलाड़ीलाल एण्ड संस, वाराणसी १९३२।

१०८. संस्कृतकविदर्शन—डा० भोलाशंकर व्यास, चौ० वि० भ० वाराणसी, २०१२।

१०९. संस्कृतसुकविसमीक्षा—ग्राचार्यबलदेवोपाध्यायः चौ० वि० भ०, वाराणसी।

११०. संस्कृतकाव्यकार—हरिदत्तशास्त्री, साहित्य भण्डार, मेरठ, १९६२

१११. संस्कृतकाव्यधारा—राहुलसांकृत्यायनः ९५८।

११२. संस्कृतसाहित्य का इतिहास—ग्रनु० मंगलदेवशास्त्री, १९६०।

११३. संस्कृतसाहित्य का इतिहास —वाचस्पति गैरोला चौखम्बा प्रकाशन।

११४. संस्कृतसाहित्य का इतिहास—एस्० के० दे०—कलकत्ता यूनिवर्सिटी, १९४७।

११५. संस्कृतसाहित्य का इतिहास—ग्राचार्यबलदेवोपाध्याय, शारदा मंदिर, बनारस, १९४५।

११६. संस्कृत साहित्य का इतिहास—छज्जूराम, मास्टर खेलाड़ीलाल।

११७. संस्कृत साहित्य का इतिहास—कन्हैयालाल पोद्दार, रामविलास पोद्दार ग्रन्थमाला, नवलगढ़, १९३८।

११८. संस्कृतसाहित्यविमर्शः—द्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानम्, मेरठ १९५६।

११९. हरिवंशपुराणम्—चित्रशाला, पूना १९३६।

१२०. हिमालयदर्शन--श्रीकृष्णस्वामी, ग्रात्माराम एण्ड संस, दिल्ली, १९६३।

१२१. हिस्ट्री ग्राफ क्लासिकल संस्कृत लिट्रेचर—एम० कृष्णमाचारियर।

१२२. हिस्टारिकल ज्योग्रेफी ग्राफ एन्शेण्ट इण्डिया—डा० विमलशरण ला, फ्रांस, १९५४।

पत्र-पत्रिकाः

१. आर्केलाजिकल सर्वे आफ सदर्न इण्डिया।
२. आर्केलाजिकल सर्वे आफ इण्डिया रिपोर्ट।
३. इण्डियन एण्टीक्वेरी।
४. एपिग्राफिका इण्डिका।
५. एशियाटिक रिसर्चेज।
६. जर्नल आफ दि रायल एशियाटिक सोसायटी।
७. बाम्बे गजेटियर।
८. जर्नल आफ दि एशियाटिक सोसायटी आफ बंगाल।
९. जर्नल आफ दि बाम्बे ब्राञ्च आफ रायल एशियाटिक सोसायटी।
१०. सारस्वती सुषमा, वाराणसेयसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका।